संशोधक
गुरु सा. श्री भैरवलाल जी भट्ट
तलवण्डी, कोटा

upayogibooks.com

प्रकाशक
शुक्ल दयानन्द 'निराला'
(पूर्व अध्यापक)
दिग्विजय शुक्ला
(निर्माता सेलो सुपारी, कोटा)

पुस्तक प्राप्ति स्थान
१–श्री दिग्विजय शुक्ला
सुधा–भवन, लक्ष्मण विहार
मकान नं. 21, कुन्हाड़ी कोटा
मो.: 98290–36693
२–पं. राकेशकुमार व्यास
किशन–निवास, वरनापाडा
रेतवाली कोटा–6 (राज.)
मोबाईल नं.98291–70164,
94149–71116
३–श्री मथुरानाथ शर्मा
टिपन की चौकी
श्रीपुरा कोटा (राज.)
मोबाईल नं. 94130–08261

## ॥ शुभाशंषा ॥



श्री राकेश व्यास द्वारा संकलित "द्विजकर्म नन्दिनी" श्री निरंजन वेद विद्यालय गोदावरी धाम कोटा में अधीत ज्ञान का भंडार, सामाजिक संस्कारों को सुरक्षित रखने का सु-प्रयास हैं। सामाजिक आवश्यकता पूर्ति के लिए समय-२ पर काम आने वाले संस्कारों को समुचित ढंग से सम्पादित करके शुभ चिन्तन की प्रबलकामना हैं, जिससे हमारी संस्कृति एवं प्राकृतिक वनस्पति, गोधन आदि निरन्तर सुरक्षित रह सकें।

अहोरात्र अथक परिश्रम करके "सर्वजन हिताय" "सर्वजन सुखाय" प्रयास स्तुत्य हैं।

ईश्वर से प्रार्थना हैं कि इन्हें निरन्तर गतिशील कर्मकाण्ड वेद साहित्य में पारङ्गतता प्रदान कर यशस्वी बनाये।

पं. भैरवलाल भट्ट

भैरवलाल भट्ट

पूर्व प्राचार्य निरंजन वेद विद्यालय
गोदावरी धाम, कोटा (राज.)

## प्राक्कथन ॥

श्वेताङ्गं श्वेतवस्त्रं सितकुसुमगणैः पूजितं श्वेतगन्धैः,
क्षीराब्धौ रत्नदीपैः सुरनरतिलकं रत्नसिंहासनस्थम् ।
दोर्भिः पाशाङ्कुशाब्जाभयवरदधतं चन्द्रमौलिं त्रिनेत्रम्,
ध्याये शान्त्यर्थमीशं गणपतिममलं श्रीसमेतं प्रसन्नम् ॥३॥

श्री नीलकण्ठ महादेव व श्री श्री १००८ श्री जमुनादास जी महाराज की परम कृपा व सद्गुरुदेव के आशीर्वाद से **"श्री द्विजकर्म नन्दिनी"** पुस्तक लिखी गई । भगवान की कृपा कब और कैसे होती हैं कुछ कहा नहीं जा सकता है । एक दिन मुझे श्री मथुरानाथ शर्मा जी की लाइब्रेरी में, कर्मकाण्ड रत्न श्री मोघालाल जी औदीच्य (गुजराती) की हस्तलिखित ग्रहशान्ति संवत् १९५० देखने को मिली । ऐसी ही एक पुस्तक श्री गुरुजी भैरव लाल जी भट्ट के पास भी संवत् १८२४ मार्गशीर्ष शुक्ला ५ शनिवार, कर्मकाण्ड रत्न श्री देवीराम जी दवे की थी ।। इन दोनों पुस्तकों व अन्य (हस्तलिखित) पुस्तकों का संग्रह कर यह **"श्री द्विजकर्म नन्दिनी"** के रूप में संग्रहीत की गई । गुरु साहब श्री भैरवलाल जी भट्ट, श्री प्रह्लादत्त जी शास्त्री, पिता श्री जगदीशप्रसाद जी व्यास, पं. उमाशंकर जी शर्मा, श्री नित्यानन्द जी शुक्ल, मथुरानाथ जी शर्मा इन सभी का स्नेह प्यार, सहयोग एवं आशीर्वाद से यह पुस्तक पूर्ण हो सकी ।

इस पुस्तक संग्रहण के समय उन सभी महाविभूतियों की मुझे बहुत याद आ रही है । जिनका मेरे जीवन मैं बडा महत्व है और वे आज हमारे बीच नहीं हैं बाबा स्व. श्री रामस्वरूप जी (भायाजी) कर्मकाण्डी व ज्योतिषाचार्य ढ़ोढ़र जिला श्योपुर (म.प्र.) स्व. श्रीबाबा गोपीनाथजी भार्गव संस्थापक गोदावरीधाम कोटा (राज.) गुरु जी स्व. श्रीमांगीलाल जी यज्ञाचार्य व भागवत मर्मज्ञ नागदा श्योपुर (म.प्र.) इन

सभी महाविभूतियों को इस पुस्तक के माध्यम से छोटी सी श्रद्धाञ्जली समर्पित है ।

प्रस्तुत पुस्तक में, प्रामाणिक ग्रहशान्तिपद्धति, यज्ञोपवीतसंस्कार, विवाहसंस्कार, मंडलपूजन अन्यदेवपूजन नवग्रह जप विधि इत्यादि का बडी ही सरल भाषा में समावेश किया गया है, जिससे इसकी महत्ता और भी बढ़ गई हैं ।

मेरी यही अभिलाषा है कि यह पुस्तक कर्मेष्ठी ब्राह्मणों व विद्वज्जनों तक पहुँचे जिससे वे और समाज सही लाभ उठा सके । श्री शुक्ल दयानन्द जी 'निराला' तत्पुत्र कुल भूषण श्री दिग्विजय शुक्ला सुधा-भवन, लक्ष्मण विहार, मकान नं. 21, कुन्हाड़ी कोटा जिन्होने इस पुस्तक के मुद्रण व प्रकाशन का समस्त व्ययभार उठाया मैं व्यक्तिगत रूप से उनका सहृदय से आभारी हूँ साथ ही हम उन सभी ग्रन्थों के हृदय से आभारी हैं जिनसे हमने इस संग्रह में मदद ली हैं ।

अंत में निवेदन हैं कि इस पुस्तक के संकलन एवं मुद्रण आदि में दृष्टिदोष होना स्वाभाविक हैं जिसे विद्वज्जन मुझे क्षमा कर सूचित करने की कृपा करेंगे, ताकि भविष्य में उन्हें सुधारा जा सके । पाठक रुचिपूर्वक पढ़े और लाभ उठायें । इसी शुभकामनाओं के साथ ।

गच्छतः स्खलनं क्वापि भवत्येव प्रभादतः ।
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः ॥
वयमेव करिष्यामो कर्म भूमेः सुमंगलम् ।
प्रतिष्ठां धर्मभूमिश्च नेष्याम परमोन्नतिम् ॥

पं.राकेशकुमार व्यास
शुक्ल यजुर्वेद पाठी

## विषय सूची पृष्ठ संख्या


| | |
|---|---|
| १–प्रातः स्मरण | 1 |
| २–मंगलाचरण | 2 |
| ३–गुरु वन्दना | 3 |
| ४–श्री गुरुपादुका पंचकम् | 4 |
| ५–दशविधि स्नानम् | 5–6 |
| ६–जलयात्रा विधानम् | 7–13 |
| ७–ग्रहशान्ति पद्धति (कर्माङ्ग विधि) | 14–130 |
| ८–गणपति स्मरणम् | 15 |
| ९–शान्तिपाठ(आनोभद्रा) | 16–17 |
| १०–गणपति–वन्दना | 18 |
| ११–संकल्प | 19 |
| १२–दिग्बन्धनम् | 20 |
| १३–भैरव–ध्यानम् | 22 |
| १४–हनुमत्–ध्यानम् | 22 |
| १५–वरुणपूजनम् | 22–23 |
| १६–दीपपूजनम् | 24 |
| १७–घण्टापूजनम् | 24 |
| १८–शंखपूजनम् | 25 |
| १९–गणपतिपूजनम् | 25–40 |
| २०–गणेशाथर्वशीर्ष | 29 |
| २१–मातृकापूजनम् | 41–44 |
| २२–वसोर्धारा(सप्तघृतमातृका) | 45–48 |

| | |
|---|---|
| २३–नान्दीश्राद्धम् | 49–52 |
| २४–आचार्यऋत्विजानां वरणम् | 53–55 |
| २५–वरणश्राद्धम् | 56 |
| २६–यजमान–तिलकम् | 57 |
| २७–पुण्याहवाचनम् | 58–69 |
| २८–यज्ञरक्षाविधानम् | 70 |
| २९–कुण्डपूजनम् | 71 |
| ३०–कुश–काण्डिका | 74–76 |
| ३१–नवग्रह–स्थापनम् | 77–82 |
| ३२–अधिदेवता–आवाहनम् | 83–85 |
| ३३–पंचगणक–आवाहनम् | 86 |
| ३४–नक्षत्र–आवाहनम् | 87–91 |
| ३५–रुद्रकलश स्थापनम् | 92–94 |
| ३६–वेद स्थापनम् | 95 |
| ३७–दिक्पाल–स्थापनम् | 95–97 |
| ३८–प्राणप्रतिष्ठा | 98–99 |
| ३९–शेषकुश–काण्डिका | 100 |
| ४०–हवन–प्रारम्भ | 101 |
| ४१–अग्निपूजनम् | 101 |
| ४२–नवग्रह–हवन | 102–103 |
| ४३–षोडशमातृका–सप्तघृतमातृका हवन | 104–105 |
| ४४–नवाहुतय: | 106 |
| ४५–अधिदेव–हवनम् | 106 |
| ४६–प्रत्यधिदेव–हवनम् | 107 |

| | |
|---|---|
| ४७–पंचलोकपाल–हवनम् | 108 |
| ४८–सप्तविंशतिनक्षत्र–हवनम् | 109–111 |
| ४९–वेद–हवनम् | 112 |
| ५०–दिक्पाल–हवनम् | 113 |
| ५१–गुग्गल–होमः | 114 |
| ५२–सर्षपा–होमः | 114 |
| ५३–लक्ष्मी–होमः | 114–115 |
| ५४–अग्निस्विष्टहोमः | 116 |
| ५५–प्रायश्चित–नवाहुतयः | 116 |
| ५६–वर,कन्या विवाहे कंकणबन्धनम् | 117 |
| ५७–दिक्पाल–बलिः | 117–121 |
| ५८–गणपतिपायस–बलिः | 122 |
| ६०–क्षेत्रपाल–बलिः | 122–123 |
| ६१–पूर्णाहुतिः | 124 |
| ६२–घृतधारा | 125 |
| ६३–अग्निप्रार्थना | 126 |
| ६४–होम–संकल्पः | 126–127 |
| ६५–यजमानाभिषेकः | 128–129 |
| ६६–आशिका(आशीर्वादाः) | 130 |
| ६७–चौलकर्मसंस्कारः (मुण्डन–संस्कारः) | 131–135 |
| ६८–यज्ञोपवीत–संस्कारः(उपनयन–संस्कारः) | 136–166 |
| ६९–प्रथमवेदी–संस्कारः | 138 |
| ७०–द्वितीयवेदी–संस्कारः | 152 |

| | |
|---|---|
| ७१–तृतीयवेदी–संस्कार: | 156 |
| ७२–एकाशीति वास्तुमंडलपूजनम् व गृहवास्तु | 167–173 |
| ७३–चतु: षष्टिपद वास्तुमण्डल पूजनम् | 174–185 |
| ७४–योगिनी–मंडलपूजनम् | 186–197 |
| ७५–क्षेत्रपाल–मंडलपूजनम् | 198–206 |
| ७६–सर्वतोभद्रमंडल पूजनम् | 207–215 |
| ७७–वास्तुमण्डल–हवनम् | 216–217 |
| ७८–योगिनी–हवनम् | 218 |
| ७९–क्षेत्रपालमण्डल–हवनम् | 219 |
| ८०–सर्वतोभद्रमण्डल–हवनम् | 220 |
| ८१–मण्डपपूजनम् | 221–228 |
| ८२–तोरणपूजनम् | 229–233 |
| ८३–पंचवर्णमहाध्वजपूजनम् | 234 |
| ८४–विवाहसंस्कार: | 235–267 |
| ८५–चतुर्थीकर्म | 268–272 |
| ८६–सीमन्तोन्नयनसंस्कार: | 273–276 |
| ८७–विष्णुपूजनम् | 277–285 |
| ८८–पुरुष सूक्तम् | 280 |
| ८९–महालक्ष्मीपूजनम् | 286–297 |
| ९०–श्रीसूक्तम् | 290 |
| ९१–महालक्ष्मी आरार्तिकम् | 297 |
| ९२–वैदिकशिवपूजनम् | 298–315 |
| ९३–रुद्रसूक्तम् | 305 |

| | |
|---|---|
| अष्टोत्तरशत, विल्वपत्र | 313 |
| शिव मानस पूजा | 315 |
| ९४–जन्मोत्सवपूजनविधि | 316–321 |
| ९५–दुर्गापूजनम् | 322–334 |
| ९६–दुर्गाप्राचीनध्यानानि | 335–336 |
| ९७–भैरवनामावलिः | 337–339 |
| ९८–गणपतिमंत्रजपविधिः | 340 |
| ९९–रुद्रपाठ–न्यासध्यानम् | 340 |
| १००–महामृत्युञ्जय–जपविधिः | 341–343 |
| १०१–त्र्यक्षरमृत्युञ्जय–जपविधिः | 344 |
| १०२–शताक्षरागायत्रीमंत्र–जपविधिः | 345–346 |
| १०३–शिवपंचाक्षरमंत्र–जपविधिः | 347 |
| १०४–नवग्रहमंत्र–जपविधिः | 348–356 |
| छायापात्रदानम् | 357 |
| १०५–रामायणआसनविधिः | 358 |
| १०६–रामायणविर्सजनविधिः | 359 |
| १०७–श्रीराम स्तुतिः | 360 |
| १०८–शिवभजन | 360 |
| १०९–अग्निवास, ग्रहमुखाग्निचक्रम् | 361 |
| ११०–शिववासचक्रम् | 362 |
| १११–श्री गणेश (आरार्तिकम्) | 362 |
| ११२–शतरुद्राभिषेकः | 363–370 |


शुभम्

## ॥ प्रातः स्मरण ॥

कराग्रे वसते लक्ष्मीः करमध्ये सरस्वती ।
करमूले स्थितो ब्रह्मा प्रभाते करदर्शनम् ॥
समुद्रवसने देवि पर्वतस्तनमंडले ।
विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ॥
अहिल्या द्रौपदी सीता तारा मन्दोदरी तथा ।
पञ्च कन्याः (पंचकं ना) स्मरेन्नित्यं महापातक नाशनम् ॥
अयोध्या मथुरा माया काशी काञ्ची ह्यवन्तिका ।
पुरी द्वारावती चैव सप्तैताः मोक्षदायिकाः ॥
हनुमानञ्जनी सुनूर्वायुपुत्रो महाबलः ।
रामेष्टः फाल्गुनसखः पिङ्गाक्षोऽमित विक्रमः ॥
उदधिक्रमणश्चैव सीता शोक विनाशनः ।
लक्ष्मण प्राणदाता च दशग्रीवस्य दर्पहा ॥
अश्वत्थामा बलिर्व्यासो हनूमांश्च विभीषणः ।
कृपः परशुरामश्च सप्तैते चिरजीविनः ॥
सप्तैतान् संस्मरेन्नित्यं मार्कण्डेयमथाष्टमम् ।
जीवेद्वर्षशतं सोपि सर्वव्याधि विवर्जितः ॥

## ॥ मंगलाचरणम् ॥

यं ब्रह्मावरुणेन्द्र रुद्र मरुतः स्तुन्वति दिव्यैः स्तवै-
र्वेदैः साङ्गपदक्रमोपनिषदैर्गायन्ति यं सामगाः ।
ध्यानावस्थिततद्गतेन मनसा पश्यन्ति यं योगिनो
यस्यान्तं न विदुः सुराऽसुरगणाः देवाय तस्मै नमः ॥१॥
निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतम् ।
पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः ॥२॥
यं प्रव्रजन्तमनुपेतमपेतकृत्यं द्वैपायनो विरहकातर आजुहाव।
पुत्रेति तन्मयतया तरवोऽभिनेदु-


upayogibooks.com

स्तं सर्वभूतहृदयं मुनिमानतोऽस्मि ॥३॥
यः स्वानुभावमखिलश्रुतिसारमेक-
मध्यात्मदीपमतितितीर्षतां तमोऽन्धम् ।
संसारिणां करुणयाऽऽह पुराणगुह्यं
तं व्याससूनुमुपयामि गुरुं मुनीनाम् ॥४॥
त्वं क्रतुस्त्वं हविस्त्वं हुताशः स्वयं
त्वं हि मन्त्रः समिद्दर्भपात्राणि च ।
त्वं सदस्यर्त्विजो दम्पती देवता
अग्निहोत्रं स्वधा सोम आज्यं पशुः ॥५॥
त्वं पुरा गां रसाया महासूकरो
दंष्ट्रया पद्मिनीं वारणेन्द्रो यथा ।
स्तूयमानो नदँल्लीलया योगिभि-
र्व्युज्जहर्थ त्रयीगात्र यज्ञक्रतुः ॥६॥
स प्रसीद त्वमस्माकमाकाङ्क्षतां
दर्शनं ते परिभ्रष्टसत्कर्मणाम् ।
कीर्त्यमाने नृभिर्नाम्नि यज्ञेश ते
यज्ञविघ्नाः क्षयं यान्ति तस्मै नमः ॥७॥
बर्हापीडं नटवरवपुः कर्णयोः कर्णिकारं
बिभ्रद् वासः कनककपिशं वैजयन्तीं च मालाम् ।
रन्ध्रान् वेणोरधरसुधया पूरयन् गोपवृन्दै-
र्वृन्दारण्यं स्वपदरमणं प्राविशद् गीतकीर्तिः ॥८॥
नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥९॥
वसुदेव सुतं देवं कंस चाणूर मर्दनम् ।
देवकी परमानन्दं, कृष्णं वन्दे जगद् गुरुम् ॥१०॥

# गुरुवन्दना

ॐब्रह्मानन्दं परमसुखदं, केवलं ज्ञानमूर्तिम् ।
द्वन्द्वातीतं गगन सदृशं, तत्वमस्यादि लक्ष्यम् ॥१॥
एकं नित्यं विमलमचलं, सर्वधी साक्षीभूतम् ।
भावातीतं त्रिगुण रहितं सद्गुरुं तं नमामि ॥२॥
ॐगुरुर्ब्रह्मा गुरुर्विष्णुः गुरुदेवो महेश्वरः ।
गुरुसाक्षात् परब्रह्म तस्मै श्री गुरवे नमः ॥३॥
अखण्ड मण्डलाकारं व्याप्तं येन चराचरं ।
तत्पदं दर्शितं येन तस्मै श्री गुरवे नमः ॥४॥
अखण्डानन्दबोधाय शिष्य संताप हारिणे ।
सच्चिदानन्दरूपाय तस्मै श्री गुरवे नमः ॥५॥
अज्ञानतिमिरान्धस्य ज्ञानाञ्जन शलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्री गुरवे नमः ॥६॥
न गुरोरधिकं तत्त्वं न गुरोरधिकं तपः ।
न गुरोरधिकं ज्ञानं तस्मै श्री गुरवे नमः ॥७॥
ध्यानमूलं गुरोमूर्तिः पूजामूलं गुरोः पदम् ।
मन्त्रमूलं गुरोर्वाक्यं मोक्षमूलं गुरोः कृपा ॥८॥
अज्ञान मूल हरणं जन्मकर्म निवारणम् ।
ज्ञान वैराग्य सिद्ध्यर्थं गुरोः पादोदकं पिबेत् ॥९॥
वन्दे भगवतीं देवीं श्री रामञ्च जगत् गुरुम् ।
पादपद्मे तयोः श्रित्वा प्रणमामि मुहुर्मुहुः ॥१०॥
मातृवत् लालयित्री च पितृवत् मार्गदर्शिका ।
नमोऽस्तु गुरुसत्तायै श्रद्धा प्रज्ञायुता च या ॥११॥

# श्री गुरुपादुका पंचकम्

ॐ नमो गुरुभ्यो गुरुपादुकाभ्यो ।
नमः परेभ्यः परपादुकाभ्यः ॥
आचार्य सिद्धेश्वर पादुकाभ्यो ।
नमो नमः श्री गुरुपादुकाभ्यः ॥१॥

ऐंकार ह्रींकार रहस्य युक्त ।
श्रींकार गूढार्थ महाविभूत्या ॥
ॐकार मर्म प्रतिपादिनीभ्याम् ।
नमो नमः श्रीगुरुपादुकाभ्याम् ॥२॥

होत्राग्नि होत्राग्नि हविष्य होतृ ।
होमादि सर्वाकृति भासमानम् ॥
यद् ब्रह्म तद्बोध वितारिणीभ्याम् ।
नमो नमः श्री गुरुपादुकाभ्याम् ॥३॥

कामादि सर्प व्रज गारुडाभ्याम् ।
विवेक वैराग्य निधि प्रदाभ्याम् ॥
बोध प्रदाभ्याम् द्रुतमोक्षादाभ्याम् ।
नमो नमः श्री गुरुपादुकाभ्याम् ॥४॥

अनन्त संसार समुद्रतार ।
नौकायिताभ्याम् स्थिर भक्तिदाभ्याम् ॥
जाड्याब्धि संशोषण वाडवाभ्याम् ।
नमो नमः श्री गुरुपादुकाभ्याम् ॥५॥

## ।। दशविधि स्नानम् ।।

तीर्थस्नाने तथा प्रायश्चित्तादिषु केचन दशविधस्नानानि कुर्वन्ति यथाः–

१–**भस्मस्नानम्**:–ॐनमस्ते रुद्रमन्यव ऽ उतोतऽइषवेनमः । बाहुभ्यामुततेनमः ॥

यथाऽग्निर्दहते भस्म तृणकाष्ठादि सञ्चयम् ।
तथा मे दह्यतां पापं कुरु भस्म शुचे शुचिम् ॥1॥

२–**अथमृत्तिका–स्नानम्**:–ॐइदं व्विष्णुर्व्विचक्रमे त्रेधानिदधेपदम् ।समूढमस्यपाथ्ठं सुरेस्वाहा ॥2॥

अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे ।
शिरसा धारयिष्यामि रक्षस्व मां पदे पदे ॥
उद्धृतासि वराहेण कृष्णेन शतबाहुना ।
मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतम् ॥
मृत्तिके ब्रह्मपूताऽसि काश्यपेनाभिवन्दिता ।
मृत्तिके देहि मे पुष्टिं त्वयि सर्वं प्रतिष्ठितम् ॥2॥

३–**गोमयस्नानम्**:–ॐमानस्तोकेतनयेमानऽआयुषिमानोगोषुमानोऽ अश्वेषुरीरिषः ॥ मानोव्विरान्न्रुद्रभामिनो व्वधीर्हविष्मन्तः सदमित्त्वाहवामहे ॥

गोमये वसते लक्ष्मीः पवित्रा सर्वमङ्गला ।
स्नानार्थं संस्कृता देवी पापं मे हर गोमय ॥
अग्रमग्रं चरन्तीनामोषधीनां वने वने ।
तासामृषभपत्नीनां पवित्रं कायशोधनम् ॥
यन्मे रोगं च शोकं च तन्मे दहतु गोमय ॥3॥

४-**पंचगव्यस्नानम्**:-ॐसहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।
सभूमि ठँ सर्व्वतस्पृत्वा त्त्यतिष्ठ्दशाङ्गुलम् ॥
गोमूत्रं गोमयं क्षीरं दधिसर्प्पिः समन्वितम् ।
सर्वपापविशुद्ध्यर्थं पञ्चगव्यं पुनातु माम् ॥
५-गोरजःस्नानम्:-ॐआयङ्गौः पृश्निरक्रमीदसदन्मातरम्पुरः
पितरञ्चप्प्रयन्त्स्वः ॥
गवां क्षुरेण निर्द्धूतं यद्रेणु गगने गतम् ।
शिरसा तेन संलेपे महापातकनाशनम् ॥

६-**धान्यस्नानम्**:-ॐधान्यमसिधिनुहि देवान्प्राणायत्त्वोदानायत्वा
व्यानायत्वा ॥ दीर्ग्घामनुप्प्रसितिमा युषेधान्देवोवः
सविताहिरण्ण्यपाणिः प्प्रतिगृब्भ्णात्वच्छिद्रेण
पाणिनाचक्षुषेत्वामहीनाम्पयोसि ॥
धान्यौषधी मनुष्याणां जीवनं परमं स्मृतम् ।
तेन स्नानेन देवेश मम पापं व्यपोहतु ॥

७-**फलस्नानम्**:-ॐ याः फलिनीर्याऽ अफलाऽ
अपुष्पायाश्चपुष्प्पिणीः ॥ बृहस्पति प्प्रसूतास्तानो मुञ्चत्वथ्ठं
हसः॥
वनस्पतिरसो दिव्यः फलपुष्पवृतः सदा ।
तेन स्नानेन मे देव फलं लब्धमनंतकम् ॥

८-**सर्वोषधिस्नानम्**:-ॐओषधयः समवदन्तसोमेनसहराज्ञा ।
यस्म्मैकृणोतिब्ब्राह्मणस्त थ्ठं राजन्पारयामसि ॥
औषध्यः सर्ववृक्षाणां तृणगुल्मलतास्तु याः ।
दूर्वा सर्षपसंयुक्ताः सर्वौषध्यः पुनन्तु माम् ॥

९-**कुशोदकस्नानम्**:-ॐदेवस्यत्त्वा सवितुः प्प्रसवे
श्श्विनोर्ब्बाहुब्भ्याम्पूष्णणो हस्ताब्भ्याम् ॥

कुशमूले स्थितो ब्रह्मा कुशमध्ये जनार्दनः ।
कुशाग्रे शङ्करो देवस्तेन नश्यतु पातकम् ॥

१०–**हिरण्यस्नानम्** :– ॐ आकृष्णेन रजसा व्वर्त्तमानो निवेशयन्नमृतम्मर्त्यञ्च ॥ हिरण्ययेन सविता रथेना देवोयाति भुवनानिपश्श्यन् ॥

हिरण्यगर्भ गर्भस्थं हेमबीजं विभावसोः ।
अनन्त पुण्यफलदमतः शान्तिं प्रयच्छ मे ॥

## ॥ अथ जलयात्रा विधानम् ॥

**संकल्पः**–अत्राद्य. जलयात्राङ्गभूत श्री वरुणदेवता प्रीत्यर्थं गणेश जलमातृ –जीवमातृ –स्थलमातृ–सप्तसागर योगिनी क्षेत्रपाल–जलपूजन भूमिपूजन पूर्वकं नववर्द्धनी कलशेषु वरुण पूजनं करिष्ये ॥

(थाली या लालवस्त्र पर गणपति का पूजन करें)

**गणपति–ध्यानम्**:–ॐगणानांत्वा गणपति ठँ हवामहे प्रियाणां त्वा प्रियपति ठँ हवामहे निधीनां त्वा निधिपति ठँ हवामहे वसो मम । आहमजानि गब्भर्धमा त्वमजासि गब्भर्धम् ॥ गणपतिमावाहयामि स्थापयामि ॥

आसनार्थे पुष्पाणि समर्पयामि ॥ पादयोः पाद्यं समर्पयामि ॥ हस्तयोः अर्घ्यं समर्पयामि ॥ मुखे आचमनीयं जलं समर्पयामि ॥ सर्वांगे स्नानं समर्पयामि ॥ मिश्रित पंचामृत स्नानं समर्पयामि ॥ शुद्धोदक स्नानं समर्पयामि ॥ वस्त्रं समर्पयामि ॥ यज्ञोपवीतं समर्पयामि ॥ आचमनीयं जलं समर्पयामि ॥ उपवस्त्रं समर्पयामि ॥ चन्दनं समर्पयामि ॥ गंधं समर्पयामि ॥ अक्षतान् समर्पयामि ॥ पुष्पाणि समर्पयामि ॥ परिमलद्रव्याणि समर्पयामि ॥ सुगंधितैलं समर्पयामि ॥ धूपं आघ्रापयामि ॥ दीपं दर्शयामि ॥ नैवेद्यं निवेदयामि ॥ आचमनीयं जलं समर्पयामि ॥ ऋतुफलं समर्पयामि ॥ ताम्बूलं समर्पयामि ॥ द्रव्यदक्षिणां समर्पयामि ॥ श्रीफलं समर्पयामि ॥

## ॥ जलादिमातृकापूजनम् ॥

(थाली में कुङ्कुम से या वस्त्र पर अक्षत से सप्त पुंजबना पर पूजन करे)

**ध्यानम्ः**–ॐमत्सी कूर्मी वाराही च मांडूकी मकरी तथा ।
ग्राहकी क्रौंचकी चैव सप्तैता जलमातृकाः ॥

१–ॐभूर्भुवः स्वः मत्स्यै नमः मत्सीमावाहयामि स्थापयामि ॥
२–ॐभूर्भुवः स्वः कूर्म्यै नमः कूर्मीमावाहयामि स्थापयामि ॥
३–ॐभूर्भुवः स्वः वाराह्यै नमः वाराहीमावाहयामि स्थापयामि ॥
४–ॐभूर्भुवः स्वः मांडूक्यै नमः मांडूकीमावाहयामि स्थापयामि॥
५–ॐभूर्भुवः स्वः मकर्यै नमः मकरीमावाहयामि स्थापयामि ॥
६–ॐभूर्भुवः स्वः ग्राहक्यै नमः ग्राहकीमावाहयामि स्थापयामि॥
७–ॐभूर्भुवः स्वः क्रौंचिक्यै नमः क्रौंचिकीमावाहयामि स्थापयामि॥

सर्वोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि ॥ ॐ मत्स्यादि जलदेवताभ्यो नमः ॥

## ॥ सप्त जीवमातृका पूजनम् ॥

**ध्यानम्ः**–ॐकुमारी धनदा नंदा विमला मंगलाऽचला ।
पद्मा चेति सुविख्याताः सप्तैता जीवमातृकाः ॥

१–ॐभूर्भुवःस्वः कुमार्यै नमः कुमारीमावाहयामि स्थापयामि ॥
२–ॐभूर्भुवःस्वः धनदायै नमः धनदामावाहयामि स्थापयामि ॥
३–ॐभूर्भुवः स्वः नन्दायै नमः नन्दामावाहयामि स्थापयामि ॥
४–ॐभूर्भुवः स्वः विमलायै नमः विमलामावाहयामि स्थापयामि॥
५–ॐभूर्भुवः स्वः मंगलायै नमः मंगलामावाहयामि स्थापयामि॥
६–ॐभूर्भुवः स्वः अचलायै नमः अचलामावाहयामि स्थापयामि॥
७–ॐभूर्भुवः स्वः पद्मायै नमः पद्मामावाहयामि स्थापयामि ॥

सर्वोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि ॥ ॐ जीवमातृकाभ्यो नमः ॥

## ॥ अथ सप्त स्थलमातृका पूजनम् ॥

**ध्यानम्ः**–ऊर्मी लक्ष्मीर्महामाया पानादेवी तथैव च ।
वारुणी निर्मला गोधा सप्तैता: स्थलमातृका: ॥

१–ॐभूर्भुव: स्व: ऊर्म्यै नम: ऊर्मिमावाहयामि स्थापयामि ॥
२–ॐभूर्भुव: स्व: लक्ष्म्यै नम: लक्ष्मीमावाहयामि स्थापयामि ॥
३–ॐभूर्भुव: स्व: महामायायै नम: महामायामावाहयामि स्थापयामि ॥
४–ॐभूर्भुव: स्व: पानादेव्यै नम: पानादेवीमावाहयामि स्थापयामि ॥
५–ॐभूर्भुव: स्व: वारुण्यै नम: वारुणीमावाहयामि स्थापयामि॥
६–ॐभूर्भुव: स्व: निर्मलायै नम: निर्मलामावाहयामि स्थापयामि॥
७–ॐभूर्भुव: स्व: गोधायै नम: गोधामावाहयामि स्थापयामि ॥
सर्वोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि ॥
ॐ स्थलमातृकाभ्यो नम: ॥

## ॥ योगिनी पूजनम् ॥

ॐभूर्भुव: स्व: दिव्यादिचतु: षष्टि योगिनीभ्यो नम: ॥ सर्वोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि ॥

## ॥ अथ क्षेत्रपाल पूजनम् ॥

ॐक्षत्रस्य योनिरसि क्षत्रस्यनाभिरसि मा त्वाहि ꣳ सीन्मामाहिꣳ सी: ॥ ॐभूर्भुव: स्व: क्षेत्रपालाय नम: । क्षेत्रपालमावाहयामि स्थापयामि ॥ सर्वोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि ॥

**बलिदानम्ः**–(दीपक,उड़द,दही,नमकीन (मंगोडी) से बलि देवें)
क्षेत्रपाल महाबाहो महाबल पराक्रम । बलिं गृहाण देवेश क्षेत्ररक्षण हेतवे ॥

ॐभूर्भुव: स्व: क्षेत्रपालाय नम: ॥ सदीप–दधिमाषभक्तबलिं समर्पयामि ॥

## ।। अथ सप्तसागराणान् पूजनम् ।।

ॐभूर्भुवः स्वः सप्तसागरेभ्यो नमः ।। पुष्करादि तीर्थेभ्यो नमः ।। इति मंत्रेण आवाहनम् ।। **जले वरुण पूजनम्** ।।

ॐतत्वायामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः । अहेडमानो वरुणेहबोध्युरुशꣳस मान ऽ आयुः प्रमोषीः ।। सर्वोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि ।। (जल में पेडे की बलि प्रदान करे, जल में पञ्चामृत प्रोक्षण करें, और स्रुवे से घृत की द्वादश आहुती देवें)

(जले स्रुवेण द्वादशघृताहुतीर्जुहुयात्)

ॐअद्भ्यः स्वाहा । इदं अद्भ्यो न मम ।।१।।

ॐवार्भ्यः स्वाहा । इदं वार्भ्यो न मम ।।२।।

ॐउदकाय स्वाहा । इदं उदकाय न मम ।।३।।

ॐतिष्ठन्तीभ्यः स्वाहा । इदं तिष्ठन्तीभ्यः न मम ।।४।।

ॐस्रवन्तीभ्यः स्वाहा । इदं स्रवंतीभ्यो न मम ।।५।।

ॐस्यन्दमानाभ्यः स्वाहा । इदं स्यन्दमानाभ्यो न मम ।।६।।

ॐकूप्याभ्यः स्वाहा । इदं कूप्याभ्यः न मम ।।७।।

ॐसूद्याभ्यः स्वाहा । इदं सूद्याभ्यः न मम ।।८।।

ॐधार्याभ्यः स्वाहा । इदं धार्याभ्यः न मम ।।९।।

ॐअर्णवाय स्वाहा । इदं अर्णवाय न मम ।।१०।।

ॐ समुद्राय स्वाहा । इदं समुद्राय न मम ।।११।।

ॐसरिद्भ्यः स्वाहा । इदं सरिद्भ्यः न मम ।।१२।।

## नव कलशों मे जल भरे:-

**१-मध्य कलशे:-** ॐसमुद्र ज्येष्ठाः सलिलस्य मध्यात्पुनानायंत्यनिविशमानाः । इन्द्रो या वज्रो वृषभोररादाता आपो देवीरिह मामवन्तु ।।

**२–पूर्वकलशे:**–ॐ या आपो दिव्या उतवास्त्रवन्ति खनित्रिमा उतवाया: स्वयंजा: । समुद्रार्थाया: शुचय: पावकास्ता आपो देवीरिह मामवन्तु ॥

**३–आग्नेयकलशे:**–या सा राजा वरुणो याति मध्ये सत्यानुते अवपश्यञ्जनाना । मधुश्चुत: शुचयो या: पावकास्ता आपो देवीरिह मामवन्तु ॥

**४–दक्षिणकलशे:**–ॐयासु राजा वरुणो यासु सोमो विश्वेदेवा यासूर्जं मदन्ति । वैश्वानरो यास्वग्नि: प्रविष्टस्ता आपो देवीरिह मामवन्तु ॥

**५–नैर्ऋत्यकलशे:**–समुद्रं गच्छ स्वाहाऽन्तरिक्षं गच्छ स्वाहा देव ठं सवितारं गच्छ स्वाहा मित्रावरुणौ गच्छ स्वाहाऽहोरात्रे गच्छ स्वाहा छन्दाꣳसि गच्छ स्वाहा द्यावापृथिवी गच्छ स्वाहा यज्ञं गच्छ स्वाहा सोमं गच्छ स्वाहा दिव्यं नभो गच्छ स्वाहाग्निं वैश्वानरं गच्छ स्वाहा मनो मे हार्दि यच्छ दिवं ते धूमो गच्छतु स्वर्ज्योति: पृथिवीं भस्मनापृण स्वाहा ॥

**६–पश्चिमकलशे:**–ॐ समुद्राय त्वा वाताय स्वाहा सरिताय त्वा वाताय स्वाहा । अनाधृष्याय त्वा वाताय स्वाहा प्रतिधृष्याय त्वा वाताय स्वाहा ॥

**७–वायव्यकलशे:**–ॐसमुद्रोऽसि नभस्वानार्द्रदानु: शम्भूर्मयोभूरभि मा वाहि स्वाहा । मारुतोऽसि मरुतां गण: शम्भूर्मयो भूरभि मा वाहि स्वाहा । अवस्यूरसि दुवस्वाञ्छम्भूर्मयो भूरभि मा वाहि स्वाहा ॥

**८–उत्तरकलशे:**–ॐइमम्मे व्वरूण श्रुधी हवमद्या च मृडय । त्वा मवस्युरा चके ॥

**९–ईशानकलशे:**–ॐवरुणस्योत्तं भनमसि व्वरुणस्यस्कं भसर्जनीस्त्थो व्वरुणस्यऋृत सदन्यसि व्वरुणऋृतसदनमसि व्वरुणस्य ऋृत सदनमासीद ॥

## ❋ सब कलशों में धान्यादि प्रक्षेप:- ❋

**१-धान्य प्रक्षेप:**-ॐधान्यमसि धिनुहि देवान् प्राणाय त्वोदानाय त्वा व्यानाय त्वा । दीर्घामनु प्रसितिमायुषे धां देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना चक्षुषे त्वा महीनां पयोसि ॥

**२-गन्ध प्रक्षेप:**-ॐत्वां गन्धर्वाऽ अखनँस्त्वामिन्द्रस्त्वां बृहस्पतिः । त्वामोषधे सोमो राजा विद्वान् यक्ष्मा दमुच्यत ॥

**३-कलशं सूत्रवेष्टनम्:**-ॐ सुजातो ज्योतिषा सहशर्म व्वरूथमासदत्स्वः। वासो अग्ने विश्वरूपथ्ठं संव्ययस्व विभावसो॥

**४-सर्वोषधी प्रक्षेप:**- ॐयाऽओषधीः पूर्वाजाता देवेभ्यस्त्रियुगं पुरा । मनै नु बभ्रूणामह थ्ठं शतं धामानि सप्त च ॥

**५-दूर्वाप्रक्षेप:**-ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि ॥ एवानो दूर्वे प्रतनुसहस्रेण शतेन च ॥

**६-कलशे कुशा प्रक्षेप:**-ॐ पवित्रे स्थो वैष्णव्यौ सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः ।तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् ॥

**७-सप्त मृत्तिकाप्रक्षेप:**-स्योना पृथिविनो भवानृक्षरा निवेशनी । यच्छा नः शर्म सप्रथाः ॥

**८-पूगीफलम् प्रक्षेप:**-ॐ याः फलिनीर्या ऽअफलाऽ अपुष्पायाश्च पुष्पिणी÷ । बृहस्पति प्रसूतास्तानो मुंचन्त्वᳫं हंसः ॥

**९-पंचरत्नानि प्रक्षेप:**- परिवाजपतिः कविरग्निर्हव्यान्यक्रमीत् । दधद्रत्नानि दाशुषे ॥

**१०-दक्षिण प्रक्षेप:**-ॐ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत् । स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥

**११-पंचपल्लवान् प्रक्षेप:**-ॐ अश्वत्थे वो निषदनं पर्णेवो व्वसतिष्कृता । गोभाजऽइत्किला सथयत्त्सनवथ पूरुषम् ॥

**१२–तण्डुल पूर्णपात्रम् निधाय:–** ॐ पूर्णा दर्वि परापत सुपूर्णा पुनरापत ॥ व्वस्ने व्विक्रीणा वहाऽइषमूर्ज ठ शतक्रतो ॥

**१३–श्रीफल:**–ॐ श्रीश्चते लक्ष्मीश्चपत्क्यग्रा बहोरात्रे पार्श्वे नक्षत्राणिरूपमश्विनौ ऽव्याप्तम् । इष्णन्निषाणा मुम्मऽइषाण सर्वलोकम्मऽइषाण ॥

ॐमनो जूतिर्ज्जुषतामाज्यस्य बृहस्पतिर्य्यज्ञमिमन्तनोत्वरिष्टं यज्ञ ठँ समिमन्दधातु । विश्वे देवासऽइह मादयन्तामों ३ँ म्प्रतिष्ठ ॥ **इति मंत्रेण प्रतिष्ठा कार्या** ॥

ॐतत्वायामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः । अहेडमानो वरुणेह बोध्युरुशꣳस मान ऽ आयुः प्रमोषीः ॥ सर्वोपचारार्थे गंधाक्षतपुष्पाणि समर्पयामि ॥

(यात्रा के बीच में चौराहे पर भैरव पूजन व बलि दान करें)

## ॥ अथ क्षेत्रपाल पूजनम् ॥

ॐक्षत्रस्य योनिरसि क्षत्रस्यनाभिरसि मा त्वाहि ꣳसीन्मा माहिꣳसीः ॥१॥

करकलित कपाल कुंडली दण्डपाणिस्त रुणतिमिरनीलो व्याल यज्ञोपवीती । क्रतुसमय सपर्या विघ्नविच्छेद हेतुर्जयति बटुकनाथः सिद्धदः साधकानाम् ॥ आवाहयामि स्थापयामि ॥

सर्वोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि ॥

**बलिदानम्:**–(दीपक,उड़द,दही,नमकीन से बलि देवें)

क्षेत्रपाल महाबाहो महाबल पराक्रम । बलिं गृहाण देवेश क्षेत्ररक्षण हेतवे ॥

भूर्भुवः स्वः क्षेत्रपालाय नमः ॥ सदीप–दधिमाषभक्तबलिं समर्पयामि ॥

(मंडप में पश्चिम द्वार से प्रवेश करे व द्वार पर गंगा जी की आरती करे)

# ॥ ग्रहशान्ति पद्धति ॥

॥श्री गणेशायनमः ॥

अथ यजुर्वेदोक्त ग्रहयज्ञ पद्धतिर्लिख्यते ॥ यजमानः कृताभ्यङ्गादि स्वलंकृतोदर्भपाणिः शुचिर्भूत्वा मंगल संभारान् संभृत्य स्वलंकृते गृहे गोमयेनोलिप्त भूमौ सोत्तरच्छदे भद्रासने प्राङ्मुखो दङ्मुखोपविश्य स्वदक्षिणपार्श्वे पत्नीं तद्दक्षिणपार्श्वे संस्कार्यं चोपवेश्य ॥

सुमुहूर्तं सुलग्नं क्षेमं कल्याणं आरोग्यं शुभं भवतु ॥

**शरीर-मार्जनम्:**-ॐ अपवित्रः पवित्रो वा सर्वावस्थांगतोऽपिवा। यः स्मरेत् पुण्डरीकाक्षं सबाह्याभ्यन्तरः शुचिः ॥

ॐ पुण्डरीकाक्षः पुनातु, ॐ पुण्डरीकाक्षः पुनातु, ॐ पुण्डरीकाक्षः पुनातु ॥

**पवित्री धारणम्:**-ॐ पवित्रे स्थो वैष्णव्यौ सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः । तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् ॥

**त्रिराचम्यः**-ॐ केशवाय नमः । ॐ माधवाय नमः । ॐ गोविन्दाय नमः ॥ हृषीकेशायनमः हस्तौ प्रक्षालयेत् ॥

**आचम्य-प्राणानायम्यः**-मूलमंत्रेण गायत्रीमंत्रेण वा पूरककुम्भकरेचक क्रमेणत्रिवारं कुर्यात् ॥

**रक्षादीप-प्रज्वालनः**-ॐअग्निर्ज्ज्योतिर्ज्ज्योतिरग्निः स्वाहा सूर्य्योज्ज्योतिर्ज्योतिः सूर्य्यः स्वाहा । अग्निर्वर्चोज्ज्योतिर्वर्चः स्वाहा सूर्य्यो व्वर्चोज्ज्योतिर्वर्चः स्वाहा । ज्योतिः सूर्य्यः सूर्य्योज्ज्योतिः स्वाहा ॥ दीपकं प्रज्वाल्य हस्तौ प्रक्षाल्य ॥

**शिखाबन्धनम्:**-ॐमानस्तोके तनये मानऽ आयुषि मानो गोषुमानोऽ अश्वेषुरीरिषः । मानो व्वीरान्नुद्र भामिनो व्वधीर्हविष्मन्तः सदमित्त्वा हवामहे ॥

**ललाटे तिलकं कुर्यात्ः**–ॐ स्वस्ति नऽइन्द्रो वृद्धश्रवाः स्वस्तिनः पूषाविश्ववेदाः । स्वस्तिनस्तार्क्ष्यो अरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु ॥

**यजमानपत्न्यै तिलकं दद्यात्ः**–ॐ श्रीश्चते लक्ष्मीश्चपत्क्न्या बहोरात्रे पार्श्वे नक्षत्राणिरूपमश्विनौ ऽव्यात्तम् । इष्णन्निषाणा मुम्मऽइषाण सर्वलोकम्मऽइषाण ॥

**लोकाचारात् ग्रन्थीबन्धनम्ः**–ॐ यदाबध्नंदाक्षायणा हिरण्य छं शतानीकाय सुमनस्यमानाः । तन्मऽआबध्नामि शतशारदायायुष्मान् जरदष्टिर्यथासम् ॥ मंगलं भगवान् विष्णुः मंगलं गरुडध्वजः । मंगलं पुण्डरीकाक्षः मंगलायतनो हरिः ॥

**भूमिपूजनम्ः**–ॐ स्योना पृथिविनो भवानृक्षरा निवेशनी । यच्छा नः शर्म सप्रथाः ॥ ॐ कर्म भूम्यै नमः ॥ सर्वोपचारार्थे गन्धाक्षत्पुष्पाणि समर्पयामि ॥

**आसनशुद्धिः**–पृथ्वीति मन्त्रस्य मेरुपृष्ठऋषिः सुतलंछन्दः कूर्मो देवता आसन पवित्रकरणे विनियोगः ॥

ॐ पृथ्वि त्वया धृतालोका देवि त्वं विष्णुना धृता । त्वं च धारय मां देवि पवित्रं कुरुचासनम् ॥ ॐ कूर्मासनाय नमः ॥ ॐअनन्तासनाय नमः ॥ ॐ विमलासनाय नमः ॥ ॐयोगासनाय नमः ॥ ॐ मध्ये परमसुखासनाय नमः ॥ हस्ते अक्षतान् गृहीत्वा॥

## ॥ गणपति स्मरणम् ॥

ॐ उद्यद्दिनेश्वर रुचिं निज हस्त पद्मैः,
पाशांकुशाऽभयवरान्दधतं गजास्यम् ।
रक्ताम्बरं सकलविघ्नहरं गणेशं,
ध्यायेत् प्रसन्नमखिला भरणाभिरामम् ॥१॥
सजयति सिन्धुर–वदनो देवो यत्पाद पंकज–स्मरणम् ।
वासर मणिरिव तमसां राशीन्नाशयतु विघ्नानाम् ॥२॥
अविरल मदझर निवहं भ्रमरकुलानीक सेवितकपोलम् ।

अभिमत फलदातारं कामेशं गणपतिं वन्दे ॥३॥
किंकिणिमणि–गण–रंजित–चरण,
प्रकटित गुरुमति भवभय हरण ।
मदझर–लहरी–गलित–कपोल शमयति दुरितं गणपतिर्नाम् ॥४॥
सम्पूजकानां परिपालकानां जितेन्द्रियाणां च तपोधनानाम् ।
देशे च राष्ट्रे च कुले च राज्ञां करोतु शान्तिं भगवान् गणेशः ॥५॥

## ॥ भद्रसूक्तम् ॥

**शान्तिपाठं–कुर्यात्ः**–हरिः ॐ आनो भद्राः क्रतवो यन्तु व्विश्वतोदब्धासोऽअपरीतास ऽउद्भिदः। देवानो यथा सदमिद्वृधेऽअसन्नप्रायुवो रक्षितारो दिवे दिवे ॥१॥ देवानाम्भद्रा सुमतिर्ऋजूयतान्देवानाॅं रातिरभिनो निवर्तताम् । देवानाॅं सक्ख्य मुपसेदिमा व्वयन्देवा नऽआयुः प्प्रतिरन्तु जीवसे ॥२॥ तान्पूर्व्वया निविदा हूमहे व्वयम्भगम्मित्रमदितिन्दक्क्षमस्रिधम् । अर्य्यमणं वरुणॅं सोममश्विना सरस्वती नः सुभगा मयस्करत् ॥३॥ तन्नो व्वातो मयोभुवातु भेषजन्तन्माता पृथिवी तत्पिता द्यौः । तद्ग्रावाणः सोमसुतो मयोभुवस्तदश्विना शृणुतन्धिष्ण्या युवम् ॥४॥ तमीशान ञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्वमवसे हूमहे वयम् । पूषानो यथा व्वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ॥५॥ स्वस्ति नऽ इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥६॥ पृषदश्वा मरुतः पृश्निमातरः शुभँयावानो व्विदथेषु जग्मयः । अग्निजिह्वामनवः सूरचक्षसो विश्वेनो देवाऽअवसागमन्निह ॥७॥ भद्रं कर्णेभिः शृणुयाम देवा भद्रम्पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाॅंस स्तनूभिर्व्यशेमहि देवहितं यदायुः ॥८॥ ॐ शतमिन्नुशरदो अन्ति देवा यत्रा नश्चक्रा जरसन्तनूनाम् । पुत्रासो यत्र पितरो भवन्ति मानो मध्यारीरिषतायुर्गन्तोः॥९॥ अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः । विश्वे देवाऽ अदितिः पञ्च जनाऽ

अदितिर्जातमदितिर्जनित्वम् ॥१०॥ द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥११॥ दृते दृꣳह मा मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षन्ताम् । मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे । मित्रस्य चुक्षषा समीक्षामहे ॥१२॥ दृते दृꣳह मा ज्योक्ते सन्दृशि जीव्यासन्ज्योक्ते सन्दृशि जीव्यासम् ॥१३॥ नमस्ते हरसे शोचिषे नमस्ते अस्त्वर्चिषे । अन्याँस्ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यꣳ शिवो भव ॥१४॥ नमस्ते अस्तु विद्युते नमस्ते स्तनयित्नवे । नमस्ते भगवन्नस्तु यतः स्वः समीहसे ॥१५॥ यतो यतः समीहसे ततो नो अभयङ्कुरु । शन्नः कुरुप्प्रजाभ्योभयन्नः पशुभ्यः ॥१६॥ विश्वानि देव सवितर्दुरितानि परासुव । यद्भद्रन्तन्न आसुव ॥१७॥

**हरिः ॐ**आशुः शिशानो० ॥ सङ्क्रन्दनेना०॥ सइऽषुहस्तैः० ॥ बृहस्पते परि०॥ बलविज्ञाय० ॥ गोत्रभिदं० ॥ अभिगोत्रा० ॥ इन्द्रऽआसान्ने० ॥ इन्द्रस्य० ॥ उद्धर्षय मघ० ॥ अस्माकमिन्द्रःस० ॥ अमीषाञ्चि०॥ अवस्रष्टाप० ॥ विश्वानिदेवसवितर्दुरितानि परासुव ॥ यद्भद्रंतन्नआसुव ॥ द्यौः शान्तिरंतरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः॥ व्वनस्पतयः शान्तिर्व्विश्वेदेवाः शान्तिर्ब्रह्मशांतिः सर्वꣳ शान्तिः शान्तिरेवशान्तिः सामाशान्तिरेधि॥

**विनियोग :-** तच्चंर्य्योरावृणीति मन्त्रस्य विश्वेदेवा ऋषयः शक्करीच्छन्दः शान्तिर्देवता शान्तिप्रीत्यर्थे जपे विनियोगः ॥

ॐ तच्चंन्योरा वृणीमहे गातुं यज्ञाय गातुं यज्ञपतये दैवीस्वस्तिरस्तुनः स्वस्तिर्मानुषेभ्यः ऊर्द्धंजिगातु भैषजं शन्नोऽअस्तु द्विपदे शं चतुष्पदे । ॐ शान्तिः शान्तिः सुशान्तिर्भवतु ॥

**गुरुपूजनम्:-**ॐगुरुर्ब्रह्मा गुरुर्विष्णु गुरुर्देवो महेश्वरः । गुरुर्साक्षात्परब्रह्म तस्मै श्रीगुरवे नमः॥

अखण्ड मण्डलाकारं व्याप्तं येन चराचरं ।
तत्पदं दर्शितं येन तस्मै श्री गुरवे नमः ॥
सर्वोपचारार्थे गंधाक्षतपुष्पाणि समर्पयामि ॥

## ॥ श्री गणेश वन्दना ॥

सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः ।
लम्बोदरश्च विकटो विघ्ननाशो विनायकः ॥२॥
धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः ।
द्वादशैतानि नामानि यः पठेच्छृणुयादपि ॥३॥
विद्यारम्भेविवाहे च प्रवेशे निर्गमे तथा ।
सङ्ग्रामे सङ्कटे चैव विघ्नंस्तस्य न जायते ॥४॥
शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम् ।
प्रसन्न वदनं ध्यायेत्सर्व विघ्नोपशान्तये ॥५॥
अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः ।
सर्वविघ्न हरस्तस्मै गणाधिपतये नमः ॥६॥
सर्वमङ्गल माङ्गल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोस्तुते ॥७॥
सर्वदा सर्वकार्येषु नास्ति तेषाममङ्गलम् ।
येषां हृदिस्थो भगवान्मङ्गलायतनो हरिः ॥८॥
तदेवलग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव ।
विद्याबलं दैवबलं तदेव लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि ॥९॥
लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः ।
येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः ॥१०॥
यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिमतिर्मम ॥११॥
सर्वेष्वारम्भकार्येषु त्रयस्त्रिभुवनेश्वराः ।
देवा दिशन्तु नः सिद्धिं ब्रह्मेशान जनार्दनाः ॥
आपदामपहर्तारं दातारं सुखसम्पदाम् ।

लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ॥१२॥
विश्वेशं माधवं ढुण्ढिं दण्डपाणिं च भैरवम् ।
वन्दे काशीं गुहां गङ्गां भवानीं मणि कर्णिकाम् ॥१३॥
विनायकं गुरुं भानुं ब्रह्मविष्णुमहेश्वरान् ।
सरस्वतीं प्रणौम्यादौ सर्वकार्यार्थ सिद्धये ॥१४॥
वक्र तुण्ड महाकाय कोटि सूर्य समप्रभ ।
निर्विघ्नं कुरु मे देव सर्व कार्येषु सर्वदा ॥१५॥
श्रीमन्महागणाधिपतये नमः ॥ श्रीलक्ष्मीनारायणाभ्यां नमः ॥ श्रीउमामहेश्वराभ्यां नमः ॥ वाणीहिरण्यगर्भाभ्यां नमः ॥ शचीपुन्दराभ्यां नमः ॥ मातापितृचरणकमलेभ्योनमः। इष्टदेवताभ्यो नमः ॥ कुलदेवताभ्यो नमः ॥ ग्रामदेवताभ्यो नमः ॥ स्थान देवताभ्योनमः ॥ एतत्कर्मप्रधान देवताभ्यो नमः ॥ गुरु चरणकमलेभ्यो नमः ॥ वास्तुदेवताभ्यो नमः ॥ सर्वेभ्योदेवेभ्यो नमः ॥ सर्वेभ्यो ब्राह्मणेभ्यो नमः ॥ निर्विघ्नमस्तु ॥

**हस्ते साक्षत जलं गृहीत्वा सङ्कल्पं पठेत् :-**

ॐ नमः परमात्मने श्री पुराणपुरुषोत्तमस्य श्री विष्णोराज्ञया प्रवर्तमानस्य अद्य श्री ब्रह्मणोद्वितीयपरार्द्धे श्रीश्वेतवाराहकल्पे सप्तमे वैवस्वत मन्वन्तरेऽष्टाविंशतितमे कलियुगे कलिप्रथमचरणे भारतवर्षे जम्बूद्वीपे रामक्षेत्रे परशुरामाश्रमे दण्डकारण्यदेशे श्री गोदावर्याः पश्चिमदिग्भागे श्रीमल्लवणाब्धेरुत्तरेतीरे अमुके अस्मिन्वर्तमाने अमुकनामसंवत्सरे अमुक श्रीशालिवाहनशके अमुकायने अमुकऋतौ अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकनक्षत्रे अमुकराशिस्थिते चन्द्रे अमुकराशिस्थिते श्रीसूर्ये अमुकराशिस्थिते देवगुरौ शेषेषु ग्रहेषु यथायथं राशिस्थानस्थितेषु सत्सु एवं गुणविशेषण विशिष्टायां शुभपुण्यतिथौ अमुकगोत्रोत्पन्नोऽहं अमुकशर्मा-गुप्ता-वर्माऽहं ममात्मनः श्रुतिस्मृति पुराणोक्त फलप्राप्त्यर्थं ऐश्वर्याभिवृद्ध्यर्थं

अप्राप्तलक्ष्मीप्राप्त्यर्थं प्राप्तलक्ष्म्याश्चिरकालसंरक्षणार्थं सकलमनईप्सित- कामनासंसिद्ध्यर्थं लोके सभायां राज्यद्वारे वा सर्वत्र यशो विजयलाभादि प्राप्त्यर्थं इह जन्मनि जन्मान्तरे वा सकलदुरितोपशमनार्थं मम सभार्यस्य संपुत्रस्य सबान्धवस्य अखिल कुटुम्ब सहितस्य सपशोः समस्तभयव्याधि जरापीडामृत्युपरिहारद्वारा आयुरारोग्यैश्वर्याभिवृद्ध्यर्थं मम जन्मराशेः सकाशाद्ये केचिद्विरुद्ध चतुर्थाष्टमद्वादशस्था नस्थितक्रूरग्रहास्तैः सूचितं सूच्ययिष्यमाणं च यत्सर्वारिष्टं तद्विनाशद्वारा एकादशस्थानस्थितवच्छुभफलप्राप्त्यर्थं पुत्रपौत्रादिसन्तते रविच्छिन्नवृद्ध्यर्थं आदित्यादि नवग्रहानुकूलतासिद्ध्यर्थं इन्द्रादि दशदिक्पाल प्रसन्नता सिद्ध्यर्थं आधिदैविकाऽऽधिभौतिकाऽऽध्यात्मिक त्रिविधतापोपशमनार्थं धर्मार्थकाममोक्षफलवाप्यर्थं अमुककर्म प्रारम्भनिमित्तं गौर्यादि षोडशमातृणां वसोर्द्धारासहितानां आभ्युदयिक नांदीश्राद्ध,ब्राह्मण वरण, पुण्याहवाचनपूर्वकं (वास्तुपूजन,) अग्निस्थापनं, ग्रहस्थापन, रुद्रकलश सहितं (योगिनी श्रेत्रपालमण्डलस्थदेवतानां) प्रधानपूजनं आवाहनं स्थापनं प्रतिष्ठा पूजनं हवनञ्चकरिष्ये॥

तत्रादौ दिग्रक्षणं कलशार्चनं शङ्खघण्टार्चनं च करिष्ये॥तद्यथा॥

**वामहस्ते गौरसर्षपानृगृहीत्वाः-**

(हाथ में पीली सरसों या चावल लेकर अभिमन्त्रित कर चारों दिशाओं में छोड़े)

ॐरक्षोहणंव्वलगहनंवैष्णवीमिदमहंतं व्वलगमुत्त्किरामि यम्मे निष्ट्योऽममात्त्यो निचखानेदमहन्तं व्वलगमुत्त्किरामि यम्मेसमानोयमसमानो निचखानेदमहन्तं व्वलगमुत्त्किरामि यम्मेसबन्धुर्य्यमसबन्धुर्न्निचखानेदमहन्तं व्वलगमुत्त्किरामि यम्मेसजातो यमसजातो निचखानोत्त्कृत्त्याङ्किरामि ॥१॥ रक्षोहणोवो व्वलगहनः प्प्रोक्षामिव्वैष्णवान्त्रक्षोहणो वो व्वलगहनोवनयामि

व्वैष्णवान्त्रक्षोहणोवो व्वलगहनोवस्तृणामि व्वैष्णवान्त्रक्षोहणौ वां व्वलगहनाऽ उपदधामि व्वैष्णवीरक्षोहणौ वांव्वलगहनौ पर्य्यूहामि व्वैष्णवी व्वैष्णवमसि व्वैष्णवास्त्थ ॥२॥ रक्षसां भागोसिनिरस्तꣳ रक्षऽइदमहꣳ रक्षोभितिष्ठामीदमहꣳ रक्षोव बाधऽइदमहꣳ रक्षोधमन्तमो नयामि ॥ घृतेनद्द्यावापृथिवी प्प्रोर्णुवाथांव्वायो व्वे स्तोकानामग्ग्रिराज्ज्यस्य व्वेतुस्वाहा स्वाहाकृतेऽ ऊर्ध्वनभसम्मारुतङ्गच्छतम् ॥३॥ रक्षोहा विश्वचर्षणिरभि योनिमयोहते । द्रोणेसधस्त्थमासदत् ॥४॥

पूर्वे रक्षतु गोविन्दः आग्नेयां गरुडध्वजः ।
याम्ये रक्षतु वाराहो नारसिंहस्तु नैऋते ॥१॥
केशवो वारुणीं रक्षेद्वायव्यां मधुसूदनः ।
उत्तरं श्रीधरो रक्षेदीशाने च गदाधरः ॥२॥
ऊर्ध्वं गोवर्धनोरक्षेद्धरायां च त्रिविक्रमः ।
एवं दशदिशोरक्षे द्वासुदेव जनार्दनः ॥३॥
अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिता ।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥४॥
अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम् ।
सर्वेषामविरोधेन पूजाकर्म समारभे ॥५॥
यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वतः ।
स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु ॥६॥
भूतप्रेतपिशाचाद्या अपक्रामन्तु राक्षसाः ।
स्थानादस्माद् व्रजन्त्वन्यत्स्वीकरोमि भुवं त्विमाम् ॥७॥
भूतानि राक्षसा वापि येऽत्र तिष्ठन्ति केचन ।
ते सर्वेऽप्यपगच्छन्तु पूजाकर्म करोम्यहम् ॥८॥
एतैर्मन्त्रैः सर्वदिक्षु विकिरेत् ॥

**वामपादेन भूमिं त्रिवारं ताडयेत्** ॥ हुं फट् इति (मनसा स्मरेत्)

**भैरवध्यानम्**:–तीक्ष्णदंष्ट्रमहाकायकल्पान्त दहनोपम । भैरवाय नमस्तुभ्यं अनुज्ञांदातु मर्हसि ॥

ॐयो भूताना मधिपतिर्यस्मिँल्लोकाऽ अधिश्रिताः यऽईशे महतो महाँस्तेन गृह्णामि मयि गृह्णामि त्वामहम् ॥

**हनुमतः ध्यानम्**:–अतुलित बलधामं हेम शैलाभदेहं, दनुजवन कृशानुं ज्ञानिनामग्रगण्यम् । सकल गुण निधानं वानराणामधीशं, रघुपति प्रिय भक्तं वातजातं नमामि ॥

ॐअस्मे रुद्रा मेहना पर्वतासो वृत्रहत्ये भरहूतौ सजोषाः । यः शंसतेस्तु वते धायि पज्र इन्द्रज्येष्ठा अस्माँ २॥ अवन्तु देवाः ॥

(उदकस्पर्शः ॥ ततः स्ववामभागे पूजार्थजलपूरितकलशार्चनम्)

**तत्र वरुणावाहनम्**:–

तत्त्वायामीत्यस्य शुनः शेप ऋषिः त्रिष्टुप्छन्दः वरुणो देवता वरुणावाहने विनियोगः ॥

ॐतत्त्वायामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः अहेडमानो व्वरुणे हबोध्युरुशंस समानऽआयुः प्रमोषीः ॥

मकरस्थं पाशहस्तमम्भसां पतिमीश्वरम् । आवाहये प्रतीचीशं वरुणं यादसां पतिम् ॥ ॐभूर्भुवः स्वः अस्मिन्कलशे वरुणं साङ्गं सपरिवारं सायुधं सशक्तिकम् आवाहयामि स्थापयामि ॥

**प्रतिष्ठापनम्**:–

ॐ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञंसमिमं दधातु । विश्वे देवास ऽ इह मादन्तामों ३॥ म्प्रतिष्ठ ॥ ॐ वरुणाय नमः । वरुण सुप्रतिष्ठितो वरदो भव ॥

सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि ॥

ततः अनामिकया कलशं स्पृष्ट्वा **अभिमन्त्रयेत्**:–

कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः ।
मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥
कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा ।

ऋग्वेदोऽथ यजुर्वेदः सामवेदो अथर्वणः ॥
अङ्गैश्च सहिताः सर्वे कलशं तु समाश्रिताः ।
अत्र गायत्री सावित्री शान्तिः पुष्टिकरी तथा ॥
आयान्तु मम शान्त्यर्थं दुरितक्षयकारकाः ।
गङ्गे च यमुने चैव गोदावरि सरस्वति ॥
नर्मदे सिन्धो कावेरि जलेऽस्मिन् सन्निधिं कुरु ।
ब्रह्माण्डोदरतीर्थानि करैः स्पृष्टानि ते रवे ॥
तेन सत्येन मे देव तीर्थं देहि दिवाकर ॥

**ततो पूजनम्ः-**

पूर्वे ऋग्वेदाय नमः ॥ दक्षिणे यजुर्वेदाय नमः।। पश्चिमे सामवेदाय नमः ॥ उत्तरे अथर्ववेदाय नमः ॥ कलशमध्ये अपाम्पतये वरुणाय नमः ॥ इति वरुणं सम्पूज्य "गायत्र्यादिभ्यो नमः" सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि

**कलशं प्रार्थयेत्ः**-देवदानवसंवादे मथ्यमाने महोदधौ ।
उत्पन्नोऽसि तदा कुम्भ विधृतो विष्णुना स्वयम् ॥
त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः ।
त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ॥
शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः ।
आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः ॥
त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः ।
त्वत्प्रसादादिमां पूजां कर्तुमीहे जलोद्भव ॥
सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा ॥

अङ्कुशमुद्रया सूर्यमण्डलात् सर्वाणि तीर्थान्यावाह्य । वं इति धेनुमुद्रया अमृतीकृत्य हुं इति कवचेनावगुण्ठ्य मत्स्यमुद्रयाऽऽच्छाद्य वं इति मूलेनाष्टवारमभिमन्त्र्य तस्मादुदकादुदकं गृहीत्वा पूजाद्रव्याणि सम्प्रोक्षयेत् । तां च

भूमिं सम्प्रोक्षयेत्। पुनः स्वल्पोदकमादाय स्वात्मानं स्वशिरश्च संप्रोक्षयेत् ॥

**तत्रमन्त्रः**–अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा । यः स्मरेत्पुण्डरीकाक्षं सबाह्याभ्यन्तरः शुचिः ॥

ॐ आपो हिष्ठामयोभुवस्तानऽऊर्जेदधातन ॥ महेरणाय चक्षसे ॥ यो वः शिवतमो रसस्तस्यभाजयते हनः॥ उशती रिवमातरः॥ तस्माऽअरङ्गमा मवोयस्यक्षया यजिन्वथ ॥ आपो जनयथाचनः ॥ पश्चात्कलश (कुम्भ) मुद्रां प्रदर्शयेत् ॥

**१–अथ–दीपपूजनम्**:–ईशानभागे घृतदीपं प्रज्वाल्य अक्षतपुंजोपरि निर्वातस्थले निधाय ॥

ॐअग्निर्ज्ज्योतिज्ज्योतिरग्निः स्वाहा सूर्य्योज्ज्योतिर्ज्योतिः सूर्य्यः स्वाहा । अग्निर्वर्चोज्ज्योतिर्वर्चः स्वाहा सूर्य्यो व्वर्चोज्ज्योतिर्वर्चः स्वाहा । ज्योतिः सूर्य्यः सूर्य्योज्ज्योतिः स्वाहा ॥ भूर्भुवः स्वः दीपस्थदेवतायै नमः आवाहयामि। सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि नमस्करोमि ॥

**प्रार्थयेत्**– भो दीप देवरूपस्त्वं कर्मसाक्षी ह्यविघ्नकृत् । यावत्पूजासमाप्तिः स्यात्तावदत्र स्थिरो भव ॥

अनेन पूजनेन दीपदेवता प्रीयताम् ॥

**२–घण्टापूजनम्**:–ॐ सुपर्णोसि गरुत्मांस्त्रिवृत्ते शिरो गायत्रं चक्षुर्बृहद्रथन्तरे पक्षौ । स्तोमऽआत्मा छन्दा थ्ठं स्यङ्गानि यजूथ्ठंषि नाम । साम ते तनूर्वामदेव्यं यज्ञायज्ञियं पुच्छं धिष्ण्याः शफाः । सुपर्णोसि गरुत्मान्दिवं गच्छ स्वः पत ॥

आगमार्थं तु देवानां गमनार्थं तु राक्षसाम् । घण्टानादं प्रकुर्वीत पश्चाद् घण्टां प्रपूजयेत् ॥ ॐ भूर्भुवः स्वः घण्टास्थाय गरुडाय नमः आवाहयामि सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि नमस्करोमि । गरुडमुद्रां प्रदर्शयेत् ॥

**३–शङ्ख पूजनम्:–** शङ्खे जलपूरणम् । शङ्खं चन्द्रार्कदेवत्यं वरुणं चाधिदैवतम् । पृष्ठे प्रजापतिं विद्यादग्रे गङ्गा सरस्वती ॥ त्रैलोक्ये यानि तीर्थानि वासुदेवस्य चाज्ञया । शङ्खे तिष्ठन्ति विप्रेन्द्र तस्माच्छङ्खं प्रपूजयेत् ॥

ॐअग्निर्ऋषिः पवमानः पाञ्चजन्यः पुरोहितः तमीमहे महागयम् ॥ उपया मगृहीतोस्यग्ग्रयेत्त्वा वर्चसऽएषते योनिरग्नयेत्त्वा वर्चसे ॥ ॐ भूर्भुवः स्वः शङ्खस्थदेवतायै नमः आवाहयामि सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि नमस्करोमि ॥

**प्रार्थयेत्–** त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे । नमितः सर्वदेवैश्च पाञ्चजन्य नमोस्तुते ॥ पाञ्चजन्याय विद्महे पावमानाय धीमहि । तन्नः शङ्खः प्रचोदयात् ॥ शङ्खमुद्रां प्रदर्शयेत् ॥

## ॥ गणपति–पूजनम् ॥

मृण्मय पीठेपट्टे वा रक्त वस्त्रोपरि अरुणाक्षतैर्गोधूमैः अष्टदलं स्वस्तिकं वा कृत्वा गणपतिं पूजयेत् ॥

ॐ मण्डूकादि पीठ देवताभ्यो नमः सर्वोपचारार्थे गंधाक्षत पुष्पाणि समर्पयामि ॥

**नवशक्तयः–**ॐतीव्रायैनमः। ॐज्वालिन्यैनमः । ॐनन्दायैनमः। ॐमोदायै नमः। ॐकामरूपिण्यै नमः। ॐउग्रायै नमः । ॐतेजोवत्यै नमः । ॐसत्यायै नमः । ॐविघ्ननाशिन्यै नमः। सर्वोपचारार्थे गंधाक्षत पुष्पाणि समर्पयामि ॥

**गणपतिध्यानम्:–**ॐ गणानांत्वा गणपति ठँ हवामहे प्रियाणां त्वा प्रियपति ठँ हवामहे निधीनां त्वा निधिपति ठँ हवामहे वसो मम । आहमजानि गर्भधमा त्वमजासि गर्भधम् ॥१॥

ॐनमो गणेभ्यो गणपतिभ्यश्चवो नमोनमो व्रातेभ्यो व्रातपतिभ्यश्चवो नमोनमो गृत्सेभ्यो गृत्सपतिभ्यश्चवो नमोनमो विरूपेभ्यो विश्वरूपेभ्यश्चवो नमोनमः ॥२॥

श्वेताङ्गं श्वेतवस्त्रं सितकुसुमगणैः पूजितं श्वेतगन्धैः, क्षीराब्धौ रत्नदीपैः सुरनरतिलकं रत्नसिंहासनस्थम् । दोर्भिः पाशाङ्कुशाब्जाभयवरदधतं चन्द्रमौलिं त्रिनेत्रम्, ध्याये शान्त्यर्थमीशं गणपतिममलं श्रीसमेतं प्रसन्नम् ॥३॥ ॐ गजास्य गणनाथत्वं सर्वविघ्न विनाशन ॥ लम्बोदर त्रिनयन आगच्छ गणनायक ॥४॥

**अम्बिकाध्यानम्ः**–ॐ अम्बे अम्बिकेऽम्बालिके न मा नयतिकश्चन । ससस्त्यश्वकः सुभद्रिकां काम्पील वासिनीम् ॥ ॐभूर्भुवः स्वः श्री गणेशाम्बिकाभ्यां नमः ध्यानान्ते अक्षतपुष्पाणि समर्पयामि ॥

**आसनम्ः**–ॐ पुरुषऽ एवेदꣳ सर्वं यद्भूतं यच्चभाव्यम् । उतामृतत्वस्ये शानो यदन्नेनातिरोहति ॥ रम्यं सुशोभनं दिव्यं सर्वसौख्यकरं शुभम् । आसनं च मया दत्तं गृहाण परमेश्वर ॥ ॐभूर्भुवः स्वः श्री गणेशाम्बिकाभ्यां नमः । **आसनार्थे पुष्पाणि समर्पयामि** ॥

**पाद्यम्ः**–ॐ एतावानस्य महिमातो ज्यायाँश्च पूरुषः। पादोस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥ उष्णोदकं निर्मलञ्च सर्वसौगन्ध्य संयुतम् ॥ पादप्रक्षालनार्थाय दत्तं ते प्रतिगृह्यताम् ॥ॐभूर्भुवःस्वःश्री गणेशाम्बिकाभ्यां नमः**पाद्यम् जलं समर्पयामि**॥

**अर्घ्यम् ः**–ॐत्रिपादूर्ध्वऽउदैत्पुरुषः पादोस्येहाभवत् पुनः । ततो विष्वङ् व्यक्रामत्साशनानशने अभि ॥१॥ ॐ गायत्री त्रिष्टुब्जगत्यनुष्टुब्पङ्क्त्या सह । बृहत्युष्णिहा ककुप्सूचीभिः शम्यन्तुत्वा ॥२॥ अर्घ्यं गृहाण देवेश गन्धपुष्पाक्षतैर्युतम् । ताम्र पात्रस्थितं चैव फलतोय समन्वितम् ॥३॥ ॐभूर्भुवः स्वः श्री गणेशाम्बिकाभ्यां नमः । **अर्घ्यं समर्पयामि** ॥

**आचमनम्ः**–ॐ ततो विराडजायत व्विराजो अधि पूरुषः । सजातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥१॥ ॐत्र्यम्बकं यजामहे सुगंधिम्पुष्टिर्द्धनम् । उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय माऽमृतात्

॥२॥ ॐ इमं मे वरुण श्रुधी हवमद्या च मृडय । त्वामवस्युरा चके ॥३॥ सर्व तीर्थसमायुक्तं सुगन्धि निर्मलं जलम् । आचम्यतां मया दत्तं गृहीत्वा परमेश्वर ॥ ॐभूर्भुवः स्वः श्री गणेशाम्बिकाभ्यां नमः आचमनीयं समर्पयामि ॥

**स्नानम्**:–ॐ तस्माद्यज्ञात्सर्वहुतः सम्भृतं पृषदाज्यम् । पशूँस्ताँश्चक्रे वायव्यानारण्या ग्राम्याश्चये ॥१॥ ॐवरुणस्योत्तंभनमसि व्वरुणस्यस्कं भसर्जनीस्त्थो व्वरुणस्यऋत सदन्यसि व्वरुणऋतसदनमसि व्वरुणस्य ऋत सदनमासीद ॥२॥ गङ्गा सरस्वती रेवा पयोष्णी नर्मदाजलैः । स्नापितोऽसि मया देव ह्यतः शान्तिं कुरुष्व मे ॥ ॐभूर्भुवः स्वः श्री गणेशाम्बिकाभ्यां नमः **स्नानं समर्पयामि** ॥

**पयस्नानम्**:–ॐ पयः पृथिव्यां पयओषधीषु पयोदिव्यंतरिक्षेपयोधाः । पयस्वतीः प्रदिशः संतुमह्यम् ॥ ॐपयसो रूपं यद्यवा दध्नोरूपंकर्कन्धूनि । सोमस्य रूपंवाजिनथ्ठं सौम्यस्यरूपमामिक्षा ॥ काम धेनु समुत्पन्नं सर्वेषां जीवनं परम् । पावनं यज्ञहेतुश्च पयः स्नानार्थमर्पितम् ॥ ॐभूर्भुवः स्वः श्री गणेशाम्बिकाभ्यां नमः **पयः स्नानं समर्पयामि** ॥ पयः स्नानान्ते शुद्धोदक स्नानं समर्पयामि ॥ शुद्धोदकस्नानान्ते आचमनीयं समर्पयामि ॥

**दधिस्नानम्**:–ॐ दधिक्राव्णो अकारिषंजिष्णोरश्वस्य वाजिनः । सुरभिनो मुखाकरत्प्रणऽ आयू थ्ठं षितारिषत् ॥ पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम् । दध्यानीतं मया देव स्नानार्थं प्रतिगृह्यताम् ॥ ॐभूर्भुवः स्वः श्री गणेशाम्बिकाभ्यां नमः **दधिस्नानम् समर्पयामि** ॥ दधिस्नानान्ते शुद्धोदक स्नानं समर्पयामि ॥ शुद्धोदकस्नानान्ते आचमनीयं समर्पयामि ॥

**घृतस्नानम्**:–ॐ घृतं घृतपावानः पिवतवसां वसा पावानः पिबतांतरिक्षस्य हविरसि स्वाहा ॥ दिशः प्रदिशऽआदिशो विदिश ऽ उद्दिशोदिग्भ्यः स्वाहा ॥१॥ ॐ घृतं मिमिक्षे घृतमस्य योनिघृते

श्रितो घृतम्वस्य धामं । अनुष्वधमावह मादवस्य स्वाहाकृतं वृषभ वक्षि हव्यम् ॥२॥ नवनीतसमुत्पन्नं सर्वसंतोषकारकम् । घृतं तुभ्यं प्रदास्यामि स्नानार्थं प्रतिगृह्यताम् ॥३॥ ॐभूर्भुवः स्वः श्री गणेशाम्बिकाभ्यां नमः **घृतस्नानं समर्पयामि** । घृतस्नानान्ते शुद्धोदक स्नानं समर्पयामि ॥ शुद्धोदकस्नानान्ते आचमनीयं समर्पयामि ॥

**मधुस्नानम्**:–ॐमधुव्वाताऋृतायते मधुक्षरंति सिंधवः माध्वीर्नः सन्त्वोषधीः ॥ मधुनक्तमुतोषसो मधुमत्पार्थिव ७ं रजः । मधु द्यौरस्तु नः पिता ॥ मधुमान्नो वनस्पतिर्मधुमाँ२॥ अस्तु सूर्य्यः माध्वीर्गावो भवन्तु नः ॥१॥ ॐस्वाहा मरुद्भिः परि श्रीयस्वदिवः स७ं स्पृशस्पाहि । मधु मधु मधु ॥२॥ तरुपुष्पसमुद्भूतं सुस्वादु मधुरं मधु । तेजः पुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम् ॥३॥ ॐभूर्भुवः स्वः श्री गणेशाम्बिकाभ्यां नमः । **मधुस्नानं समर्पयामि** ॥ मधुस्नानान्ते शुद्धोदक स्नानं समर्पयामि ॥ शुद्धोदकस्नानान्ते आचमनीयं समर्पयामि ॥

**शर्करास्नानम्**:–ॐ अपा७ं रसमुद्वय स७ं सूर्येसंत ७ं समाहितम् ॥ अपा७ं रसस्य यो रसस्तंवो गृह्णाम्युत्तममुपयाम गृहीतोसीन्द्रा यत्वा जुष्टं गृह्णाम्येष ते योनिरिंद्राय त्वा जुष्टतमम् ॥

**विनियोगः**–स्वादुः पवस्वेतिवेनो भार्गवःपवमानः सोमोजगतीछन्द शर्करास्नाने विनियोगः ॥

**शर्करामंत्र**:–ॐस्वादुः पवस्वदिव्याय जन्मने स्वादुरिंद्राय सुहवीतुनाम्ने स्वादुर्मित्राय वरुणाय वायवेबृहस्पतेये मधुमां अदाम्य॥ इक्षुसारसमुद्भूता शर्करा पुष्टिकारका । मलापहारिका दिव्या स्नानार्थं प्रतिगृह्यताम् ॥ ॐभूर्भुवः स्वः श्री गणेशाम्बिकाभ्यां नमः **शर्करास्नानं समर्पयामि** ॥ शर्करास्नानान्ते शुद्धोदकस्नानं समर्पयामि ॥ शुद्धोदकस्नानान्ते आचमनीयं समर्पयामि ॥

**एकतन्त्रेण पञ्चामृतस्नानम्**:–ॐपंचनद्यः सरस्वती मपियंति सस्रोतसः । सरस्वतीतु पंचधासो देशे भवत्सरित् ॥ पयो दधि घृतं चैव मधु च शर्करायुतम् । पञ्चामृतं मयाऽऽनीतं स्नानार्थं प्रतिगृह्यताम् ॥ ॐभूर्भुवः स्वः श्री गणेशाम्बिकाभ्यां नमः पञ्चामृतस्नानं समर्पयामि ॥ पञ्चामृतस्नानान्ते शुद्धोदकस्नानं समर्पयामि ॥ शुद्धोदकस्नानान्ते आचमनीयं समर्पयामि ॥

**गन्धोदकस्नानम्**:–ॐगन्धर्वस्त्वा विश्वावसुः परिदधातु विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिडऽईडितः ॥१॥ ॐ अꣳशुनाते अꣳशुः पृच्यतां परुषा परुः । गन्धस्ते सोममवतु मदाय रसो अच्युतः ॥२॥ मलयाचलसम्भूतं चन्दनागरुसम्भवम् । चन्दनं देवदेवेश स्नानार्थं प्रतिगृह्यताम् ॥३॥ ॐभूर्भुवः स्वः श्री गणेशाम्बिकाभ्यां नमः **गन्धोदकस्नानं समर्पयामि** ॥

**शुद्धोदकस्नानम्**:–ॐशुद्धवालः सर्व शुद्धवालो मणि बालस्तऽआश्विनाः श्वेतः श्वेताक्षोरुणस्ते रुद्राय पशुपतये कर्णायामाऽअवलिप्ता रौद्रानभोरूपाः पार्ज्जन्याः ॥ ॐभूर्भुवः स्वः श्री गणेशाम्बिकाभ्यां नमः शुद्धोदकस्नानं समर्पयामि ॥ शुद्धोदकस्नानान्ते आचमनीयं समर्पयामि ॥ सर्वोपचारार्थे गंधाक्षतपुष्पाणि समर्पयामि ॥

**अभिषेकं कुर्यात्**:– गणपत्यथर्वशीर्षम्:–

ॐ नमस्ते गणपतये । त्वमेव प्रत्यक्षं तत्त्वमसि । त्वमेव केवलं कर्त्तासि । त्वमेव केवलं धर्तासि । त्वमेव केवलं हर्तासि । त्वमेव सर्वं खल्विदं ब्रह्मासि । त्वमेव साक्षादात्मासि नित्यम् । ऋतं वच्मि । सत्यं वच्मि । अव त्वं माम् । अव वक्तारम् । अव श्रोतारं । अव दातारम् । अव धातारम् । अवानूचानमव शिष्यम् । अव पश्चात्तात् । अव पुरस्तात् । अवोत्तरात्तात् । अव दक्षिणात्तात् । अव चोर्ध्वात्तात् अवाधरात्तात् । सर्वतो मां पाहि पाहि समन्तात् । त्वं वाङ्मयस्त्वं चिन्मयः ।

त्वमानन्दमयस्त्वं ब्रह्ममयः । त्वं सच्चिदानन्दाद्वितीयोसि । त्वं प्रत्यक्षं ब्रह्मासि । त्वं ज्ञानमयो विज्ञानमयोऽसि । सर्वं जगदिदं त्वत्तो जायते । सर्वं जगदिदं त्वत्तस्तिष्ठति । सर्वं जगदिदं त्वयि लयमेष्यति । सर्वं जगदिदं त्वयि प्रत्येति । त्वं भूमिरापोऽनलोऽनिलो नभः । त्वं चत्वारि वाक्पदानि ॥ त्वं गुणत्रयातीतः । त्वमवस्थात्रयातीतः । त्वं देह त्रयातीतः । त्वं कालत्रयातीतः । त्वं मूलाधारस्थितोऽसि नित्यम् । त्वं शक्तित्रयात्मकः । त्वां योगिनो ध्यायन्ति नित्यम् । त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वमिन्द्रस्त्वमग्निस्त्वं वायुस्त्वं सूर्यस्त्वं चन्द्रमास्त्वं ब्रह्मभूर्भुवः स्वरोम् ॥ गणादीन्पूर्वमुच्चार्य वर्णादींस्तदन्तरम् । अनुस्वारः परतरः । अर्धेन्दुलसितम् । तारेणरुद्धम् । एतत्तव मनुस्वरूपम् । गकारः पूर्वरूपम् । अकारो मध्यमरूपम् । अनुस्वारश्चान्त्यरूपम् । बिन्दुत्तररूपम् । नादः सन्धानम् । सꣳहिता सन्धिः । सैषा गणेशविद्या । गणक ऋषिः । निचृद्गायत्रीछन्दः । गणपतिर्देवता ॥ ॐ गं गणपतये नमः । एकदन्ताय विद्महे वक्रतुण्डाय धीमहि । तन्नो दन्ती प्रचोदयात् ॥ एकदन्तं चतुर्हस्तं पाशमङ्कुशधारिणम् । रदं च वरदं हस्तैर्बिभ्राणं मूषकध्वजम् ॥ रक्तं लम्बोदरं शूर्पकर्णकं रक्तवाससम् । रक्तगन्धानुलिप्ताङ्गं रक्तपुष्पैः सुपूजितम् ॥ भक्तानुकम्पिनं देवं जगत्कारणमच्युतम् । आविर्भूतं च सृष्ट्यादौ प्रकृतेः पुरुषात्परम् ॥ एवं ध्यायति यो नित्यं स योगी योगिनां वरः ॥ नमो व्रातपतये नमो गणपतये नमः प्रमथपतये नमस्तेऽस्तु लम्बोदरायैकदन्ताय विघ्ननाशिने शिवसुताय श्रीवरदमूर्तये नमः ॥ (अभिषेकं समर्पयामि)॥

(**फलश्रुतिः–**) एतदथर्वशीर्षं योऽधीते । स ब्रह्मभूयाय कल्पते । स सर्वविघ्नैर्न बाध्यते । स सर्वतः सुखमेधते । स पञ्चमहापापात्प्रमुच्यते ॥ सायमधीयानो दिवसकृतं पापं नाशयति । प्रातरधीयानो रात्रिकृतं पापं नाशयति । सायम्प्रातः प्रयुञ्जानोऽपापो

भवति । सर्वत्राधीयानोऽपविघ्नो भवति । धर्ममर्थं कामं मोक्षं च विन्दति ॥ इदमथर्वशीर्षमशिष्याय न देयम् । यो यदि मोहाद्दास्यति । स पापीयान्भवति ॥ सहस्रावर्तनाद्यं यं काममधीते । तं तमनेन साधयेत् ॥अनेन गणपतिमभिषिञ्चति । स वाग्मी भवति ॥ चतुर्थ्यामनश्नञ्जपति । स विद्यावान्भवति ॥ इत्यथर्वणवाक्यम् ॥ ब्रह्माद्यावरणं विद्यान्न बिभेति कदाचनेति ॥ यो दूर्वाङ्कुरैर्यजति । स वैश्रवणोपमो भवति ॥ यो लाजैर्यजति । स यशोवान् भवति । स मेधावान् भवति ॥ यो मोदकसहस्रेण यजति । स वाञ्छितफलमवाप्नोति ॥ यः साज्यसमिद्भिर्यजति । स सर्वं लभते स सर्वं लभते ॥ अष्टौ ब्राह्मणान्सम्यग्ग्राहयित्वा सूर्य वर्चस्वी भवति ॥ सूर्यग्रहे महानद्यां प्रतिमासन्निधौ वा जप्त्वा सिद्धमन्त्रो भवति ॥ महाविघ्नात्प्रमुच्यते । महादोषात्प्रमुच्यते । महाप्रत्यवायात्प्रमुच्यते ॥ स सर्वविद्भवति स सर्वविद्भवति । य एवं वेद ॥ इत्युपनिषत् ॥

**पुनः शुद्धोदक स्नानम्:**–ॐशुद्धवालः सर्वशुद्धवालो मणि बालस्तऽआश्विना:श्वेतः श्वेता क्षोरुणस्ते रुद्राय पशुपतये कर्ण्णायामाऽअवलिप्ता रौद्रानभोरूपाः पार्ज्जन्याः॥ ॐभूर्भुवः स्वः श्री गणेशाम्बिकाभ्यां नमः शुद्धोदकस्नानं समर्पयामि ॥ शुद्धोदकस्नानान्ते आचमनीयं समर्पयामि ॥

**वस्त्रम्:**–ॐ सुजातो ज्योतिषा सहशर्म व्वरूथमासदत्स्वः । वासो अग्ने विश्वरूपꣳ संव्ययस्व विभावसो ॥१॥ ॐतस्माद्यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे । छन्दाꣳसि जज्ञिरे तस्माद्यजुस्तस्मा दजायत ॥२॥ ॐ युवा सुवासाः परिवीत आगात्स उ श्रेयान्भवति जायमानः । तं धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्तः ॥३॥ सर्व भूषादिके सौम्ये लोकलज्जा निवारिणे । मयोपपादिते तुभ्यं वाससी प्रतिगृह्यताम् ॥४॥ रक्तवस्त्रद्वयं देव राजराजादिपूजित । भक्त्या दत्तं गृहाणेदं भगवन् हरनन्दन

॥५॥ॐभूर्भुवः स्वः श्री गणेशाम्बिकाभ्यां नमः । **वस्त्रोपवस्त्रं समर्पयामि** । तदन्ते आचमनीयं जलं समर्पयामि ।

**यज्ञोपवीतः**–ॐ ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचोव्वेनऽ आवः । सबुध्न्या ऽ उपमाऽअस्यविष्ठाः सतश्च योनि-मसतश्चव्विवः ॥१॥ ॐ तस्मादश्वाऽ अजायन्त ये के चोभयादतः। गावो ह जज्ञिरे तस्मात्तस्माज्जाताऽ अजावयः ॥२॥ नवभिस्तन्तुभिर्युक्तं त्रिगुणं देवता मयम् । उपवीतं चोत्तरीयम् गृहाण परमेश्वर ॥३॥ राजतं ब्रह्मसूत्रं च कांचनं चोत्तरीयकम् । गृहाण देव सर्वज्ञ गीर्वाणसुरपूजित ॥४॥ ॐभूर्भुवः स्वः श्री गणेशाम्बिकाभ्यां नमः **यज्ञोपवीतं समर्पयामि** । तदन्ते आचमनीयं जलं समर्पयामि ।

**मधुपर्कः**–ॐ मधुव्वाताऋतायते मधुक्षरंति सिंधवः माध्वीर्नः सन्त्वोषधीः ॥1॥

ॐयन्मधुनो मधव्यं परम ठं रूपमन्नाद्यम् । तेनाऽहं मधुनो मधव्येन परमेण रूपमन्नाद्येन परमो मधव्योऽन्नादोऽसानि ॥2॥

कांस्ये कांस्येन पिहितो दधिमवाज्यसंयुतः । मधुपर्को मयानीतः पूजार्थं प्रतिगृह्यताम् ॥3॥ ॐ भूर्भुवः स्वः श्री गणेशाम्बिकाभ्यां नमः । **मधुपर्कम् समर्पयामि** । आचमनीयं जलं समर्पयामि ॥

**चन्दनम्**:–ॐत्वां गन्धर्वा ऽ अखनँस्त्वा मिन्द्रस्त्वां बृहस्पतिः । त्वामोषधे सोमो राजा विद्वान् यक्ष्मा दमुच्यत ॥१॥

ॐ तँय्यज्ञम्बर्हिषिप्प्रौक्षन्पुरुषञ्जातमग्ग्रतः । तेन देवाऽ अयजन्त साध्याऽ ऋषयश्चये ॥२॥ ॐ गन्धद्वारां दुराधर्षाम् नित्यपुष्टां करीषिणीम् । ईश्वरीम् सर्वभूतानां तामिहोपह्वयेश्रियम् ॥३॥ श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् । विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम् ॥४॥ गन्धं विलेपयामि ॥

ॐभूर्भुवः स्वः श्री गणेशाम्बिकाभ्यां नमः। **गन्धं(चन्दनं)**

समर्पयामि।

**रक्त चन्दनः**–नहि तेषाममा चन नाध्वसु वारणेषु । ईशे रिपुरघशर्ठं सः ॥ ॐभूर्भुवः स्वः श्री गणेशाम्बिकाभ्यां नमः । **रक्त चन्दनं समर्पयामि ।**

**कुङ्कमः**–ॐइन्द्रस्य रूपमृषभो बलाय कर्णाभ्याथ्ठं श्रोत्रममृतं ग्रहाभ्याम् । यवा न बर्हिर्भ्रुवि केसराणि कर्कन्धु जज्ञे मधु सारघं मुखात् ॥

कुङ्कमं कामदं दिव्यं कुङ्कमं कामरूपिणम् । अखण्डकामसौभाग्यं कुङ्कमं प्रतिगृह्यताम् ॥ ॐभूर्भुवः स्वः श्री गणेशाम्बिकाभ्यां नमः । **कुङ्कमं समर्पयामि ।**

**सिन्दूरंः**–ॐसिन्धूरिव प्राध्वने शूघनासो वातप्रमियः पतयन्ति यह्वाः। घृतस्य धारा अरुषो न व्वाजी काष्ठा भिन्दन्नूर्मिभिः पिन्वमानः ॥

सिन्दूरं शोभनं रक्तं सौभाग्यं सुख वर्द्धनम्। शुभदं कामदं चैव सिन्दूरं प्रतिगृह्यताम् ॥ ॐभूर्भुवः स्वः श्री गणेशाम्बिकाभ्यां नमः । **सिन्दूरं समर्पयामि ॥**

**अक्षतान्ः**–ॐ अक्षन्नमीमदन्तह्यवप्रियाऽअधूषत । अस्तोषतस्व भानवो विप्रान विष्ठया मती योजान्विन्द्रते हरिः ॥१॥ अक्षताश्च सुरश्रेष्ठाः कुंकुमाक्ताः सुशोभिताः । मया निवेदिता भक्त्या गृहाण परमेश्वर ॥२॥ अक्षतान् धवलान् दिव्यान् शालीयांस्तण्डुलान् शुभान् । हरिद्रा चूर्ण संयुक्तान् सुगृहाण गणाधिप ॥३॥ ॐभूर्भुवः स्वः श्री गणेशाम्बिकाभ्यां नमः । **अक्षतान् समर्पयामि ।**

**पुष्पम्ः**–ॐ सवित्तात्त्वा सवानाथ्ठं सुवता मग्निर्गृहपतीनाथ्ठं सोमोवनस्पतीनाम् । बृहस्पतिर्व्वाचऽ इन्द्रोज्ष्येष्ठ्यायरुद्रः पशुभ्योमित्रः सत्यो वरुणो धर्म पतीनाम् ॥

ॐओषधी: प्रतिमोदद्ध्वम्पुष्पवती: प्रसूवरी:। अश्श्वाऽ इवसजित्वरीर्वीरूध: पारयिष्ण्व:॥

माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो । मयानीतानि पुष्पाणि गृहाण परमेश्वर ॥ पुष्पैर्नानाविधैर्दिव्यै: कुमुदैरथ चम्पकै: । संपूजयामि त्वां देव पुष्पाणि प्रतिगृह्यताम् ॥ ॐभूर्भुव: स्व: श्री गणेशाम्बिकाभ्यां नम: । **पुष्पाणि समर्पयामि** ।

**बिल्वपत्र:**–ॐ नमो बिल्मिने च कवचिने च नमो वर्मिणे च वरूथिने च नम: श्रुताय च श्रुतसेनाय च नमो दुन्दुभ्याय चाहनन्याय च ॥ ॐ शिवोभवप्रजाभ्यो मानुषीभ्यस्त्वमङ्गिर: ॥ माद्यावा पृथिवी अभिशोचीर्म्मान्तरिक्षम्मा वनस्पतीन् ॥

त्रिशाखैर्बिल्वपत्रैस्त्वां पूजयामि गजानन । अच्छिद्रै: कोमलैर्नित्यं गृहाण गणनायक ॥ ॐभूर्भुव: स्व:श्री गणेशाम्बिकाभ्यां नम:। **बिल्वपत्रं समर्पयामि**।

(गणपति जी को इक्कीस दूर्वाएँ चढायें)

**दूर्वा:**–ॐगणाधिपाय नम: दूर्वायुग्मं समर्पयामि ॥ (१)ॐउमापुत्राय नम: दूर्वायुग्मं समर्पयामि ॥ (२) ॐअघनाशनाय नम: दूर्वायुग्मं समर्पयामि ॥ (३) ॐविनायकाय नम: दूर्वायुग्मं समर्पयामि ॥ (४) ॐईशपुत्राय नम: दूर्वायुग्मं समर्पयामि ॥ (५) ॐसर्वसिद्धिप्रदाय नम: दूर्वायुग्मं समर्पयामि ॥ (६) ॐएकदन्ताय नम: दूर्वायुग्मं समर्पयामि ॥ (७) ॐइभवक्त्राय नम: दूर्वायुग्मं समर्पयामि ॥ (८) ॐमूषकवाहनाय नम: दूर्वायुग्मं समर्पयामि ॥ (९) ॐकुमारगुरवे नम: दूर्वायुग्मं समर्पयामि ॥ (१०)

ॐ काण्डात्काण्डात्प्ररोहन्ती परुष: परुषस्परि ॥ एवानो दूर्वे प्रतनुसहस्रेण शतेन च ॥ ॐभूर्भुव: स्व: श्री गणेशाम्बिकाभ्यां नम: । **दूर्वामेकां (दूर्वांकुराणि)** समर्पयामि ।(११)

**आभूषण:**–ॐपृथिव्या: सधस्थादग्निं पुरीष्यमङ्गिरस्वदाभराग्निं पुरीष्यमङ्गिरस्वदच्छेमोऽग्निं पुरीष्यमङ्गिरस्वद्भरिष्याम: ॥

रत्नकङ्कणवैदूर्य मुक्ताहारादिकानि च । सुप्रसन्नेन मनसा दत्तानि स्वीकुरुष्व भो ॥ वज्रमाणिक्य वैदूर्य मुक्ताविद्रुममण्डितम् । पुष्परागसमायुक्तं भूषणं प्रतिगृह्यताम् ॥ ॐभूर्भुवः स्वः श्री गणेशाम्बिकाभ्यां नमः । **आभूषणं समर्पयामि** ॥

**शमीपत्राणि**:–ॐअग्नेस्तनूरसि वाचो विसर्जनन्देववीतये त्त्वा गृह्णामि बृहद्ग्रावासि वानस्पत्त्यः सऽइदन्देवेभ्यो हविः शमीष्व सुशमि शमीष्व हविष्कृदेहि हविष्कृदेहि ॥१॥ ॐऋतवस्तऽऋतुथापर्वशमितारो विशासतु । संवत्सरस्य तेजसा शमीभिः शम्यन्तुत्वा ॥२॥ अमङ्गलानां शमनीं शमनीं दुष्कृतस्य च । दुःस्वप्ननाशिनीं धन्यामर्पयेऽहं शमीं शुभाम् ॥३॥ ॐभूर्भुवः स्वः श्री गणेशाम्बिकाभ्यां नमः । **शमीपत्राणि समर्पयामि** ॥

अक्षतपुष्पाणि गृहीत्वा:–अक्षतपुष्प हाथ में लेकर अंग पूजन करे)

**अंगपूजा**:–ॐपार्वतीनन्दाय नमः पादौ पूजयामि । ॐ गणेशाय नमः गुल्फौ पूजयामि ।ॐ जगद्धात्रे नमः जंघे पूजयामि ।ॐ जगद्वल्लभाय नमः जानुनी पूजयामि ।ॐ उमापुत्राय नमः ऊरू पूजयामि । ॐ विकटाय नमः कटिं पूजयामि । ॐ गुहाग्रजाय नमः गुह्यं पूजयामि । ॐ महत्तमाय नमः मेढ्रं पूजयामि । ॐ नाथाय नमः नाभिं पूजयामि । ॐ उत्तमाय नमः उदरं पूजयामि । ॐ विनायकाय नमः वक्षः पूजयामि ॐ पाशच्छिदे नमः पार्श्वे पूजयामि । ॐ हेरम्बाय नमः हृदयं पूजयामि । ॐ मदोत्कटाय नमः कंठं पूजयामि । ॐस्कन्दाग्रजायनमः स्कन्धं पूजयामि । ॐ हरसुताय नमः हस्तान् पूजयामि । ॐब्रह्मचारिणे नमः बाहून् पूजयामि । ॐ सुमुखाय नमः मुखं पूजयामि । ॐ एकदन्ताय नमः दन्तं पूजयामि । ॐ विघ्नहन्त्रे नमः नेत्रे पूजयामि । ॐ शूर्प कर्णाय नमः कर्णौ पूजयामि । ॐभालचन्द्राय नमः भालं पूजयामि । ॐ नागाभरणाय नमः नासिकां पूजयामि । ॐ चिरन्तनाय नमः चिबुकं पूजयामि ।

ॐ स्थूलोष्ठाय नमः ओष्ठौ पूजयामि । ॐ गलन्मदाय नमः कचान् पूजयामि । ॐ शिवप्रियाय नमः शिरः पूजयामि । ॐसर्वमंगलासुताय नमः सर्वाण्यङ्गानि पूजयामि ।

**सुगन्धिद्रव्याणि**:-ॐत्र्यंबकं यजामहे सुगंधिम्पुष्टिवर्द्धनम् । उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय माऽमृतात् ॥ तैलानि च सुगन्धीनि द्रव्याणि विविधानि च । मया दत्तानि लेपार्थं गृहाण परमेश्वर ॥ ॐभूर्भुवः स्वः श्री गणेशाम्बिकाभ्यां नमः । **सुगन्धि द्रव्याणि** समर्पयामि ॥

**नानापरिमल द्रव्याणि**:-ॐ अहिरिवभोगैः पर्य्येतिवाहुञ्ज्याया हेतिम्परि बाधमानः । हस्तघ्नो विश्वाव्वयुनानि विद्वान्पुमान्पुमाꣳसम्परिपातु विश्वतः ॥ हरिद्रां कुंकुमं चैव सिन्दूरं कज्जलान्वितम्। सौभाग्यद्रव्य-संयुक्तं गृहाण परमेश्वर ॥ ॐभूर्भुवः स्वः श्री गणेशाम्बिकाभ्यां नमः । **परिमल द्रव्याणि** समर्पयामि ॥ हस्तौ प्रक्षाल्य ॥

**धूप**:-ॐधूरसि धूर्वधूर्वन्तन्धूर्वतँ योस्मान्धूर्वतितं धूर्व यं व्व्यन्धूर्व्वामः । देवानामसि व्वन्हितमꣳ स्निततमम्पप्प्रित-मञ्जुष्टतमन्देवहूतमम् ॥१॥ ॐब्राह्मणोस्य मुखमासीद् बाहू राजन्यः कृतः । ऊरू तदस्य यद्वैश्यः पभ्द्या ꣳशूद्रो अजायत ॥२॥ वनस्पति रसोद्भूतो गन्धाढ्यो गन्ध उत्तमः । आघ्रेयः सर्व देवानाम् धूपोऽयं प्रतिगृह्यताम् ॥३॥ दशाङ्ग गुग्गुलोपेतं सुगन्धं च मनोहरम् । धूपं दास्यामि देवेश गृहाण त्वं गजानन ॥४॥

ॐ भूर्भुवः स्वः श्री गणेशाम्बिकाभ्यां नमः । **धूपं आघ्रापयामि**।

**दीप**:-ॐ चन्द्रमाऽअप्स्वन्तरा सुपर्णो धावते दिवि । रयिं पिशङ्गं बहुलं पुरुस्पृहꣳ हरिरेति कनिक्रदत् ॥१॥ ॐ अग्निर्ज्योतिषा ज्योतिष्मान् रुक्मो वर्चसा वर्चस्वान् ।सहस्रदाऽअसि सहस्राय त्वा ॥२॥ ॐ मखस्य शिरोसि । मखाय त्वा मखस्य त्वा शीर्ष्णे। मखस्य शिरोसि । मखाय त्वा मखस्य त्वा शीर्ष्णे । मखस्य

शिरोसि । मखाय त्वा मखस्य त्वा शीर्ष्णे । मखाय त्वा मखस्य त्वा शीर्ष्णे । मखाय त्वा मखस्य त्वा शीर्ष्णे । मखाय त्वा मखस्य त्वा शीर्ष्णे ॥३॥

ॐअग्निर्ज्ज्योतिर्ज्ज्योतिरग्निः स्वाहा सूर्य्योज्ज्योतिर्ज्योतिः सूर्य्यः स्वाहा । अग्निर्वर्चोज्ज्योतिर्वर्चः स्वाहा सूर्य्यो व्वर्चोज्ज्योतिर्वर्चः स्वाहा । ज्योतिः सूर्य्यः सूर्य्योज्ज्योतिः स्वाहा ॥४॥

साज्यं चवर्ति संयुक्तं वह्निना योजितं मया । दीपं गृहाण देवेश त्रैलोक्यतिमिरापहम् ॥५॥ ॐभूर्भुवः स्वः श्री गणेशाम्बिकाभ्यां नमः । **दीपं दर्शयामि** । हस्तौ प्रक्षाल्य ॥

**नैवेद्य**:-ॐनाभ्याऽआसीदन्तरिक्षꣳ शीर्ष्णो द्यौः समवर्त्तत पद्भ्यामभूमिर्द्दिशः श्रोत्रा तथालोका 2ँ॥ ऽअकल्पयन् ॥१॥ ॐअन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः । प्रप्रदातारं तारिषऽऊर्जं नो धेहि द्विपदे चतुष्पदे ॥२॥ शर्करा घृत संयुक्तं मधुरं स्वादुचोत्तमम् । उपहार समायुक्तं नैवेद्यं प्रतिगृह्यताम् ॥३॥ ॐ एकदन्ताय विद्महे वक्रतुण्डाय धीमहि । तन्नो दन्तीः प्रचोदयात् ।

टंकारं गायत्रीमन्त्रेण सम्प्रोक्ष्य ॥ धेनुमुद्रां, ग्रासमुद्राम् प्रदर्शयेत् ॥ ॐ प्राणाय स्वाहा, ॐ अपानाय स्वाहा, ॐ व्यानाय स्वाहा, ॐ उदानाय स्वाहा, ॐ समानाय स्वाहा ।ॐभूर्भुवः स्वः श्री गणेशाम्बिकाभ्यां नमः **नैवेद्यं निवेदयामि** मध्ये पानीयं जलं समर्पयामि, आचमनीयं जलं समर्पयामि, उत्तरापोषनार्थे हस्त प्रक्षालनं, मुखप्रक्षालनं आचमनीयं जलं समर्पयामि ॥

**करोद्वर्तनार्थे गन्धम्**:-ॐ अꣳशुनाते अꣳशुः पृच्यतां परुषा परुः । गन्धस्ते सोममवतु मदाय रसो अच्युतः ॥ ॐभूर्भुवः स्वः श्री गणेशाम्बिकाभ्यां नमः करोद्वर्तनान्ते गन्धं समर्पयामि॥

**ऋतुफलम्**:-ॐ याः फलिनीर्या ऽअफलाऽ अपुष्पायाश्च पुष्पिणीः । बृहस्पति प्रसूतास्तानो मुंचन्त्वꣳ हसः ॥ इदं फलं

मया देव स्थापितं पुरतस्तव । तेन मे सफला वाप्तिर्भवेज्जन्मनि जन्मनि ॥ ॐभूर्भुवः स्वः श्री गणेशाम्बिकाभ्यां नमः ऋतुफलं समर्पयामि ।

**ताम्बूलम्**:-मुख वासार्थे ताम्बूलम् ॥ ॐ यत्पुरुषेण हविषा देवा यज्ञ मतन्वत । व्वसन्तोस्या सीदाज्यं ग्रीष्मऽइध्मः शरद्धविः ॥१॥ ॐउत स्मास्य द्रवतस्तुरण्यतः पर्णं न वेरनुवाति प्रगर्धिनः श्येनस्येव ध्रजतो अङ्कसं परि दधिक्राव्णः सहोर्जा तरित्रतः स्वाहा ॥२॥ ताम्बूलं च वरं रम्यं कर्पूरादि सुवासितम् ।
जिह्वाजाड्यच्छेदकरं ताम्बूलं प्रति गृह्यताम् ॥३॥ पूगीफलं महद्दिव्यम् नागवल्ली दलैर्युतम् । एला चूर्णादि संयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥४॥ ॐभूर्भुवः स्वः श्री गणेशाम्बिकाभ्यां नमः । **मुखशुद्ध्यर्थं ताम्बूलं समर्पयामि ।**

**दक्षिणा**:-ॐ हिरण्यगर्ब्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत् । स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥१॥ ॐयद्दत्तँ ब्यत्परादानँ ब्यत्पूर्तं याश्च दक्षिणाः तदग्निर्वैश्श्व कर्म्मणः स्वर्द्देवेषुनो दधत् ॥२॥ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः । अनन्तपुण्यफलद-मतः शान्तिं प्रयच्छमे ॥३॥ ॐभूर्भुवः स्वः श्री गणेशाम्बिकाभ्यां नमः सांगतासिद्ध्यर्थं हिरण्यगर्भदक्षिणां समर्पयामि।

**श्रीफलम्**:-ॐश्रीश्चते लक्ष्मीश्चपत्क्यग्रा बहोरात्रे पार्श्वे नक्षत्राणिरूपमश्विनौऽ व्याप्तम् । इष्ष्णन्निषाणा मुम्मऽ इषाण सर्वलोकम्मऽ इषाण ॥१॥ रूपं देहि जयं देहि भाग्यं भवति देहि मे । पुत्रान्देहि धनं देहि सर्वकामांश्च देहि मे ॥२॥ फलेन फलितं सर्वं त्रैलोक्यं सचराचरम् । तस्मात् फलप्रदानेन पूर्णाः सन्तु मनोरथाः ॥ ॐ भूर्भुवः स्वः श्री गणेशाम्बिकाभ्यां नमः । **सांगतासिद्ध्यर्थं श्रीफलं समर्पयामि ॥**

**कर्पूरारार्तिकम्**:–ॐ इदꣳ हविः प्रजननम्मेऽअस्तुदशवीरꣳ सर्वगणꣳ स्वस्तये । आत्मसनि प्रजासनि पशुसनि लोकसन्न्यभयसनि अग्निः प्रजाम्बहुलाम्मे करोत्वन्नम्पयोरेतोऽस्मासुधत्त ॥१॥ ॐ आ रात्रि पार्थिवꣳ रजः पितुरप्रायि धामभिः । दिवः सदाꣳसि बृहती वि तिष्ठस ऽआ त्वेषं वर्त्तते तमः ॥२॥ ॐ ये देवेसो दिव्येकादशस्थ पृथिव्या मध्येकादशस्थ । अप्सुक्षितो महिनैकादशस्थ ते देवासो यज्ञमिमं जुषध्वम् ॥३॥ कदली गर्भसंभूतं कर्पूरं च प्रदीपितम् । आरार्तिकमहं कुर्वे पश्य मे वरदो भव ॥४॥ कर्पूर गौरं करुणावतारं संसारसारं भुजगेन्द्रहारम् । सदा वसन्तं हृदयारविन्दे भवं भवानी सहितं नमामि ॥५॥ ॐभूर्भुवः स्वः श्री गणेशाम्बिकाभ्यां नमः । **आरार्तिकम् समर्पयामि** । ततो जलारार्तिकम् समर्पयामि ।

**मन्त्रपुष्पांजलिः**– अञ्जलौ पुष्पाण्यादाय तिष्ठन् ॥

ॐयज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् । ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥

ॐनमो गणेभ्यो गणपतिभ्यश्चवो नमोनमो व्व्रातेभ्यो व्व्रातपतिभ्यश्चवो नमोनमो गृत्सेभ्यो गृत्सपतिभ्यश्चवो नमोनमो व्विरूपेभ्यो व्विश्वरूपेभ्यश्चवो नमोनमः ॥

ॐभूर्भुवः स्वः श्री गणेशाम्बिकाभ्यां नमः पुष्पांजलिं समर्पयामि॥

**ततः प्रदक्षिणा**:–सप्तास्यासन् परिधयस्त्रिः सप्तसमिधः कृताः। देवा यद्यज्ञं तन्वाना ऽ अबध्नन् पुरुषं पशुम् ॥ यानि कानि च पापानि जन्मान्तर कृतानिच । तानि सर्वाणि नश्यन्तु प्रदक्षिणे पदे पदे ॥ ॐभूर्भुवः स्वः श्री गणेशाम्बिकाभ्यां नमः प्रदक्षिणाम् समर्पयामि ।

(अर्घपात्रे जलं प्रपूर्य रक्तचन्दनपुष्पाक्षतसहितं नारिकेलं च धृत्वा)

**विशेषार्घ**:–रक्ष रक्ष गणाध्यक्ष रक्ष त्रैलोक्यरक्षक ।

भक्तानामभयंकर्त्ता त्राता भव भवार्णवात् । द्वैमातुर कृपासिन्धो षाण्मातुराग्रज प्रभो । वरदस्त्वं वरं देहि वांछितं वांछितार्थद॥ अनेन सफलार्घेण फलदोऽस्तु सदा मम ॥

ॐभूर्भुवः स्वः श्री गणेशाम्बिकाभ्यां नमः **विशेषार्घं समर्पयामि**।

**प्रार्थनाः**–ॐविघ्नेश्वराय वरदाय सुरप्रियाय, लम्बोदराय सकलाय जगद्धिताय । नागाननाय श्रुतियज्ञविभूषिताय, गौरीसुताय गणनाथ नमो नमस्ते ॥१॥ भक्तार्तिनाशनपराय गणेश्वराय, सर्वेश्वराय शुभदाय सुरेश्वराय । विद्याधराय विकटाय च वामनाय, भक्त प्रसन्नवरदाय नमो नमस्ते ॥२॥ नमस्ते ब्रह्मरूपाय विष्णुरूपाय ते नमः । नमस्ते रूद्ररूपाय करिरूपाय ते नमः। विश्वरूपस्वरूपाय नमस्ते ब्रह्मचारिणे । भक्तप्रियाय देवाय नमस्तुभ्यं विनायक ॥३॥ लम्बोदर नमस्तुभ्यं सततं मोदकप्रिय। निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥४॥ त्वां विघ्नशत्रुदलनेति च सुन्दरेति, भक्तप्रियेति सुखदेति वरप्रदेति । विद्याप्रदेत्यघहरेति च ये स्तुवन्ति, तेभ्यो गणेश वरदो भव नित्यमेव ॥५॥ ॐभूर्भुवः स्वः श्री गणेशाम्बिकाभ्यां नमस्करोमि ।

अनया पूजया श्री गणेशाम्बिके प्रीयेतां न मम ॥

## ॥आग्नेयां मातृका पूजनम्॥

(तन्निमित्तमाह ॥ अकृत्वा मातृयागंतु वैदिकं यः समाचरेत् ॥ तस्य क्रोध समाविष्टा हिंसामिच्छंति मातरः ॥१॥ स्थानलक्षणमाह ॥ गृहनिर्गम वामांगे वसोर्द्धारा च वेदिका । कार्या विवाहे विद्वद्भिर्गृहेवै पूर्वदक्षिणे ॥ गृहेवै पश्चिमद्वारे तथा उत्तर एव च । कार्याविवाहे विद्वद्भिर्गृह निर्गम दक्षिणे ॥ मातृपूजां रक्तवस्त्रोपरिपट्टे कुर्यात् ॥ तत्र स्थापन क्रमः ॥ वायौचतुष्क मध्यस्थं गणेशं तत्र पूजयेत् ॥ मध्ये नैऋत्यके गौरी पद्मा पावक गोचरे । शचिः पश्चिमतो मेधा सावित्री विजया यमे ॥ जयोत्तरे देवसेना स्वधामीशान एवच । स्वाहा चैव तथाग्नेये मात्रीन्द्रे लोकमातरः ॥ मध्ये वायु धृतिश्चैव नैऋत्ये पुष्टि पूजयेत् । तुष्टिश्चैवतु वायव्ये मध्येशे कुलदेवता ॥ अथ नामानि ॥ गौरी पद्मा शची मेधा सावित्री विजया जया । देवसेना स्वधा स्वाहा मातरो लोकमातरः ॥ धृतिः तुष्टि तथापुष्टिरात्मनः कुल देवता। गणेशेनाधिकाह्येता वृद्धौ पूज्यास्तु मातरः ॥ ततश्च पंचसप्तंवानातिनीचानचोच्छ्रताः ॥ कुड्यादिषु वसोर्धारा सप्तधारा घृतेनतु । कारयेत् पंचधारावा वसोः मंत्रेण कारयेत् ॥ पुष्टिरात्मनः कुल देवता । गणेशाधिकाह्येता वृद्धौ पूज्यास्तु मातरः ॥ ततश्च पंचसप्तवानातिनीचानचोच्छ्रताः ॥ कुड्यादिषु वसोर्धारा सप्तधारा घृतेनतु । कारयेत् पंचधारावा वसोर्मंत्रेण कारयेत् ॥)

मातृपूजां रक्तवस्त्रोपरिपट्टे कुर्यात्। हस्ते गन्धाक्षतपुष्पाणि गृहीत्वा॥

**अथ मातृका स्थापनं ॥**

**गणपतिः**–ॐ गणानान्त्वा गणपति ठँ हवामहे प्रियाणां त्वा प्रियपति ठँ हवामहे निधीनां त्वा निधिपति ठँ हवामहे वसो मम । आहमजानि गर्ब्भधमा त्वमजासि गर्ब्भधम् ॥ ॐ गजास्य गणनाथत्वं सर्वविघ्न विनाशन ॥ लम्बोदर त्रिनयन आगच्छ गण

नायक ॥ मध्ये वायव्यकोष्ठे भो गणपते इहागच्छ इहा तिष्ठ ॥ **गणपतये नमः** गणपतिमावाहयामि स्थापयामि ॥

**१–गौरी**:–ॐ आयङ्गौः पृश्निरक्रमीदसदन् मातरं पुरः । पितरं च प्रयन्त्स्वः ॥ हिमाद्रितनयां देवीं वरदां भैरव प्रियां । लम्बोदरस्य जननीं गौरीमावाहयाम्यहम् ॥ मध्ये नैऋत्यकोष्ठे **गौर्यै नमः**। गौरीमावाहयामि स्थापयामि ॥

**२–पद्मा**:–ॐ हिरण्यरूपाऽउषसो विरोकऽ उभाविन्द्राऽ उदिथः सूर्य्यश्च । आरोहतं वरुण मित्र गर्तं ततश्चक्षाथामदितिं दितिं च मित्रोसि वरुणोसि ॥ सुवर्णाभां पद्महस्तां विष्णोर्वक्षस्थले स्थिताम् । त्रैलोक्ये पूजितां देवीं पद्मामावाहयाम्यहम् मध्ये आग्नेयकोष्ठे **पद्मायै नमः** । पद्मामावाहयामि स्थापयामि ॥

**३–शची**:–ॐ कदाचन स्तरीरसि नेन्द्रसश्चसि दाशुषे । उपोपेन्नु मघवन् भूयऽइन्नु ते दानं देवस्य पृच्यते ॥ उत्पलाक्षीं सुदर्शनां शचीं कुंडलधारिणीं । देवराज प्रियां भद्रां शचीमावाहयाम्यहं ॥ पश्चिमे प्रथमकोष्ठे **शच्यै नमः** । शचीमावाहयामि स्थापयामि॥

**४–मेधा**:–ॐ मेधांमे वरुणो ददातु मेधामग्निः प्रजापतिः । मेधामिन्द्रश्च वायुश्च मेधां धाता ददातु मे स्वाहा ॥ वैवस्वत्करफुल्लाब्जं दधानां पद्मवासिनीम् । बुद्धि प्रसादिनीं सौम्यां मेधामावाहयाम्यहम् ॥ पश्चिमे द्वितीयकोष्ठे **मेधायै नमः** । मेधामावाहयामि स्थापयामि ॥

**५–सावित्री**:–ॐ तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि । धियोयोनः प्रचोदयात् ॥१॥

उपयामगृहीतोऽसि सावित्रोऽसि चनोधाश्चनोधाऽअसि चनोमयिधेहि । जिन्व यज्ञं जिन्व यज्ञपतिं भगाय देवाय त्वा सवित्रे ॥२॥ जगत्सृष्टीं जगद्धात्रीं पक्षीरूपेण संस्थिताम् । आवाहयामि सावित्रीमोंकारांक स्वरूपिणीम् ॥३॥ दक्षिणे प्रथमकोष्ठे **सावित्र्यै नमः** । सावित्रीमावाहयामि स्थापयामि ॥

**६–विजया**:–ॐ विज्यन्धनुः कपर्दिनो विशल्यो बाणवाँ२॥ उत । अनेशन्नस्य याऽइषवऽआभुरस्य निषङ्गधिः ॥ दैत्य क्षयकरीं देवीं देवानामभयप्रदाम् । गीर्वाण वंदितां देवीं विजयामावाहयाम्यहं ॥दक्षिणे द्वितीयकोष्ठे **विजयायै नमः** । विजयामावाहयामि स्थापयामि ॥

**७–जया**:–ॐ यातेरुद्रशिवा तनूरघोरा पापकाशिनी । तया नस्तन्वाशं तमयागिरिशंताभिचा कशीहि ॥ विश्वभद्रां जयां रक्तां रक्तांबर धरां सतीम् । त्रैलोक्ये पूजितां देवीं जयामावाहयाम्यहम् ॥ उत्तरे प्रथमकोष्ठे **जयायै नमः** । जयामावाहयामि स्थापयामि॥

**८–देवसेना**:–ॐ देवानां भद्रा सुमितिर्ऋजूयतां देवाना छं रातिरभि नो निवर्त्तताम् । देवानाछं सख्यमुपसेदिमा वयं देवानऽआयुः प्रतिरन्तु जीवसे ॥ मयूर वाहनारूढां शक्ति खड्ग धनुर्धराम् ॥ आवाहये देवसेनां तारका सुरमर्द्दिनीम् ॥ उत्तरे द्वितीयकोष्ठे **देवसेनायै नमः** । देवसेनामावाहयामि स्थापयामि ॥

**९–स्वधा**:–ॐ पितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः स्वधायिभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः । अक्षन् पितरोमीमदन्त पितरोतीतृपन्त पितरः पितरः शुन्धध्वम् ॥ कव्यमादाय सततं पितृभ्योया प्रयच्छति । पितृलोकार्च्चितां देवीं स्वधामावाहयाम्यहं ॥ बाह्ये ईशानकोष्ठे **स्वधायै नमः** । स्वधामावाहयामि स्थापयामि ॥

**१०–स्वाहा**:–स्वाहा यज्ञं मनसः स्वाहोरोरन्तरिक्षात् स्वाहा द्यावापृथिवीभ्या छं स्वाहा वातादारभे स्वाहा ॥१॥ ॐ स्वाहा यज्ञं वरुणः सुक्षत्रो भेषजं करत् । अतिच्छन्दा ऽ इन्द्रियं बृहदृषभो गौर्वयो दधुः ॥२॥ हविर्गृहीत्वा सततं देवेभ्यो या प्रयच्छति । दैवतैः स्वर्चिता स्वाहा समायातु मदध्वरे ॥३॥ बाह्याग्नेयकोष्ठे **स्वाहायै नमः** । स्वाहामावाहयामि स्थापयामि ॥

**११–मातृ:**– अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः । विश्वे देवाऽ अदितिः पञ्च जनाऽ अदितिर्जातमदितिर्जनित्वम् ॥१॥ ॐ आपो अद्यान्वचारिषथ्ठं रसेन समसृक्ष्महि । पयस्वा नग्नआगमंतं मा सथ्ठं सृजवर्चसा प्रजया च धनेन च ॥२॥ भूतग्राममिदं कृत्स्नं याभिरुत्पादितं पुरा । त्रैलोक्ये पूजितां देवीं मातृनावाहयाम्यहं ॥३॥ पूर्वे प्रथमकोष्ठे **मातृभ्यो नमः** । मातृनावाहयामि स्थापयामि॥

**१२–लोकमातृ:**–ॐपृषदश्वा मरुतः पृश्निमातरः शुभंयावानो विदथेषु जग्मयः । अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवाऽअवसागमन्निह ॥१॥ ॐभवतन्नः समनसौ सचेतसावरेपसौ । मा यज्ञथ्ठं हिथ्ठं सिष्टं मा यज्ञपतिं जातवेदसौ शिवौ भवतमद्य नः ॥२॥ आवाहयेल्लोकमातर्जगत्पालन संस्थिताम् । शक्राद्यैर्वंदितां देवीं स्तोत्र मंत्रैरभीष्टदाम् ॥३॥ पूर्वे द्वितीयकोष्ठे **लोकमातृभ्यो नमः** । लोकमातृनावाहयामि स्थापयामि ॥

**१३–धृतिः**–यत्प्रज्ञानमुतचेतो धृतिश्चयज्योतिरंतरमृतं प्रजासु । यस्मान्नऋते किंचनकर्म क्रियते तन्मे मनः शिवसङ्कल्पमस्तु ॥१॥ ॐधृष्टिरस्यपाऽग्ने ऽ अग्निमामादं जहि निष्क्रव्याद ठँ सेधा देवयजं वह । ध्रुवमसि पृथिवीं दृठँ हब्रह्मवनि त्वा क्षत्रवनि सजातवन्युपदधामि भ्रातृव्यस्य वधाय ॥२॥ मनस्तुष्टिकरीं देवीं लोकानुग्रहकारिणीम् । सर्वकाम समृद्ध्यर्थं धृतिमावाहयाम्यहम् ॥३॥ मध्ये वायव्यकोष्ठे **धृत्यै नमः** । धृतिमावाहयामि स्थापयामि॥

**१४–पुष्टिः**–ॐत्वष्टा तुरीपो अद्भुतऽ इन्द्राग्नी पुष्टिवर्धना । द्विपदा छन्दऽ इन्द्रियमुक्षा गौर्नवयो दधुः ॥१॥ ॐतत्वायामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः । अहेडमानो वरुणेह बोध्युरुशथ्ठं स मान ऽ आयुः प्रमोषीः ॥२॥ स्वभक्तेभ्यश्च वरदां विद्याज्वालाक्ष कुण्डलाम् ॥ आब्रह्मस्तंब पर्यंतं सर्वजीव सुखप्रदाम् ॥३॥ बाह्ये नैऋत्यकोष्ठें **पुष्ट्यै नमः** । पुष्टिमावाहयामि स्थापयामि॥

१५-**तुष्टिः**-ॐ बृहस्पते ऽअतियदर्यो ऽअर्हा द्युमद्विभाति क्रतुमज्जनेषु । यद्दीदयच्छवस ऋृत प्रजा ततदस्मा सुद्रविणं धेहि चित्रम् ॥१॥ ॐबृहस्पते परिदीया रथेन रक्षोहा मित्राँ ॥२ अपबाधमानः । प्रभञ्जन्त्सेनाः प्रमृणो युधाजयन्नस्माकमेद्ध्यविता रथानाम् ॥२॥ आवाहयामि तां तुष्टिं सर्वलोकेषु गीयताम् । संतोषभावनां देवीं रक्षणीयाध्वरे मम ॥३॥ बाह्ये वायव्यकोष्ठे **तुष्ट्यै नमः** । तुष्टिमावाहयामि स्थापयामि ॥

१६-**कुलदेवाः**-ॐप्राणाय स्वाहा पानाय स्वाहा व्यानाय स्वाहा । अंबेऽ अंबिकेऽ म्बालिकेनमानयति कश्चन । ससस्त्यश्वकः सुभद्रिकांकाम्पीलवासिनीम् ॥ तामात्म वंदितां देवीं सर्वकाम फलप्रदाम् । वंश रक्षक गोत्रीयां देवीमावाहयाम्यहम् ॥ मध्ये ईशानकोष्ठे **आत्मनः कुलदेवतायै नमः** । आत्मकुलदेवता-मावाहयामि स्थापयामि ॥

**ध्यानम्**:-ॐसमख्ये देव्या धिया सं दक्षिणयोरुचक्षसा । मा मऽआयुः प्रमोषीर्मोऽअहं तव वीरं विदेय तव देवि सन्दृशि ॥ ॐ गौरी पद्मा शची मेधा सावित्री विजया जया । देवसेना स्वधा स्वाहा मातरो लोकमातरः ॥ धृतिः तुष्टि तथा पुष्टिरात्मनः कुल देवता । गणेशेनाधिकाह्येता वृद्धौ पूज्याश्च षोडशः ॥

## ॥सप्तवसोर्धारा पूजनम्॥

श्रीर्लक्ष्मीर्धृतिर्मेधा स्वाहा प्रज्ञा सरस्वती । मांगल्येषु प्रपूज्यन्ते सप्तैताः घृत मातरः ॥

ॐ व्वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारम् । देवत्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः ॥ **इत्यनेन सप्तधाराः कृत्वा**

**१–श्री**:–ॐ मनसः काममाकूतिम् वाचः सत्यमशीय । पशूनाꣳ रूपमन्नस्य रसो यशः श्रीः श्रयतां मयिस्वाहा ॥ ॐभूर्भुवःस्वः श्रियै नमः ॥ श्रियं आवाहयामि स्थापयामि ॥

**२–लक्ष्मी**:–ॐश्रीश्चते लक्ष्मीश्चपत्क्य्रा बहोरात्रे पार्श्वे नक्षत्राणिरूपमश्विनौव्याप्तम् । इष्णंन्निषाणामुम्मइषाण सर्वलोकंमइषाण ॥ ॐभूर्भुवः स्वः **लक्ष्म्यै नमः** ॥ लक्ष्मीं आवाहयामि स्थापयामि ॥

**३–धृति**:–ॐ इह रतिरिह रमध्वमिह धृतिरिह स्वधृतिः स्वाहा । उपसृजन् धरुणं मात्रे धरुणो मातरं धयन् । रायस्पोषमस्तासु दीधरत् स्वाहा ॥ ॐभूर्भुवः स्वः **धृत्यै नमः** । धृतिमावाहयामि स्थापयामि ॥

**४–मेधा**:–ॐ मेधां मे वरुणो ददातु मेधामग्निः प्रजापतिः । मेधामिन्द्रश्च वायुश्च मेधां धाता ददातु मे स्वाहा ॥ ॐ भूर्भुवः स्वः **मेधायै नमः** ॥ मेधामावाहयामि स्थापयामि ॥

**५–स्वाहा**:–ॐप्राणाय स्वाहा पानाय स्वाहा व्यानाय स्वाहा चक्षुषे स्वाहाश्श्रोत्राय स्वाहा व्वाचे स्वाहा मनसे स्वाहा । ॐभूर्भुवः स्वः **स्वाहायै नमः** स्वाहामावाहयामि स्थापयामि॥

**६–प्रज्ञा**:–यत्ज्ञानमुतचेतो धृतिश्चयज्ज्योतिरन्तरमृतम्प्रजासु । यस्मानऽऋृते किञ्चन कर्म्मक्रियते तन्मे मनः शिवसंकल्पमस्तु ॥ ॐ भूर्भुवः स्वः **प्रज्ञायै नमः** । प्रज्ञामावाहयामि स्थापयामि॥

**७–सरस्वती**:–ॐपावकानः सरस्वती व्वाजेभिर्व्वाजिनीवति । यज्ञं व्वष्टुधियावसुः । ॐभूर्भुवः स्वः **सरस्वत्यै नमः** सरस्वतीमावाहयामि स्थापयामि ॥

**प्रतिष्ठां कुर्यात्**:–ॐ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञꣳ समिमं दधातु । विश्वे देवासऽइहमादन्तामो ३ँ॥ म्प्रतिष्ठ ॥

एषवै प्रतिष्ठानाम् यज्ञो यत्रै तेन यज्ञे यजंतेन सर्वमेव प्रतिष्ठितं भवति ॥

गौर्यादि षोडशमातरः श्र्यादि सप्तमातरः गणपति कुलदेव्याः सहिताः सुप्रतिष्ठिता वरदा भवंतु ॥ श्री गौर्यादि षोडशमातृकाभ्यो नमः । श्रियादि सप्तमातृभ्यो नमः आवाहनं समर्पयामि ॥

**आसनार्थे पुष्पाणि समर्पयामि** ॥ पादयोः पाद्यं समर्पयामि ॥ हस्तयोः अर्घ्यं समर्पयामि ॥ मुखे आचमनीयं जलं समर्पयामि ॥ सर्वांगे स्नानं समर्पयामि ॥ मिश्रित पंचामृत स्नानं समर्पयामि ॥ शुद्धोदक स्नानं समर्पयामि ॥ वस्त्रं समर्पयामि ॥ उपवस्त्रं समर्पयामि ॥ चन्दनं समर्पयामि ॥ गंधं समर्पयामि ॥ अक्षतान् समर्पयामि ॥ पुष्पाणि समर्पयामि ॥ परिमलद्रव्याणि समर्पयामि ॥ सुगंधितैलं समर्पयामि ॥ धूपं आघ्रापयामि ॥ दीपं दर्शयामि ॥ नैवेद्यं निवेदयामि ॥ आचमनीयं जलं समर्पयामि ॥ ऋतुफलं समर्पयामि ॥ ताम्बूलं समर्पयामि ॥ द्रव्यदक्षिणां समर्पयामि ॥ श्रीफलं समर्पयामि ॥ पुष्पआरार्तिकं समर्पयामि ॥ मन्त्रपुष्पांजलिं समर्पयामि ॥ प्रदक्षिणां समर्पयामि ॥ नमस्कारं समर्पयामि ॥

**विशेषार्घ्यंः**–जयन्ती मंगलाकाली भद्रकोली कपालिनी । दुर्गा क्षमा शिवाधात्री स्वाहा स्वधा नमोस्तुते ॥ रूपं देहि जयं देहि भाग्यं भवति देहि मे । पुत्रान्देहि धनं देहि सर्वकामांश्च देहि मे ॥ फलेन फलितं सर्वं त्रैलोक्यं सचराचरं । फलस्यार्घ प्रदानेन सफलाः सन्तु मनोरथाः ॥ इदं फलं मया देव्यः स्थापितं पुरतस्तव । तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥ इति नालिकेरमयं विशेषार्घ्यं समर्पयामि ॥

**प्रार्थनाः**–गौरी पद्मा शची मेधा सावित्री विजया जया । देवसेना स्वधा स्वाहा मातरो लोकमातरः ॥ धृतिः तुष्टि तथा पुष्टिरात्मनः

कुल देवता । गणेशेनाधिकाह्येता वृद्धौ पूज्याश्च षोडशः ॥ श्रीर्लक्ष्मीर्धृतिर्मेधा स्वाहा प्रज्ञा सरस्वती । मांगल्येषु प्रपूज्यन्ते सप्तैताः घृत मातरः ॥ श्री गौर्यादि षोडशमातृकाभ्यो नमः । श्रियादि सप्तमातृभ्यो नमः ॥ मंत्रपुष्पांजलिं समर्पयामि ॥

**आयुष्यमंत्रम्**:-ॐआयुष्यं व्वर्चस्यꣳ रायस्पोषमौद्भिदम् । इदꣳ हिरण्यं वर्चस्वज्जैत्रा याविशतादुमाम् ॥ नतद्रक्षाꣳसि न पिशाचास्तरन्ति देवानामोजः प्रथमजꣳ ह्येतत् । यो बिभर्ति दाक्षायणꣳ हिरण्यꣳ स देवेषु कृणुते दीर्घमायुः स मनुष्येषु कृणुते दीर्घमायुः ॥ यदाबध्नन् दाक्षायणा हिरण्यꣳ शतानीकाय सुमनस्यमानाः । तन्मऽ आ बध्नामि शतशारदायायुष्माञ्जर-दष्टिर्यथासम् ॥

अद्य मातृका स्थापन पूजन कृतस्य कर्मणो विधेर्यन्न्यूनमधिकंवा तत्सर्वं भवतां ब्राह्मणानां वचनेभ्यः श्रीगणेशाम्बिकयोः प्रसादात्सर्वं विधेः परिपूर्णमस्तु॥

द्वारमातृ पूजनम् ॐ अद्येह- कामनासिद्ध्यर्थं क्रियमाणसप्ताहकर्मणि निर्विघ्नपरिसमाप्त्यर्थञ्च नन्दादि सप्तद्वारमातृ पूजनं करिष्ये -

१) नन्दा (२) नन्दिनी (३) वासिष्ठी
४) वासुदेवा (५) भार्गवी (६) जया (७) विजया

ॐ भूर्भुवः स्वः नन्दादि सप्तमातरः इहागच्छत तिष्ठत इत्यावाह्य प्रतिष्ठाप्य चतुर्थ्यन्तैः नाममन्त्रैः पूजयेत् घृतधाराञ्च कुर्यात् -

वसोः पवित्रमसि शतधारं ॰

## ॥ अथ नान्दीश्राद्धम् ॥

सौकर्याय सङ्कल्पं विधिनैवोच्यते ॥ ताम्र पात्रे दधि कुंकुमयवाक्षत दूर्वाजलानि एकीकृत्य सङ्कल्पं कुर्यात् ॥

**आचम्य प्राणानायम्य** ॥

ॐतत्सदद्य मासोत्तमे मासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकनक्षत्रे अमुककर्माङ्गीभूतं सङ्कल्पविधिना आभ्युदयिक श्राद्धमहं करिष्ये ॥

दूर्वाङ्कुरम् गृहीत्वा पात्रस्थ दध्यादीनालोडयेत् ॥

सत्यवसु संज्ञका विश्वेदेवाः नांदीमुखाः भूर्भुवः स्वः इदं वः पाद्यं स्वाहानामयं च वृद्धिः ॥ सर्वं पितृकार्यमपि सव्येनैव स्वाहाकार संयुक्तं यवैरेव देववत्कुर्यात् ॥ वृद्धिः इत्युक्तौ ॥

अमुकगोत्राः मातृपितामही प्रपितामह्यः नांदीमुख्यः भूर्भुवः स्वः एतद्वः पाद्यं स्वाहानामयं च वृद्धिः ॥

अमुकगोत्राः पितृपितामह प्रपितामहाः नांदीमुखाः भूर्भुवः स्वः एतद्वः पाद्यं स्वाहानामयं च वृद्धिः ॥

अमुकगोत्राः मातामह प्रमातामह वृद्धप्रमातामहाः पत्नीसहिताः नान्दीमुखाः भूर्भुवः स्वः एतद्वः पाद्यं स्वाहानामयं च वृद्धिः ॥

गणेशाम्बिकयोः भूर्भुवः स्वः एतद्वः पाद्यं स्वाहानामयं च वृद्धिः॥

**पादोदकं परित्यज्य आचमनं प्राणायामम्ः**– कर्म पात्रस्थापनं, कर्मपात्रे आसनं, आसने पात्रं,पात्रे पवित्रं **ॐशन्नो देवीति जलपूरणम्ः**–ॐशन्नो देवीरभिष्टयऽआपोभवन्तुपीतये। शँय्योरभिस्रवंतुनः ॥ **यवोसीति यव प्रक्षेपः**– ॐ यवो सियवयास्मद् द्वेषोयवयाराती दिंवेत्वान्तरिक्षा यत्वा पृथिव्यै त्वा शुन्धंतॉं लोकाः पितृसदनाः पितृसदनमसि ॥

**इति मंत्रेण चंन्दनं पुष्पं दधि च प्रक्षेपः**– ॐ दधिक्राव्णो अकारिषं जिष्णो रश्वस्य वाजिनः । सुरभिनो मुखाकरत्प्रणः आयू ꣳ षितारिषत् ॥

**स्वस्ति नइन्द्रेत्यनेनाक्षतै दिग्बंधः-**

(पूर्वादि दिशाओं में अक्षत छोडे)

ॐस्वस्तिनऽइन्द्रो वृद्धश्रवाः स्वस्तिनःपूषाविश्ववेदाः ॥ स्वस्ति नस्ताक्ष्योंऽअरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु ॥

(इति पूर्वादिदिक्षु अक्षतान् प्रक्षिपेत्)

**संकल्प** विधिना आभ्युदयिक श्राद्धोपहाराणां पवित्रतास्तु देश-काल-पाक-पात्र-उपहार द्रव्य श्रद्धा सम्पदस्तु ॥

अत्राद्य. तिथौ अमुककर्म प्रारंभ निमित्तं आभ्युदयिक श्राद्धमहं करिष्ये ॥

सत्यवसु संज्ञका विश्वेदेवाः नांदीमुखाः भूर्भुवः स्वः इदं वः आसनगंधाद्युपचार कल्पनं स्वाहानामयं च वृद्धिः ॥

अमुकगोत्राः मातृपितामही प्रपितामह्यः नांदीमुख्यः भूर्भुवः स्वः इदं वः आसन गंधाद्युपचार कल्पनं स्वाहानामयं च वृद्धिः ॥

अमुकगोत्राः पितृपितामह प्रपितामहाः नांदीमुखाः भूर्भुवः स्वः इदं वः आसन गंधाद्युपचार कल्पनं स्वाहानामयं च वृद्धिः ॥

अमुकगोत्राः मातामह प्रमातामह वृद्धप्रमातामहाः पत्नीसहिताः नांदीमुखाः भूर्भुवः स्वः इदं वः आसन गंधाद्युपचार कल्पनं स्वाहानामयं च वृद्धिः ॥

गणेशाम्बिकयो:भूर्भुवः स्वः इदं वः आसनगंधाद्युपचार कल्पनं स्वाहानामयं च वृद्धिः ॥

इदमर्चितं वो ज्योतिः सूर्योज्योतिः दीपकं ज्योतिः पुष्पं ॥

अस्याभ्युदयिक श्राद्धस्यार्चनविधेः परिपूर्णताऽस्तु

## ॥ अथ ब्राह्मणभोजनं ॥

सत्यवसु संज्ञका विश्वेदेवाः नांदीमुखाः भूर्भुवः स्वः इदं वः युग्म ब्राह्मणभोजन पर्याप्तं दास्यमानमन्नं यथाशक्ति सोपस्करं स्वाहानामयं च वृद्धिः ॥

अमुकगोत्राः मातृपितामही प्रपितामह्यः नान्दीमुख्यः भूर्भुवः स्वः युग्म ब्राह्मणभोजन पर्याप्तं दास्यमानमन्नं यथाशक्ति सोपस्करं स्वाहानामयं च वृद्धिः द्विः ॥

अमुकगोत्राः मातामह प्रमातामह वृद्धप्रमातामहाः पत्नीसहिताः नान्दीमुखाः भूर्भुवः स्वः युग्म ब्राह्मणभोजन पर्याप्तं दास्यमानमन्नं यथाशक्ति सोपस्करं स्वाहानामयं च वृद्धिः द्विः ॥

गणेशाम्बिकयोः भूर्भुवः स्वः युग्म ब्राह्मणभोजन पर्याप्तं दास्यमानमन्नं यथाशक्ति सोपस्करं स्वाहानामयं च वृद्धिःद्विः॥

## ॥ ततो दक्षिणा सङ्कल्पः ॥

सत्यवसु संज्ञका विश्वेदेवाः नान्दीमुखाः भूर्भुवः स्वः संकल्प श्राद्धप्रतिष्ठा सिद्ध्यर्थं द्राक्षामलक निष्क्रयिणीं दक्षिणां वः स्वाहानामयं च वृद्धिः ॥

अमुकगोत्राः मातृपितामही प्रपितामह्यः नांदीमुखाः भूर्भुवः स्वः सङ्कल्प श्राद्धप्रतिष्ठा सिद्ध्यर्थं हरीतक्या निष्क्रयिणीं दक्षिणां वः स्वाहानामयं च वृद्धिः द्विः ॥

अमुकगोत्राः पितृपितामह प्रपितामहाः नान्दीमुखाः भूर्भुवः स्वः सङ्कल्प श्राद्धप्रतिष्ठा सिद्ध्यर्थं रजतं निष्क्रयिणीं दक्षिणां वः स्वाहानामयं च वृद्धिः द्विः ॥

अमुकगोत्राः मातामह प्रमातामह वृद्धप्रमातामहाः पत्नीसहिताः नान्दीमुखाः भूर्भुवः स्वः साङ्कल्प श्राद्धप्रतिष्ठा सिद्ध्यर्थं हिरण्य निष्क्रयिणीं दक्षिणां वः स्वाहानामयं च वृद्धिः द्विः ॥

गणेशाम्बिकयोः भूर्भुवः स्वः श्राद्धप्रतिष्ठा सिद्ध्यर्थं द्राक्षामलक निष्क्रयिणीं दक्षिणां वः स्वाहानामयं च वृद्धिः द्विः ॥

(विश्वेदेवाः प्रीयंतामिति ब्रूहि)

ते देवाः शान्तिदा पुष्टिदा तुष्टिदा वरदा भवन्तु ॥

अद्य आभ्युदयिक श्राद्ध कृतस्य कर्मणो विधेः परिपूर्णताऽस्तु

ॐउपास्मै गायता नरः पवमानायेन्दवे । अभि देवाँर इयक्क्षते ॥१॥ ये त्वाहिहत्त्ये मघवन्नवर्धन्ये शाम्बरे हरिवो ये गविष्टौ । ये त्वा नूनमनुमदन्ति विप्राः पिबेन्द्र सोमꣳ सगणो मरुद्भिः ॥२॥ जनिष्ठाऽउग्रः सहसे तुराय मरायमन्द्रऽ ओजिष्ठो बहुलाभिमानः। अवर्धन्निन्द्रम्मरुतश्चिदत्र माता यद्वीरं दधनद्धनिष्ठा ॥३॥ आ तू नऽ इन्द्र वृत्रहन्नस्माकमर्द्धमा गहि । महान्महीभिरूतिभिः ॥४॥ त्वमिन्द्र प्रतूर्त्तिष्वभि विश्वाऽअसि स्पृधः । अशस्तिहा जनिता विश्वतूरसि त्वं तूर्य तरुष्यतः ॥५॥ अनु ते शुष्मं तुरयन्तमीयतुः क्क्षोणी शिशुं न मातरा । विश्वास्ते स्पृधः श्रथयन्त मन्यवे वृत्रं यदिन्द्र तूर्वसि ॥६॥ यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृडयन्तः । आ वोर्वाची सुमतिर्ववृत्यादꣳ होश्चिद्या वरिवोवित्तरासत् ॥७॥ अदब्धेभिः सवितः पायुभिष्ट्वꣳ शिवेभिरद्य परि पाहि नो गयम् । हिरण्यजिह्वः सुविताय नव्यसे रक्क्षा माकिर्न्नो ऽ अघशꣳ सऽ ईशत ॥८॥

**ततः स्तुतिः**–माता पिता महीचैव तथैव प्रपितामहीः । पिता पितामहश्चैव तथैव प्रपितामहः॥ माता महस्तत्पिता च प्रमाता महकादयः । एते भवंतु सुप्रीताः प्रयच्छन्तु च मङ्गलम् ॥ इडामग्ने पुरुदꣳ सꣳ सनिङ्गोः शश्वत्तमꣳ हवमानाय साध । स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥

**शिवं शिवं इति पात्र टंकार नादं कृत्वा** ॥

अनेन कर्मणा नान्दीमुख देवताः प्रीयन्ताम् वृद्धिः ॥

ते देवाः शान्तिदाः पुष्टिदाः तुष्टिदाः वरदाः भवन्तु ॥

कृतस्य नान्दीश्राद्धस्य विधेर्यन्न्यूनमतिरिक्तं तत्सर्वं भवतां ब्राह्मणानां वचनात् श्रीगणेशाम्बिकयोः प्रसादात् सर्वविधेः परिपूर्णताऽस्तु।

॥ इति नांदी श्राद्धः ॥

**ततो बहि:शालायामागत्य ग्रहयज्ञं समारभेत् ॥** मण्डपवितानाद्यलंकृतं गृहं गोमयादिना लिपेत् ॥ चन्दो बांधवो ॥ (विवाह स्तम्भ गाड़ना व मंडप पूजन करना)

(**अथ मंडप पूजनम्**:-सूर्य संक्रान्ति अनुसार

ईशानकोणे:- सिंह, कन्या, तुला

अग्निकोण:- वृषभ, मिथुन, कर्क

नैऋत्यकोणे:- कुंभ, मीन, मेष

वायव्यकोणे:- वृश्चिक, धन, मकर

**आग्नेयाम्**:-ॐनंदिन्यैनम: आवाहयामि स्थापयामि ॥ **नैऋत्याम्**:-ॐनलिन्यै नम: आवाहयामि स्थापयामि ॥ **वायव्याम्**:- ॐमैत्रायै नम: आवाहयामि स्थापयामि ॥ **ऐशान्याम्**:- उमायै नम: आवाहयामि स्थापयामि ॥ **मध्ये** ॐपशुवर्धिन्यै नम: मंडल मातृका देवताभ्यो नम: ॐनंदिनी नलिनी मैत्रा उमा च पशुवर्धिनी ॥ आग्नेयादि क्रमेणैव शाखा स्तंभे प्रतिष्ठिता: ॥ ॐ मंडपाधिष्ठात्रि देवतायै नम: इति मंडपं गंधादिभि: संपूज्य ॥ सर्वोपचारार्थे गंद्याक्षत पुष्पाणि समर्पयामि ॥

## ॥ आचार्यऋत्विजानां वरणम् ॥

**वरणं कुर्यात्**:-ॐ विष्णु:२ श्रीमद्भगवतो. तिथौ सुतस्य वा सुताया: अमुककर्म प्रारंभनिमित्तं ग्रहयज्ञमहं करिष्ये ॥ ग्रहयज्ञांग भूतेन आचार्यादीनां वरणार्चनं च करिष्ये ॥ ततो यजमानोत्थाय अर्घं गृहीत्वा

**प्रार्थयेत्**:-ॐ आयुरारोग्य पुत्रादि सुखश्री प्राप्तये मम । आपद्विघ्न विनाशाय शत्रुबुद्धि क्षयाय च ॥ विशेष काम्यहोमेतु सहितं समिदादिभि: ॥ नवग्रहमखं देवकर्तुंयूयं प्रसीदथ । स्वागतं भो द्विजा श्रेष्ठामदनुग्रह कारका: ॥ इदमर्घ्यमिदं पाद्यं भवद्भि:

प्रतिगृह्यताम् ॥ अर्घो अर्घो अर्घः यजमानः– प्रतिगृह्यतां आचार्यः– प्रतिगृह्णामि ॥ पुनस्तदर्घं यजमान हस्ते कृत्वा ।

**आचार्यचरणौ प्रक्षालयेत्:**–ॐ यत्फलं कपिलादाने कार्त्तिक्यां ज्येष्ठपुष्करे । तत्फलं पांडवाः श्रेष्ठा विप्राणां पादशौचने ॥ विप्रपाद तलघृष्ट क्षीयमाणस्तु यः करः । स करः कर विज्ञेयः शेषाः कर्म कराः कराः ॥ अस्मिन्ग्रह यज्ञाख्ये कर्मणि अमुक वेदमूर्त्ते आचार्याय एतत्ते पाद्यं पादावनेजनं पादप्रक्षालनं एषोऽर्घः इदमत्र चंदनंच पुष्पं ॥ इति पादौ प्रक्षाल्य तत्पादौ गंधादिभिः संपूज्य ॥

**तिलकं कुर्यात्:**–ॐबृहस्पते ऽअतियदर्य्यो ऽअर्हाद्द्युमद्विभाति क्क्रतुमज्जनेषु। यद्दीदयच्छवस ऽऋृतप्प्रजा ततदस्म्मा सुद्द्रविणन्न्धेहि चित्रम् ॥ ॐ युञ्जते मनऽउत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः । विहोत्रा दधे वयुनाविदेकऽ इन्मही देवस्य सवितुः परिष्टुतिः स्वाहा ॥ ॐइरावती धेनुमती हि भूतꣳ सूयवसिनी मनवे दशस्या । व्यस्कभ्ना रोदसी विष्णवेते दाधर्त्थ पृथिवी मभितो मयूखैः स्वाहा ॥ ॐ नमोस्त्वनंताय सहस्त्रमूर्त्तये सहस्त्रपादाक्षिशिरोरुबाहवे । सहस्त्रनाम्ने पुरुषाय शाश्वते सहस्त्रकोटीयुगधारिणें नमः ॥ ब्रह्मणे अर्चनं प्रीयताम् ॥ गंधाः पांतु सुमंगल्यं चास्तु ॥ अक्षताः पांतु आयुष्यमस्तु ॥ पुष्पाणि पांतु सौश्रियमस्तु ॥ सकलाराधनैः स्वर्चितमस्तु ॥

**यजमानः वरण सामग्रीं गृहीत्वाः–** अद्यैतत्सत्यसंकल्पोक्त फलप्राप्त्यर्थं अमुक प्रवरान्वित अमुक वेदांतरगत अमुक शाखाध्यायिनं अमुक शर्माणं ब्राह्मणं एभिः पूगीफलाक्षत द्रव्यैः आचार्यत्वेन त्वामहं वृणे ॥ वृतोस्मीति प्रत्युक्तिः ॥

**आचार्यहस्ते कंकणं बध्नीयात्:**–ॐ यदाबध्नंदाक्षायणा हिरण्यꣳ शतानीकाय सुमनस्यमानाः । तन्मआबध्नामिशत शारदायायुष्मान् जरदष्टिर्यथासम् ॥

यजमानस्य मस्तकोपरि अक्षतान्विकीरयेत् ॥ **तत्र मंत्र** ॥ ॐ व्रतेन दीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम् । दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते ॥

**यजमानप्रार्थना:**–आचार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः। तथा त्वं मम यज्ञेस्मिन्नाचार्यो भव सुव्रत ॥ यजमानः यथाविहितं कर्म कुरु ॥ आचार्यः यथा ज्ञानतः करवाणि ।

**ब्रह्मा वरणम्:**–अस्मिन्ग्रहयज्ञाख्ये कर्मणि अमुक वेदमूर्त्ते ब्रह्मन् एतत्ते पाद्यं पादावनेजनं पादप्रक्षालनं एषोऽर्घः इदमत्र चंदनंच पुष्पं॥ ॐ यत्फलं कपिलादाने कार्त्तिक्यां ज्येष्ठपुष्करे । तत्फलं पांडवाः श्रेष्ठा विप्राणां पादशौचने ॥ ॥ तत्पादौ गंधादिभिः संपूज्य ॥

**तिलकंकुर्यात्:**–ॐब्रह्मयज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचोवेनऽ आवः । सबुध्न्याऽउपमाऽ अस्यविष्ठाः सतश्च योनिमसतश्च वि वः॥ ॐ नमोस्त्वनंताय सहस्रमूर्त्तये सहस्रपादाक्षिशिरोरुबाहवे । सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः ॥ ॥ गंधाः पांतु सुमङ्गल्यं चास्तु ॥ अक्षताः पांतु आयुष्यमस्तु ॥ पुष्पाणि पांतु सौश्रियमस्तु ॥ सकलाराधनैः स्वर्चितमस्तु ॥ अद्यैतत्सत्यसंकल्पोक्त फलप्राप्त्यर्थं अमुक प्रवरान्वितं अमुकशर्माणं एभिः पूगीफलाक्षतद्रव्यैः ब्रह्मत्वेन त्वामहं वृणे ॥ वृतोस्मि ॥

**कंकणंबध्नीयात्:**–ॐयदाबध्नंदाक्षायणा हिरण्यथं शतानीकाय सुमनस्यमानाः । तन्मआबध्नामि शतशारदायायुष्मान् जरदष्टिर्यथासम् ॥

**यजमानस्य मस्तकोपरि अक्षतान्विकीरयेत्:**–ॐ व्रतेन दीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम् । दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते ॥

**प्रार्थना** ॥ यथा चतुर्मुखो ब्रह्मा स्वर्गे लोके पितामहः । तथात्वं मम यज्ञेस्मिन् ब्रह्मा भव द्विजोत्तम ॥ यथा विहितं कर्म कुरु-करवाणि ॥

**ऋत्विक् वरणम्**:-अस्मिन्ग्रहयज्ञाख्ये कर्मणि ऋत्विक् एतत्ते पाद्यं पादावनेजनं पादप्रक्षालनं एषोऽर्घः इदमत्र चंदनंच पुष्पं ॥ तत्पादौ गंधादिभिः सम्पूज्य ॥ ॐ यत्फलं कपिलादाने कार्त्तिक्यां ज्येष्ठपुष्करे। तत्फलं पांडवाः श्रेष्ठा विप्राणां पादशौचने॥

**तिलकं कुर्यात्** :-ॐ नमोस्त्वनंताय सहस्रमूर्त्तये सहस्र पादाक्षिशिरोरुबाहवे । सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटी युगधारिणे नमः ॥ गंधाः पांतु सुमङ्गल्यं चास्तु ॥ अक्षताः पांतु आयुष्यमस्तु ॥ पुष्पाणि पांतु सौश्रियमस्तु ॥ सकलाराधनैः स्वर्चितमस्तु ॥

अद्यैतत्सत्यसंकल्पोक्त फलप्राप्त्यर्थं अमुक प्रवरान्वितं अमुक वेदांतरगत अमुक शाखाध्यायिनं अमुक शर्माणं ब्राह्मणं एभिः पूगीफलाक्षत द्रव्यैः ऋत्विक्त्वेन त्वामहं वृणे ॥ वृतोस्मि ॥

**कंकणं बध्नीयात्**:-ॐ यदाबध्नंदाक्षायणा हिरण्यछं शतानीकाय सुमनस्यमानाः । तन्मआबध्नामि शतशारदायायुष्मान् जरदष्टिर्यथासम् ॥ ॐ व्रतेन दीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम् । दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते ॥

## ॥ वरण श्राद्धम् ॥

ततो यजमानः स्वपादौ प्रक्षाल्याचम्य वरणश्राद्धं कुर्यात् ॥ आचार्य प्रमुखेभ्यो ब्राह्मणेभ्यः एतद्वः पाद्यंपादावने जनं पादप्रक्षालनं एष वोऽर्घः इदमत्र चंदनं च पुष्पं ॥ स्वस्तिनइंद्रेति दिग्बंधः ॥ ॐ स्वस्ति नऽ इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥ वरुणश्राद्धोपहाराणां पवित्रास्तु ॥ देश-काल-पाक-पात्र-द्रव्य-श्रद्धासंपदस्तु ॥

अद्येत्यादि मासेपक्षेतिथौवासरे अमुककर्मनिमित्तं वरुणश्राद्धमहं करिष्ये ॥

व्रतेभ्यो ब्राह्मणेभ्यः इदमासनं ॥ व्रतेभ्यो ब्राह्मणेभ्यः इदमर्घ्यं ॥ व्रतेभ्यो ब्राह्मणेभ्यः इदमर्चनं ॥ यथादत्तं गंधाद्यर्चनं कुण्डलमुद्रिका वासांसि यज्ञोपवीतं च आचार्यप्रमुखेभ्यश्चाहं संप्रददे ॥ इदमर्चितं वो ज्योतिः सूर्यो ज्योतिर्दीपकं ज्योतिः पुष्पम् । अस्य वरणश्राद्धविधेर्यन्न्यूनमतिरिक्तं तत्सर्वं भवतां ब्राह्मणानां वचनात् विधिवद्भवतु ॥ ततः दधिक्राव्णेति दधि वंदनं ॥ ॐ दधिक्राव्णो अकारिषञ्जिष्णोरश्वस्य वाजिनः । सुरभिनो मुखाकरत्प्रण आयूꣳषितारिषत् ॥ काण्डात्कांण्डादिति दूर्वामार्जनं ॥ ॐ कांडात्कांडात्प्ररोहंती परुषः परुषस्परि ॥ एवानो दूर्वे प्रतनुसहस्रेण शतेन च ॥ ॐ याः फलनीति फलम् ॥ ॐ याः फलिनीर्या अफला अपुष्पायाश्च पुष्पिणीः । बृहस्पति प्रसूतास्तानोमुञ्चंत्वꣳहसः ॥ हिरण्यगर्भेति मुद्रार्पणम् ॥ ॐ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत् । सदाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥

**ॐस्वस्तिनइन्द्रेति यजमानस्य तिलकं कुर्यात् :-**

ॐस्वस्तिनऽइन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्ताक्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥

**यजमानहस्तेरक्षिकां बध्नीयात्:-**

ॐयदाबध्नंदाक्षायणा हिरण्यꣳ शतानीकाय सुमनस्यमानाः । तन्मआबध्नामि शतशारदायायुष्मान् जरदष्टिर्यथासम् ॥ येनबद्धो बलीराजा दानवेन्द्रो महाबलः । तेन त्वां प्रतिबध्नामि रक्षे मा चल मा चल ॥

**यजमानपत्न्याः तिलकं वामहस्ते कंकणं (रक्षिकां) बध्नीयात्:-**

ॐ श्रीश्चते लक्ष्मीश्च पत्क्न्या बहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ ऽव्याप्तम् । इष्णन्निषाणामुम्मऽइषाण सर्वलोकम्मऽइषाण ॥

ॐ तम्पत्नीभिरनुगच्छेम देवाः पुत्रैर्भ्रातृभिरुतवा हिरण्यैः । नाकं गृभ्णानाः सुकृतस्य लोके तृतीये पृष्ठेऽअधि रोचने दिवः ॥

## ॥ पुण्याहवाचनम् ॥

अथ यजमानो स्वलंकृतः दर्भपाणि प्राणानायम्य शुचिर्भूत्वा भद्रासने उदङ्मुखोवोपविश्य, ईशानकोणे सप्तधान्योपरि कलशं संस्थाप्य पुण्यजलैरापूरितं सपल्लवं मृण्मयं ताम्रं सौवर्णं वा तण्डुलनिर्मिताष्टदलोपरि वा संस्थाप्य तदुपरि पञ्चरत्नानि निक्षिप्य पञ्चपल्लवैः कृतशोभं तण्डुलपूरितं सफलं पात्रं निधाय तत्पश्चिमदिग्भागे प्रशस्तप्रतिवचनसमर्थान् शुचीन् सोत्तरीयान् प्राङ्मुखान् दर्भपाणिनः युग्मान् ब्राह्मणान् उपवेश्य तान् गंधपुष्पाक्षतैः सम्पूज्य दक्षिणादिभिरुपतोष्य गणपति स्मरणं कुर्यात् ॥तथा चः-

**संकल्पंकुर्यात्**:-ॐ विष्णुर्विष्णुर्विष्णुः श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य अद्य श्रीब्रह्मणोऽह्नि द्वितीयप्रहरार्धे श्रीश्वेतवाराहकल्पे जम्बूद्वीपे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे भारतवर्षे भरतखण्डे श्रीशालिवाहनशके बौद्धावतारे अस्मिन् वर्तमाने अमुक सम्वत्सरे रवेः अमुक अयने अमुक ऋतौ मासानामुत्तमे मासे अमुक मासे अमुक पक्षे अमुक तिथौ अमुक वासरान्वितायां अमुक गोत्रोत्पन्नोऽहं अमुक शर्माऽहं अमुक कर्मणि श्रीपरमेश्वरप्रीत्यर्थं कलशस्थापनपूर्वकं ब्राह्मणैः सह स्वस्तिपुण्याहवाचनं करिष्ये ।

## ॥ कलशस्थापनप्रयोगः ॥

अथ सप्तधान्योपरि तण्डुलपूरिताष्टदलोऽपरि वा स्थित कलशस्याधारभूतां भूमिं स्पृशेत्

**भूमिं स्पृष्ट्वा**:–ॐ भूरसिभूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री । पृथिवी यच्छ पृथिवीं दृꣳह पृथवीं मा हिꣳसीः ॥ ॐ मही द्यौः पृथिवी च नऽइमं यज्ञम्मिमिक्षताम् पिपृतान्नो भरीमभिः॥

**धान्य प्रक्षेपः**–ॐ धान्यमसि धिनुहि देवान् प्राणाय त्वोदानाय त्वा व्यानाय त्वा । दीर्घामनु प्रसितिमायुषे धां देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना चक्षुषे त्वा महीनां पयोसि ॥ ॐ ओषधयः समवदन्त सोमेन सह राज्ञा । यस्मै कृणोति ब्राह्मणस्त ꣳ राजन्पारयामसि

**कलशस्थापनम्**:–ॐ आजिघ्र कलशं मह्या त्वा व्विशंत्विन्दवः। पुनरुर्ज्जा निवर्त्तस्व सा नः सहस्रं धुक्ष्वोरुधारा पयस्वतीः पुनर्म्माऽऽविशताद्रयिः ॥

**जलपूरणम्**:–ॐ वरुणस्योत्तम्भनमसि व्वरुणस्य स्कम्भसर्ज्जनीस्थो व्वरुणस्यऽऋतसदन्यसि व्वरुणस्यऽ ऋतसदनमसि व्वरुणस्यऽ ऋतसदनमासीद ॥

**गंध प्रक्षेपः**–ॐ त्वां गन्धर्वा अखनँस्त्वामिन्द्रस्त्वां बृहस्पतिः। त्वामोषधे सोमो राजा विद्वान्यक्ष्मादमुच्यत ॥

**सर्वोषधिप्रक्षेपः**–ॐ याऽओषधीः पूर्वाजाता देवेभ्यस्त्रियुगं पुरा। मनै नु बभ्रूणामह ꣳ शतं धामानि सप्त च ॥

**दूर्वा प्रक्षेपः**–ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि। एवा नो दूर्वे प्रतनु सहस्रेण शतेन च ॥

**पंचपल्लवप्रक्षेपः**–ॐ अश्वत्थे वो निषदनं पर्णेवो व्वसतिष्कृता । गोभाजऽ इत्किलासथयत्सनवथ पुरुषम् ॥

**सप्तमृदः प्रक्षेपः**–ॐ स्योना पृथिवि नो भवानृक्षरानिवेशनी । यच्छा नः शर्म्म सप्रथाः ॥

**पूगीफलप्रक्षेपः**–ॐयाः फलिनीर्य्याऽअफलाऽअपुष्पा याश्च पुष्पिणीः । बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्व ꣳ हसः ॥

**पंच रत्न प्रक्षेप**:–परिवाजपतिः कविरग्निर्हव्यान्यक्रमीत् । दधद्रत्नानि दाशुषे ॥

**हिरण्यमुद्रा प्रक्षेप**:–ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् । स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥

**रक्तसूत्रवेष्टनम्**:–ॐ सुजातो ज्योतिषासह शर्म वरूथमासदत्स्वः । वासो अग्नेविश्वरूपꣳ संव्ययस्व विभावसो ॥

**पूर्णपात्रम्**:–ॐ पूर्ण्णादर्व्वि परापत सुपूर्ण्णा पुनरापत । व्वस्नेव व्विक्रीणावहाऽ इषमूर्ज्ज ꣳ शतक्रतो ॥

**श्रीफलं**:–ॐ श्रीश्चते लक्ष्मीश्च पत्क्न्याबहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौऽ व्यात्तम् । इष्णन्निषाणामुंमऽ इषाण सर्वलोकं म ऽ इषाण ॥

**ध्यान आवाहन**:–ॐ तत्त्वा यामि ब्रह्मणा व्वन्दमानस्तदाशास्ते यजमानो हविर्भिः । अहेडमानो व्वरुणेह बोध्युरुश ꣳ समान आयुः प्र मोषीः॥ ॐ भूर्भुवः स्वः अस्मिन् कलशे वरुणं साङ्गम् सपरिवारं सायुधं सशक्तिकं आवाहयामि स्थापयामि ॥

ॐ मनो जूतिर्ज्जुषतामाज्यस्य बृहस्पति र्य्यज्ञमिमन्तनोत्वरिष्टं यज्ञ ठँ समिमन्दधातु । विश्वे देवासऽइह मादयन्तामोउँ॥ म्प्रतिष्ठ ॥ ॐ भूर्भुवः स्वः वरुण देवता सुप्रतिष्ठितो वरदो भव, ॐ भूर्भुवःस्वः अपांपतये वरुणाय नमः, इति वरुणं षोडशोपचारैः सम्पूज्य ततः, अनामिकया कलशं स्पृष्ट्वा अभिमन्त्रयेत् देवता आवाहयेच्च ।

**अक्षतान् प्रक्षेपणम्**:–

कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः । मूले त्वस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥1॥ कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा । ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः ॥2॥ अङ्गैश्च सहिताः सर्वे कलशाम्बु समाश्रिताः । अत्र गायत्री

सावित्री शान्तिः पुष्टिकरी तथा ॥3॥ आयान्तु मम शान्त्यर्थं दुरितक्षयकारकाः ॥ पाशपाणे नमस्तुभ्यं पद्मिनीजीवनायकः । पुण्याहवाचनं यावत् तावत्त्वं सन्निधौ भव ॥

**आसनार्थे पुष्पाणि समर्पयामि** ॥ पादयोः पाद्यं समर्पयामि ॥ हस्तयोः अर्घ्यं समर्पयामि ॥ मुखे आचमनीयं जलं समर्पयामि ॥ सर्वांगे स्नानं समर्पयामि ॥ मिश्रित पंचामृत स्नानं समर्पयामि ॥ शुद्धोदक स्नानं समर्पयामि ॥ वस्त्रं समर्पयामि ॥ यज्ञोपवीतं समर्पयामि ॥ आचमनीयं जलं समर्पयामि उपवस्त्रं समर्पयामि ॥ चन्दनं समर्पयामि ॥ गंधं समर्पयामि ॥ अक्षतान् समर्पयामि ॥ पुष्पाणि समर्पयामि ॥ परिमलद्रव्याणि समर्पयामि ॥ सुगंधितैलं समर्पयामि ॥ धूपं आघ्रापयामि ॥ दीपं दर्शयामि ॥ हस्तौ प्रक्षाल्य ॥ नैवेद्यं निवेदयामि ॥ आचमनीयं जलं समर्पयामि ॥ ऋतुफलं समर्पयामि ॥ ताम्बूलं समर्पयामि ॥ द्रव्यदक्षिणां समर्पयामि ॥ श्रीफलं समर्पयामि ॥ पुष्पआरार्तिकं समर्पयामि तत्त्वायामि इत्यनेन पुष्पाञ्जलिं समर्प्य।

## ।। प्रार्थयेत् ।।

देवदानवसंवादे मथ्यमाने महोदधौ ।
उत्पन्नोऽसि तदा कुम्भः विधृतो विष्णुना स्वयम् ॥
त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः ।
त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ॥
शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः ।
आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः ॥
त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः ।
त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भवः ॥
सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा ।
नमो नमस्ते स्फटिकप्रभाय, सुश्वेतहाराय सुमङ्गलाय ।
सपाशहस्ताय झषासनाय, जलाधिनाथाय नमो नमस्ते ॥1॥

प्रार्थना पूर्वकं नमस्कारान् समर्पयामि ॥ अनेन पूजनेन अपांपतिर्वरुण प्रीयताम् ।

## ॥ ब्राह्मण वरण ॥

अत्र युग्मब्राह्मणान् अन्यूनचतुरान् संस्थाप्य तथा अर्घं संस्थाप्य देशकालौ संकीर्त्य अमुकगोत्रः अमुकशर्माऽहं अमुक कर्मणि सर्वाभ्युदयप्राप्तये ब्राह्मणैः पुण्याह वाचयिष्ये । तदङ्गतया चतुर्वर्णां ब्राह्मणानां पूजन वरणं च करिष्ये । **ब्राह्मणेभ्यो तिलक मन्त्रः-**

नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः ॥1॥

एभिर्गन्धाक्षतैः पुष्पपूगीफलद्रव्यैः अमुककर्म्मणि सर्वाभ्युदयप्राप्तये पुण्याहवाचनार्थं अमुकनामानं ब्राह्मणं त्वामहं वृणे । ब्राह्मणः- 'वृतोस्मि' प्रतिवदेत् । एवं क्रमेण प्रत्येकं वृणुयात् ॥

सम्पूज्य गन्धमाल्याद्यै र्ब्राह्मणान्स्वस्ति वाचयेत् ।
धर्मकर्म्मणि माङ्गल्ये संग्रामेऽद्भुतदर्शने ॥1॥
पुण्याहवाचनं दैवं ब्राह्मणस्य विधीयते ।
एतदेव निरोङ्कारं कुर्यात्त् क्षत्रिय वैश्ययोः ॥2॥

**अथ यजमानः-** अवनि कृत जानु मण्डलः, (भूमौ दक्षिणजानुं पातयित्वा) कमल मुकुल सदृशमञ्जलिं शिरस्याधाय दक्षिणेन पाणिना ।

आचार्यः- दक्षिणेन पाणिना सुवर्ण पूर्णकलशं धारयित्वा ॥

यजमानः- आशिषः

**प्रार्थयेत्-** दीर्घा नागा नद्यो गिरयस्त्रीणि विष्णुपदानि च, तेनायुः प्रमाणेन पुण्यं पुण्याहं दीर्घमायुरस्तु' इति भवन्तो ब्रुवन्तु ।

विप्राः-ॐ तेन आयुः प्रमाणेन पुण्यं पुण्याहं दीर्घमायुरस्तु ।

यजः- अपां मध्येस्थिता देवाः सर्वमप्सु प्रतिष्ठितम् ।
ब्राह्मणानां करे न्यस्ताः शिवा आपो भवन्तु मे । शिवा आपः सन्तु ।

विप्राः–ॐ सन्तु शिवा आपः ।
यजः–लक्ष्मी र्वसति पुष्पेषु लक्ष्मी र्वसति पुष्करे ।
सा मे वसतु वै नित्यं सौमनस्यं तथास्तु नः॥ ॐ सौमनस्यमस्तु।
विप्राः–ॐ अस्तु सौमनस्यम् ॥
यजः–अक्षतं चास्तु मे पुण्यं दीर्घमायुर्यशो बलम् ।
यद्यच्छ्रेयस्करं लोके तत्तदस्तु सदा मम ॥ ॐ अक्षतं चारिष्टं चास्तु ।
विप्राः–अस्त्वक्षतमरिष्टं च ।
यजः–गन्धप्रदेयो देवानामपत्यः पुष्टिदश्च नः ।
गन्धद्वारां दुराधर्षांमिति मन्त्रेण भक्तितः॥ गन्धाः पान्तु,
विप्राः–ॐ अस्तु सौमङ्गलम् ॥
यजः– ॐ पुष्पाणि पान्तु । विप्राः– ॐ सौश्रियमस्तु ।
यजः– ॐ ताम्बूलानि पान्तु । विप्राः ॐ ऐश्वर्यमस्तु ।
यजः– ॐ पूगीफलानि पान्तु । विप्राः– ॐ बहुफलमस्तु ।
यजः– ॐ दक्षिणाः पान्तु । विप्राः– बहुदेयं चास्तु ।
यजः– दीर्घमायुः श्रेयः शान्तिः पुष्टिः तुष्टिः श्रीर्यशो विद्या विनयो वित्तं चास्तु ।
विप्राः–ॐ बहुपुत्रं चायुष्यं चास्तु ।
यजः– यं कृत्वा सर्ववेदयज्ञक्रियाकरणकर्मारम्भाः शुभाः शोभनाः प्रवर्तन्ते तमहमोंकारमादिं कृत्वा ऋग्यजुः सामाथर्वाशीर्वचनं बहुऋषिमतं समनुज्ञातं भवद्भिरनुज्ञातः पुण्यं पुण्याहं वाचयिष्ये ।
विप्राः– वाच्यताम् ।
(ब्राह्मणानां हस्तेष्वक्षतान् दद्यात्) अथाशीर्वादः–
(आशीर्वादात्मकान् इमान् मन्त्रान् पठेयुः)
विप्राः–ॐभद्रं कर्णेभिः श्रृणुयाम देवा भद्रं पश्येमाक्षभिर्य्यजत्राः । स्थिरैरङ्गैस्तुष्टुवा ꣳ सस्तनूभिर्व्यशे महि देवहितं य्यदायुः ॥

ॐ द्रविणोदा: पिपीषति जुहोत प्रचतिष्ठत । नेष्ट्राद्दतुभिरिष्यत ॥ ॐ सविता त्वा सवाना ꣳ सुवतामग्निर्गृहपतीना ꣳ सोमो वनस्पतीनाम् ॥ बृहस्पतिर्व्वाचऽइन्द्रो ज्यैष्ठ्याय रुद्र: पशुभ्यो मित्र: सत्यो वरुणो धर्मपतीनाम् ॥ ॐ न तद्रक्षा ꣳ सि न पिशाचास्तरंति देवानामोज: प्रथमज ꣳ ह्येतत् । यो बिभर्तिदाक्षायण ꣳ हिरण्य ꣳ स देवेषु कृणुते दीर्घमायु: स मनुष्येषु कृणुते दीर्घमायु: ॥ ॐ उच्चा ते जातमन्धसो दिवि सद् भूम्या ददे । उग्र ꣳ शर्म महि श्रव: ॥

यज:–व्रत जप नियम तप: स्वाध्याय क्रतुदयादमदान विशिष्टानां सर्वेषां ब्राह्मणानां मन: समाधीयताम् ॥

विप्रा:– समाहितमनस: स्म: ।

यज:– प्रसीदन्तु भवन्त : विप्रा:–प्रसन्ना स्म: ।

(प्रथम पात्रे जलं पूर्येत्)

ॐ शान्तिरस्तुपुष्टिरस्तु तुष्टिरस्तु वृद्धिरस्तुऋद्धिरस्तु अविघ्नमस्तु आयुष्यमस्तु आरोग्यमस्तु शिवमस्तु शिवं कर्मास्तु कर्मसमृद्धिरस्तु वेदसमृद्धिरस्तु शास्त्रसमृद्धिरस्तु पुत्रपौत्रंसमृद्धिरस्तु धनधान्यसमृद्धिरस्तु इष्टसम्पदस्तु (भूमौ) अनिष्ट निरसनमस्तु यत्पापं रोगमशुभमकल्याणं तद्दूरे प्रतिहत मस्तु यच्छ्रेयस्तदस्तु (पुन: पात्रे) उत्तरे कर्मणि निर्विघ्नमस्तु उत्तरोत्तर महरहरभिवृद्धिरस्तु उत्तरोत्तरा: क्रिया: शुभा: शोभना:सम्पद्यन्ताम् । तिथि करण मुहूर्त नक्षत्र सम्पदस्तु तिथि करण मुहूर्त नक्षत्र ग्रह लग्नाधिदेवता: प्रीयन्ताम् तिथिकरणे सुमुहूर्ते सुनक्षत्रे सुग्रहे सुलग्ने सुदैवते प्रीयेताम् दुर्गापाञ्चाल्यौ प्रीयेताम् अग्निपुरोगा विश्वेदेवा: प्रीयन्ताम् इन्द्रपुरोगा: मरुद्गणा: प्रीयन्ताम् वसिष्ठपुरोगा ऋषिगणा: प्रीयन्ताम् माहेश्वरीपुरोगा उमामातर: प्रीयन्ताम् अरुन्धतीपुरोगा एकपत्न्य: प्रीयन्ताम्ऋषय: छन्दासाचार्या

वेदा: यज्ञाश्च प्रीयन्ताम् विष्णुपुरोगा: सर्वे देवा:
प्रीयन्ताम् ब्रह्मपुरोगा: सर्वे वेदा: प्रीयन्ताम् आदित्यपुरोगा:
सर्वेग्रहा: प्रीयन्ताम् ब्रह्म च ब्राह्मणाश्च प्रीयन्ताम्
श्रीसरस्वत्यौ प्रीयेताम् श्रद्धामेधे प्रीयेताम् भगवती
कात्यायनी प्रीयताम् भगवती माहेश्वरी प्रीयताम् भगवती
ऋद्धिकरी प्रीयताम् भगवती वृद्धिकरी प्रीयताम् भगवती
सिद्धिकरी प्रीयताम् भगवती पुष्टिकरी प्रीयताम् भगवती
तुष्टिकरी प्रीयताम् भगवन्तौ विघ्नविनायकौ प्रीयेताम्
भगवान् स्वामी महासेन: सपत्नीक: ससुत: सपार्षद:
सर्वस्थानगत: प्रीयताम् हरिहरहिरण्यगर्भा: प्रीयन्ताम्
सर्वा: कुलदेवता: प्रीयन्ताम् सर्वा ग्रामदेवता: प्रीयन्ताम्
सर्वा: इष्टदेवता: प्रीयन्ताम् (भूमौ) हताश्च ब्रह्मद्विष:
हताश्च परिपन्थिन: हताश्चास्यकर्मणो विघ्नकर्तार: शत्रव:
पराभवं यान्तु शाम्यन्तु घोराणि शाम्यन्तु पापानि शाम्यन्तु
ईतय: शुभानि वर्द्धन्ताम् ॥

(पुन: प्रथम पात्रे)

शिवा आप: सन्तु शिवा ऋतव: सन्तु शिवा अग्नय: सन्तु
शिवा आहुतय: सन्तु शिवा ओषधय: सन्तु शिवा वनस्पतय:
सन्तु शिवा अतिथय: सन्तु अहोरात्रे शिवे स्याताम्
ॐ निकामे निकामे न: पर्ज्जन्यो वर्षतु फलवत्यो
नऽओषधय: पच्यन्तां योगक्षेमो न: कल्पन्ताम् ॥
शुक्राङ्गारक बुध बृहस्पति शनैश्चर राहु केतु सोम सहिता:
आदित्यपुरोगा: सर्वेग्रहा: प्रीयन्ताम् । विप्रा: ॐ अस्तु
यज:- ॐ भगवान् नारायण: प्रीयताम् ॐ भगवान् पर्ज्जन्य:
प्रीयताम् ॐभगवान् स्वामी महासेन प्रीयताम्
याज्यया यत्पुण्यं तदस्तु वषट्कारेण यत्पुण्यं तदस्तु प्रात:
सूर्योदये यत्पुण्यं तदस्तु एतत् कल्याणयुक्तं पुण्यं

पुण्याहं वाचयिष्ये ।

विप्रा:- वाच्यताम्

यज:- ब्राह्मं पुण्यमहर्यच्च सृष्ट्युत्पादनकारणम् ।
वेदवृक्षोद्भवं नित्यं तत्पुण्याहं ब्रुवन्तु नः ॥१॥

भो ब्राह्मणा: मम सकुटुम्बस्य सपरिवारस्य गृहे करिष्य माणस्य अमुक कर्मण: पुण्याहं भवन्तो ब्रुवन्तु।

विप्रा:- ॐ पुण्याहम् ॐ पुण्याहम् ॐ पुण्याहम् ।

ॐ पुनन्तु मा देवजना: पुनन्तु मनसा धिय: । पुनन्तु विश्वा भूतानि जातवेद: पुनीहि मा ॥

यज:- पृथिव्यामुद्धृतायान्तु यत्कल्याणं पुराकृतम् ।
ऋषिभि: सिद्धगन्धर्वैस्तत्कल्याणं ब्रुवन्तु नः ॥२॥

भो ब्राह्मणा: मम सकुटुम्बस्य सपरिवारस्य गृहे करिष्य माणस्य अमुक कर्मण: कल्याणं भवन्तो ब्रुवन्तु।

विप्रा:-ॐ कल्याणम् ॐ कल्याणम् ॐ कल्याणम् ॥

ॐ यथेमां वाचं कल्याणीमा वदानि जनेभ्य: । ब्रह्मराजन्याभ्याꣳ शूद्राय चार्य्याय च स्वाय चारणाय च । प्रियो देवानां दक्षिणायै दातुरिह भूयासमयम्मे काम: समृद्ध्यतामुप मादो नमतु ॥

यज:-सागरस्य तु या ऋद्धि (वृद्धि) र्महालक्ष्म्यादिभि: कृता।
सम्पूर्णा सुप्रभावा च तां च ऋद्धिं ब्रुवन्तु नः ॥३॥

भो ब्राह्मणा: मम सकुटुम्बस्य सपरिवारस्य गृहे करिष्य माणस्य अमुक कर्मण: ऋद्धिं भवन्तो ब्रुवन्तु। ।

विप्रा:-ॐ ऋद्ध्यताम् । ॐ ऋद्ध्यताम् । ॐ ऋद्ध्यताम् ॥

ॐसत्रस्य ऋद्धिरस्यगन्म ज्योतिरमृताऽअभूम । दिवं पृथिव्याऽ अध्यारुहामाऽ विदाम देवान्स्वर्ज्योति: ॥

यज:-स्वस्तिस्तुयाऽ विनाशाख्या पुण्यकल्याणवृद्धिदा ।
विनायकप्रिया नित्यं तां च स्वस्तिं ब्रुवन्तु नः ॥४॥

भो ब्राह्मणाः मम सकुटुम्बस्य सपरिवारस्य गृहे करिष्य माणस्य अमुक कर्मणः स्वस्ति भवन्तो ब्रुवन्तु।

विप्राः-ॐ स्वस्ति ॐ स्वस्ति ॐ स्वस्ति ॥

ॐस्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥

यजः-मृकण्डसूनोरायुर्यद् ध्रुवलोमशयोस्तथा ।
आयुषा तेन संयुक्ता जीवेम शरदः शतम् ॥५॥

विप्राः-ॐ शतं जीवन्तु भवन्तः ।

ॐ शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम् ।
पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः ॥

यजः-शिव गौरी विवाहे या या श्रीरामे नृपात्मजे ।
धनदस्य गृहे या श्रीरस्माकं सा ऽस्तु सद्मनि ॥६॥

भो ब्राह्मणाः मम सकुटुम्बस्य सपरिवारस्य गृहे करिष्य माणस्य अमुक कर्मणः श्रीरस्तु भवन्तो ब्रुवन्तु।

विप्राः-ॐ अस्तु श्रीः । ॐ अस्तु श्रीः । ॐ अस्तु श्रीः ॥

ॐ मनसः काममाकूतिं वाचः सत्यमशीय । पशूनाꣳ रूपमन्नस्य रसो यशः श्रीः श्रयतां मयि स्वाहा ॥

यजः-प्रजापतिर्लोकपालो धाता ब्रह्मा च देवराट् ।
भगवान् शाश्वतो नित्यं स नो रक्षतु सर्वतः ॥७॥

भो ब्राह्मणाः मम सकुटुम्बस्य सपरिवारस्य गृहे करिष्य माणस्य अमुक कर्मणः भगवान् प्रजापतिः प्रीयताम् ।

विप्राः-ॐ भगवान् प्रजापतिः प्रीयताम् (इति त्रिः)

ॐ प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परिता बभूव ।
यत्कामास्ते जुहुमस्तन्नो अस्तु वयꣳ स्याम पतयो रयीणाम् ॥

यजः-आयुष्मते स्वस्ति मते यजमानाय दाशुषे ।

क्रियेरन्नाशिषः सन्तु ऋत्विग्भिर्वेदपारगैः ॥८॥
देवेन्द्रस्य यथा स्वस्ति यथा स्वस्ति गुरोर्गृहे ।
एकलिङ्गे यथा स्वस्ति तथा स्वस्ति सदा मम। ।९॥

भो ब्राह्मणाः मम गृहे अस्य.....कर्मणः आयुष्मते स्वस्तिं भवन्तो ब्रुवन्तु ।

विप्राः-ॐ आयुष्मते स्वस्ति (इति त्रिः) (तिलकं कुर्यात्)

**यजमानस्य मस्तकोपरि अभिषेकं कुर्यात्ः-**

ॐ आपोहिष्ठामयो भुवस्तान ऽऊर्जेदधातन ॥ महेरणाय चक्षसे ॥ यो वः शिवतमो रसस्तस्यभाजयते हनः॥ उशतीरिवमातरः॥ तस्माऽअरङ्गमामवोयस्यक्षयायजिन्वथ ॥ आपोजनयथाचनः ॥ द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥ इति अभिषेकः॥

**अथ आशीर्वादः-**

ॐविश्वानि देवसवितर्दुरितानि परासुव । यद्भद्रं तन्नऽ आसुव॥

मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः ।
शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयस्तव ॥१॥
ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः ।
ब्रह्मवक्त्रे सदा नित्यं निघ्नन्तु तव शत्रवान् ॥२॥
अक्षतान्विप्रहस्तात्तु नित्यं गृह्णन्ति ये नराः ।
चत्वारि तेषां वर्द्धन्ते आयुः मेधा यशो बलम् ॥३॥
श्रीर्वर्चस्वमायुष्यमारोग्यमाविधात्पवमानं महीयते ।
धान्यं धनं बहुपशुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥
आयुष्कामो यशस्कामो पुत्र पौत्रस्तथैव च ।
आरोग्यं धनकामश्च सर्वे कामा भवन्तु ने ॥

स्वस्त्यस्तु ते कुशलमस्तु चिरायुरस्तु गोवाजि हस्ति धनधान्य समृद्धिरस्तु ।

ऐश्वर्यमस्तु बलमस्तु रिपुक्षयोस्तु वंशे सदैव भवताम्
हरिभक्तिरस्तु ॥

**ॐअद्य:**–कृतैतत्पुण्याह वाचन कर्मण: साङ्गता सिद्ध्यर्थं तत्सम्पूर्ण फल प्राप्त्यर्थं च पुण्याह वाचकेभ्यो ब्राह्मणेभ्यो यथाशक्ति मनसोद्दिष्टां दक्षिणां विभज्य दातुमह मुत्सृजे।

अस्मिन् पुण्याहवाचने न्यूनातिरिक्तो यो विधि: स उपविष्ट ब्राह्मणानाम् वचनात् श्री महागणपति प्रसादाच्च परिपूर्णोऽस्तु अस्तु परिपूर्ण: ॥

ततो नालिकेरं तदुपरि कटि निबद्ध पूगीफलं धृत्वा,

प्रार्थना:–ब्राह्मणा: सन्तु शास्तार: पापात्पान्तु समाहिता: ।
देवानाम् चैव दातार: पातार: सर्व देहिनाम् ॥
जप यज्ञैस्तथा होमैदनैश्चविविधै शुभै:।
देवानाञ्च पितृणाञ्च तृप्त्यर्थं याचका: स्मृता ॥
येषान्देहे स्थिता देवा पावयन्ति जगत्त्रयम् ।
ते मां रक्षन्तु सततं जपयज्ञे व्यवस्थिता: ॥
अक्रोधना: शौच परा: सततं ब्रह्मचारिण: ।
जप ध्यानपरानित्यं प्रसन्ना: सन्तु सर्वदा ॥
माश्लेष भाषणा: सन्तु मासन्तु पर निन्दका: ।
ममाप्येते हि नियमा: भवन्तु सततं द्विजा: ॥
अस्य यागस्य निष्पत्तौ भवन्तोऽभ्यर्चिता मया ।
सुप्रसादं प्रकर्त्तव्यं शान्तिकं विधिपूर्वकम् ॥

## ॥ यज्ञ रक्षा विधान ॥

**ततो रक्षासामग्रीं गृहीत्वा** ॥ तद्यथा ॥
यवान्कुशांस्तथा दूर्वा सर्षपान्गंध संयुतान् । गोमयं दधिसंयुक्तं कारयेत्ताम्रभाजने ॥ तद्भाजनं करपुटे धृत्वा मंत्रान् पठेत् ॥
**(अभिमन्त्रित करे)**

गणाधिपं नमस्कृत्य नमस्कृत्य पितामहम् ।
विष्णुं रुद्रं श्रियं देवीं वन्दे भक्त्या सरस्वतीम् ॥
स्थान क्षेत्रं नमस्कृत्य दिननाथं निशाकरं ।
धरणी गर्भ संभूतं शशिपुत्रं बृहस्पतिम् ॥
दैत्याचार्यं नमस्कृत्य सूर्यपुत्रं महाग्रहम् ।
राहुकेतुं नमस्कृत्य यज्ञारंभे विशेषतः ॥
शक्राद्या देवताः सर्वा मुनींश्च कथयाम्यहम् ।
गर्गं मुनिं नमस्कृत्य नारदं मुनि सत्तमम् ॥
वशिष्ठं मुनिशार्दूलं विश्वामित्रं महामुनिम् ।
व्यासं कविं नमस्कृत्यं सर्वशास्त्र विशारदं ॥
सर्वे नमस्कृतास्ते मे यज्ञं रक्षंतु तत्पराः ॥ रक्षोहणं० २०पृष्ठे

**गौरसर्षपान् विकीरयेत्** ॥ **(दसों दिशाओं में पीली सरसों छोड़े)**

पूर्वे रक्षतु गोविन्दः आग्नेयां गरुडध्वजः ।
याम्ये रक्षतु वाराहो नारसिंहस्तु नैऋते ॥
केशवो वारुणीं रक्षेद्वायव्यां मधुसूदनः ।
उत्तरं श्रीधरो रक्षेदीशाने च गदाधरः ॥
ऊर्ध्वं गोवर्धनोरक्षेद्धरायां च त्रिविक्रमः ।
एवं दशदिशोरक्षेद्वासुदेंव जनार्दनः ॥
यज्ञाग्रे रक्षकः शंखः पृष्ठे पद्मं हि रक्षतु ।
वामपार्श्वे गदा रक्षेद्दक्षिणे च सुदर्शनः ॥
उपेन्द्रः पातु ब्रह्माणं आचार्यं पातु वामनः ।
अच्युतोऽवतु ऋग्वेदं यजुर्वेदमधोक्षजः ॥

कृष्णो रक्षतु सामाख्यमथर्वाणं च माधवः ।
विप्रान्चोपद्दष्टान्तान् सदा दामोदरोऽवतु ॥
यजमानं सपत्नीकं पुंडरीकाक्षश्च रक्षतु ॥
अथ भूतोत्सादनं ॥ **तत्र मंत्रौः-**
यदत्र संस्थितं भूतं स्थानमाश्रित्य देवताः । स्थानंत्यक्त्वातु सर्वत्र यत्रस्थं तत्र गच्छतु ॥ अपक्रामंतु भूतानि पिशाचाः सर्वतो दिशं । सर्वेषामविरोधेन शान्तिकर्म समारभेत् ॥
ततो मंत्रवत्पंच गव्यं संपाद्य ॥ गायत्र्या गोमूत्रं ॥ गंधद्वारेति गोमयं ॥ आप्यायस्वेति क्षीरं ॥ दधिक्राव्णेति दधि ॥ घृतंमिमिक्षेति घृतं ॥ आपोहिष्ठेति कुशोदकं ॥ प्रणवेन यज्ञियकाष्ठेन निर्मंथ्यालोढ्यश्च ॥ प्रणवेनाष्टवारमभिमंत्र्य ॥ आपोहिष्ठेति यागभूमिं सर्वतश्च संप्रोक्षयेत् ॥ **पञ्चगव्यमात्रा** ॥ (पलो में) गौमूत्र-१६, गौमय-३२, पय-१२, दधि-२४, गौघृत-१६ ॥

## ॥ कुण्डपूजनम् ॥

**आचार्यः**-आचार्यानुज्ञयाकश्चिद्विप्रः कुण्डपश्चिमतः उपविशेत् ॥ पुष्पांजलिं गृहीत्वा स्वस्तिनइन्द्रेति वेद्युपरि क्षिपेत् ॥ देवा आयांतु ॥ यातुधानाअपयांतु ॥ विष्णो देवयजनं रक्षस्व ॥
**संकल्पः**-तत्सदद्यादि-अमुक यागाख्ये अग्निस्थापनं कर्मणि अंगतया सम्मार्जन, मेखला योनिकंठनाभिप्रभृति देवतानां पूजनपूर्वकं पञ्चभूसंस्कारादि अग्नि स्थापनं पूजनं च करिष्ये॥
**कुशोदकेन कुण्डं संप्रोक्षयेत्ः-**
ॐ आपोहिष्ठामयो भुवस्तान ऽ ऊर्जेदधातन ॥ महेरणाय चक्षसे ॥ यो वः॑शिवतमो रसस्तस्यभाजयते हनः॑॥ उशतीरिवमातरः॑॥ तस्माऽअरङ्गमामवोयस्यक्षयायजिन्वथ ॥ आपोजनयथाचनः ॥
**ततो हस्ते पुष्पाण्यादाय कुण्डं स्पृष्ट्वा आवाहयेत् ॥**
आवाहयामि तत्कुण्डं विश्वकर्मविनिर्मितम् ॥

शरीरं यच्चते दिव्यमग्रधिष्ठानमद्भुतम् ॥

भूर्भुवः स्वः कुण्डाय नमः । पुष्पाणि कुण्डोपरि निक्षिपेत् ॥

**प्रार्थनाः–**

ये च कुण्डे स्थिता देवाः कुंडाङ्गे याश्च देवताः ।

ऋद्धिं यच्छन्तु ते सर्वे यज्ञसिद्धिं मुदान्विताः ॥

हे कुण्ड तव रूपं तु रचितं विश्वकर्मणा ।

अस्माकं वाञ्छितां सिद्धिं यज्ञसिद्धिं ददस्व च ॥

**कुण्डमध्ये विश्वकर्मण पूजनम्ः–**ॐविश्वकर्म्मन्हविषा वर्द्धनेन त्रातारमिन्द्रमकृणोरवध्यम् । तस्मै विशः समनमन्त पूर्वीरयमुग्रो विहव्यो यथासत् । उपयामगृहीतोऽसीन्द्राय त्वा विश्वकर्म्मणऽ एषते योनिरिन्द्राय त्वा विश्वकर्म्मणे ॥ ॐ विश्वकर्मणे नमः। विश्वकर्माणमावाहयामि स्थापयामि ॥ सर्वोपचारार्थे गंधाक्षतपुष्पाणि समर्पयामि ॥

**प्रार्थयेत्ः–**अज्ञानतो ज्ञानतो वापि दोषा ये खननोद्भवाः ।

नाशयत्वखिलाँस्ताँस्तु विश्वकर्मन् नमोऽस्तुते ॥

**१–मेखलापूजनम् प्रथम श्वेतवर्ण मेखलायांः–** ॐइदं व्विष्णु र्व्विचक्रमे त्रेधा निदधेपदम् । समूढमस्यपा ᳪ सुरेस्वाहा ॥ ॐभूर्भुवः स्वः विष्णवे नमः । विष्णुमावाहयामि स्थापयामि ॥ सर्वोपचारार्थे गंधाक्षतपुष्पाणि समर्पयामि ॥

**२–मध्यरक्तवर्णमेखलायाम्ः–**ॐब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचोव्वेनऽ आवः । सबुध्न्या ऽ उपमाऽअस्यविष्ठाः सतश्च योनिमसतश्चव्विवः ॥ ॐ भूर्भुवः स्वः ब्रह्मणे नमः । ब्रह्माणमावाहयामि स्थापयामि ॥ सर्वोपचारार्थे गंधाक्षतपुष्पाणि समर्पयामि ॥

**३–तृतीयकृष्णवर्णं मेखलायांः–**ॐ नमस्ते रुद्रमन्यव उतोतइषवे नमः । बाहुभ्यामुतते नमः ॥ ॐ भूर्भुवः स्वः रुद्राय नमः ।

रुद्रमावाहयामि स्थापयामि ॥ सर्वोपचारार्थे गंधाक्षतपुष्पाणि समर्पयामि ॥

**४-योनिपूजनम्ः-प्राक् योन्यां गौरीं पूजयेत्ः**-ॐअम्बे अम्बिकेऽम्बालिके न मा नयति कश्चन । ससस्त्यश्वकः सुभद्रिकां काम्पील वासिनीम्॥ ॐ भूर्भुवः स्वः गौर्यै नमः । गौरीमावाहयामि स्थापयामि ॥ ॐक्षत्रस्य योनिरसि क्षत्रस्य नाभिंरसि । मात्वा हि ठं सीन्मामाहिर्ठ सीः॥ ॐ भूर्भुवः स्वः योन्यै नमः । योनिमावाहयामि स्थापयामि॥ योन्युपरि **दक्षिणे गोलार्धे**-सूर्याय नमः । **उत्तरगोलार्धे** चन्द्रमसे नमः । सर्वोपचारार्थे गंधाक्षतपुष्पाणि समर्पयामि ॥

**प्रार्थनाः**-सेवन्ते महतीं योनिं देवर्षिसिद्धमानवाः ।
चतुरशीतिलक्षाणि पन्नगाद्या सरीसृपा ॥
पशवः पक्षिणः सर्वे संसरन्ति यतो भुवि ।
योनिरित्येव विख्याता जगदुत्पत्तिहेतुकाः॥
योने त्वं विश्वरूपाऽसि प्रकृतिर्विश्वधारिणी ।
कामस्था कामरूपा च विश्वयोन्यै नमो नमः॥

**५-कण्ठपूजनम्ः**-ॐनीलग्रीवाः शितिकण्ठा दिवॐ रुद्राऽउपश्रिताः । तेषाॐ सहस्रयो जनेव धन्वानितन्मसि ॥ ॐभूर्भुवः स्वः कण्ठेरुद्राय नमः । रुद्रमावाहयामि स्थापयामि ॥ सर्वोपचारार्थे गंधाक्षतपुष्पाणि समर्पयामि ॥

**प्रार्थनाः**-कण्ठ मंगलरूपेण सर्वकुण्डे प्रतिष्ठितः ।
परितोमेखलास्त्वत्तो रचिता विश्वकर्मणा ॥

**६-नाभिपूजनम्ः**-ॐनाभिर्मे चित्तं विज्ञानं पायुर्मेऽ पचितिर्भसत् । आनन्दनन्दावाण्डौ मे भगः सौभाग्यं पसः । जङ्घाभ्यां पद्भ्यां धर्मोऽस्मि विशि राजा प्रतिष्ठितः॥ ॐभूर्भुवः स्वः नाभ्यै नमः । नाभिं आवाहयामि स्थापयामि ॥
सर्वोपचारार्थे गंधाक्षतपुष्पाणि समर्पयामि ॥

**प्रार्थना:**– नाभे त्वं कुंडमध्ये तु देवैः सह प्रतिष्ठिता ।
अतस्त्वां पूजयामीह शुभदा सिद्धिदा भव ॥

**कुंडमध्ये नैर्ऋत्य कोणे वास्तुपूजनम्:**–ॐवास्तोष्पते प्रतिजानी ह्यस्मान्स्वावेशो अनमीवो भवानः । यत्वेमहे प्रतितन्नो जुषस्वशन्नो अस्तु द्विपदे शं चतुष्पदे ॥ ॐभूर्भुवः स्वः वास्तुपुरुषाय नमः । वास्तुपुरुषमावाहयामि स्थापयामि ॥ सर्वोपचारार्थे गंधाक्षतपुष्पाणि समर्पयामि ॥

**प्रार्थना:**–वास्तुपुरुष देवेश सर्वविघ्नहरो भव ।
शान्तिं कुरु सुखं देहि सर्वकामान्प्रयच्छ मे ॥

कुण्डपुरतः एकस्मिन्पात्रे बलिदानार्थं दध्योदनं संस्थाप्य बलिदानं कुर्यात् ॥

**हस्ते जलं गृहीत्वा:**–ॐभूर्भुवः स्वः वास्तुपुरुषाय नमः अमुं दध्योदनबलिं समर्पयामि ॥

अनेन पूजन पूर्वक बलिदानेन वास्तुपुरुषः प्रीयतां न मम ॥

## ॥ कुशकाण्डिका ॥

**संकल्पः**–अत्राद्य. अमुक गोत्रस्य यजमानस्य अमुक कर्मांगतभूतं अस्मिन्स्थंडिले पंचभूसंस्कार पूर्वकमग्निं स्थापनं करिष्ये ॥ त्रिभिर्दर्भैः परिसमुह्य ३ तान्कुशानैशान्यां क्षिप्त्वा ॥ गोमयेनोपलिप्य ३ ॥ स्रुवेणोल्लिख्य ३ मध्ये प्रदेशमात्रमुत्तरोत्तर क्रमेण स्रुवमूलेन त्रिरुल्लिख्य ॥ उल्लेखन क्रमेणोद्धृत्य दक्षिणानामिकांगुष्ठाभ्यां ईशान्यां क्षिपेत् ॥ कुशोदकेनाभ्युक्ष्य ३ ॥ सौभाग्यवत्या काँस्यपात्र द्वय संपुटितेन तमग्निमानीयमात्माभिमुखेअग्निकोणे प्रतिष्ठाप्य ॥ तस्मादाचार्यः हुँ फट् इति मंत्रेण क्रव्यादांशं नैर्ऋत्यां क्षित्वा तस्योपरि अक्षतान् विकीरयेत् ॥ आच्छादनं दूरीकृत्य ॥ आत्माभिमुखमग्निं स्थापयेत् ॥

ॐअग्निन्दूतं पुरोदधे हव्य वाहमुपब्रुवे । देवाँ २॥ आ सादयादिह ॥ ॐआवो देवासऽईमहे वामं प्रयत्य ध्वरे । आवो देवास ऽ

आशिषो यज्ञियासो हवामहे ॥ इत्यग्निमुपसमाधाय ॥

**अथावाहनं** ॥ रुद्र तेजस समुद्भूतं द्विमूर्द्धानं द्विनासिकं । षण्नेत्रं च चतुः श्रोत्रं त्रिपादं सप्तहस्तकम् ॥ याम्यभागे चतुर्हस्तं सव्यभागे त्रिहस्तकम् । स्रुवं स्रुचिं च शक्तिं च अक्षमालां च दक्षिणे ॥ तोमरं व्यजनं चैव घृतपात्रं तु वामके । बिभ्रंतं सप्तभिर्हस्तैर्द्विमुखं सप्तजिह्वकम् ॥ दक्षिणं च चतुर्जिह्वं त्रिजिह्वमुत्तरं मुखम् । द्वात्रिंशत्कोटिमूर्त्त्याख्यं द्विपंचाशत्कलायुतम् ॥ स्वाहा स्वधा वषट्कारैरंकितं मेषवाहनम् । रक्तमाल्यांबरधरं रक्तपद्मासन स्थितम् ॥ रौद्रं त्वां शिवनामानि वह्निमावाहयाम्यहं । त्वं मुखं सर्वदेवानां सप्तार्चिरमितद्युते ॥ आगच्छ भगवन्नग्ने यज्ञेस्मिन्सन्निधो भव ॥

शान्तिके वरदवैश्वानराय नमः ॥

**इत्यावाह्य संपूज्य** ॥ अग्नेर्द्दक्षिणतः परिस्तरण भूमिमतिक्रम्य शुद्धमासनं यज्ञियवृक्षोद्भवं पीठं वा निधाय ॥ दक्षिणतो ब्रह्मासनम् उत्तरतः प्रणीतासनम् ॥ तत्र ब्रह्मोपवेशनम् ॥

**ब्रह्मापूजनम्**:–ॐआ ब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे राजन्यः शूर ऽ इषव्योतिव्याधी महारथो जायतां दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां निकामे–निकामे नः पर्जन्यो वर्षतु फलवत्यो नऽ ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम्॥ ॐब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचोव्वेनऽ आवः । सबुध्न्या ऽ उपमा ऽ अस्यविष्ठाः सतश्च योनिमसतश्चव्विवः ॥ सर्वोपचारार्थे गन्धाक्षत्पुष्पाणि समर्पयामि ॥

यावत्कर्मसमाप्यते तावत्वं ब्रह्मा भव॥ ब्रह्माभवामीति वदेत् ॥ परिस्तरण भूमिमतिक्रम्य कुशैरासन द्वयं कल्पयित्वा ॥

(तत्र कुशानामग्रभागस्तु वटोस्तु मुखमीरितं ॥ मूलंतु पुच्छभागंस्यादेवं कात्यायनोऽब्रवीत् ॥ ऊर्ध्वकेशो भवेत् ब्रह्मा

लंबकेशस्तु विष्टरः॥ पंचाशतो भवेत् ब्रह्म तदर्द्धेनतु विष्टरः) अग्रेरुत्तरतः चमसं सव्य हस्ते कृत्वा दक्षिणहस्तेनोद्धृत्य पात्रांतरस्थोदकेन ॐ प्रणय ३ पूरयित्वा ब्रह्मणोमुखमवलोक्य पश्चिमासने निधायालभ्य पूर्वासने स्थापयेत् ॥

**अथ परिस्तरणं** :–बर्हिमुष्टिमादाय ईशानत आरभ्योदक पर्यंतं अग्रेः परिस्तरणं कुर्यात् ॥ तद्यथा ॥ उपमूललूतबर्हिषां मुष्टि चतुर्थभागेन आग्नेयादीशानांतं प्राच्यां (पूर्वे) ॥१॥ तृतीयभागेन ब्रह्मणोग्नि पर्यंतं दक्षिणस्यां (दक्षिण) ॥२॥ द्वितीय भागेन नैऋत्याद्वायव्यंतं पश्चिमायां (पश्चिम) ॥३॥ शेषभागेन अग्नितः प्रणीता पर्यंतमुत्तरस्यां (उत्तर) ॥ ततोर्थवदासाद्य ॥ आसादनमुपयोग्य माना नामग्रेरुत्तरतः प्रणीता पश्चिमे प्राक्संस्थं उदक्संस्थं वा अग्रे पश्चाद्वा ॥ तद्यथा

**पात्रासादनम्**:–पवित्रच्छेदनार्थं कुश त्रयं ॥ पवित्रार्थमनंतर गर्भिणं साग्रं कुशपवित्र द्वयं ॥ प्रोक्षणीपात्रं ॥ आज्यस्थाली ॥ चरुस्थाली॥ सन्मार्जन कुशाः पंच ॥ उपयमन कुशाः सप्त ॥ प्रादेशमिति पालाश समिध त्रयः ॥ स्रुवः खादिरो हस्तमात्रः ॥ स्रुक्बाहुमात्रा ॥ आज्यं गव्यं ॥ दुग्धं च ॥ त्रिः प्रक्षालितास्तंडुलाः ॥ ब्रह्म दक्षिणार्थं पूर्णपात्रं ॥ होतृदक्षिणार्थं वस्त्रयुग्मं ॥ तिलयवग्रहसमिधाः ॥ सुवर्णकांस्यादीन्युप कल्पयेत् ॥

**पवित्रकरणम्**:–ततो वाग्यतो आसादित पवित्रच्छेदन कुशपत्र त्रयमादाय दक्षिणहस्ते गृहीत्वा वामहस्तेन कुशपत्र द्वयमादाय॥ पवित्रच्छेदन कुशैरग्रतः प्रादेशमात्रं विहाय द्वयोरुपरि त्रीन्निधाय कुशद्वयमूलेन द्वौ कुशौ प्रदक्षिणी कृत्य छित्वात्तानपास्य पवित्राभ्यां प्रणीतोदकमुत्पूर्य ॥ प्रोक्षणीपात्रं प्रणीता सन्निधौ निधाय सपवित्रेण करेण प्रणीतोदकं त्रिः प्रोक्षण्यं निधाय ॥ पात्रांतरेण वा निक्षिपेत्॥

उदगग्रे पवित्रे सव्यहस्तयोरंगुष्टानामिकाग्राभ्याम् तयोरादाय तन्मध्येन प्रोक्षण्युदकं भूमौ त्रिः क्षिप्त्वा पवित्रे प्रोक्षण्यां निधाय। तत्पात्रं दक्षिणहस्तेनादाय वामे निधाय दक्षिणहस्तनामिकांगुष्टाभ्यां जलं किंचिदूर्ध्वमुत्क्षिप्य प्रणीता जलेन प्रोक्षणीरभिषिंच्य ॥ तज्जलेन यथा सादितं द्रव्यं सकृत्प्रोक्ष्य ॥ यथा ॥ आज्यस्थाल्यां प्रोक्षणं ॥ चरुस्थाल्यां प्रोक्षणं ॥ संमार्गकुशानां प्रोक्षणं ॥ उपयमन कुशानां प्रोक्षणं ॥ समिधानां प्रोक्षणं ॥ स्त्रुवस्य प्रोक्षणं ॥ स्त्रुचेः प्रोक्षणं ॥ तंडुलानां प्रोक्षणं ॥ पूर्णपात्रस्य प्रोक्षणं ॥ सर्वेषां प्रोक्षणं॥ पवित्र शेषजलसहित पात्रं प्रणीताग्न्योरंतरे निधाय ॥ आज्यस्थाल्यामाज्यंनिरूप्य ॥ चरुस्थाल्यां तंडुलाः प्रक्षिप्य ॥ प्रणीतोदकेन तां स्त्रिः प्रोक्ष्य ॥ त्रिः प्रक्षाल्य प्रणीतोदकं दुग्धं च प्रक्षिप्य ॥ स्वयं चरुं ब्रह्मणाचाज्यं गृहीत्वाऽग्निपूर्वेणानीय दक्षिणत आज्यं उत्तरतः पायस चरुं श्रपणार्थं युगपदग्नौ निधाय॥ उल्मुकं सहविः काग्रेः प्रदक्षिणं भ्रामयित्वा तत्रैव क्षिप्त्वा ॥ हस्तस्येतरथावृत्तिः ॥ उदकोपस्पर्शः ॥

**☆ ।। अत्रावसरे ग्रहस्थापनं कुर्यात् ॥ ☆**

ततो ग्रहपीठे गत्वा तत्र शुक्लवस्त्रमास्तर्य ॥ तदुपरि तंदुलरेखया पद्माकारकं नवकोष्टकं मंडलं शान्तिपाठेन कुर्यात् ॥ सुवर्णपटैर्वा लेख्या गंधैर्मण्डलिकेशुभा ॥ अथवाक्षत पुंजेषु शक्त्या वित्तानुसारतः॥ **अथ ग्रहाणां स्थान लक्षणं** ॥ मध्येतु भास्करं विंद्याच्छशिनं पूर्वदक्षिणे। दक्षिणे लोहितं विंद्याद्बुधं पूर्वोत्तरेणतु ॥ उत्तरेतु गुरुं विंद्यात्पूर्वेचैवतु भार्गवम् । पश्चिमेतु शनिं विंद्याद्राहुं दक्षिणपश्चिमे। पश्चिमोत्तरतः केतुं स्थाप्यावै शुक्लतंदुलैः । ग्रहाणां वै मण्डलानि कुंकुमेन समालिखेत् ॥

**अथ स्थान प्रमाणं** ॥ द्वादशांगुल सूर्यस्य सोमस्य द्विगुणं भवेत्।

त्रिरंगुलंतु भौमस्य बुधस्य चतुरंगुलम् ॥ षडंगुलं गुरोः कृत्वा नवांगुलं तु



भार्गवे । षडंगुलं शनेः कृत्वा राहोर्विंशांगुलैरिदं ॥ नवांगुलं तु केतूनां एते ग्रह प्रमाणतः ॥ अथ वर्णानि ॥ आदित्यांगारकौ रक्तौ श्वेतौ शुक्र निशाकरौ । पीतो गुरु मुदग् बुधो शेषा कृष्ण ग्रहा स्मृताः॥ अथाकाराः॥ वृत्तमण्डलमादित्ये चतुरस्त्रं निशाकरे। महिपुत्रे त्रिकोणंस्याद्बुधेवै बाण सन्निभम्॥ गुरवेपट्टिशाकारं पंचकोणं तु भार्गवे । धनुषाकृति मंदेच शूर्पाकारंतु राहवे ॥ केतूनां तु ध्वजाकारं मंडलानि क्रमेणतु ॥

**अथ मुखाः**॥ शुक्रार्कौ प्राङ्मुखौ ज्ञेयौ गुरुसौम्यावुदङ्मुखौ । प्रत्यङ्मुखः शनिः सोमः शेषा दक्षिणतो मुखाः॥ अतः जातयः॥ आदित्य प्रमुखाः सर्वे वर्णैरेभिः प्रशीतया ॥ ब्राह्मणौ भार्गवाचार्यौ

क्षत्रियौ रवि लोहितौ ॥ वैश्यौ सोमबुधौ ज्ञेयौ शेषाः शूद्राः प्रकीर्तिताः ॥ मुष्टिमात्रास्तथा श्वेता अभग्नाश्चैव शालिजाः ॥ ग्रहाणां स्थापने प्रोक्ता अर्द्धार्द्ध प्रति दैवतं ॥

ॐकारस्य ब्रह्मात्रृषिः परमात्मा देवता गायत्रीछन्दः व्याहृतीनां विश्वामित्रजमदग्निर्भरद्वाज भृगव ऋषयः अग्निवायुः सूर्योदेवता गायत्र्युष्णिगनुष्टुप् छन्दांसिसूर्याद्यावाहने विनियोगः ॥

**१-सूर्यः-**

(१)उदयंतं महातेजं तेजस्वी चाभय प्रदं । दुर्निरीक्षं ख गमनं सूर्यमावाहयाम्यहं ॥

भो भो सूर्यग्रहाध्यक्ष कलिंग विषयोद्भव । रक्त काश्यपगोत्रेय द्विभुजः पद्मलांछन ॥ सप्ताश्व वाहनागच्छ पद्ममध्ये वर प्रद ॥ अग्निंदूतेति मन्त्रेण रुद्ररूपी प्रतिष्ठितः ॥

(२)ॐ अग्निंदूतं पुरोदधे हव्यवा हमुपब्रुवे । देवां २ आसादयादिह॥

(३)ॐआकृष्णेनरजसाव्वर्त्तमानोनिवेशयन्नमृतंमर्त्यंच । हिरण्ययेन सवितारथेना देवोयाति भुवनानि पश्यन् ॥ मध्ये कलिंगदेशोद्भव काश्यप सगोत्र सूर्य इहागच्छ इहतिष्ठ **सूर्यायनमः । सूर्यमावाहयामि स्थापयामि** ॥

**२-चन्द्रः-**(१)द्विजराजं सुरश्रेष्ठं तारापत्यं त्रिनन्दनम् । औषधीनां पतिं चैव सोममावाहयाम्यहं ॥

अहो चन्द्र जगत्प्राण यमुना विषयोद्भव । सुश्वेतात्रेय गोत्रेय गदापाणि वरप्रद ॥ दशाश्व वाहनायाहि उमारूपी समाविशः । हुताशन दले देव मंत्रेणाप्स्वग्निनार्चितः ॥

(२)ॐअप्स्वग्ने सधिष्टवसौषधीरनुरुध्यसे । गर्भेसंजायसे पुनः॥

(३)ॐइमन्देवाऽअसपत्क्नथ्ठं सुबध्वम्महते क्षत्रायमहते ज्ज्यैष्ठ्यायमहतेजानराज्ज्यायेन्द्रस्येन्द्रियाय ॥ इमममुष्य पुत्रमुष्ष्यै पुत्रमस्यै व्विशऽ एष वोमी राजा सोमोस्म्माकम्ब्राह्मणानाथ्ठंराजा॥

आग्नेय्यां यमुनातीरोद्भवात्रेय सगोत्र चन्द्र इहागच्छ इहतिष्ठ **चन्द्रायनमः । चन्द्रमावाहयामि स्थापयामि ॥**

**३–भौमः**–(१)निर्जिता यज्ञबुद्धिंच यज्ञमाश्रित् देवताः । ऋषिभिस्तूयमानंतु भौममावाहयाम्यहं ॥

उज्जयिन्यां समुत्पन्नो भो भो भौम चतुर्भुज । भारद्वाज कुलेजात शूलशक्ति गदाधर ॥ वरदो मेषमारूढ स्कंदप्राय तडित्प्रभो । स्योनापृथिवीति मन्त्रेण दलेयाम्ये प्रतिष्ठितः ॥

(२)ॐ स्योना पृथिवि नो भवानृक्षरा निवेशनी । यच्छा नः शर्म सप्रथाः ॥

(३)ॐ अग्निर्मूर्द्धादिवः ककुत्पतिः पृथिव्याऽअयम् ॥ अपाᳬं रेताᳬं सिजिन्वति॥ दक्षिणे अवन्तीदेशोद्भव भारद्वाज सगोत्र भौम इहागच्छ इहतिष्ठ **भौमायनमः। भौममावाहयामि स्थापयामि॥**

**४–बुधः**–(१)बुधो बुद्धिप्रदातारं सौम्यदृष्टिं समाविषम् । यजमान हितार्थाय बुधमावाहयाम्यहम् ॥४॥

अहो चन्द्रसुत श्रीमान्मागधायां समुद्भव । अत्रिगोत्रश्चतुर्बाहो खड्ग खेटक धारक ॥ गदा वरदसिंहस्थ सुवर्णाभ समाविश । कृष्णवर्दि सपत्रे च इदं विष्णु प्रपूजयेत् ॥

(२)ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्यपाᳬं सुरेस्वाहा ॥

(३)ॐउद्बुद्ध्यस्वाग्ने प्रतिजागृहि त्त्वमिष्टापूर्त्ते सᳬं सृजेथामयञ्च ॥ अस्मिन्त्सधस्त्थेऽ अद्ध्युत्त रस्मिन्विश्श्वे देवायजमानश्च सीदत ॥ ईशान्यां मगधदेशोद्भवात्रेय सगोत्र बुध इहागच्छ इहतिष्ठ **बुधायनमः । बुधमावाहयामि स्थापयामि ॥**

**५–गुरुः**–(१)बुद्ध्यायस्य समोनान्यो देवानांचपुरोहितम् । त्रातारं सर्वदेवानां गुरुमावाहयाम्यहम् ॥ अहो वाचस्पते पीत संजात सिंधुमंडले । एह्यांगिरसगोत्रेय हयारूढ चतुर्भुज ॥ दंडाक्षसूत्र

वरद कमंडलु धर प्रभो । महांइंद्रेति संपूज्यो विधिवच्चोत्तरे दले ॥

(२)ॐमहांर इंद्रो व्वज्रहस्तः षोडशी शर्मयच्छतु । हन्तुपाप्मानं योस्मान्द्वेष्टि ॥

(३) ॐबृहस्प्पते ऽअतियदर्ष्यौऽ अर्हाद्द्युमद्विभाति क्क्रतु मज्जनेषु । यद्दीदयच्छवसऽ ऋतप्प्रजा ततदस्म्मा सुद्र्विणन्धेहि चित्रम्॥ उत्तरे सिंधुदेशोद्भवांगिरस गोत्र गुरो इहागच्छ इहतिष्ठ **गुरवेनमः** गुरुमावाहयामि स्थापयामि ॥

६–**शुक्रः**–(१)सोमतुल्योदिति प्राज्ञदानवानां पुरोहितम् । त्रातारं सर्वदैत्यानां भृगुमावाहयाम्यहम् ॥ भो भो भोजकटेजात शुक्र श्वेताश्ववाहनः । समागच्छ चतुर्बाहो भृगुगोत्र विभूषण ॥ परिघाक्षा बलिं हस्त कमंडलुधर प्रभो । शक्रवत्पूर्वपत्रेच शुक्रज्योतिश्च पूजितः ॥

(२)ॐशुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्माँश्च। शुक्रश्चऋतपाश्चात्यथ्ठं हाः ॥

(३)ॐअन्नात्त्परिस्स्रुतो रसम्ब्रह्मणा व्यपिवत्क्षत्रम्पयः सोमम्प्रजापतिः॥ ऋतेनसत्त्यमिन्द्रियं व्विपानठं शुक्क्रमन्धसऽ इन्द्रस्येन्द्रिय मिदम्पयोऽमृतम्मधु ॥ पूर्वे भोजकट देशोद्भव भार्गव सगोत्र शुक्र इहागच्छ इहतिष्ठ **शुक्रायनमः । शुक्रमावाहयामि स्थापयामि** ॥

७–**शनिः**–(१)कृष्णाङ्गं कृष्णवर्णं च कृष्णाजिनधरं तथा । शूरमंदगतिं चैव शनिमावाहयाम्यहम् ॥

अहो सौराष्ट्र संजात छायापुत्र चतुर्भुज । कृष्णवर्णार्क गोत्रेयं बाणहस्त धनुर्धर ॥ त्रिशूलीच समागच्छ वरदो गृध्रवाहन । **प्रजापतेति संपूज्यो विधिवत्पश्चिमे दले** ॥

(२)ॐप्रजापते नत्वदेतान्यन्यो विश्वारूपाणि परिता बभूव । यत्कामास्ते जुहुमस्तन्नोऽअस्त्वयममुष्य पितासावस्य पिता वयथं स्याम पतयो रयीणां ॥

(३)ॐशन्नोदेवीरभिष्टयऽ आपोभवन्तुपीतये॥ शँय्योरभिस्त्रवन्तुनः॥ पश्चिमे सौराष्ट्रदेशोद्भव काश्यप सगोत्र शनैश्चर इहागच्छ इहतिष्ठ **शनिश्चराय नमः। शनिश्चरमावाहयामि स्थापयामि** ॥

**८–राहुः**–(१)रक्ताङ्गं रक्तवर्णंच रक्ताजिनधरं तथा । सिंहिका गर्भ संभूतं राहुमावाहयाम्यहम् ॥८॥

राहोर्बर्बके देशे संजाताकाय वर्जित । गोत्रैपैठीनसेह्येहि सिंहारूढ वर प्रद ॥ कराल वदन श्रेष्ठ कालरूपांजन प्रभो । आयंगौरिति मन्त्रेण पूज्यो नैऋत्य पत्रके ॥

(२)ॐआयङ्गौः पृश्निरक्रमी दसदन्मातरं पुरः । पितरंच प्रयंत्स्वः॥

(३)ॐकयानश्चित्रऽआभुवदूती सदावृधः सखा ॥ कयाशचिष्ट्या वृता ॥ नैऋत्यां राठीनापुरोद्भव पैठीन सगोत्र राहो इहागच्छ इहतिष्ठ **राहवे नमः । राहुमावाहयामि स्थापयामि** ॥

**९–केतुः**–(१)एह्येहि भगवन्केतो व्योमचारि महामते।ग्रहैस्तु विविधैः सर्वैः केतुमावाहयाम्यहम्॥ केतवो विविधाकारा मलयाद्रि समुद्भवाः । द्विभुजा जैमिनी गोत्रा गदाहस्त वरप्रदा ॥

आगच्छन्तु कपोतस्थाः शोभने मारुते दले । ब्रह्मयज्ञान मंत्रेण चित्रगुप्तमिवार्चयेत् ॥

(२)ॐब्रह्मयज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचोवेनऽ आवः । सबुध्न्याऽउपमाऽ अस्यविष्ठाः सतश्च योनिमसतश्चविवः ॥

(३)ॐकेतुङ्कृण्वन्नकेतवेपेशोमर्य्याऽअपेशसे ॥ समुषद्भि रजायथाः॥

वायव्यां अंतर्वेदि समुद्भवा जैमिन सगोत्रा केतवः इहागच्छंत्विहतिष्ठंतु केतुभ्यो नमः केतु इहागच्छ इहतिष्ठ **केतवे नमः । केतुमावाहयामि स्थापयामि** ॥

**प्रार्थना**:–ॐग्रहाऽऊर्जाहुतयो व्यन्तो विप्राय मतिम् । तेषां विशिप्रियाणां वोऽहमिषमूर्जठँ समग्रभमुपयामगृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम् ॥

ॐब्रह्मा मुरारि स्त्रिपुरान्तकारी भानु शशी भूमिसुतो बुधश्च । गुरुश्च शुक्रः शनिराहुकेतवः सर्वे ग्रहाः शान्तिकरा भवन्तु ॥ सूर्यः शौर्य मथेन्दुरूच्च पदवीं सन्मङ्गलं मङ्गलः सद्बुद्धिं च बुधो गुरुश्च गुरुतां शुक्रः सुखं शं शनिः । राहुर्बाहुबलं करोतु सततं केतुः कुलस्योन्नतिं नित्यं प्रीतिकरा भवन्तु मम ते सर्वेऽनुकूला ग्रहाः ॥ इति नवग्रह स्थापनं ॥

## ॥ अथाधिदेवानामावाहनम् :–

तत्रैषांनामानिः–शिवोगौरी तथा स्कंदो विष्णुर्ब्रह्मापुरंदर । यमः कालश्चित्रगुप्तश्चाधिदेवा इमे स्मृताः ॥ अत्राधिदेवता प्रत्यधिदेवता दक्षिण वाम पार्श्वे स्थाप्याः ॥ तद्यथा :–

**१–शिवः**–ॐत्र्यम्बकं यजामहे सुगंधिम्पुष्टिवर्द्धनम् । उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय माऽमृतात् ॥ सूर्यदक्षिणपार्श्वे शिव इहागच्छ इहतिष्ठ **शिवाय नमः** ॥ शिवमावाहयामि स्थापयामि ॥

**२–उमा**:–ॐ श्रीश्चते लक्ष्मीश्चपत्क्यौ बहोरात्रे पार्श्वे नक्षत्राणिरूपमश्विनौव्यात्तम् । इष्णन्निषाणामुम्मइषाण सर्वलोकंमइषाण ॥ चन्द्र दक्षिणपार्श्वे उमे इहागच्छ इहतिष्ठ **उमायैनमः** उमामावाहयामि स्थापयामि ॥

**३–स्कंधः**–ॐ यदक्रंदः प्रथमं जायमान ऽ उद्यन्त्समुद्रादुत वा पुरीषात् । श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं महि जातं

ते ऽऽ अर्वन्॥ भौम दक्षिणपार्श्वे स्कंद इहागच्छ इहतिष्ठ **स्कंदाय नमः** ॥ स्कंधं आवाहयामि स्थापयामि ॥

**४–विष्णुः**–ॐ विष्णोरराटमसिविष्णोः श्नप्त्रेस्थो विष्णोः स्यूरसिविष्णोर्ध्रुवोसि । वैष्णवमसि विष्णवेत्वा ॥ बुध दक्षिणपार्श्वे नारायण इहागच्छ इहतिष्ठ **नारायणाय नमः** ॥ नारायणं आवाहयामि स्थापयामि ॥

**५–ब्रह्मा**:–ॐआ ब्रह्मन्ब्रह्मणो ब्रह्मवर्चसीजायतामाराष्ट्रे राजन्यः शूरऽइषव्योति व्याधी महारथो जायतांदोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां निकामे–निकामे नः पर्जन्यो वर्षतु फलवत्यो नऽओषधयः पच्यन्तां योगक्षेमो नः कल्पताम्॥ गुरोर्द्दक्षिणपार्श्वे ब्रह्मन्निहागच्छ इहतिष्ठ **ब्रह्मणे नमः** ॥ ब्रह्माणं आवाहयामि स्थापयामि ॥

**६–इन्द्रः**–ॐसजोषा ऽइन्द्र सगणो मरुद्भिः सोमं पिब वृत्रहा शूर विद्वान् । जहि शत्रूँ२ऽरप मृधोनुदस्वाथाभयं कृणुहि विश्वतो नः । उपयामगृहीतोसीन्द्राय त्वा मरुत्वत ऽएषते योनिरिन्द्राय त्वा मरुत्वते ॥ शुक्र दक्षिणपार्श्वे इन्द्र इहागच्छ इहतिष्ठ **इन्द्राय नमः** ॥ इन्द्रं आवाहयामि स्थापयामि ॥

**७–यमः**–ॐ यमाय त्वा मखाय त्वा सूर्यस्य त्वा तपसे । देवस्त्वा सविता मध्वानक्तु पृथिव्याः सꣳ स्पृशस्पाहि । अर्चिरसि शोचिरसि तपोसि ॥ शनि दक्षिणपार्श्वे यम इहागच्छ इहतिष्ठ **यमाय नमः** ॥ यमं आवाहयामि स्थापयामि ॥

**८–कालः**–ॐकार्षिरसि समुद्रस्य त्वाक्षित्याऽउन्नयामि । समापो अद्भिरग्मत समोषधीभिरोषधीः ॥ राहु दक्षिणपार्श्वे काल इहागच्छ इहतिष्ठ **कालाय नमः** ॥ कालं आवाहयामि स्थापयामि ॥

**९–चित्रगुप्तः**–ॐ चित्रा वसोस्वस्तिते पारमशीय ॥ केतु दक्षिणपार्श्वे चित्रगुप्त इहागच्छ इहतिष्ठ **चित्रगुप्ताय नमः** ॥

चित्रगुप्तं आवाहयामि स्थापयामि ॥१८॥इत्यधिदेवतावाहनं ॥

**अथ प्रत्यधिदेवानामावाहनम् :-**

तेषांनामानि:-अग्निरापोमहीविष्णुरिन्द्र इन्द्राणिका तथा । प्रजापतिर्भुजंगाश्च ब्रह्मा प्रत्यधिदेवता: ॥ अथावाहनं :-

१-**अग्नि:**-ॐ स न: पितेव सूनवेग्ने सूपायनो भव । सचस्वा न: स्वस्तये ॥ सूर्य वामपार्श्वे अग्ने इहागच्छ इहतिष्ठ **अग्नये नम:** अग्निमावाहयामि स्थापयामि ॥

२-**अप ( जल )**:-ॐ आपो अद्यान्वचारिषꣳ रसेन समसृक्ष्महि । पयस्वा नग्नआगमंतं मा सꣳ सृजवर्चसा प्रजया च धनेन च ॥ चन्द्र वामपार्श्वे आप इहागच्छध्वं इहतिष्ठध्वम् **अद्भ्यो नम:** ॥ अप: आवाहयामि स्थापयामि ॥

३-**पृथ्वी**:-ॐ चिदसि तया देवतयाङ्गिरस्वद् ध्रुवा सीद । परिचिदसि तया देवतयाङ्गिरस्वद् ध्रुवासीद ॥ भौमवामपार्श्वे पृथिवि इहागच्छ इहतिष्ठ **पृथिव्यै नम:** ॥ पृथिवीमावाहयामि स्थापयामि ॥

४-**विष्णु**:-ॐइदं विष्णुर्विचक्रमे त्रेधानिदधे पदम् । समूढमस्यपाꣳ सुरेस्वाहा ॥ ॐ बुधवामपार्श्वे विष्णो इहागच्छ इहतिष्ठ **विष्णवे नम:** ॥ विष्णुमावाहयामि स्थापयामि ॥

५-**इन्द्र**:-ॐ इन्द्रआसान्नेता बृहस्पतिर्दक्षिणा यज्ञ: पुरएतु सोम: । देवसेनानामभिभंजतीनां जयंतीनां मरुतो यंत्वग्रम् ॥ गुरु वामपार्श्वे इन्द्र इहागच्छ इहतिष्ठ **इन्द्राय नम:**
इन्द्रमावाहयामि स्थापयामि ॥

६-**इन्द्राणी**:-ॐइन्द्रं दैवीर्विशो मरुतोनुवर्त्मानो भवन्यथेन्द्रं दैवीर्विशो मरुतोनु वर्त्मानोऽभवन् । एवमिमं यजमानं दैवीश्चविशो मानुषीश्चानुवर्त्मानो भवन्तु ॥ शुक्र वामपार्श्वे इन्द्राणि इहागच्छ इहतिष्ठ **इन्द्राण्यै नम:** ॥ इन्द्राणीमावाहयामि स्थापयामि ॥

**७–प्रजापति:**–ॐप्रजापते नत्वदेतान्यन्यो विश्वारूपाणि परिता बभूव । यत्कामास्ते जुहुमस्तन्नो अस्त्वयममुष्य पितासावस्य पिता व्वयछं स्यामपतयोरयीणाछं स्वाहा ॥ शनि वामपार्श्वे प्रजापते इहागच्छ इहतिष्ठ **प्रजापतये नमः** । प्रजापतिमावाहयामि स्थापयामि ॥

**८–सर्प:**–ॐ नमोऽस्तु सर्पेभ्यो येके च पृथिवी मनु । ये ऽ अन्तरिक्षे येदिवि तेभ्यः सर्पेभ्यो नमः ॥ राहु वामपार्श्वे सर्पा इहागच्छत इहतिष्ठत **सर्पेभ्योनमः** । सर्पानावाहयामि स्थापयामि॥

**९–ब्रह्मा:**–ॐब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचोव्वेनऽ आवः । सबुध्न्या ऽ उपमा ऽ अस्यविष्ठाः सतश्च योनिमसतश्चव्विवः ॥ केतु वामपार्श्वे ब्रह्मन् इहागच्छ इहतिष्ठ **ब्रह्मणेनमः** । ब्रह्माणमावाहयामि स्थापयामि ॥ इति प्रत्यधिदेवताः ॥

## ❋❋ अथ गणपंचकानामावाहनम् :– ❋❋

**१–गणपति:**–ॐ गणानांत्वा गणपति ठँ हवामहे प्रियाणां त्वा प्रियपति ठँ हवामहे निधीनां त्वा निधिपति ठँ हवामहे वसो मम । आहमजानि गब्र्भधमा त्वमजासि गब्र्भधम् ॥ शनिकेत्वोः पूर्वे गुरुसूर्ययोः पश्चिमे गणपति इहागच्छ इहतिष्ठ **गणपतये नमः** । गणपतिमावाहयामि स्थापयामि ॥

**२–देवी:**–ॐजातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः । सनः पर्षदति दुर्गाणि विश्वानावेव सिंधुं दुरितात्यग्निः ॥ गणेशादुत्तरे दुर्गे इहागच्छ इहतिष्ठ **दुर्गायै नमः** । दुर्गामावाहयामि स्थापयामि॥

**३–वायु:**–ॐवायोऽशते सहस्त्रिणो रथासस्तेभिरागहि । नियुत्वान्सोमपीतये ॥ गणेशाद्वायव्यां वायो इहागच्छ इहतिष्ठ **वायवे नमः** । वायुमावाहयामि स्थापयामि ॥

**४–आकाश:**–ॐ घृतं घृतपावानः पिवतवसां वसा पावानः पिबतांतरिक्षस्य हविरसि स्वाहा । दिशः प्रदिशऽआदिशो विदिश

ऽ उद्दिशोदिग्भ्यः स्वाहा ॥ गणेश पश्चिमे आकाश इहागच्छ इहतिष्ठ **आकाशायनमः** । अकाशमावाहयामि स्थापयामि ॥

**५–अश्विनी:**–ॐ यावांकाशा मधुमत्यश्विना सूनृतावती । तयायज्ञंमिमिक्षतम् ॥ गणेशात्पूर्वे अश्विनीकुमारौ इहागच्छतं इहतिष्ठतं **अश्विनीकुमाराभ्यां नमः** । अश्विनीकुमारौ आवाहयामि स्थापयामि ॥ इति पंचयज्ञ भूतात्मक लोकपालाः ॥

**अथ पूर्वादितः अश्विन्यादि सप्त विंशतिनक्षत्राणि स्थापयेत्:–**

**१–अश्विनी:**–ॐअश्विना तेजसा चक्षुः प्राणेन सरस्वती वीर्यम् । वाचेंद्रो बलेनेंद्रायदधुरिंद्रियम् ॥ अश्विनौ इहागच्छतं इहतिष्ठतं **अश्विन्यै नमः** । अश्विनीमावाहयामि स्थापयामि ॥

**२–भरणी:**–ॐ यमायत्वामखायत्वा सूर्यस्यत्वा तपसे ॥ देवस्त्वा सविता मध्वानक्तु पृथिव्याः सꣳ स्पृशस्पाहि । अर्चिरसि शोचिरसि तपोसि ॥ यम इहागच्छ इहतिष्ठ **यमाय नमः** । यममावाहयामि स्थापयामि ॥

**३–कृतिका:**–ॐ अयमग्निः सहस्त्रिणो व्वाजस्य शतिनस्पतिः। मूर्द्धाकवीरयीणाम् ॥ अग्ने इहागच्छ इहतिष्ठ **अग्नये नमः** । अग्निमावाहयामि स्थापयामि ॥

**४–रोहिणी:**–ॐ ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचोवेन आवः। सबुध्न्याऽ उपमाऽ अस्यविष्ठाः सतश्चयोनि मसतश्चविवः ॥ प्रजापते इहागच्छ इहतिष्ठ **प्रजापतये नमः** । प्रजापतिमावाहयामि स्थापयामि ॥

**५–मृगशिरा:**–ॐसोमो धेनुꣳ सोमो अर्वन्तमाशुꣳ सोमोवीरं कर्मण्यं ददाति । सादन्यंविदथ्यꣳ सभेयं पितृश्रवणं यो ददाशदस्मै ॥ सोम इहागच्छ इहतिष्ठ **सोमाय नमः**। सोममावाहयामि स्थापयामि॥

**६–आर्द्रा:**–ॐ नमस्ते रुद्रमन्यव उतोतइषवे नमः। बाहुभ्यामुतते नमः॥ रुद्र इहागच्छ इहतिष्ठ **रुद्राय नमः**। रुद्रमावाहयामि स्थापयामि॥

**७–पुनर्वसु:**–ॐअदितिर्द्यौरदितिरंतरिक्षमदिर्माता सपिता सपुत्रः विश्वेदेवा अदितिः पंचजना अदितिर्जातमदितिर्जनित्वं॥ अदिते इहागच्छ इहतिष्ठ **अदितये नमः**। अदितिमावाहयामि स्थापयामि॥ इति पूर्वे॥ **अथ दक्षिणे :–**

**८–पुष्य:**–ॐ वाचस्पतये पवस्व वृष्णोऽ अꣳशुभ्यांगभस्तिपूतः। देवो देवेभ्यः पवस्व येषां भागोसि॥ बृहस्पते इहागच्छ इहतिष्ठ **बृहस्पतये नमः। बृहस्पतिमावाहयामि स्थापयामि**॥

**९–आश्लेषा:**–ॐ नमोस्तु सर्पेभ्यो येके च पृथिवीमनु। ये अंतरिक्षे ये दिवि तेभ्यः सर्प्पेभ्योनमः॥ सर्प्पाः इहागच्छत इहतिष्ठत **सर्पेभ्यो नमः। सर्पान् आवाहयामि स्थापयामि**॥

**१०–मघा:**–ॐ पितृभ्यः स्वधायिभ्यः स्वधानमः पितामहेभ्यः स्वधायिभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः। अक्षन् पितरोमीमदन्त पितरोतीतृपन्त पितरः पितरः शुन्धध्वम्॥ पितरः इहागच्छत इहतिष्ठत **पितृभ्यो नमः पितृनावाहयामि स्थापयामि**॥

**११–पूर्वाफाल्गुनी:**–ॐ भगप्रणेतर्भग सत्यराधो भगेमां धियमुदवा ददन्नः। भग प्र नो जनय गोभिरश्वैर्भग प्र नृभिर्नृवन्तः स्याम॥ भग इहागच्छ इहतिष्ठ **भगाय नमः**। भगं आवाहयामि स्थापयामि॥

**१२–उत्तराफाल्गुनी:**–ॐ दैव्या वध्वर्यू आगतꣳ रथेन सूर्यत्वचा। मध्वायज्ञꣳ समंजाथे॥ अर्यमन् इहागच्छ इहतिष्ठ **अर्यम्णे नमः**। अर्यमाणमावाहयामि स्थापयामि॥

१३–**हस्त**:– ॐ विभ्राड् बृहत्पिबतु सोम्यं मध्वायुर्द्दधद्यज्ञपतावविह्रुतम् । वातजूतोयो अभिरक्षित्क्मना प्रजाः पुपोषपुरुधा विराजति ॥ सवित इहागच्छ इहतिष्ठ **सवित्रे नमः** । **सवितारमावाहयामि स्थापयामि** ॥

१४–**चित्रा**:–ॐत्वष्टा तुरीपो अद्भुतऽ इन्द्राग्री पुष्टिवर्धना । द्विपदा छन्दऽ इन्द्रियमुक्षा गौर्न वयो दधुः ॥ त्वष्ट इहागच्छ इहतिष्ठ **त्वष्ट्रे नमः** । त्वष्टारमावाहयामि स्थापयामि ॥ इति दक्षिणे ॥ **अथ पश्चिमे :–**

१५–**स्वाति**:–ॐ पीवो अन्ना रयिवृधः सुमेधाः श्वेतः सिषक्ति नियुतामभिश्रीः । ते वायवे समनसो वि तस्थुर्विश्वेन्नरः स्वपत्यानि चक्रुः ॥ वायो इहागच्छ इहतिष्ठ ॥ **वायवे नमः** । **वायुमावाहयामि स्थापयामि** ॥

१६–**विशाखा**:–ॐइन्द्राग्री आगतꣳ सुतं गीर्भिर्नभो वरेण्यम् । अस्य पातं धियेषिता । इन्द्राग्नि इहागच्छतं इहतिष्ठतं **इन्द्राग्निभ्यां नमः** । **इन्द्राग्नीमावाहयामि स्थापयामि** ॥

१७–**अनुराधा**:–ॐ नमो मित्रस्य वरुणस्य चक्षसे महोदेवायतदृतꣳ सपर्य्यत ॥ दूरे दृशे देवजाताय केतवे दिवस्पुत्राय सूर्यायशꣳशत ॥ मित्र इहागच्छ इहतिष्ठ **मित्राय नमः** । **मित्रमावाहयामि स्थापयामि** ॥

१८–**ज्येष्ठा**:–ॐसइषुहस्तैः सनिषङ्गिभिर्वशी सꣳस्रष्टा सयुध इन्द्रोगणेन । सꣳसृष्टजित्सोमपा बाहुशर्ध्युग्रधन्वा प्रतिहिताभिरस्ता ॥ पुरंदर इहागच्छ इहतिष्ठ **पुरंदराय नमः** । **पुरंदरमावाहयामि स्थापयामि** ॥

१९–**मूल**:–ॐमातेव पुत्रं पृथिवी पुरीष्यमग्निꣳ स्वे योनावभारुषा । तां विश्वैर्देवैर्ऋतुभिः संविदानः प्रजापतिर्विश्वकर्मा वि मुञ्चतु ॥ निर्ऋते इहागच्छ इहतिष्ठ **निर्ऋतये नमः** । **निर्ऋतिमावाहयामि स्थापयामि** ॥

**२०–पूर्वाषाढा**:–ॐ अपाघम किल्बिषमपा कृत्यामपो रपः । अपामार्ग त्वमस्मदपदु:स्वप्न्यꣳ सुव ॥ अप इहागच्छ इहतिष्ठ **अद्भ्यो नमः । अपः आवाहयामि स्थापयामि** ॥

**२१–उत्तराषाढा**:–ॐविश्वे अद्य मरुतो विश्व ऽ ऊती विश्वे भवन्त्वग्नयः समिद्धाः । विश्वे नो देवाऽ अवसागमन्तु विश्वमस्तु द्रविणं वाजो अस्मे ॥ **विश्वेभ्यो देवेभ्यो नमः** । विश्वान्देवानावाहयामि स्थापयामि ॥ ॥ इति पश्चिमे ॥

**अथ उत्तरे :–**

**२२–अभिजित्**:–ॐ तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि । धियोयोनः प्रचोदयात् ॥ ब्रह्मन् इहागच्छ इहतिष्ठ **ब्रह्मणे नमः । ब्रह्माणमावाहयामि स्थापयामि** ॥

**२३–श्रवण**:–ॐ विष्णोरराटमसि विष्णोः श्नप्त्रेस्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोसि । वैष्णवमसि विष्णवे त्वा ॥ विष्णो इहागच्छ इहतिष्ठ **विष्णवे नमः । विष्णुमावाहयामि स्थापयामि** ॥

**२४–धनिष्ठा**:–ॐवसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्त्रधारम् । देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः ॥ वसवः इहागच्छत इहतिष्ठत **वसुभ्यो नमः**। वसूनावाहयामि स्थापयामि ॥

**२५–शतभिषा**:–ॐवरुणस्योत्तंभनसि वरुणस्य स्कम्भसर्जनी स्थो वरुणस्य ऋतसदन्यसि वरुणस्य ऋतसदनमसि वरुणस्यऋतसदनमासीद ॥ वरुण इहागच्छ इहतिष्ठ **वरुणाय नमः** । वरुणमावाहयामि स्थापयामि ॥

**२६–पूर्वभाद्रपद**:–ॐ उतनोहिर्बुध्न्यः शृणोत्वजऽ एकपात्पृथिवी समुद्रः । विश्वे देवाऽ ऋतावृधो हुवानाः स्तुता मन्त्राः कविशस्ता ऽ अवन्तु ॥ अजैकपद इहागच्छ इहतिष्ठ **अजैकपदाय नमः । अजैकपदमावाहयामि स्थापयामि** ॥

२७–**उत्तराभाद्रपदः**–ॐशिवोनामासि स्वधितिस्ते पितानमस्ते अस्तुमामाहिᳫंसीः । निवर्त्तयाम्यायुषेन्नाद्याय प्रजननाय रास्योषाय सुप्रजास्त्वाय सुवीर्याय ॥ अहिर्बुध्न्य इहागच्छ इहतिष्ठ **अहिर्बुध्न्याय नमः** । अहिर्बुध्नमावाहयामि स्थापयामि ॥

२८–**रेवतीः**–ॐ पूषं तवव्रते वयन्नरिष्येम कदाचन । स्तोतारस्त इहस्मसि ॥ पूषन् इहागच्छ इहतिष्ठ **पूष्णे नमः** । पूष्णमावाहयामि स्थापयामि ॥ इतिनक्षत्र देवताः ॥

१–**योगाः**–ॐ योगे योगे तवस्तरं वाजे वाजे हवामहे । सखाय ऽ इन्द्रमूतये ॥ मंडलाद्बहिरीशान्यां विष्कुंभादियोगानावाहयामि स्थापयामि ॥

२–**करणाः**–ॐ भद्रं कर्णेभिः श्रृणुयाम देवा भद्रं पश्येमाक्षभिर्य्यजत्राः । स्थिरैरंगैस्तुष्टुवाᳫंसस्तनूभिर्व्यशेम हिदेवहितं यदायुः ॥ मंडलबहिराग्नेये बवादिकरणाः इहागच्छत इहतिष्ठत **करणेभ्यो नमः** । करणानावाहयामि स्थापयामि॥

३–**ध्रुवः**–ॐ ध्रुवोसि ध्रुवोयं यजमानोस्मिन्नायतने प्रजया पशुभिर्भूयात् ॥ घृतेनद्यावा पृथिवी पूर्य्येथामिंद्रस्यछदिरसि विश्वजनस्य छाया ॥ आदित्यमंडले उत्तरे ध्रुव इहागच्छ इहतिष्ठ **ध्रुवाय नमः** । ध्रुवमावाहयामि स्थापयामि ॥

४–**सरिताः**–ॐ पंचनद्यः सरस्वतीमपियंति सस्रोतसः । सरस्वतीतु पंचधासो देशे भवत्सरित् ॥ सूर्यात्पश्चिमे शनिमंडले सरितः इहागच्छत इहतिष्ठत **सरिद्भ्यो नमः** । सरितॄन् आवाहयामि स्थापयामि ॥

५–**सप्तऋषयः**–ॐसप्तऋषयः प्रतिहिताः शरीरे सप्तरक्षंति सदमप्रमादम् । सप्तापः स्वपतो लोकमीयुस्तत्र जागृतो अस्वप्नजौ सत्रसदौ च देवौ ॥ गुरुसूर्ययोर्मध्ये सप्तऋषयः इहागच्छत

इहतिष्ठत **सप्तऋषिभ्यो नमः** । सप्तऋषीनावाहयामि स्थापयामि॥
**६-सागराः**-ॐ इमम्मे वरुणश्रुधी हवमद्या च मृडय । त्वामवस्युरा चके ॥ सूर्यात् पश्चिमे शनिमंडले सरितोधः सप्तसागराः इहागच्छत इहतिष्ठत **सप्तसागरेभ्यो नमः** । सप्तसागरानावाहयामि स्थापयामि ॥
**७-पर्वताः**-ॐप्र पर्वतस्य वृषभस्य पृष्ठान्नावश्चरन्ति स्वसिचऽ इयानाः । ताऽ आववृत्रन्न धरागुदक्ताऽ अहिर्बुध्न्यमनु रीयमाणाः ॥ विष्णो र्विक्रमणमसि विष्णोर्विक्रान्तमसि विष्णोः क्रान्तमसि ॥ पर्वता इहागच्छत इहतिष्ठत **पर्वतेभ्यो नमः** । पर्वतानावाहयामि स्थापयामि ॥
**८-रैवंतः**-ॐजवोयस्ते वाजिन्निहितो गुहायः श्येनेपरीतो अचरच्चव्वाते । तेन्नो व्वाजिन्बलवान्बलेन वाजजिच्चभव समने च पारयिष्णुः । वाजिनो व्वाजजितोव्वाजथ्ठं सरिष्यंती बृहस्पतेर्भागमवजिघ्रत ॥ सूर्य पश्चिमे रैवंत इहागच्छ इहतिष्ठ **रैवंताय नमः** । रैवंतमावाहयामि स्थापयामि ॥
**९-सुपर्णः**-ॐ सुपर्णोसि गरुत्मांस्त्रिवृत्ते शिरो गायत्रं चक्षुर्बृहद्रथन्तरे पक्षौ । स्तोमऽ आत्मा छन्दाथ्ठं स्यङ्गानि यजूथ्ठंषि नाम । सामते तनूर्वामदेव्यं यज्ञायज्ञियं पुच्छं धिष्ण्याः शफाः । सुपर्णोसि गरुत्मान्दिवं गच्छस्वः पत ॥ उत्तरे बुधमंडले गरुत्मन्निहागच्छ इहतिष्ठ **गरुत्मते नमः** । गरुडमावाहयामि स्थापयामि ॥

**अत्रावसरे ग्रहमंडलादीशानकोणे रुद्रकलश स्थापनं :-**

**भूरसीति भूमिं प्रार्थ्यः**-ॐ भूरसिभूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री । पृथिवी यच्छ पृथिवीन्दृथ्ठं ह पृथिवीम्मा हिथ्ठं सीः ॥
**धान्यमसीति धान्यं धृत्वाः**-ॐ धान्यमसि धिनुहि देवान् प्राणाय त्वोदानाय त्वा व्यानाय त्वा । दीर्घामनु प्रसितिमायुषे धां देवो

वः सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना चक्षुषे त्वा महीनां पयोसि ॥

**आजिघ्रकलशेति कलशं संस्थाप्यः**–ॐ आजिघ्र कलशं मह्या त्वा व्विशंत्विन्दवः । पुनरुर्ज्जा निवर्त्तस्व सा नः सहस्त्रं धुक्ष्वोरुधारा पयस्वती पुनर्म्मा॑ऽऽविशताद्रयिः ॥

**वरुणस्योत्तंभनसीतिशुद्धोदकेनापूर्यः**–ॐवरुणस्योत्तम्भनमसि व्वरुणस्य स्कम्भसर्ज्जनी स्थोव्वरुणस्यऽ ऋतसदन्यसि व्वरुणस्यऽऋतसदनमसि व्वरुणस्यऽऋत– सदनमासीद ॥

**या ओषधीत्यौषधी र्निक्षिप्यः**–ॐ याऽओषधीः पूर्वाजाता देवेभ्यस्त्रियुगं पुरा। मनै नु बभ्रूणामह ॐ शतं धामानि सप्त च ॥

**अश्वत्थेवेति पंचपल्लवान्प्रक्षेपः**–ॐअश्वत्थे वो निषदनं पर्णे वो व्वसतिष्कृता । गोभाजऽइत्किलासथयत्सनवथ पूरुषम् ॥

**परिवाजपति इति पंचरत्नानि प्रक्षेपः**–ॐपरिवाजपतिः कविरग्निर्हव्यान्यक्रमीत् । दधद्रत्नानि दाशुषे ॥

**याः फलानीति फलं प्रक्षेपः**–ॐ याः फलिनीर्य्याऽअफलाऽअपुष्पा याश्च पुष्पिणीः । बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्व ॐ हसः ॥

**हिरण्यगर्भेति मुद्रार्पणम्ः**–ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् । स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥

**सुजातोज्योतिषेति वस्त्रेणावेष्टनम्ः**–॥सुजातो ज्योतिषा सह शर्म वरूथमासदस्त्वः।वासो अग्ने विश्वरूपॐ सं व्ययस्व विभावसो ॥

**पूर्णादर्वीति पूर्णपात्रंः**–ॐपूर्णा दर्वि परापत सुपूर्णा पुनरापत। वस्नेव विक्रीणावहा इषमूर्जॐ शतक्रतो ॥

**श्रीश्चतेति श्रीफलंः**–ॐश्रीश्चते लक्ष्मीश्च पत्न्या बहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौऽव्यात्तम् । इष्णन्निषाणामुम्मऽइषाण सर्वलोकम्मऽइषाण ॥ कलशो परिस्थापयेत् ॥

१–ॐ असंख्याता सहस्राणि ये रुद्रा अधिभूम्याम् । तेषाथं सहस्रयो जनेवधन्वानितन्मसि ॥ रुद्र इहागच्छ इहतिष्ठ ॥ **रुद्राय नमः रुद्रमावाहयामि स्थापयामि** ॥

२–ॐ सहस्रशीर्षापुरुषः सहस्राक्षः सहस्रपात् । सभूमिथं सर्वत स्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥ शनि मंडले विष्णो इहागच्छ इहतिष्ठ **विष्णवे नमः ॥ विष्णुमावाहयामि स्थापयामि** ॥

३–ॐवास्तोष्पते प्रतिजानी ह्यस्मान्स्वावेशो अनमीवो भवानः । यत्वेमहे प्रतितन्नो जुषस्वशन्नो अस्तु द्विपदे शं चतुष्पदे ॥ नैऋत्यां राहुमंडले वास्तोष्पते इहागच्छ इहतिष्ठ **वास्तोष्पतये नमः वास्तोष्पतिमावाहयामि स्थापयामि** ॥

४–ॐगणानांत्वा गणपति ठँ हवामहे प्रियाणां त्वा प्रियपति ठँ हवामहे निधीनां त्वा निधिपति ठँ हवामहे वसो मम ॥ आहमजानि गब्र्भधमा त्वमजासि गब्र्भधम् ॥ केतुमण्डले गणपते इहागच्छ इहतिष्ठ **गणपतये नमः । गणपतिमावाहयामि स्थापयामि** ॥

५–ॐ नमोस्तु सर्पेभ्यो ये के च पृथिवीमनु । ये ऽ अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः ॥ आग्नेयां सोमदले क्षेत्रपाल इहागच्छ इहतिष्ठ **क्षेत्रपालाय नमः । क्षेत्रपालमावाहयामि स्थापयामि**॥

६–ॐजातवेदसे सुनवाम सोम ममराती यतो निदहाति वेदः । सनः पर्षदति दुर्गाणि विश्वानावेव सिंधुं दुरितात्यग्निः ॥ रुद्रकुंभाग्रे चामुण्डे इहागच्छ इहतिष्ठ **चामुण्डायै नमः। चामुण्डामावाहयामि स्थापयामि** ॥

७–ॐ योवः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥ दक्षिणे भौममण्डले मातरः इहागच्छत इहतिष्ठत **मातृभ्यो नमः । मातृनावाहयामि स्थापयामि** ॥

## ।। अथ वेद स्थापनं ।।

१–ॐ अग्निमीले पुरोहितं यज्ञस्य देवमृत्विजम् ॥ होतारं रत्नधातमम् ॥ **पूर्वे** ऋग्वेद इहागच्छ इहतिष्ठ **ऋग्वेदाय नमः । ऋग्वेदमावाहयामि स्थापयामि** ॥

२–ॐ इषेत्वोर्ज्जेत्वा वायवस्थदेवोवः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणऽ आप्यायध्वमघ्न्याऽ इन्द्रायभागं प्रजावतीरनमीवाऽ अयक्ष्मामावस्तेन ईशतमाघशꣳ सोध्रुवाऽ अस्मिन् गोपतौ स्यात बह्वीर्यजमानस्य पशून्पाहि ॥ **दक्षिणे** यजुर्वेद इहागच्छ इहतिष्ठ **यजुर्वेदाय नमः । यजुर्वेदमावाहयामि स्थापयामि** ॥

३–ॐ अग्नऽ आयाहि वीतये गृणानो हव्यदातये । निहोता सत्सि बर्हिषि ॥ पश्चिमे सामवेद इहागच्छ इहतिष्ठ **सामवेदाय नमः** । सामवेदमावाहयामि स्थापयामि ॥

४–ॐशन्नो देवीरभिष्टय आपो भवन्तुपीतये । शँय्योरभिस्रवंतुनः ॥ **उत्तरे** अथर्वणवेद इहागच्छ इहतिष्ठ **अथर्वणवेदाय नमः** । अथर्वणवेदमावाहयामि स्थापयामि ॥

**अथ दिक्पाल स्थापनंः**– पूर्वादितः क्रमाद्दिक्षु इन्द्रादीन्प्रपूजयेत्॥

१–ॐ त्रातारमिन्द्रमवितारमिंद्रꣳ हवे हवे सुहवꣳ शूरमिंद्रम्। ह्वयामि शक्रं पुरुहूतमिन्द्रꣳ स्वस्ति नो मघवा धात्विन्द्रः॥ **पूर्वे** इंद्र इहागच्छ इहतिष्ठ **इंद्राय नमः।** इन्दमावाहयामि स्थापयामि॥

२–ॐत्वन्नो अग्नेवरुणस्य विद्वान् देवस्य हेडो अव यासिसीष्ठाः । यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषा ꣳसि प्र मुमुग्ध्‍ यस्मत् ॥ **आग्नेयां** हुताशन इहागच्छ इहतिष्ठ **हुताशनाय नमः।** हुताशनावाहयामि स्थापयामि ॥

३–ॐसुगन्नुपंथां प्रदिशन्न एहि ज्योतिष्मध्ये ह्यजरन्न आयुः । अपैतु मृत्युममृतं म आगाद्वैवस्वतोनो अभयं कृणोतु ॥ **दक्षिणे** यम इहागच्छ इहतिष्ठ **यमाय नमः** । यममावाहयामि स्थापयामि॥

४–ॐअसुन्वन्तमयजमानमिच्छ स्तेनस्येत्यामन्विहि तस्करस्य । अन्यमस्मदिच्छ सा तऽ इत्या नमो देवि निर्ऋते तुभ्यमस्तु ॥ **नैर्ऋत्यां** निर्ऋते इहागच्छ इहतिष्ठ **नैर्ऋत्यै नमः** । नैर्ऋतिमावाहयामि स्थापयामि ॥

५–ॐ तत्वायामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः । अहेडमानो व्वरुणे हबोध्युरुशꣳस समानऽआयुः प्रमोषीः ॥ **पश्चिमे** वरुण इहागच्छ इहतिष्ठ **वरुणाय नमः** वरुणमावाहयामि स्थापयामि ॥

६–ॐ आनोनियुद्भिः शतिनीभिरध्वरꣳस सहस्त्रिणीभिरुप याहि यज्ञम् । वायो अस्मिन्त्सवने मादयस्व यूयं पात स्वस्तिभिः सदा नः ॥ वायव्ये **वायो** इहागच्छ इहतिष्ठ **वायवे नमः** । वायुमावाहयामि स्थापयामि ॥

७–ॐवयꣳस सोमव्रते तव मनस्तनूषु बिभ्रतः । प्रजावन्तः सचेमहि ॥ उत्तरे कुबेर इहागच्छ इहतिष्ठ **कुबेराय नमः** कुबेर मावाहयामि स्थापयामि ॥

८–ॐअसंख्याता सहस्राणि ये रुद्राऽ अधिभूम्याम्। तेषा ꣳस सहस्रयो जनेव धन्वा नितन्मसि ॥ ॐ तमीशानं जगतस्थुषस्पतिं धियंजिन्वमवसे हूमहे व्वयं । पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ॥ ईशाने रुद्र इहागच्छ इहतिष्ठ **रुद्राय नमः** । रुद्रमावाहयामि स्थापयामि ॥

९–ॐ अस्मे रुद्रा मेहना पर्वतासो वृत्रहत्ये भरहूतौ सजोषाः । यः श ꣳस सते स्तुवते धायि पज्रऽ इन्द्रज्येष्ठा अस्माँ२ अवन्तु देवाः ॥ पूर्वेशानयोर्मध्ये ब्रह्मन्निहागच्छ इहतिष्ठ **ब्रह्मणे नमः** । ब्रह्माणमावाहयामि स्थापयामि ॥

१०–ॐ स्योना पृथिविनो भवानृक्षरा निवेशनी । यच्छा नः शर्म सप्रथाः ॥ पश्चिमनैर्ऋत्यमध्ये अनन्त इहागच्छ इहतिष्ठ **अनन्ताय नमः** । अनन्तमावाहयामि स्थापयामि ॥

**मूर्त्तिंचेत्प्राणप्रतिष्ठां कुर्यात्तद्यथा:–** प्रथमं मूर्त्तीनां अग्न्युत्तारणं एकस्मिन्पात्रे कारयेत् ॥ अत्राद्य. अस्यां सूर्यमूर्त्ते: अथवा आसांसूर्यादि मूर्त्तीनां लोहाद्युपघात दोष निवृत्यर्थं देवत्व सिद्ध्यर्थं पूज्यत्वाधिकार सिद्ध्यर्थंच अग्न्युत्तारणपूर्वकं प्राणप्रतिष्ठापनमहं करिष्ये ॥

प्रथमं दुग्धधारां पातयेत् ॥ **तत्र मंत्रा:–**

ॐ हेमस्यत्वा जरायुणाग्ने परिव्ययामसि । पावको अस्मभ्यꣳ शिवो भव ॥१॥ उपज्मन्नुप वेतसेऽवतर नदीष्वा । अग्ने पित्तमपामसि मण्डूकि ताराभिरागहि सेमन्नो यज्ञं पावकवर्ण ꣳ शिवं कृधि: ॥२॥ अपामिदं न्ययनꣳ समुद्रस्य निवेशनम् । अन्यांस्ते अस्मत्तपंतु हेतय: पावको अस्मभ्यꣳ शिवो भव ॥३॥ समुद्रस्य त्वावकयाग्ने परिव्ययामसि । पावको अस्मभ्यꣳ शिवो भव ॥४॥ नमस्ते हरसे शोचिषे नमस्ते अस्त्वर्चिषे । अन्यांस्ते अस्मत्तपंतु हेतय: पावको अस्मभ्य ꣳ शिवो भव ॥५॥ प्राणदा अपानदा व्यानदा वर्चोदा वरिवोदा: । अन्यांस्ते अस्मत्तपंतु हेतय: पावको अस्मभ्य ꣳ शिवो भव ॥६॥ वह्निदोष निवृत्तिरस्तु । पुनरैभिर्मंत्रैर्जलधारां पातयेत् ।

**तत: पंचामृत स्नानम्** ॥ ॐ पय: पृथिव्यां पयऽ ओषधीषु पयो दिव्यं तरिक्षे पयोधा: । पयस्वती: प्रदिश: संतुमह्यम् ॥ **इति पयसा** ॥ ॐ दधिक्राव्णो अकारिषंजिष्णोरश्वस्य वाजिन: । सुरभिनो मुखाकरत्प्रण: प्रायू ꣳ षितारिषत् ॥ **इति दध्ना** ॥

ॐ घृतंमिमिक्षे घृतमस्ययोनिर्घृते श्रितो घृतम्वस्य धाम । अनुष्वधमावहमादयस्वस्वाहा कृतं वृषभवक्षिहव्यं ॥ **इति घृतेन** ॥ ॐमधुव्वाताऋतायते मधुक्षरंति सिंधव: माध्वीर्न: सन्त्वोषधी: ॥ मधुनक्तमुतोषसो मधुमत्पार्थिव ꣳ रज: । मधु द्यौरस्तु न: पिता ॥ मधुमान्नो वनस्पतिर्मधुमाँ२॥ अस्तु सूर्य्य: माध्वीर्गावो भवन्तु न: ॥ **इति मधुना** ॥ ॐ अपा ꣳ रसमुद्वय स ꣳ सूर्येसंत

ꣳ समाहितम् । अपाꣳ रसस्यबो रसस्तंवो गृह्णाम्युत्तममुपयाम गृहीतोसीन्द्रा यत्वा जुष्टं गृह्णाम्येष ते योनिरिंद्राय त्वा जुष्टतमम् ॥ **इति शर्करया** ॥ आपोहिष्ठेति शुद्धोदकेन स्नाप्य ॥

**प्राण प्रतिष्ठां कुर्यात्ः**–ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं हंसः सोहं अस्याः सूर्य मूर्त्तेः प्राणाः इह प्राणाः ॥ ॐआं ह्रीं क्रों यं रं लं वं शं षं सं हं हंसः सोहं अस्याः सूर्य मूर्त्तेः सर्वेन्द्रियाणि ॥ ॐआं ह्रीं क्रों यं रं लं वं शं षं सं हं हंसः सोहं अस्याः सूर्य मूर्त्तेः वाङ्मनत्वक् चक्षु श्रोत्र जिह्वा घ्राण पाणि पाद पायूपस्थ प्राणा पानव्यानो दान समानाः स्वस्तये सुखं चिरं तिष्ठन्तु स्वाहा ॥ अस्यै प्राणाः प्रतिष्ठंति अस्यै प्राणाः क्षरंति च ॥ अस्यै देवत्वमर्चायै मामहेति कश्चन ॥ गर्भाधानादि पंचदश संस्कार सिद्धयर्थं पंचदश प्रणवावृत्तिं करिष्ये ॥ॐ॥

**ततोध्यानंः**–रक्तांभोधिस्थपातोल्लसदरुण सरोजाधिरूढाकराब्जैः, पाशंकोदण्डमिक्षूद्भवमथगुणमप्यंकुशं पञ्चबाणान् । बिभ्राणं सृक्कपालं त्रिनयनलसिता पीतवक्षोरुहाढ्या देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परानः ॥

ततः प्रतिमास्थापनं मंडले कुर्यात् ॥

इति प्राणप्रतिष्ठा ॥

**हस्ते अक्षतान् गृहीत्वा** ॥ ॐ तदस्तुमित्रा वरुणा तदग्ने शंयो रस्मभ्य मिदमस्तु शस्तम् । अशीमहिगाधमुत प्रतिष्ठान्नमो दिवे बृहते सादनाय ॥ ॐ मनोजूतिर्जुषता माज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञꣳसमिमं दधातु । विश्वेदेवा सऽ इहमादयन्तामो ३ँ॥ प्रतिष्ठ ॥ एषवै प्रतिष्ठानाम् यज्ञो यत्रै तेन यज्ञेन यजंतेन सर्वमेव प्रतिष्ठितं भवतु ॥ श्रीसूर्यादयो ग्रहाः स्थापित देवता रुद्रकलश सहिताः समंडपाः सुप्रतिष्ठिता वरदा भवंतु ॥

**आचम्य प्राणानायम्य** ॥

**संकल्पः**–अत्राद्य. मम सकलपीडोपशान्तिपूर्वक यथेप्सित धनधान्यानेक भोग पुत्रपौत्रादि सुख सिद्ध्यर्थं ग्रहयज्ञांगभूत रुद्रकलशसहित सूर्याद्यनंतानां समस्त स्थापित देवतानां च यथामिलितोपचारैः पूजनाद्यर्चनमहं करिष्ये ॥।

श्री सूर्यादि ग्रहमंडलमध्यस्थ देवताभ्यो नमः आसनार्थे पुष्पाणि समर्पयामि ॥ पादयोः । पाद्यं समर्पयामि ॥ हस्तयोः अर्घ्यं समर्पयामि ॥ मुखे आचमनीयं जलं समर्पयामि ॥ सर्वांगे स्नानं समर्पयामि ॥ मिश्रित पंचामृत स्नानं समर्पयामि ॥ शुद्धोदक स्नानं समर्पयामि ॥ वस्त्रं समर्पयामि ॥ यज्ञोपवीतं समर्पयामि ॥ आचमनीयं जलं समर्पयामि ॥ उपवस्त्रं समर्पयामि ॥ चन्दनं समर्पयामि ॥ गंधं समर्पयामि ॥ अक्षतान् समर्पयामि ॥ पुष्पाणि समर्पयामि ॥ परिमलद्रव्याणि समर्पयामि ॥ सुगंधितैलं समर्पयामि ॥ धूपं आघ्रापयामि ॥ दीपं दर्शयामि ॥ नैवेद्यं निवेदयामि ॥ आचमनीयं जलं समर्पयामि ॥ ऋतुफलं समर्पयामि ॥ ताम्बूलं समर्पयामि ॥ द्रव्यदक्षिणां समर्पयामि ॥ श्रीफलं समर्पयामि ॥ पुष्पआरार्तिकं समर्पयामि श्री सूर्यादि ग्रहमण्डलमध्यस्थ देवताभ्यो नमः रुद्रकलशाय नमः मंत्रपुष्पांजलिं समर्पयामि ॥

**प्रार्थनाः**–ग्रहाः राज्यं प्रयच्छन्ति ग्रहा राज्यं हरंति च । ग्रहैस्तु व्यापितं सर्वं त्रैलोक्यं सचराचरम् ॥ ब्रह्मा मुरारि स्त्रिपुरान्तकारी भानु शशी भूमिसुतो बुधश्च । गुरुश्च शुक्रः शनिराहुकेतवः सर्वे ग्रहाः शान्तिकरा भवन्तु ॥

**अथ विशेषार्घ्यं** ॥ पत्रंपुष्पं फलंतोयं रत्नानि विविधानि च । गृहाणार्घं मयादत्तं देहिमे वाञ्छितं फलम् ॥ रूपं देहि जयं देहि भाग्यं भवति देहि मे । पुत्रान्देहि धनं देहि सर्वकामांश्च देहि मे ॥ फलेन फलितं सर्वं त्रैलोक्यं सचराचरं । फलस्यार्घ प्रदानेन सफलाः सन्तु मनोरथाः ॥ इदं फलं मया देव स्थापितं पुरतस्तव । तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥ इति विशेषार्घ्यं॥

**हस्तेजलमादाय:**–अद्य. सूर्यादि नवग्रहाणां रुद्रकलश सहितानां स्थापित देवतानां च पूजन कृतस्य कर्मणो विधेर्यन्न्यूनमधिकं वा तत्सर्वं भवतां ब्राह्मणानां वचनाच्छ्रीसूर्यादि ग्रहाणां प्रसादात्सर्वविधेः परिपूर्णतामस्तु ॥

तत्रैक ऋत्विक् रुद्रकलशं स्पृष्ट्वा स्वशाखीय **रुद्रजपं कुर्यात्** ॥

**ततः आचार्यः स्थण्डिले आगत्य** ॥ (शेष कुश काण्डिका)

श्रृते चरौ स्रुवः **प्रतपनम्** ॥ तद्यथा ॥ स्रुवस्य प्रागग्रस्या वाङ्मुखस्याग्नौ प्रतपनमुत्तानस्य संमार्जन कुशैरग्रतोग्रान्मूलपर्यंतम्॥ मध्यैरेव मध्याग्रपर्यंतम् ॥ मूलैरेव मूलादग्रपर्यंतं संमार्जनम् ॥ प्रणीताद्भिरभ्युक्षणम् ॥ पुनः प्रतपनं ॥ दक्षिणतोनिदध्यात् ॥ स्रुचेरपि एवं ॥ पाकेवृत्ते स्वयं आज्यमुद्वास्य चरोः पूर्वेण अग्निपश्चिमे नीत्वा प्रणीतोत्तरतः प्रथमं निधाय ॥ चरुं तथैवोद्वास्याज्य पश्चिमेन नीत्वा ज्योत्तरे निधाय स्वपुरतः स्रुवोत्तरे आज्यं तदुत्तरतश्चरुं निधाय प्रोक्षणीतः पवित्रे समानीय ॥ आज्ये प्रोक्षीवदुत्पवनं ॥ पवित्रे प्रोक्षण्यान्निधाय ॥ आज्यमवेक्ष्य सत्यपद्रव्ये तं निरस्य ॥ प्रोक्षण्युत्पवनं विधाय ॥ होम समाप्तिपर्यंतं उपयमनकुशैर्वामिहस्ते उपग्रहं विधाय ॥

ॐ प्रजापतिं चिंतयतु तिष्ठन् प्रागग्रघृताक्त समित्रयं अग्नौ प्रक्षिप्य ॥ समिधोभ्यादाय स्वाहा ॥ ॐ (मनसा) प्रजापतये स्वाहा इदं प्रजापतये न मम ॥ उपविशेत् ॥ प्रोक्षणीभिः सह विष्कमग्निं प्रणीता ब्रह्मसहितं च प्रोक्षण्युदकेन सपवित्रेण दक्षिण चुलकेन गृहीतेन ईशानादि उदकपर्यंतं एषोहि देवरिति पर्युक्ष्य ॥ पवित्रे प्रणीता सुनिधाय ॥ प्रोक्षणीपात्रं स्वस्थाने निदध्यात् ॥ होमशेष संस्रवं तस्य प्रणीतासुधारणं ॥

**अथ होमाहुतयः** ॥ आघारावाज्यभागौ महाव्याहृतयः सर्व प्रायश्चित्तं स्विष्टकृच्छेवं नित्यं सर्वत्र दक्षिणं जान्वाच्य ॥ ब्रह्मान्वारब्धेसति

होतव्या: ॥ यथा:- ब्रह्मणा कर वर्हिषान्वारव्धे सति होतव्या । दक्षिणं जानुं नमयित्वा प्राक्त्रृजुरग्रेर्द्दक्षिण भागे॥
(मनसा) ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम ॥१॥ अग्रेरुत्तरभागे ॥ ॐ इन्द्राय स्वाहा इदं इन्द्राय न मम ॥२॥ ततोत्तरपूर्वार्द्धे ॥ ॐ अग्नये स्वाहा इदमग्नये न मम ॥३॥ ततो दक्षिणे पूर्वार्द्धे ॥ ॐ सोमायस्वाहा इदं सोमाय न मम ॥४॥ इत्याघारावाज्यभागं संस्रवं हुत्वा ॥
ॐ भू: स्वाहा इदमग्नये न मम ॥१॥ ॐ भुव: स्वाहा इदं वायव्ये न मम ॥२॥ ॐ स्व: स्वाहा इदं सूर्याय न मम ॥३॥
(आघारौ नासिका ज्ञेयौ आज्यभागौतु चक्षुषी । वक्रस्योदर कुक्षौ च कटि व्याहृतिभि: स्मृतौ ॥१॥ शीर्षहस्तौ च पादौ च पंचवारुणकं स्मृतम्)

**ततो वायव्यकोणे अग्निं संपूजयेत्** ॥

पुनरग्निं शांडिल्यगोत्रं शांडिल्यासितदेवलेति त्रि प्रवरं अरणिमातरं वरुण पितरं पूजयेत् ॥ शान्तिके वरदनाम्ने वैश्वानराय नम: सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि ॥ (इत्यासनादि संपूज्य)॥
**प्रार्थना:**-ॐअग्निं प्रज्वलितं वंदे जातवेदं हुताशनं । सुवर्ण वर्णममलं समृद्धं विश्वतो मुखम् ॥ इति संप्रार्थ्य ॥ ततो यजमानो द्रव्यत्यागं कुर्यात् ॥
(आदित्यादि समस्त देवताभ्य: समिच्चर्वाज्य तिलादि हवनीय द्रव्यं मया परित्यक्तं न मम यथा देवतमस्तु ॥
प्रथमं ग्रहाणां स्थापित देवतानांच समिधाज्यं चरुहोमस्तिल होम: क्रमेणतु ॥ समिध काष्ठप्रमाणं ॥ अर्क पलाश खदिरो अपामार्गोथ पिप्पल: । औदुम्बर शमी दूर्वा कुशाऽर्कात् समिध: क्रमात् ॥१॥ अलाभेतु प्रकर्त्तव्या: सर्वा: पालाश वृक्षजा: । प्रतिग्रहं

च जुहुयाच्छतमष्टोत्तरं तथा ॥२॥ अष्टाविंशतिरष्टौवा यजेत्पंचामृतप्लुताः ॥ प्रतिद्रव्येन प्रतिग्रहं जुहुयात् ॥

**१–अथ द्रव्य प्रमाणम्ः**–तिलभागश्चतुर्थांशं तन्दुलस्य त्रयं तथा । यवभागं भवेदेकं यथेष्टं च सिताज्ययोः ॥ तिलाधिक्ये भवेद्वुद्धिः समं शोक विवर्द्धनम् ॥

**२–योगिनी मतेः**– तन्दुलस्य चतुर्भागं तिलभाग त्रयं तथा । यवभाग द्वयं प्रोक्तं सिताज्ये च यथा रुचिः ॥ घृताधिक्ये भवेद्राज्यं शर्करायां रिपुक्षयम् । तिलाधिक्ये भवेत्सिद्धिः तन्दुलेन महद्धनम् ॥ यवाधिक्ये शोकमाहौ दृष्ट्वा वस्तूनि कल्पयेत् ॥

**३–अथ मुद्रा लक्षणम्ः**– होमे मुद्रास्त्रयः प्रोक्ता मृगी हंसी च शूकरी । शूकरी धनकामाय आयुः कामाय हंसिनी ॥ मृगी च मोक्षकामाय मुद्रा त्रय उदाहृताः । शूकरी सर्वांगुली सार्द्धं मृगी मुक्त कनिष्ठिका ॥ हंसी कनिष्ठतर्जन्योरेवं मुद्रा प्रकीर्तिताः ॥

**अर्कादि समिद्धोमः**– समिधादि द्रव्यैराकृष्णेनेत्या दिभिर्मंत्रैरेकैकाहुतिः महत्सु कर्मसु प्रतिद्रव्यं अष्टोत्तरशतं अष्टाविंशतिरष्टौवा जुहुयात् ॥)

**अथ सूर्यादि. समिद्धोमः**–

**प्रथमं गणपति मंत्रेणैकाहुतिः**–ॐ गणानांत्वा गणपति ठँ हवामहे प्रियाणां त्वा प्रियपति ठँ हवामहे निधीनां त्वा निधिपति ठँ हवामहे वसो मम । आहमजानि गर्ब्भधमा त्वमजासि गर्ब्भधम् ॥ गं गणपतये स्वाहा । इदं गणपतये न मम ॥

(१) ॐआकृष्णेनरजसाव्वर्त्तमानोनिवेशयन्नमृतंमर्त्त्यंच । हिरण्ययेन सवितारथेना देवोयाति भुवनानि पश्यन् ॥ **सूर्याय स्वाहा** (कपिलाग्नौ) इदं सूर्याय न मम ॥१॥ (अर्क समिधा)

(२) ॐ इमन्देवाऽअसपत्क्नठं सुबध्वम्महतेक्षत्रायमहते ज्ज्यैष्ठ्याय महतेजानराज्ज्यायस्येन्द्रियाय ॥ इमममुष्य पुत्रमुष्ष्यै पुत्रमस्यै व्विशऽ

एष वोमी राजा सोमोस्म्माकम्ब्राह्मणानाꣳराजा ॥ **चन्द्रमसे स्वाहा** (पिंगलाग्नौ) इदं चन्द्रमसे न मम ॥२॥ (पलाश समिधा)

(३) ॐ अग्निर्म्मूर्द्धादिव:ककुत्पति÷पृथिव्याऽअयम् ॥ अपाꣳ रेताꣳ सिजिन्वति ॥ **भौमाय स्वाहा** (धूम्रत्वग्नौ)॥ इदं भौमाय न मम ॥३॥ (खैर समिधा)

(४) ॐ उद्बुद्ध्यस्वाग्ग्ने प्प्रतिजागृहि त्त्वमिष्ट्टापूर्त्ते सꣳ सृजेथामयञ्च ॥ अस्म्मिन्त्सधस्त्थेऽ अद्ध्युत्त रस्म्मिन्विश्श्वे देवा यजमानश्च सीदत ॥ **बुधाय स्वाहा** (जाठराग्नौ) ॥ इदं बुधाय न मम ॥४॥ (अपामार्ग समिधा)

(५) ॐबृहस्प्पते ऽअतियदर्य्यो ऽअर्हाद्द्युमद्विभाति क्क्रतुमज्जनेषु। यद्दीदयच्छवसऽऋतप्प्रजा ततदस्म्मा सुद्द्रविणन्धेहि चित्रम् ॥ **गुरवे स्वाहा** (शिख्यग्नौ)॥ इदं गुरवे न मम ॥५॥ (पीपल समिधा)

(६) ॐअन्नात्त्परिस्स्रुतो रसम्ब्रह्मणा व्व्यपिवत्क्षत्रम्पय: सोमम्प्रजापति:॥ ऋतेनसत्त्यमिन्द्रियं व्विपानꣳ शुक्क्रमन्धसऽइन्द्रस्येन्द्रिय मिदम्पयोमृतम्मधु **शुक्राय स्वाहा** (हाटकाग्नौ) ॥ शुक्राय इदं न मम ॥६॥ (गूलर समिधा)

(७) ॐ शन्नोदेवीरभिष्ट्टयऽ आपोभवन्तुपीतये ॥ शँय्यो रभिस्स्रवन्तुन:॥ **शनैश्चराय स्वाहा** (महोतेजाग्नौ) ॥ इदं शनैश्चराय न मम ॥७॥ (शमी समिधा)

(८) ॐकया नश्चित्रऽआ भुवदूती सदावृध: सखा ॥ कया चिष्ठ्या वृता ॥ **राहवे स्वाहा** (हुताशनाग्नौ) ॥ इदं राहवे न मम ॥८॥ (दूर्वा)

(९) ॐ केतुङ्कृण्ण्वन्नकेतवे पेशोमर्य्याऽअपेशसे ॥ समुषद्भिरजायथा: ॥ **केतवे स्वाहा** (रोहिताग्नौ) इदं केतवे न मम ॥९॥ (कुशा) इति समिद्धोम: ॥

एता एव नवाज्याहुतयः एता एव नवचर्वाज्याहुतयः एताएव नवतिलाहुतयः॥ अन्याश्च तिला हुतयः सर्वे॥

**(लम्बोदरी पद्धत्यनुसारेण षोडश मातृका होमः-**

ॐ गणानान्त्वा गणपति ठं हवामहे प्रियाणां त्वा प्रियपति ठं हवामहे निधीनां त्वा निधिपति ठं हवामहे वसो मम । आहमजानि गर्भधमा त्वमजासि गर्भधम्॥ **गणपतये स्वाहा इदं न मम॥** आयङ्गौः पृश्निरक्रमीदसन् मातरं पुरः । पितरं च प्रयन्त्स्वः॥ **गौर्यै स्वाहा इदं न मम॥** हिरण्यरूपाऽउषसो विरोकऽ उभाविन्द्राऽ उदिथः सूर्यश्च । आरोहतं वरुण मित्र गर्तं ततश्चक्षाथामदितिं दितिं च मित्रोसि वरुणोसि॥ **पद्मायै स्वाहा इदं न मम॥** कदाचन स्तरीरसि नेन्द्रसश्चसि दाशुषे । उपोपेन्नु मघवन् भूयऽइन्नु ते दानं देवस्य पृच्यते॥ **शच्यै स्वाहा इदं न मम॥** मेधांमे वरुणो ददातु मेधामग्निः प्रजापतिः । मेधामिन्द्रश्च वायुश्च मेधां धाता ददातु मे स्वाहा॥ **मेधायै स्वाहा इदं न मम॥** तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि । धियोयोनः प्रचोदयात्॥ **सवित्र्यै स्वाहा इदं न मम॥** विज्यंधनुः कपर्द्दिनो विशल्यो बाणवाँ २॥ उत ।अनेश न्नस्यया ऽइषवऽआभुरस्य निषङ्गधिः॥ **विजयायै स्वाहा इदं न मम॥** यातेरुद्रशिवा तनूरघोरा पापकाशिनी । तया नस्तन्वाशं तमयागिरिशंताभिचाकशीहि॥ **जयायै स्वाहा इदं न मम॥** देवानां भद्रा सुमितिर्ऋजूयतां देवाना ठं रातिरभि नो निवर्त्तताम् । देवानाठं सख्यमुपसेदिमा वयं देवानऽआयुः प्रतिरन्तु जीवसे॥ **देवसेनायै स्वाहा इदं न मम॥** पितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः स्वधायिभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः। अक्षन् पितरोमीमदन्त पितरोतीतृपन्त पितरः पितरः शुन्धध्वम्॥ **स्वधायै स्वाहा इदं न मम॥** स्वाहा यज्ञं वरुणः सुक्षत्रो भेषजं करत् । अतिच्छन्दा ऽ इन्द्रियं बृहदृषभो गौर्वयो दधुः॥ **स्वाहायै स्वाहा इदं न मम॥** तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि । धियोयोनः

प्रचोदयात् ॥ **मातृभ्यो स्वाहा इदं न मम** ॥ भवतन्नः समनसौ सचेतसा वरेपसौ । मा यज्ञꣳ हिꣳ सिष्टं मा यज्ञपतिं जातवेदसौ शिवौ भवतमद्य नः ॥ **लोकमातृभ्यो स्वाहा इदं न मम** ॥ यत्प्रज्ञानमुतचेतो धृतिश्चयज्योतिरंतरमृतं प्रजासु । यस्मान्नऽऋते किंचनकर्म क्रियते तन्मे मनः शिवसङ्कल्पमस्तु ॥ **धृत्यै स्वाहा इदं न मम** ॥ तत्वायामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः । अहेडमानो वरुणेह बोध्युरुशꣳ स मान ऽ आयुः प्रमोषीः ॥ **पुष्ट्यै स्वाहा इदं न मम** ॥ बृहस्पतेऽअतियदर्योऽअर्हा द्युमद्विभाति क्रतुमज्जनेषु । यद्दीदयच्छवस ऋत प्रजा ततदस्मा सुद्रविणं धेहि चित्रम् ॥ **तुष्ट्यै स्वाहा इदं न मम** ॥

प्राणाय स्वाहा पानाय स्वाहा व्यानाय स्वाहा । अंबेऽ अंबिकेऽ म्बालिके नमानयति कश्चन । ससस्त्यश्वकः सुभद्रिकांकाम्पीलवासिनीम् ॥ **आत्मनः कुलदेवतायै स्वाहा इदं न मम** ॥

**वसोर्द्धारा होमः** ॥

ॐ व्वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्त्रधारम्। देवत्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः॥

**वसोर्द्धाराभ्यः स्वाहा इदं न मम** ॥

मनसः काममाकूतिम् वाचः सत्यमशीय । पशूनाꣳ रूपमन्नस्य रसो यशः श्रीः श्रयतां मयिस्वाहा ॥ **श्रियै स्वाहा । इदं न मम**॥ श्रीश्चते लक्ष्मीश्चपत्क्यृा बहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौव्याप्तम् । इष्णंन्निषाणा मुम्मइषाण सर्वलोकंमइषाण ॥ **लक्ष्म्यै स्वाहा । इदं न मम** ॥ इह रतिरिह रमध्वमिह धृतिरिह स्वधृतिः स्वाहा । उपसृजन् धरुणं मात्रे धरुणो मातरं धयन् । रायस्पोषमस्मासु दीधरत् स्वाहा ॥ **धृत्यै स्वाहा । इदं न मम** ॥ मेधां मे वरुणो ददातु मेधामग्निः प्रजापतिः। मेधामिन्द्रश्च वायुश्च मेधां धाता ददातु मे स्वाहा ॥ **मेधायै स्वाहा। इदं न**

**मम** ॥ प्राणाय स्वाहा पानाय स्वाहा व्यानाय स्वाहा चक्षुषे स्वाहाश्श्रोत्राय स्वाहा व्वाचे स्वाहा मनसे स्वाहा । **स्वाहायै स्वाहा । इदं न मम** ॥ यत्प्रज्ञानमुतचेतो धृतिश्च यज्योतिरन्तरमृतम्प्रजासु । यस्मानऽऋृते किञ्चन कर्म्मक्रियते तन्मे मनः शिवसंकल्पमस्तु ॥ **प्रज्ञायै स्वाहा । इदं न मम** ॥ पावका नः सरस्वती व्वाजेभिर्व्वाजिनीवति । यज्ञं व्वष्टुधियावसुः । **सरस्वत्यै स्वाहा इदं न मम** ॥

**हस्ते जल मादायः**– इमानि हवनीय द्रव्याणि या या यक्ष्यमाण देवताः ताभ्यस्ताभ्यः परित्यक्तानि इदं न मम ॥ यथा देवत मस्तु ॥

**विशेषनवाहुतयः**–

ॐअग्निं दूतं पुरोदधे हव्यवाहमुपब्रुवे । देवाँ ३॥ आसादयादिह **स्वाहा** ॥१॥ अप्स्वग्ने सधिष्ठ वसौषधी रनुरुध्यसे । गर्भे सञ्जायसे पुनः **स्वाहा** ॥२॥ स्योना पृथिविनो भवानृक्षरा निवेशनी । यच्छा नः शर्म सप्रथाः **स्वाहा** ॥३॥ इदं विष्णुर्विचक्रमे त्रेधा नि दधे पदम् । समूढमस्यपाꣳ सुरे **स्वाहा** ॥४॥ महाँ३॥ इन्द्रो वज्रहस्तःषोडशी शर्म यच्छतु हन्तुपाप्मानं योस्मान्द्वेटि **स्वाहा** ॥५॥ शुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्माँश्च ।शुक्रश्च ऋतपाश्चात्यꣳ हाः **स्वाहा** ॥६॥ प्रजापते नत्वदेतान्यन्यो विश्वा रूपाणि परि ता वभूव । यत्कामास्ते जुहुमस्तन्नोऽ अस्तु व्वयꣳ स्यामपतयोरयीणाम् **स्वाहा** ॥७॥ आयङ्गौः पृश्निरक्रमीदसन् मातरं पुरः । पितरं च प्रयन्त्स्वः **स्वाहा** ॥८॥ ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचोव्वेन ऽ आवः । सबुध्न्या ऽ उपमा ऽऽ अस्यविष्ठाः सतश्च योनिमसतश्चव्विवः **स्वाहा** ॥९॥)

**अथाधि देवता मंत्राः**–ॐत्र्यम्बकं यजामहे सुगंधिम्पुष्टिवर्द्धनम् । उर्वारुकमिव बंधनान्मृत्यो र्मुक्षीय माऽमृतात् । त्र्यम्बकं यजामहे सुगंधिम्पतिवेदनम् । उर्वारुकमिव बन्धनादितो मुक्षीय माऽमुतः

॥ **रुद्राय स्वाहा** ॥१॥ श्रीश्चते लक्ष्मीश्चपत्क्न्या बहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् । इष्णन्निषाणामुम्मऽइषाण सर्वलोकंमऽइषण ॥ **श्रियै स्वाहा** ॥२॥ यदक्रंद: प्रथमं जायमान ऽ उद्यन्त्समुद्रादुत वा पुरीषात् । श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं महि जातं तेऽ अर्वन् ॥ **स्कन्दाय स्वाहा** ॥३॥ विष्णोरराटमसिविष्णो: श्नप्त्रेस्थो विष्णो: स्यूरसिविष्णोर्ध्रुवोसि । वैष्णवमसि विष्णवेत्वा ॥ **विष्णवे स्वाहा** ॥४॥ आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे राजन्य: शूर ऽ इषव्योतिव्याधी महारथो जायतां दोग्ध्री धेनुर्वोढानड्वानाशु: सप्ति: पुरन्धिर्योषा जिष्णू रथेष्ठा: सभेयो युवास्य यजमानस्य वीरो जायतां निकामे-निकामे न: पर्जन्यो वर्षतु फलवत्यो नऽ ओषधय: पच्यन्तां योगक्षेमो न: कल्पताम् ॥ **ब्रह्मणे स्वाहा** ॥५॥ सजोषा ऽइन्द्र सगणो मरुद्भि: सोमं पिब वृत्रहा शूर विद्वान् । जहि शत्रूँऽरप मृधोनुदस्वाथाभयं कृणुहि विश्वतो न: ॥ **इन्द्राय स्वाहा** ॥६॥ यमाय त्वा मखाय त्वा सूर्यस्य त्वा तपसे । देवस्त्वा सविता मध्वानक्तु पृथिव्या: सᳬं स्पृशस्पाहि । अर्चिरसि शोचिरसि तपोसि ॥ **यमाय स्वाहा** ॥७॥ कार्षिरसि समुद्रस्य त्वा क्षित्याऽ उन्नयामि । समापो अद्भिरग्मत समोषधीभिरोषधी: ॥ **कालाय स्वाहा** ॥८॥ चित्रावसोस्वस्तितेपारमशीय ॥ **चित्रगुप्ताय स्वाहा** ॥९॥ इत्यधिदेवता: ॥

**हस्ते जल मादाय:**–इमानि हवनीय द्रव्याणि या या यक्ष्यमाण देवता: ताभ्यस्ताभ्य: परित्यक्तानि इदं न मम ॥ यथा देवत मस्तु॥

**अथ प्रत्यधि देवता:**–ॐसन: पितेव सूनवेग्ने सूपायनो भव । सचस्वान: स्वस्तये ॥ **अग्नये स्वाहा** ॥१॥ आपोअद्यान्वचारिᳬं समसृक्ष्महि । पयस्वानग्नआगमतं मा सᳬं सृजवर्चसा प्रजया च धनेन च ॥ **अद्भ्य स्वाहा** ॥२॥ चिदसि तया देवतयाङ्गिरस्वद् ध्रुवा सीद । परिचिदसि तया देवतयाङ्गिरस्वद् ध्रुवासीद ॥ **पृथिव्यै**

**स्वाहा** ॥३॥ इदं विष्णुर्विचक्रमे त्रेधा नि दधे पदम् । समूढमस्यपाछं सुरे स्वाहा ॥ **विष्णवे स्वाहा** ॥४॥इन्द्रआसान्नेता बृहस्पतिर्दक्षिणा यज्ञः पुरऽएतु सोमः । देवसेनानामभिभंजतीनां जयंतीनां मरुतो यंत्वग्रम् ॥ **इन्द्राय स्वाहा** ॥५॥ इन्द्रं दैवीर्विशो मरुतोनुवर्त्मानो भवन्यथेन्द्रन्‍ दैवीर्विशो मरुतोनु विवर्त्मानो ऽभवन् । एवमिमं यजमानं दैवीश्चविशो मानुषीश्चानुवर्त्मानो भवन्तु ॥ **इन्द्राण्यै स्वाहा** ॥६॥ प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परि ता वभूव । यत्कामास्ते जुहुमस्तन्नोऽ अस्तु व्वयछं स्यामपतयोरयीणाम् स्वाहा ॥ **प्रजापतये स्वाहा** ॥७॥ नमोस्तु सर्पेभ्यो ये के च पृथिवी मनु । ये ऽ अन्तरिक्षे येदिवि तेभ्यः सर्पेभ्यो नमः ॥ **सर्पेभ्यो स्वाहा** ॥८॥ ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचोव्वेन ऽ आवः । सबुध्न्या ऽ उपमा ऽ अस्यविष्ठाः सतश्च योनि मसतश्चव्विवः ॥ **ब्रह्मणे स्वाहा** ॥९॥

**हस्ते जल मादायः**–इमानि हवनीय द्रव्याणि या या यक्ष्यमाण देवताः ताभ्यस्ताभ्यः परित्यक्तानि इदं न मम ॥ यथा देवत मस्तु ॥

**अथ गणपंचकंः**–ॐगणानांत्वा गणपति ठँ हवामहे प्रियाणां त्वा प्रियपति ठँ हवामहे निधीनां त्वा निधिपति ठँ हवामहे वसो मम । आहमजानि गब्भर्धमा त्वमजासि गब्भर्धम् ॥ **गणपतये स्वाहा** ॥१॥ जातवेदसे सुनवामसो ममराती यतो निदहाति वेदः । सनः पर्षदिति दुर्गाणि विश्वानावेव सिंधुं दुरितात्यग्निः ॥ **दुर्गायै स्वाहा** ॥२॥ वायो ये ते सहस्त्रिणो रथासस्तेभिरा गहि । नियुत्वान्त्सोमपीतये ॥ **वायवे स्वाहा** ॥३॥ घृतं घृतपावानः पिवतव्वसां वसा पावानः पिवतान्तक्षिस्य हविरसि स्वाहा । दिशः प्रदिशऽआदिशो विदिश ऽ उद्दिशोदिग्भ्यः स्वाहा ॥ **आकाशाय स्वाहा** ॥४॥ द्यावांकाशा मधुमत्यश्विना सूनृतावती । तयायज्ञम्मिमिक्षतम् ॥ **अश्विनीकुमाराभ्यां स्वाहा** ॥५॥

**अथ नक्षत्र देवता मंत्राः-**

ॐअश्विना तेजसा चक्षुः प्राणेन सरस्वती वीर्यम् । वाचेंद्रो बलेनेन्द्रायदधुरिन्द्रियम् ॥ **अश्विन्यै स्वाहा** ॥१॥ यमाय त्वा मखाय त्वा सूर्यस्यत्वा तपसे । देवस्त्वा सविता मध्वानक्तु पृथिव्याः सꣳ स्पृशस्पाहि । अर्चिरसि शोचिरसि तपोसि ॥ **भरण्यै स्वाहा** ॥२॥ अयमग्निः सहस्त्रिणो व्वाजस्य शतिनस्पतिः । मूर्द्धाकवी रयीणाम् ॥ **कृत्तिकायै स्वाहा** ॥३॥ ब्रह्मजज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन ऽ आवः । स बुध्न्याऽ उपमाऽ अस्य विष्ठाः सतश्च योनिमसतश्च वि वः ॥ **रोहिण्यै स्वाहा** ॥४॥ सोमो धेनुꣳ सोमो अर्वन्तमाशुꣳ सोमो वीरं कर्मण्यं ददाति । सादन्यं विदथ्यꣳ सभेयं पितृश्रवणं यो ददाशदस्मै ॥ **मृगशिरसे स्वाहा** ॥५॥ नमस्ते रुद्रमन्यव ऽउतोतऽइषवे नमः । बाहुभ्यामुतते नमः ॥ **आर्द्रायै स्वाहा** ॥६॥ अदितिर्द्यौरदितिरंतरिक्षमदितिर्माता सपिता सपुत्रः । विश्वेदेवा अदितिः पंचजनाऽअदितिर्जातमदितिर्जनित्वम् ॥ **पुनर्वसवे स्वाहा** ॥७॥

वाचस्पते पवस्व वृष्णोऽ अꣳ शुभ्यांगभस्तिपूतः । देवो देवेभ्यः पवस्वयेषां भागोसि ॥ **पुष्याय स्वाहा** ॥८॥ नमोस्तु सर्पेभ्यो ये के च पृथिवी मनु । ये ऽ अन्तरिक्षे येदिवि तेभ्यः सर्पेभ्यो नमः ॥ **अश्लेषायै स्वाहा** ॥९॥ पितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः स्वधायिभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधायिभ्यः नमः । अक्षन् पितरोमीमदन्त पितरोतीतृपन्त पितरः पितरः शुन्धध्वम् ॥ **मघायै स्वाहा** ॥१०॥ भग प्रणेतर्भग सत्यराधो भगेमां धियमुदवा ददन्नः । भग प्र नो जनय गोभिरश्वैर्भग प्र नृभिर्नृवन्तः स्याम ॥ **पूर्वा फाल्गुन्यै स्वाहा** ॥११॥ दैव्या वध्वर्यू आगतꣳ रथेन सूर्यत्वचा । मध्वायज्ञꣳ समंजाथे ॥ **उत्तरा फाल्गुन्यै स्वाहा** ॥१२॥ विभ्राड् बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावविह्रुतं । वातजूतोयो अभिरक्षित्मना प्रजाः

पुपोषपुरुधा विराजति ॥ **हस्ताय स्वाहा** ॥१३॥ त्वष्टा तुरीपो अद्भुतऽ इन्द्राग्नी पुष्टिवर्धना । द्विपदा छन्दऽ इन्द्रियमुक्षा गौर्न वयो दधुः ॥ **चित्रायै स्वाहा** ॥१४॥ पीवो अन्ना रयिवृधः सुमेधाः श्वेतः सिषक्ति नियुतामभिश्रीः । ते वायवे समनसो वि तस्थुर्विश्वेन्नरः स्वपत्यानि चक्रुः ॥ **स्वात्यै स्वाहा** ॥१५॥ इन्द्राग्नी आगतꣳ सुतं गीर्भिर्नभो वरेण्यम् । अस्य पातं धियेषिता ॥ **विशाखायै स्वाहा** ॥१६॥ नमो मित्रस्य वरुणस्य चक्षसे महोदेवायतदृतꣳ सपर्य्यत ॥ दूरे दृशे देवजाताय केतवे दिवस्पुत्राय सूर्य्यायशꣳ सत ॥ **अनुराधायै स्वाहा** ॥१७॥ सऽइषुहस्तैः सनिषंगिभिर्वशीसꣳ स्रष्टा सयुध इन्द्रोगणेन । सꣳ सृष्टजित्सोमपा बाहुशर्ध्युग्रधन्वा प्रतिहिताभिरस्ता ॥ **ज्येष्ठायै स्वाहा** ॥१८॥ मातेव पुत्रं पृथिवी पुरीष्यमग्निꣳ स्वे योनावभारुषा । तां विश्वैदेवैर्ऋतुभिः संविदानः प्रजापतिर्विश्वकर्मा वि मुञ्चतु ॥ **मूलाय स्वाहा** ॥१९॥ अपाघमप किल्बिषमप कृत्यामपो रपः । अपामार्ग त्वमस्मदपदुःष्वप्न्यꣳ सुव ॥ **पूर्वाषाढायै स्वाहा** ॥२०॥ विश्वे अद्य मरुतो विश्व ऽ ऊती विश्वे भवन्त्वग्नयः समिद्धाः । विश्वे नो देवाऽ अवसागमन्तु विश्वमस्तु द्रविणं वाजो अस्मे ॥ **उत्तराषाढायै स्वाहा** ॥२१॥ तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि । धियोयोनः प्रचोदयात् ॥ **अभिजिते स्वाहा** ॥२२॥ विष्णोरराटमसि विष्णोः श्नप्त्रे स्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोसि । वैष्णवमसि विष्णवे त्वा ॥ **श्रवणाय स्वाहा** ॥२३॥ वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारम् । देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः ॥ **धनिष्ठायै स्वाहा** ॥२४॥ वरुणस्योत्तंभनसि वरुणस्य स्कम्भसर्जनी स्थो वरुणस्य ऋतसदन्यसि वरुणस्यऋतसदनमसि वरुणस्यऋतसदन मासीद ॥ **शतभिषायै स्वाहा** ॥२५॥ उतनोहिर्बुध्न्यः शृणोत्वजऽ एकपात्पृथिवी समुद्रः । विश्वे देवाऽ ऋतावृधो हुवानाः स्तुता

मन्त्राः कविशस्ताऽ अवन्तु ॥ **पूर्वाभाद्रपदायै स्वाहा** ॥२६॥ शिवोनामासि स्वधितिस्ते पितानमस्ते अस्तु मा माहिᳬं सीः। निवर्त्तयाम्यायुषेन्नाद्याय प्रजननाय रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय ॥ **उत्तभाद्रपदायै स्वाहा** ॥२७॥ ॐ पूषन् तवव्रते वयन्नरिष्येम कदाचन । स्तोतारस्तऽ इहस्मसि ॥ **रेवत्यै स्वाहा** ॥२८॥ इति नक्षत्र देवताः ॥

ॐयोगे योगे तवस्तरं वाजे वाजे हवामहे । सखाय ऽ इन्द्रमूतये ॥ **योगेभ्यः स्वाहा** ॥१॥ भद्रं कर्णेभिः श्रृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरंगैस्तुष्टुवा ᳬं सस्तनूभिर्व्यशेमहि देवहितं यदायुः ॥ **करणेभ्यः स्वाहा** ॥२॥ ध्रुवोसि ध्रुवोऽयं यजमानोऽस्मिन्नायतने प्रजया पशुभिर्भूयात् । घृतेनद्यावा पृथिवी पूर्येथामिंद्रस्यच्छदिरसि विश्वजनस्य छाया ॥ **ध्रुवाय स्वाहा** ॥३॥ पंचनद्यः सरस्वतीमपियंति सस्रोतसः । सरस्वतीतु पंचधासो देशे भवत्सरित् ॥ **सरिद्भ्यः स्वाहा** ॥४॥ सप्तऋषयः प्रतिहिताः शरीरे सप्तरक्षंति सदमप्रमादम् । सप्तापः स्वपतो लोकमीयुस्तत्र जागृतो अस्वप्नजौ सत्रसदौ च देवौ ॥ **सप्तऋषिभ्यः स्वाहा** ॥५॥ इमम्मे वरुणश्रुधी हवमद्या च मृडय । त्वामवस्युरा चके ॥ **सागरेभ्यः स्वाहा** ॥६॥ प्रपर्वतस्य वृषभस्य पृष्ठान्नावश्चरन्ति स्वसिचऽ इयानाः । ताऽ आववृत्रन्नधरागुदक्ताऽ अहि बुध्न्यमनु रीयमाणाः ॥ **पर्वतेभ्यः स्वाहा** ॥७॥ यवोयस्ते वाजिन्निहितो गुहायः श्येनेपरितो अचरच्चवाते । तेननो व्वाजिन्बलवान्बलेन वाजजिच्च भव समने च पारयिष्णुः वाजिनो व्वाजजितोव्वाज ᳬं सरिष्यंतो बृहस्पतेर्भागमवजिघ्रत ॥ **रैवंताय स्वाहा** ॥८॥ सुपर्णोसि गरुत्मांस्त्रिवृत्ते शिरो गायत्रं चक्षुर्बृहद्रथन्तरे पक्षौ । स्तोमऽ आत्मा छन्दाᳬं स्यङ्गानि यजूᳬं षि नाम । साम ते तनूर्वामदेव्यं यज्ञायज्ञियम्पुच्छं धिष्ण्याः शफाः । सुपर्णोसि

गरुत्मान्दिवं गच्छ स्व:पत ॥ **गरुत्मते स्वाहा** ॥९॥ असंख्याता सहस्राणि ये रुद्रा अधिभूम्याम् । तेषाꣳ सहस्रयोजनेव धन्वानि तन्मसि ॥ **रुद्राय स्वाहा** ॥१०॥ सहस्रशीर्षापुरुषः सहस्राक्षः सहस्रपात् । सभूमिꣳ सर्वत स्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥ **विष्णवे स्वाहा** ॥११॥ वास्तोष्पते प्रतिजानीह्यस्मान्त्वावेशोऽ अनमीवो भवानः । यत्वेमहे प्रतितन्नो जुषस्वशन्नो अस्तुद्विपदे शं चतुष्पदे ॥ **वास्तोष्पतये स्वाहा** ॥१२॥ गणानांत्वा गणपति ठँ हवामहे प्रियाणां त्वा प्रियपति ठँ हवामहे निधीनां त्वा निधिपति ठँ हवामहे वसो मम । आहमजानि गर्भधमा त्वमजासि गर्भधम् ॥ **गणपतये स्वाहा** ॥१३॥ नमोस्तु सर्पेभ्यो येके च पृथिवीमनु । ये अंतरिक्षे ये दिवि तेभ्यः सर्प्पेभ्योनमः ॥ **क्षेत्रपालाय स्वाहा** ॥१४॥

जातवेदसे सुनवाम सोममराती यतो निदहाति वेदः । सनः पर्षदति दुर्गाणि विश्वानावेव सिंधुं दुरितात्यग्निः ॥ **चामुण्डायै स्वाहा** ॥१५॥ योवः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥ **मातृभ्यो स्वाहा** ॥१६॥

**हस्ते जल मादायः-** इमानि हवनीय द्रव्याणि या या यक्ष्यमाण देवताः ताभ्यस्ताभ्यः परित्यक्तानि इदं न मम ॥ यथा देवत मस्तु ॥

**अथ वेदाः-**

अग्निमीले पुरोहितं यज्ञस्य देवमृत्विजम् ॥ होतारं रत्नधातमम् ॥ **ऋग्वेदाय स्वाहा** ॥१॥

इषे त्वोर्ज्जे त्वा वयव स्थ देवोवः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणऽ आप्यायध्वमघ्न्याऽ इंद्राय भागं प्रजावतीरनमीवाऽ अयक्ष्मा मा वस्तेनऽ ईशतमाघश ꣳ सोध्रुवाऽ अस्मिन्गोपतौ स्यात बह्वीर्यजमानस्य पशून्पाहि ॥ **यजुर्वेदाय स्वाहा** ॥२॥

अग्न ऽ आयाहि वीतये गृणानो हव्यदातये । निहोतासत्सिबर्हिषि ॥ **सामवेदाय स्वाहा** ॥३॥ शन्नो देवीरभिष्टय आपो भवन्तुपीतये । शँय्योरभिस्त्रवन्तुनः ॥ **अथर्ववेदाय स्वाहा** ॥४॥

## अथ दिक्पाल होम

ॐत्रातारमिन्द्रमवितारमिंद्र थं हवे हवे सुहवथं शूरमिन्द्रम् । ह्वयामि शक्रं पुरुहूतमिन्द्रथं स्वस्ति नो मघवा धात्विन्द्रः॥ **इन्द्राय स्वाहा** ॥१॥ त्वन्नो अग्नेवरुणस्य विद्वान् देवस्य हेडो अव यासिसीष्ठाः । यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषा थं सि प्र मुमुग्ध्यस्मत् ॥ **हुताशनाय स्वाहा** ॥२॥ सुगन्नुपंथां प्रदिशन्न एहि ज्योतिष्मध्ये ह्यजरन्न आयुः । अपैतु मृत्युरमृतं म ऽआगाद्वैवस्वतोनो अभयं कृणोतु ॥ **यमाय स्वाहा** ॥३॥ असुन्वन्तमयजमानमिच्छ स्तेनस्येत्यामन्विहि तस्करस्य । अन्यमस्मदिच्छ सा तऽ इत्या नमो देवि निर्ऋते तुभ्यमस्तु ॥ **नैऋतये स्वाहा** ॥४॥ तत्वायामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः । अहेडमानो व्वरुणे हबोध्युरुशथं स मा न ऽ आयुः प्र मोषीः ॥ **वरुणाय स्वाहा** ॥५॥ आनोनियुद्भिः शतिनीभिरध्वरथं सहस्त्रिणीभिरुप याहि यज्ञम् । वायो अस्मिन्त्सवने मादयस्व यूयं पात स्वस्तिभिः सदा नः॥ **वायवे स्वाहा** ॥६॥ वयथं सोमव्रते तव मनस्तनूषु बिभ्रतः । प्रजावन्तः सचेमहि ॥ **कुबेराय स्वाहा** ॥७॥ तमीशानं जगतस्तस्थुषस्पतिं धियंजिन्वमवसे हूमहे व्वयम् । पूषा नो यथा वेदसामसद् वृधे रक्षिता पायुरदब्धः स्वस्तये ॥ **रुद्राय स्वाहा** ॥८॥ अस्मे रुद्रा मेहना पर्वतासो वृत्रहत्ये भरहूतौ सजोषाः । यः श थं सते स्तुवते धायि पज्रऽ इन्द्रज्येष्ठा अस्माँ२ अवन्तु देवाः ॥ **ब्रह्मणे स्वाहा** ॥९॥ स्योना पृथिविनो भवानृक्षरा निवेशनी । यच्छा नः शर्म सप्रथाः ॥ **अनन्ताय स्वाहा** ॥१०॥

बृहत्कर्मसु प्रधानहोमोऽत्र कुर्यात् ॥

**हस्ते जल मादायः**– इमानि हवनीय द्रव्याणि या या यक्ष्यमाण देवताः ताभ्यस्ताभ्यः परित्यक्तानि इदं न मम ॥ यथा देवत मस्तु ॥

**गुग्गुल होमः**–अद्य पूर्वोच्चारित तिथौ मम गृहे भूत प्रेत पिशाच दोष परिहारार्थं त्र्यम्बकमन्त्रेण गुग्गुल होम महं करिष्ये ॥

त्र्यम्बकं यजामहे सुगंधिम्पुष्टिवर्द्धनम् । उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय माऽमृतात् । त्र्यंबकं यजामहे सुगंधिम्पतिवेदनम्। उर्वारुकमिव बन्धनादितो मुक्षीय माऽमुतः **स्वाहा** ॥

**सर्षपहोमः**– सर्षपान् घृतेनाभिधार्य । अद्यपूर्वोच्चारित मम गृहे सर्वारिष्ट परिहारार्थं सर्व शत्रु बल क्षयार्थं सर्षपहोम महं करिष्ये॥ ॐसजोषा ऽइन्द्र सगणो मरुद्भिः सोमं पिब वृत्रहा शूर विद्वान्। जहि शत्रूँरऽरप मृधोनुदस्वाथाभयं कृणुहि विश्वतो नः **स्वाहा**॥

**अथ लक्ष्मी होमः** ॥ तन्दुलाज्य दुग्धशर्करामृत द्रव्येण श्रीश्चते, मनसः काममा, श्रीसूक्तेन च होम कार्यः ॥ अद्यपूर्वोच्चारित मम गृहे अलक्ष्मी विनाशार्थं दशविध लक्ष्मी प्राप्त्यर्थं लक्ष्मी होम महं करिष्ये ॥

ॐश्रीश्चते लक्ष्मीश्चपत्क्न्या बहोरात्रे पार्श्वे नक्षत्राणि रूप मश्विनौऽव्यात्तम् । इष्ष्णन्निषाणा मुम्मऽइषाण सर्वलोकम्मऽइषाण **स्वाहा** ॥

ॐ मनसः काममाकूतिम् वाचः सत्यमशीय । पशूनाꣳ रूपमन्नस्य रसो यशः श्रीः श्रयतां मयि **स्वाहा** ॥

ॐ हिरण्यवर्णां हरिणीं सुवर्ण रजतस्रजाम् । चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह स्वाहा ॥१॥ ॐतांमऽआवह जातवेदो लक्ष्मी मनपगामिनीम् । यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् स्वाहा ॥२॥ ॐ अश्वपूर्वां रथमध्यां हस्तिनाद प्रबोधिनीम् ।

श्रियं देवीमुपह्वये श्रीर्मा देवीर्जुषताम् स्वाहा ॥३॥ ॐ कांसोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् । पद्मेस्थितां पद्मवर्णां तामिहोपह्वये श्रियम् स्वाहा ॥४॥ ॐ चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम् । तां पद्मनेमिं शरणमहं प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणोमि स्वाहा ॥५॥ ॐ आदित्यवर्णे तपसोधिजातो वनस्पतिस्तव वृक्षोऽथबिल्वः । तस्य फलानि तपसा नुदन्तु मायान्तरायाश्च बाह्याऽअलक्ष्मीः स्वाहा ॥६॥ ॐ उपैतु मां देवसखः कीर्तिश्च मणिना सह । प्रादुर्भूतोस्मि राष्ट्रेस्मिन् कीर्तिं वृद्धिं ददातु मे स्वाहा ॥७॥ ॐ क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् । अभूतिमसमृद्धिंच सर्वांनिर्णुद मे गृहात् स्वाहा ॥८॥ ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टाङ्करीषिणीम्। ईश्वरीं सर्वभूतानां तामिहोपह्वयेश्रियम् स्वाहा ॥९॥ ॐ मनसः काममाकूतिं वाचः सत्यमशीमहि । पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः स्वाहा ॥१०॥ ॐ कर्द्दमेन प्रजा भूता मयि सम्भव कर्द्दम । श्रियं वासय मे कुले मातरं पद्ममालिनीम् स्वाहा ॥११॥ ॐ आपः स्रजन्तु स्निग्धानि चिक्लीत वस मे गृहे । निच देवीं मातरं श्रियं वासय मे कुले स्वाहा ॥१२॥ ॐ आर्द्रां यः करिणीं यष्टिं सुवर्णां हेममालिनीम् । सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह स्वाहा ॥१३॥ ॐ आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीं । चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह स्वाहा ॥१४॥ ॐ तांमऽ आवह जातवेदो लक्ष्मीमनपगामिनीम् । यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान्विन्देयं पुरुषानहम् स्वाहा ॥१५॥ यः शुचिः प्रयतो भूत्वा जुहुयादाज्य मन्वहम् । सूक्तं पञ्चदशर्चं श्रीकामः सततं जपेत् ॥१६॥

**प्रार्थना**:–अश्वदायी गोदायी धनदायी महाधने । धनं मे जुषतां देवि सर्वकामाँश्च देहि मे ॥ पुत्रपौत्रधनं धान्यं हस्त्यश्वादि गवे रथम् । प्रजानां भवसि माता आयुष्मन्तं करोतु मे ॥ धनमग्निर्धनं

वायुर्धनं सूर्यो धनं वसुः । धनमिन्द्रो बृहस्पतिर्वरुणं धनमश्विनौ ॥ वैनतेय सोमं पिब सोमं पिबतु बृत्रहा । सोमं धनस्य सोमिनो मह्यं ददातु सोमिनः ॥ न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः । भवन्ति कृत पुण्यानां भक्तानां श्रीसूक्तं जपेत् ॥ पद्मानने पद्मऊरु पद्माक्षि पद्मसम्भवे । तन्मे भजसि पद्माक्षि येन सौख्यं लभाम्यहम् ॥ यः शुचिः प्रयतो भूत्वा जुहुयादाज्य मन्वहम् । श्रियः पञ्चदशर्चं च श्रीकामः सततं जपेत् ॥

श्रीर्वर्चस्वमायुष्यमारोग्यमाविधात्पवमानं महीयते । धान्यं धनं बहुपशुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥ इति मन्त्रैः संप्रार्थ्य ॥

ततो व्याहृति होमश्च कर्त्तव्यः स्वेच्छया तिलैः ॥

ततः सर्वहविषां स्विष्टकृद्धोम ॥ तद्यथा :-

**हुत शेषादभिधार्यः**-ॐअग्नये स्विष्टकृते स्वाहा ॥ इदमग्नये स्विष्टकृते न मम ॥

ततो अनादिष्ट प्रायश्चित्त संज्ञका **नवा हुतयः**-

ॐ भूः स्वाहा इदमग्नये न मम ॥१॥ ॐ भुवः स्वाहा इदं वायवे न मम ॥२॥ ॐ स्वः स्वाहा इदं सूर्याय न मम ॥३॥

ॐत्वन्नोऽ अग्ने व्वरुणस्य विद्वान्देवस्यहेडोऽ अवयासिसीष्ठाः॥ यजिष्ठोवह्नितमः शोशुचानो विश्वा द्वेषाꣳसि प्रमुमुग्ध्यस्मत् स्वाहा॥ इदमग्नीवरुणाभ्यां न मम ॥४॥

ॐसत्वन्नोऽ अग्नेवमो भवोतीनेदिष्ठोऽ अस्याऽउषसोव्युष्टौ ॥ अवयक्ष्वनो वरुणꣳ रराणोव्वीहिमृडीकꣳ सुहवो न एधि स्वाहा॥ इदमग्नीवरुणाभ्यां न मम ॥५॥

ॐअयाश्चाग्नेस्यनभि शस्तिपाश्चसत्य मित्वमयाअसि ॥ अयानो यज्ञंवहास्य यानोधेहि भेषजꣳ स्वाहा॥ इदमग्नयेअयसे न मम ॥६॥

ॐयेते शतंवरुणं येसहस्रं यज्ञियाः पाशाविततामहान्तः ॥ तेभिर्न्नोऽअद्यसवितोत

विष्णुर्विश्वेमुञ्चतु मरुत: स्वर्का: स्वाहा ॥ इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भय: स्वर्केभ्यश्च न मम ॥७॥

ॐ उदुत्तमंवरुण पाशमस्मदवाधमं व्विमद्ध्यमश्रंश्रथाय ॥ अथावयमादित्त्यव्रते तवानागसोऽ अदितयेस्याम स्वाहा ॥ इदं वरुणाय आदित्याय अदितये च न मम ॥८॥

ॐ प्रजापतये स्वाहा ॥ इदं प्रजापतये न मम ॥९॥

ततो होमांते स्थापित सूर्यादि ग्रहपीठ देवतानां पुन: **पूजन संकल्पं कृत्वा** ॥

अत्राद्य. सग्रहमख अमुक होमकर्मण: सांगता सिद्ध्यर्थं स्थापित देवतानां उत्तर पूजनं च करिष्ये॥ रुद्रकलशसहित सूर्यादि नवग्रहमंडल मध्य स्थापित देवताभ्यो नम: इत्यासनादिभि: संपूज्य ॥

(**विवाहे कन्यया: वामहस्ते श्रीश्चतेति वरश्चेद्दक्षिणहस्ते यदा बध्नेति कंकणं बध्नीयात्** ॥ यथा ॥ अंजलिस्थ तंदुलेषु सफलं मदनफलयुतं कंकणन्निधाय स्थापित देवतोपरिसमर्प्य ॥ तत्र मंत्र: ॥ ॐ स्वस्तिर्या या विनाशाख्या धर्म कल्याण वृद्धिदा। विनायक प्रिया नित्यं तां त्वां स्वस्तिं ब्रुवंतुन: ॥ नमस्कृत्य कंकणं सतिलकं बध्नीयात् ॥)

**तत इन्द्रादि दशदिक्पालानां बलि:** ॥ तद्यथा ॥

अत्राद्य. सग्रहमख अमुक होमकर्मण: सांगता सिद्ध्यर्थं वा ग्रहयज्ञकर्मण: सांगता सिद्ध्यर्थं इन्द्रादि दश दिक्पालादि देवतानां प्रीत्यर्थं यथामिलितोपचारै: पूजनं बलिदानं च करिष्ये ॥

माषभक्तबलिदीप सहित बलिना पूजयेत् ॥

**१–पूर्व:**–अहो इन्द्र: गजेन्द्रस्थ: वज्रहस्त: प्रपूजित: ॥ त्रातारमिंद्र मंत्रेण प्राचीं रक्षतु दिक्पते ॥ ॐ त्रातारमिन्द्रमवितारमिंद्रश्रं हवे हवे सुहवश्रं शूरमिंद्रम् । ह्वयामि शक्रं पुरुहूतमिन्द्रश्रं स्वस्ति नो मघवा धात्विन्द्र: ॥ **पूर्वे इन्द्राय नम:** । इन्द्रस्यानुचरेभ्यो

नमः । गंधाद्युपचारान्समर्पयामि इन्द्राय सांगाय सपरिवाराय सायुधाय सवाहनाय सशक्तिकाय अमुं सदीप माषभक्तबलिं समर्पयामि ॥ भो इन्द्रदिशं रक्ष बलिं भक्ष यजमानस्य आयुकर्त्ता शुभकर्त्ता शान्तिकर्त्ता पुष्टिकर्त्ता तुष्टिकर्त्ता निर्विघ्नकर्त्ता शुभदो वरदो भव ॥

अनेन बलिदानेन इन्द्रः प्रीयताम् ॥

**२–अग्निः**–अहो सप्तार्चिमेषस्थ हव्य वाहन पूजित ॥ त्वन्नो अग्नेति मंत्रेण रक्षाग्नेय्यां दिशांपते ॥ ॐ त्वन्नो अग्नेवरुणस्य विद्वान् देवस्य हेडो अवयासिसीष्ठाः । यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषाꣳसि प्रमुमुग्ध्यस्मत् ॥ **आग्नेय्यां अग्नये नमः** अग्नेरनुचरेभ्यो नमः गंधाद्युपचारान्समर्पयामि अग्नये सांगाय सपरिवाराय सायुधाय सवाहनाय सशक्तिकाय अमुं सदीप माषभक्तबलिं समर्पयामि ॥ भो अग्ने दिशं रक्ष बलिं भक्ष यजमानस्य आयुकर्त्ता शुभकर्त्ता शान्तिकर्त्ता पुष्टिकर्त्ता तुष्टिकर्त्ता निर्विघ्नकर्त्ता शुभदो वरदो भव॥

अनेन बलिदानेन अग्निः प्रीयताम् ॥

**३–दक्षिणः**–अहो महिषमारूढ दण्डपाणि वर प्रद । पूज्यः सुगन्नुपंथेति दक्षिणां दिशिपालक ॥ ॐसुगन्नुपंथां प्रदिशन्न एहि ज्योतिष्मध्ये ह्यजरन्न आयुः । अपैतु मृत्युममृतं म आगाद्वैवस्वतोनो अभयं कृणोतु ॥ **दक्षिणे यमाय नमः** यमस्यानुचरेभ्यो नमः गंधाद्युपचारान्समर्पयामि यमाय सांगाय सपरिवाराय सायुधाय सवाहनाय सशक्तिकाय अमुं सदीप माषभक्तबलिं समर्पयामि॥ भो यमदिशं रक्ष बलिं भक्ष यजमानस्य आयुकर्त्ता शुभकर्त्ता शान्तिकर्त्ता पुष्टिकर्त्ता तुष्टिकर्त्ता निर्विघ्नकर्त्ता शुभदो वरदो भव॥

अनेन बलिदानेन यमः प्रीयतां ॥

**४–नैर्ऋत्यः**–अहो नैर्ऋत्य दिक्पाल नैर्ऋत्ये खड्गधारक । आगच्छ कौशिकारूढ असुन्वंतेति पूजितः ॥ ॐअसुन्वन्तम यजमानमिच्छ

स्तेनस्येत्यामन्विहि तस्करस्य । अन्यमस्मदिच्छ सा तऽ इत्या नमो देवि निर्ऋते तुभ्यमस्तु ॥ **नैर्ऋत्यां निर्ऋतये नमः** निर्ऋत्यानुचरेभ्यो नमः । गंधाद्युपचारान्समर्पयामि नैर्ऋते सांगाय सपरिवाराय सायुधाय सवाहनाय सशक्तिकाय अमुं सदीप माषभक्तबलिं समर्पयामि ॥ भो निर्ऋते दिशं रक्ष बलिं भक्ष यजमानस्य आयुकर्त्ता शुभकर्त्ता शान्तिकर्त्ता पुष्टिकर्त्ता तुष्टिकर्त्ता निर्विघ्नकर्त्ता शुभदो वरदो भव ॥ अनेन बलिदानेन निर्ऋतिः प्रीयताम्॥

५-**पश्चिमः**-अहो वरुण वारुण्यां मकरपृष्ठि समाश्रित । अर्चितः पाशहस्तश्च तत्वायामीति मंत्रतः ॥ ॐ तत्वायामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः अहेडमानो व्वरुणेह बोध्युरुषᳪं समानऽआयुः प्रमोषीः ॥ **पश्चिमे वरुणाय नमः** वरुणस्यानुचरेभ्यो नमः गंधाद्युपचारान्समर्पयामि वरुणाय सांगाय सपरिवाराय सायुधाय सवाहनाय सशक्तिकाय अमुं सदीप माषभक्तबलिं समर्पयामि ॥ भो वरुण दिशं रक्ष बलिं भक्ष यजमानस्य आयुकर्त्ता शुभकर्त्ता शान्तिकर्त्ता पुष्टिकर्त्ता तुष्टिकर्त्ता निर्विघ्नकर्त्ता शुभदो वरदो भव ॥ अनेन बलिदानेन वरुणः प्रीयताम्॥

६-**वायव्यः**-अहो वायव्यदिक्पाल मृतपृष्ठ समाश्रित । आनोनियुद्भि मन्त्रेण वायवीं रक्ष पूजितः ॥ ॐआनोनियुद्भिः शतिनीभिरध्वरᳪं सहस्रिणीभिरुपयाहि यज्ञम् । व्वायो अस्मिन्त्सवने मादयस्व यूयं पात स्वस्तिभिः सदा नः ॥ **वायव्यां वायवे नमः** वायोरनुचरेभ्योनमः । गंधाद्युपचारान्समर्पयामि वायवे सांगाय सपरिवाराय सायुधाय सवाहनाय सशक्तिकाय अमुं सदीप माषभक्तबलिं समर्पयामि ॥ भो वायोदिशं रक्ष बलिं भक्ष यजमानस्य आयुकर्त्ता शुभकर्त्ता शान्तिकर्त्ता पुष्टिकर्त्ता तुष्टिकर्त्ता निर्विघ्नकर्त्ता शुभदो वरदो भव ॥

अनेन बलिदानेन वायुः प्रीयताम् ॥

**७–उत्तरः**–अहोनरविमानस्थ गदापाणि वरप्रद । कौबेरीं च दिशं रक्ष वयं सोमेति पूजितः ॥ ॐवयꣳ सोमव्रते तव मनस्तनूषु बिभ्रतः । प्रजावन्तः सचेमहि ॥ **उत्तरे कुबेरायनमः** कुबेरस्यानुचरेभ्यो गंधाद्युपचारान्समर्पयामि कुबेराय सांगाय सपरिवाराय सायुधाय सवाहनाय सशक्तिकाय अमुं सदीप माषभक्तबलिं समर्पयामि ॥ भो कुबेरदिशं रक्ष बलिं भक्ष यजमानस्य आयुकर्त्ता शुभकर्त्ता शान्तिकर्त्ता पुष्टिकर्त्ता तुष्टिकर्त्ता निर्विघ्नकर्त्ता शुभदो वरदो भव ॥ अनेन बलिदानेन कुबेरः प्रीयताम्॥

**८–ईशानः**–अहो वृषभमारूढ शूलपाणि वरप्रद । रुद्राशां पूजितो रक्ष तमीशानेति मंत्रतः ॥ ॐतमीशानं जगतस्तस्थुषस्पतिं धियंजिन्वमवसे हूमहे व्वयम् । पूषा नो यथा वेदसामसद् वृधे रक्षिता पायुरब्धः स्वस्तये ॥ **ईशानायनमः** ईशानस्यानुचरेभ्यो नमः । गंधाद्युपचारान्समर्पयामि ईशानाय सांगाय सपरिवाराय सायुधाय सवाहनाय सशक्तिकाय अमुं सदीप माषभक्तबलिं समर्पयामि ॥ भो ईशानदिशं रक्ष बलिं भक्ष यजमानस्य आयुकर्त्ता शुभकर्त्ता शान्तिकर्त्ता पुष्टिकर्त्ता तुष्टिकर्त्ता निर्विघ्नकर्त्ता शुभदो वरदो भव ॥ अनेन बलिदानेन ईशानः प्रीयताम् ॥

**९–पूर्वेशानयोर्मध्येः**–अहोहंसस्थित ब्रह्मन् व्योमरक्षतु दिक्पते। कमण्डलुधरः साक्षी अस्मे रुद्रेति पूजितः ॥

ॐअस्मे रुद्रा मेहना पर्वतासो वृत्रहत्ये भरहूतौ सजोषाः । यः शꣳ सते स्तुवते धायि पज्रऽ इन्द्रज्येष्ठा अस्माँ२ अवन्तु देवाः॥ **पूर्वेशानयोर्मध्ये ब्रह्मणेनमः** ब्रह्मण अनुचरेभ्योनमः । गंधाद्युपचारान्समर्पयामि ब्रह्मणे सांगाय सपरिवाराय सायुधाय सवाहनाय सशक्तिकाय अमुं सदीप माषभक्तबलिं समर्पयामि॥ भो ब्रह्मन्दिशं रक्ष बलिं भक्ष यजमानस्य आयुकर्त्ता शुभकर्त्ता शान्तिकर्त्ता पुष्टिकर्त्ता तुष्टिकर्त्ता निर्विघ्नकर्त्ता शुभदो वरदो भव॥ अनेन बलिदानेन ब्रह्मा प्रीयताम् ॥

**१०–पश्चिमवायोर्मध्ये:**–अहो गरुडमारूढ शंखचक्र गदाधर । पालयाधोदिशं रक्षस्योना पृथिवि मंत्रत:॥ ॐस्योना पृथिविनो भवानृक्षरा निवेशनी । यच्छा न: शर्म सप्रथा:॥

**पश्चिमवायोर्मध्ये अनंतायनम:** अनंतस्यानुचरेभ्यो नम: । गंधाद्युपचारान्समर्पयामि अनंताय सांगाय सपरिवाराय सायुधाय सवाहनाय सशक्तिकाय अमुं सदीप माषभक्तबलिं समर्पयामि ॥ भो अनंतदिशं रक्ष बलिं भक्ष यजमानस्य आयुकर्त्ता शुभकर्त्ता शान्तिकर्त्ता पुष्टिकर्त्ता तुष्टिकर्त्ता निर्विघ्नकर्त्ता शुभदो वरदो भव॥ अनेन बलिदानेन अनंत: प्रीयताम् ॥

## ॥ अथवा ॥

**समुदायात्मकं इन्द्रादि देवता बलिदानं** ॥ यथा :–

ॐप्राच्यै दिशे स्वाहाऽर्वाच्यै दिशे स्वाहा दक्षिणायै दिशे स्वाहाऽर्वाच्यै दिशे स्वाहा प्रतीच्यै दिशे स्वाहाऽर्वाच्यै दिशे स्वाहो दीच्यै दिशे स्वाहाऽर्वाच्यै दिशे स्वाहो ध्र्वाया दिशे स्वाहाऽर्वाच्यै दिशे स्वाहाऽवाच्यै दिशे स्वाहाऽर्वाच्यै दिशे स्वाहा ॥ ॐ त्रातारमिन्द्रमवितारमिंद्रथ्ठं हवे हवे सुहवथ्ठं शूरमिंद्रम् । ह्वयामि शक्रं पुरुहूतमिन्द्रथ्ठं स्वस्ति नो मघवा धात्विन्द्र:॥ इन्द्रादि दशदिक्पालेभ्यो नम: गंधाद्युपचारान्समर्पयामि इन्द्रादि दशदिक्पालेभ्य: सांगाय सपरिवाराय सायुधाय सवाहनाय सशक्तिकाय अमुं सदीप माषभक्तबलिं समर्पयामि ॥ भो इन्द्रादि दशदिक्पाला: दिश: रक्षन्तु बलिं भक्षयंतु मम यजमानस्य आयु: कर्त्ता शुभकर्त्ता शान्तिकर्त्ता पुष्टिकर्त्ता तुष्टिकर्त्ता निर्विघ्नकर्त्ता शुभदा: वरदा: भवन्तु ॥

अनेन बलिदानेन इन्द्रादि दशदिक्पाला: प्रीयन्ताम् ॥

**गणपति पायस बलिः-**

ॐवक्रतुण्ड महाकाय कोटिसूर्य समप्रभ । अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥ ॐ गणानांत्वा गणपति ठँ हवामहे प्रियाणां त्वा प्रियपति ठँ हवामहे निधीनां त्वा निधिपति ठँ हवामहे वसो मम । आहमजानि गर्ब्भधमा त्वमजासि गर्ब्भधम् ॥ गणपत्यादि देवताभ्यो नमः गंधाद्युपचारान्समर्पयामि ॥ गणपत्यादि देवताभ्योनमः एष गंधार्चित पायसबलिं समर्पयामि ॥ भो गणपत्यादि देवताः दिशं रक्षन्तु बलिं भक्षन्तु यजमानस्य आयुकर्त्ता शुभकर्त्ता शान्तिकर्त्ता पुष्टिकर्त्ता तुष्टिकर्त्ता निर्विघ्नकर्त्ता शुभदाः वरदाः भवन्तु ॥ अनेन बलिदानेन गणपत्यादेवताः प्रीणंतु ॥

**नवग्रह पायस बलिः-**

उदयंत महातेज तेजस्वी चाभयप्रद । दुर्निरीक्ष ख गमन बलिं भक्ष जगत्पते ॥

ॐआकृष्णेन रजसाव्वर्तमानो निवेशयन्नमृतंमर्त्यंच । हिरण्ययेन सविता रथेना देवोयाति भुवनानि पश्श्यन् ॥ रुद्रकलश सहित सूर्यादि नवग्रहमंडलमध्यस्थ देवताभ्यो नमः एष गंधाद्यर्चित पायसबलिं समर्पयामि ॥ भो रुद्रकलश सहित सूर्यादि नवग्रहमंडलमध्यस्थ देवताः दिशं रक्षंतु बलिं भक्षंतु यजमानस्य आयुकर्त्तारः क्षेमकर्त्तारः शुभकर्त्तारः शान्तिकर्त्तारः शुभदातारः वरदातारः भवन्तु ॥ अनेन बलिदानेन रुद्रकलशसहित श्रीसूर्यादि नवग्रहमण्डलमध्यस्थ समस्तदेवता प्रीयन्ताम् ॥

(बृहत्कर्मणि सुयोगिनी क्षेत्रपालानां बलिं च दत्वा)

**अथ क्षेत्रपाल बलिः**-ततो नैर्ऋत्यां चतुर्वर्त्तियुत महीदीप सहित माषभक्तशष्कुलीं शूर्पपात्रे धृत्वा ॥ क्षेत्रपाल समागच्छ जगत्सर्वास्पदास्पद । क्षत्रस्यत्वेति मंत्रेण बलिं गृह्णष्व यागप ॥ **ॐ** क्षत्रस्य त्वा परस्पाय ब्रह्मणस्तन्वं पाहि । विशस्त्वा धर्मणा

वयमनु क्रामाम सुविताय नव्यसे ॥ श्री क्षेत्रपालाय नमः । इत्यासनादि संपूज्य ॥

कर कलित कपालः कुण्डली दण्डपाणिस्तरुण तिमिर् नीलो व्याल यज्ञोपवीती । क्रतु समय सपर्या विघ्न विच्छेद हेतुर्जयति बटुकनाथ सिद्धिदः साधकानाम् ॥

क्षेत्रपालाय सांगाय सपरिवाराय सायुधाय सवाहनाय सशक्तिकाय भूतप्रेतपिशाच शाकिनीडाकिनी ब्रह्मराक्षस वेतालादि परिवारयुताय इमं गंधाद्यर्चितं सदीपं, सताम्बूलं, सदक्षिणाकं, दधिमाषभक्त बलिं समर्पयामि ॥

ॐहिंकाराय स्वाहा हिंकृतायस्वाहा क्रंदतेस्वाहा वक्रंदायस्वाहा प्रोथतेस्वाहा प्रप्रोथायस्वाहा गन्धायस्वाहा घ्रातायस्वाहा निविष्टायस्वाहोपविष्टायस्वाहा सन्दितायस्वाहा वल्गते स्वाहा सीनाय स्वाहा शयानायस्वाहा स्वपतेस्वाहा जाग्रतेस्वाहा कूजतेस्वाहा प्रबुद्धायस्वाहा विजृम्भमाणायस्वाहा विचृत्तायस्वाहा सꣳहानाय स्वाहोपस्थितायस्वाहायनाय स्वाहा प्रायणायस्वाहा ॥

भो भो क्षेत्रपाल इमं बलिं गृहाण मम यजमानस्य आयुकर्त्ता क्षेमकर्त्ता भव ॥

अनेन बलिदानेन क्षेत्रपालः प्रीयताम् ॥ इमं बलिं चतुष्पथे गृहद्वारे स्थापयेत् ॥

**हस्तौपादौ प्रक्षाल्याचम्य** ॥ (बृहत्सुकर्मणि सुतर्पणं अत्रैव)

**अथ पूर्णाहुतिं कुर्यात्** ॥ आज्यस्थाल्यामाज्यं निर्वापः ॥ आज्याधिश्रयणं ॥ स्त्रुक् स्त्रुवौ प्रतप्य संमृज्य पुनः प्रतप्य निदध्यात् ॥ आज्यमुद्वास्य उत्पूयावेक्ष्यापद्रव्यं निरस्य ॥ चतुर्गृहीतमाज्यं स्त्रुचं पूरयित्वा ॥ तदुपरि घृतपूर्ण श्रीफलं वह्न्यभिमुखं धृत्वा ॥

**संकल्पः**-अत्राद्य. श्रीपरमेश्वर प्रीत्यर्थं मम मनोभिलषित धर्मार्थकामादि यथेप्सितानेक भोग पुत्रपौत्रायुरारोग्यैश्वर्याभि

वृद्धयर्थं च कृतस्य ग्रहमखांग हवन कर्मणः साद्गुण्यार्थं पूर्णाहुति होममहं करिष्ये ॥
तदादौ पूर्णाहुति पूजनं मृडनामाग्नि पूजनं च करिष्ये ॥
ॐ पूर्णा दर्वि परापत सुपूर्णा पुनरापत । वस्नेव विक्रीणावहा इषमूर्जꣳ शतक्रतो ॥ पूर्णाहुत्यै एकोन्पंचाशन्मरुद्गणेभ्यो नमः । इत्यासनादि संपूज्य ॥
ॐवैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्रीः । इतो जातो विश्वमिदं विचष्टे वैश्वानरो यतते सूर्येण ॥ मृडनामाग्नये नमः । इत्यासनादि संपूज्य ॥
सपत्नीको यजमानः पूर्णाहुतिं गृहीत्वोत्थाय तदुपरि न्युब्जं स्रुवं निधाय स्रुचिमूलं नाभिमूले धृत्वा ॥
**विनियोगः**–ॐमूर्द्धान मिति मन्त्रस्य भारद्वाज ऋषि वैश्वानर देवता त्रिष्टुप्छन्दः पूर्णाहुति होमे विनियोगः ॥
**ब्राह्मणाः मन्त्रान्पठेयुः :–**
ॐमूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आ जातमग्निम् । कविꣳ सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः ॥ पूर्णा दर्वि परा पत सुपूर्णा पुनरा पत ॥ व्वस्नेवव्विक्रीणा वहाऽइषमूर्जꣳ शतक्रतो ॥ चित्तिं जुहोमि मनसा घृतेन यथा देवाऽ इहागमन्वीतिहोत्रा ऽ ऋतावृधः । पत्ये विश्वस्य भूमनो जुहोमि विश्वकर्मणे विश्वाहादाभ्यꣳ हविः ॥ सप्त ते अग्ने समिधः सप्त जिह्वाः सप्तऋषयः सप्तधाम प्रियाणि । सप्त होत्राः सप्तधा त्वा यजन्ति सप्त योनीरापृणस्व घृतेन स्वाहा ॥ शुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्माँश्च । शुक्रश्च ऋतपाश्चात्यꣳ हाः ॥ ईदृङ् चान्यादृङ् च सदृङ् च प्रतिसदृङ् च । मितश्च सम्मितश्च सभराः ॥ ऋतश्च सत्यश्च ध्रुवश्च धरुणश्च । धर्त्ता च व्विधर्त्ता च व्विधारयः ॥ ऋतजिच्च सत्यजिच्च सेनजिच्च सुषेणश्च । अन्तिमित्रश्च दूरेऽ अमित्रश्च

गण: ॥ ईदृक्षास ऽ एतादृक्षास ऽ ऊ षु ण: सदृक्षास: प्रतिसदृक्षास ऽ एतन । मितासश्च सम्मितासो नो अद्य सभरसो मरुतो यज्ञे अस्मिन् ॥ स्वतवाँश्च प्रघासी च सान्तपनश्च गृहमेधी च । क्रीडी च शाकी चोज्जेषी ॥ उग्रश्च भीमश्च ध्वान्तश्च धुनिश्च ॥ सासह्वाँश्चा भियुग्वा च विक्षिप: स्वाहा ॥ पुनस्त्वाऽदित्या रुद्रा वसव: समिन्धतां पुर्नब्रह्माणो वसुनीथ यज्ञै: ॥ घृतेन त्वं तन्वं वर्धयस्व सत्या: सन्तु यजमानस्य कामा: ॥ स्वाभिमुखं पूगीफलं (वा)श्रीफलं हुत्वा ॥

(वसोर्द्धारा) **घृतधारांकुर्यात्:-**

समुद्रादूर्मिर्मधुमाँ२ उदारदुपाꣳशुना सममृतत्वमानट् । घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभि: ॥१२॥ वयन्नाम प्र ब्रवामा घृतस्यास्मिन् यज्ञे धारयामा नमोभि: । उप ब्रह्मा शृणवच्छस्यमानं चतु: शृङ्गोऽवमीद्गौरऽ एतत् ॥१३॥ चत्वारिशृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासोऽ अस्य । त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां२ आविवेश ॥१४॥ त्रिधा हितं पणिभिर्गुह्यमानं गवि देवासो घृतमन्वविन्दन् । इन्द्रऽ एकꣳ सूर्यऽ एकं जनान वेनादेकꣳ स्वधया निष्टतक्षु: ॥१५॥ एता ऽ अर्षन्ति हृद्यात्समुद्राच्छतव्रजा रिपुणा नावचक्षे । घृतस्य धाराऽ अभि चाकशीमि हिरण्ययो वेतसो मध्य आसाम् ॥१६॥ सम्यक् स्त्रवन्ति सरितो न धेना ऽ अन्तर्हृदा मनसा पूयमाना: । एते अर्षन्त्यूर्मयो घृतस्य मृगाऽ इव क्षिपणोरीषमाणा: ॥१७॥ सिन्धोरिव प्राध्वने शूघनासो वातप्रमिय: पतयन्ति यह्वा: । घृतस्य धाराऽ अरुषो न वाजी काष्ठा भिन्दन्नूर्मिभि: पिन्वमान: ॥१८॥ अभिप्रवन्त समनेव योषा: कल्याण्य: स्मयमानासोऽ अग्निम् । घृतस्य धारा: समिधो नसन्त ता जुषाणो हर्यति जातवेदा: ॥१९॥ कन्याऽ इव वहतुमेतवा ऽ उ अञ्ज्यञ्जाना ऽ अभि चाकशीमि । यत्र सोम:

सूयते यत्र यज्ञो घृतस्य धाराऽ अभि तत्पवन्ते ।।२०।। अभ्यर्षत सुष्टुतिं गव्यमाजिमस्मासु भद्रा द्रविणानि धत्त । इमं यज्ञं नयत देवता नो घृतस्य धारा मधुमत्पवन्ते ।।२१।। धामं ते विश्वं भुवनमधि श्रितमन्तः समुद्रे हृद्यन्तरायुषि । अपामनीके समिथे यऽ आभृतस्तमश्याम मधुमन्तं तऽ ऊर्मिम् ।। वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारम् । देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः ।। इति वसोर्धारां पातयेत् ।। घृतं च रुद्रकलशे त्यागः ।। इदमग्नये मरुद्गणेभ्यश्च न मम ।। अथ भस्म वंदनम् ।। ॐ त्र्यायुषं जमदग्ने ललाटे ।। कश्यपस्यत्र्यायुषं ग्रीवायां ।। यद्देवेषुत्र्यायुषं दक्षिणस्कंधे ।। तन्नो अस्तुत्र्यायुषं वामस्कन्धे ।। शतायुशं नाभौ ।। बलायुषं शिरसि ।।

**अक्षतपुष्पाणि गृहीत्वा ततोग्निं प्रार्थयेत्ः-**

ॐ इन्द्रं दैवीर्विशो मरुतोनुवर्त्मानोऽभवन् । एवमिमं यजमानं दैवीश्च विशो मानुषीश्चानुवर्त्मानो भवन्तु ।।९।। इमथ्ठं स्तनमूर्जस्वन्तं धयापां प्रपीनमग्ने सरिरस्य मध्ये । उत्सं जुषस्व मधुमन्तमर्वन्त्समुद्रियथ्ठं सदनमा विशस्व ।।१०।। घृतम्मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतम्वस्य धाम । अनुष्वधमावह मादयस्व स्वाहाकृतं वृषभ वक्षि हव्यम् ।।११।। ॐ चतुर्भिश्चचतुर्भिश्च द्वाभ्यां पंचभिरेव च ।। हूयते च पुनर्द्वाभ्यां तस्मै यज्ञात्मने नमः ।। ॐ स्वस्ति श्रद्धां यशः प्रज्ञां विद्यां बुद्धिं श्रियं बलम् । आयुष्यं तेजमारोग्यं देहि मे हव्य वाहन ।।

**ततो होम संकल्पः** ।। स्रुक्मध्ये जलगंधाक्षतान्निक्षिप्य ।।

आघारावादि पूर्णाहुतिपर्यन्तं यद्यत् द्रव्यं यावद्यावत्संख्याकं येन येन मन्त्रेण यया यया कामनया यस्यै यस्यै देवतायै हुतं तत्तद्द्रव्यं तावत्तावत्संख्याकं तेन तेन मंत्रेण तया तया कामनया तस्यै तस्यै देवतायै सुहुत हुतमस्तु ।। ताः ताः देवताः प्रीयन्तां ते देवाः

शान्तिदाः पुष्टिदा तुष्टिदा वरदा भवन्तु ॥ संस्रवः प्राशनं ॥ आचमनं ॥ पवित्राभ्यां मार्जनं ॥ ॐ सुमित्रियान आपऽओषधयः सन्तु इति शिरसि मार्जनं ॥ ॐ दुर्मित्रियास्तस्मै सन्तुयोस्मान्द्वेष्टि यं चवयं द्विष्मः इति प्रणीतोदकमीशान्यां क्षिप्त्वा ॥ **प्रणीता विमोक तज्जलेन मार्जनम्**:– आपः शिवाः शिवतमाः शान्ताः शान्ततमास्तास्ते कृण्वन्तु भेषजम् ॥ पवित्रे अग्नौ प्रक्षिप्य ॥ उपयमनमग्नौ प्रक्षेपः ॥ ततस्तरण क्रमेण बर्हिनुत्थाप्याज्येनाभिधार्य ॥ ॐ देवागातु विदोगातुं वित्वागातुमित । मनसस्पत इमं देव यज्ञथ्ठं स्वाहा वातेधाः ॥ अथवा दिव्याय नभसे स्वाहा ॥ इति बर्हिहोमः ॥

**ब्रह्मणे पूर्णपात्र दानं** ॥ अत्राद्य. ग्रहयज्ञहवनकर्मणि कृताकृता वेक्षणरूप ब्रह्मकर्म प्रतिष्ठा सिद्ध्यर्थं इमानि तंडुल तिलपात्र घृतपात्र शर्करापात्राणि दक्षिणासहितानि नाना देवतानि यथा यथा नामगोत्रेभ्यो ब्राह्मणेभ्यः विभज्य दातुमहमुत्सृजे ॥

कृतैतत् ग्रहयज्ञ हवन कर्मणः सांगता सिद्ध्यर्थं आचार्यप्रमुखेभ्यो ऋत्विग्भ्यो होतृभ्यश्च यथा यथा विभागं दक्षिणां संप्रददे ॥

कृतैतत् ग्रहयज्ञहवन कर्मणः सांगतासिद्ध्यर्थं यथा संपन्नेनान्नेन तृप्तिपर्यन्तेन यथा संख्याकान् ब्राह्मणान् कुमीरिका त्रयं बटुकमेकं भोजयिष्ये ॥

कृतैतत् ग्रहयज्ञहवन कर्मणि न्यूनातिरिक्त दोषपरिहारार्थं नाना नामगोत्रेभ्यो ब्राह्मणेभ्यः यथोत्साहां भूयसीं दक्षिणां विभज्य दातुमहमुत्सृजे ॥

कृतैतत् ग्रहयज्ञहवन कर्मणि न्यूनातिरिक्त दोषपरिहारार्थं पक्षीभ्यः अन्नं गोभ्यः तृणं दास्ये ॥

चतुर्भिश्चचतुर्भिश्च द्वाभ्यां पंचभिरेव च ॥ हूयते च पुनर्द्वाभ्यां तस्मै यज्ञात्मने नमः ॥ अस्य ग्रहयज्ञहवनकर्मणो विधेर्यन्न्यूनमधिकं

तत्सर्वं भवतां ब्राह्मणानां वचनात् श्रीसूर्यादि नवग्रहाणां प्रसादाच्च सर्वविधेः परिपूर्णमस्तु ॥ अस्तु परिपूर्णम् ॥ उत्तरे कर्मणि निर्विघ्नमस्तु ॥ गृहेवृद्धि शतानि भवन्तु ॥

ॐउत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे । उपप्रयन्तु मरुतः सुदानवऽ इन्द्र प्राशूर्भवा सचा ॥ इति उत्सर्जनं ब्रह्मण: ब्रह्मग्रंथि विमोक: ॥ यांतु देवगणाः सर्वे पूजामादाय पार्थिवीम् । इष्टकाम समृद्धयर्थं पुनरागमनाय च ॥ इति ग्रहादीन् विसर्जयेत् ॥ गच्छ गच्छ सुरश्रेष्ठ स्वस्थाने परमेश्वर । यत्र ब्रह्मादयो देवास्तत्र गच्छ हुताशन ॥ इत्यग्निं विसृज्य ॥

**अभिषेके वामतः पत्नीः–** ततो यजमानं सपत्नीकं सपरिवारं प्रागभिमुखासीनं उदङ्मुखा आचार्य ऋत्विजश्च रुद्रकलशादुदुकमादाय दूर्वापल्लवैश्च **अभिषेकं कुर्यात्** ॥

अभिषेके पत्नी वामतः ॥

ॐआपोहिष्ठा मयो भुवस्तान ऊर्जे दधातन । महेरणाय चक्षसे ॥१॥ यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥२॥ तस्मा ऽअरङ्गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥३॥ ॐ त्रातारमिन्द्रमवितारमिंद्रꣳ हवे हवे सुहवꣳ शूरमिंद्रम । ह्वयामि शक्रं पुरुहूतमिन्द्रꣳ स्वस्ति नो मघवा धात्विन्द्रः ॥४॥ ॐ व्वरुणस्योत्त्तंभनमसि वरुणस्य स्कम्भसर्जनीस्थो वरुणस्यऋतसदन्यसि वरुणस्यऋतसदनमसि वरुणस्य ऋतसदनमासीद ॥५॥ ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः । पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ॥६॥ ॐ पवित्रेण पुनीहिमा शुक्रेण देव दीध्यत् । अग्नेकृत्वा क्रतूँ १ रनु ॥७॥ ॐ भग प्रणेतर्भग सत्यराधो भगेमां धियमुदवा ददन्नः । भग प्र नो जनय गोभिरश्वैर्भग प्र नृभिर्नृवन्तः स्याम ॥८॥ ॐ समुद्राय त्वा वाताय स्वाहा सरिताय त्वा वाताय स्वाहा । अनाधृष्याय त्वा वाताय स्वाहा प्रतिधृष्याय त्वा वाताय

स्वाहा ॥९॥ ॐ इदमापः प्र वहतावद्यं च मलं च यत् । यच्चाभिदुद्रोहानृतं यच्च शेपे अभीरुणम् ॥१०॥ ॐ अग्निमीले पुरोहितं यज्ञस्य देवमृत्विजं होतारं रत्नधातमम् ॥११॥ ॐ पंचनद्यः सरस्वतीमपियंति सस्त्रोतसः । सरस्वतीतु पंचधासो देशे भवत्सरित् ॥ ॐ आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् । भवा वाजस्य सङ्गथे ॥

**अथ पौराणिक मंत्राः**–सुरास्त्वामभिषिंचंतु ब्रह्मविष्णु महेश्वराः । वासुदेवो जगन्नाथस्तथा संकर्षणो विभुः ॥१॥ प्रद्युम्नश्चानिरुद्धश्च भवंतु विजयाय ते । नारदाद्या ऋषिगणा ये चान्ये च तपोधनाः ॥२॥ भवन्तु यजमानस्य आशीर्वाद परायणाः । आखण्डलोग्निर्भगवान् यमोवै निर्ऋतिस्तथा ॥३॥ वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः । ब्रह्माचैव तथानंतो दिक्पालाः पांतु वः सदा ॥४॥ कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः । बुद्धिर्लज्जा वपुः शान्तिः कान्तिस्तुष्टिश्च मातरः ॥५॥ एतास्त्वामभिषिंचंतु देवपत्न्यः समागताः ॥

**ततो ग्रह मंत्राः**–ग्रहाणामादिरादित्यो लोकरक्षण कारकः । विषम स्थान भृतां पीडां दहतु ते रविः ॥१॥ रोहिणीशः सुधामूर्त्तिः सुधागात्रं सुधासनः । विषमस्थान संभूतां पीडां दहतु ते विधुः ॥२॥ भूमिपुत्रो महातेजो जगतां भयकृत् सदा । वृष्टिकृद्वृष्टिहर्ता च पीडां दहतु ते कुजः ॥३॥ उत्पातरूपो जगतां चन्द्रपुत्रो महाद्युतिः । सूर्य प्रियकरो विद्वान् पीडां दहतु ते बुधः ॥४॥ देवमंत्री विशालाक्षः सदा लोकहिते रतः । अनेक शिष्यैः सम्पूर्णः पीडां दहतु ते गुरुः ॥५॥ दैत्यमन्त्री भृगुस्तेषां प्राणदश्च महामतिः । प्रभुस्ताराग्रहाणां च पीडां दहतु ते भृगुः ॥६॥ सूर्यपुत्रो दीर्घदेहो विशालाक्षः शिव प्रियः । मंदचारः प्रसन्नात्मा पीडां दहतु ते शनिः ॥७॥ महाशनो महावक्रो दीर्घदंष्ट्रो महाबलः । अतनुश्चोर्ध्वकेशश्च पीडां दहतु ते तमः ॥८॥ अनेक रूपवर्णैश्च

शतशोथ सहस्रशः । उत्पातरूपो जगतां पीडां दहतु ते शिखी ॥ ॐ तच्छन्योरा वृणीमहे गातुं यज्ञायगातुं यज्ञपतये दैवी: स्वस्तिरस्तुनः स्वस्तिर्मानुषेभ्यः । ऊर्ध्वं जिघातु भेषजं शन्नोऽ अस्तु द्विपदे शं चतुष्पदे ॥ ॐ शान्तिः शान्तिः शान्तिः ॥ भूर्भुवः स्वरमृताभिषेकोऽस्तु ॥ इत्यभिषेकः ॥

**ततस्तिलकाशीर्वादः**–ॐशतंजीवशरदो वर्द्धमानः शतंहेमन्ताच्छत मुवसन्तान् ॥ शतमिन्द्राग्निसविता बृहस्पतिः शतायुषा हविषेमं पुनर्दुः ॥ ॐ शतमिन्नुशरदो अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम्। पुत्रासो यत्र पितरो भवन्ति मा नो मध्यारीरिषतायुर्गन्तोः ॥ मंत्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः । शत्रूणां बुद्धिनाशोस्तु मित्राणामुदयस्तव ॥१॥ ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः । ब्रह्मवाक्यैस्तुतैर्नित्यं हन्यन्ते तव शत्रवः ॥२॥ अक्षतान्विप्रहस्तेभ्यो नित्यं विन्दन्ति ये नराः । चत्वारि वृद्धिमायांतु आयुः कीर्तियशो बलम् ॥३॥ श्रीर्वर्चस्वमायुष्य मारोग्यमा विधात्पवमानं महीयते । धान्यं धनं पशु पुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥४॥ आयुष्कामो यशस्कामो पुत्र पौत्रस्तथैव च । आरोग्यं धनकामश्च सर्वे कामा भवन्तु मे ॥५॥ स्वस्त्यस्तु ते कुशलमस्तु चिरायुरस्तु गोवाजि हस्ति धनधान्य समृद्धिरस्तु ।

ऐश्वर्यमस्तु बलमस्तु रिपुक्षयोस्तु वंशे सदैव भवताम्
हरिभक्तिरस्तु ॥6॥

इति यजमान हस्ते अक्षतान्दद्यात् ॥ अखण्डसौभाग्यवती पुत्रपौत्रवती भवेति यजमानस्य पत्न्यै दद्यात् ॥

ॐ ब्रह्मार्पणं ब्रह्महविः ब्रह्माग्नौ ब्रह्मणाहुतम् । ब्रह्मैव तेन गंतव्यं ब्रह्मकर्म समाधिना ॥

**इति यजुः शाखीय ग्रहमख प्रयोगः समाप्तः ॥**

देवछन्द विहीनस्य सुतः प्रोक्ताः भुजंगमाः । मूकादयो नेत्रवर्जाः ऋषिहीनस्तु कारयेत् ॥1॥ तथा प्रकारांतरेण माध

यंदिनिशाखायामाचर्येण कारिका:॥ अन्तहीनो भवेद्राष्ट्रं मन्त्रहीनस्तु ऋत्विज: । ऋषिछन्दविहीनस्य आचार्य: कुशल कर्मणे । द्रव्यहीनेतु कर्त्तारं पत्निहीनं न कारयेत् । गन्धहीने भवेद्रोगं दीपहीने कुलक्षयम् । वस्त्रहीने स्त्रियोघात्तं पूगहीने धनक्षय: । चरुहीने भयाग्नि घृतहीने सुतं हत: । होमहीने महादुखं सधूम्रे नेत्रदाहक: । दानहीनेतु तत्कर्म बलिहीने तथाऽसुखम् । स्रुवहीने करोहंता श्रुचिहीनेतु पंगुता: । विधिहीनेतु वैधव्यं हविहीने गृहं तथा । तोयहीने च वृष्टिघ्नं धूपहीने च दुर्मती । भावहीने न सा सिद्धि कुण्डहीने कुलक्षयम्। यजमानमदाक्षण्यम् नास्ति यज्ञ समो रिपु:॥

**याज्ञवल्क्य:**–पत्न्याभावे द्विजातीनां कुशहेमादि कारयेत् । कुण्डाभावे स्थण्डिलं स्यात् एकदन्तं च मण्डपम् ॥ द्रव्यं च वित्तशक्तिनां समर्थानांच कारयेत् । आचार्य कर्मकुशलं सर्वसिद्धि प्रजायते ॥

**वशिष्ठ:**–वशिष्ठ: सर्व कल्याणं नवग्रहमखं शुभम् । शान्तिदं राज्यदं श्रीदं आयुरारोग्यवृद्धिदम् ॥ शान्तिके ये पठेन्नित्यं श्रद्धया य: शृणोति च । सानुकूला ग्रहास्तस्य सर्वकालं भविष्यति ॥

## ॥ अथ चौल संस्कार प्रयोग: ॥

आचम्य प्राणानायम्य ॥ सुमुखश्चेत्यादि पठित्वा ॥

**संकल्प:**–अद्येत्यादि० मम सुतस्य चौलसंस्कारस्य स्वकालातिक्रमदोषप्रत्यवायपरिहारार्थम् अर्धकृच्छ्ररूपं प्रायश्चित्तं रजतप्रत्याम्नायद्वारा अहमाचरिष्ये ॥ **अनेन** अर्धकृच्छ्ररूप प्रायश्चित्तकृतेन मम अमुकशर्मणं: सुतस्य चौलसंस्कार कर्मण्यधिकार सिद्धिरस्तु ॥

**अद्येत्यादि०** मम सुतस्य चौलसंस्कार कर्मण्यधिकारार्थं सूत्रोक्तान् त्रिभ्योऽधिकान् ब्राह्मणान् यथाकाले यथासंपन्नेनान्नेनाहं भोजयिष्ये ॥

**हस्ते जलमादाय ॥**

**अद्येत्यादि०** मम सुतस्य बीजगर्भ समुद्भवैनोनिबर्हणेन बलायुर्वर्च्चोभिवृद्धिद्वारा श्रीपरमेश्वर प्रीत्यर्थं चौलसंस्काराख्यं कर्म करिष्ये ॥

**तत्रादौ** निर्विघ्नतासिद्ध्यर्थं श्रीमहागणपतेः पञ्चोपचारैः पूजनं करिष्ये ॥

**ध्यानम्ः**– ॐ गणानान्त्वा गणपति ठँ हवामहे प्रियाणां त्वा प्रियपति ठँ हवामहे निधीनां त्वा निधिपति ठँ हवामहे वसो मम । आहमजानि गर्ब्भधमा त्वमजासिगर्ब्भधम् ॥ सर्वोपचारार्थे गन्धाक्षत्पुष्पाणि समर्पयामि ॥

ततो बहिः शालायां स्थण्डिले **पञ्चभूसंस्कारपूर्वकं सभ्यनामाग्नेः** स्थापनम् ॥

ततो दक्षिणतो ब्रह्मासनमास्तीर्येत्यादि चरुवर्जं पात्रासादनान्तं कुर्यात्॥ पात्रासादनानन्तरम् उपकल्पनीयानि ॥ शीतोदकम् ॥ उष्णोदकम् ॥ नवनीतपिण्डो घृतपिण्डो दधिपिण्डो वा त्र्येणी शलली ॥ साग्राणि सप्तविंशतिकुशतरुणानि ॥ ताम्रपरिष्कृत आयसः क्षुरः ॥ आनडुहगोमयपिण्डः ॥ नापितः वरश्चेति ॥ (ठण्डाजल, गर्मजल, मखन, घी, दही, और सहली का काँटा, २७ कुश पुंज, ताम्र परिष्कृत उस्तरा, बैल का गोबर, नाई और बालक) पवित्री करणादि पवित्रयोः प्रणीतासु निधानम् ॥ **दक्षिणं जान्वाच्य** ब्रह्मान्वारब्ध आघारावाज्यभागौ जुहुयात् ॥ (मनसा) ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम ॥१॥ ॐ इन्द्राय स्वाहा इदं इन्द्राय न मम ॥२॥ ॐ अग्नये स्वाहा इदमग्नये न मम ॥३॥ ॐ सोमाय स्वाहा इदं सोमाय न मम ॥४॥ हस्ते अक्षतान् गृहीत्वा ॥ चौले सभ्यनाम्ने वैश्वानराय नमः सर्वोपचारार्थे गन्धाक्षत्पुष्पाणि समर्पयामि ॥ **भूरादिनवाहुतयः** ॥ ॐ भूः स्वाहा इदमग्नये न मम ॥१॥ ॐ भुवः स्वाहा इदं वायवे न मम ॥२॥ ॐ स्वः स्वाहा इदं सूर्याय न मम ॥३॥

ॐ त्वन्नोऽ अग्ने व्वरुणस्य विद्वान्देवस्यहेडोऽ अवयासिसीष्ठाः॥ यजिष्ठोवह्नितमः शोशुचानो विश्वा द्वेषाꣳसि प्रमुमुग्ध्यस्मत् स्वाहा॥ इदमग्नीवरुणाभ्यां न ममः॥४॥

ॐ सत्वन्नोऽ अग्ग्रेवमो भवोतीनेदिष्ठोऽ अस्याऽउषसोव्युष्टौ॥ अवयक्ष्वनो वरुणꣳ रराणोव्वीहिमृडीकꣳ सुहवो न एधि स्वाहा॥ इदमग्नीवरुणाभ्यां न ममः॥५॥

ॐअयाश्चाग्नेस्यनभि शस्तिपाश्चसत्यमित्वमयाअसि॥ अयानो यज्ञंवहास्ययानोधेहि भेषजꣳ स्वाहा॥ इदमग्नयेअयसे न मम॥६॥

ॐयेते शतंवरुण येसहस्त्रं यज्ञियाः पाशाविततामहान्तः॥ तेभिर्न्नोऽअद्यसवितोत विष्णुर्विश्वेमुञ्चतु मरुतः स्वर्काः स्वाहा॥ इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च न मम॥७॥

ॐ उदुत्तमंवरुण पाशमस्मदवाधमं व्विमद्ध्यमꣳ श्रथाय॥ अथावयमादित्त्यव्रते तवानागसोऽ अदितयेस्याम स्वाहा॥ इदं वरुणायादितये न मम॥८॥

ॐप्रजापतये स्वाहा इदं प्रजापतये न मम॥९॥ **नवाहुतीर्हुत्वा स्विष्टकृतादिकं कुर्यात्**॥ ॐअग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते न मम॥ **संस्त्रवप्राशनम्**॥ पवित्राभ्यां मार्जनम्॥ अग्नौ पवित्रप्रतिपत्तिः॥

**ब्रह्मणे पूर्णपात्रदानम्**॥ ब्रह्मन् पूर्णपात्रम् अयं ते वरः प्रतिगृह्यताम्। एवं आचार्याय पूर्णपात्रं दत्वा **पश्चिमे प्रणीताविमोकः तज्जलेन च मार्जनम् :-**

आपः शिवाः शिवतमाः शान्ताः शान्ततमास्तास्ते कृण्वन्तु भेषजम्॥

**1–ततः अद्येत्यादि० अस्य कुमारस्य चूडाकर्मकर्तुमधिकारार्थं दक्षिणगोदानं मुण्डनं च करिष्ये** ॥ ततएकस्मिन्पात्रे शीतास्वप्सूष्णाऽअप आसिंचति ॥

ॐउष्णेन वायउदकेनेह्यदिते केशान्वप ॥ अथात्र नवनीतपिंडं घृतपिंडं दध्नो वा पिंडं प्रास्यति ॥ ततः उदकमादाय दक्षिणगोदानमुंदति ॥

ॐसवित्रा प्रसूता दैव्याऽआपऽ उन्दन्तुतेतनूम्॥ दीर्घायुत्वायवर्चसे॥ ततस्त्र्येण्या शलल्या केशान् विनीय॥ त्रीणि कुशतरुणान्यंतर्दधाति ॥ ॐओषधेत्रायस्व ॥ इत्यनेनमंत्रेण॥ ॐशिवोनामतिलो हक्षुरमादधाति ॥ ॐ शिवोनामा सिस्वधितिस्ते पिता नमस्तेऽ अस्तु मामाहिंथ्ठं सीः ॥ निवर्तयामीति मंत्रेण केश कुशाक्षुर संलग्नीकरणम्॥ निवर्त्तयाम्या युषेन्नाद्द्या यप्प्रजननायरा यस्पोषा यसुप्प्रजास्त्वाय सुवीर्याय ॥

ततः छेदनम्॥ **छेदनमंत्रः** ॥

ॐयेनावपत्सविता क्षुरेण सोमस्यराज्ञो व्वरुणस्यव्विद्वान्॥ तेनब्ब्रह्मणोवपते दमस्या युष्यंजरदष्टिर्यथासम्॥ अनेन सकेशानि कुशतरुणानि प्रच्छिद्यानडुहे गोमयपिंडे प्रास्यत्यग्रेरुत्तरतो घ्रियमाणे ॥१॥ (कुशा के साथ छेदन करे और बैल के गोबर मे भुआ की गोद में झेले और दो जुडियो को चुपचाप इसीप्रकार काट ले) **एवं द्विरपरं तूष्णीम्** ॥ तद्यथा उन्दनम् । विनयनम् । **त्रिकुशतरुणान्तर्धानम्** । क्षुरग्रहणम् । संलग्नीकरणम्॥ छेदनम्॥ आनडुहे गोमयपिंडे प्राशनम्॥२॥ पुनः उन्दनम् । विनयनम् । **त्रिकुशतरुणान्तर्धानम्** । क्षुरग्रहणम् । संलग्नीकरणम्॥ छेदनम्॥ आनडुहे गोमयपिंडे प्राशनम्॥३॥ इति दक्षिणगोदानम्॥

**2–पुनर्जलमादायः–अस्य कुमारस्य चूडाकर्मकर्तुमधिकारार्थं पश्चिम गोदानं मुंडनं च करिष्ये** ॥ उन्दनम्–ॐसवित्रा प्रसूता दैव्याऽआपऽ उन्दन्तुतेतनूम्॥ दीर्घायुत्वायवर्चसे॥ त्र्येण्या शलल्या

विनयनम् ॥ ततः त्रिकुशतरुणान्तर्धानम् ॥ ॐओषधेत्रायस्व ॥ इत्यनेनमंत्रेण ॥ ॐ शिवोनामा सिस्वधितिस्ते पिता नमस्तेऽ अस्तु मामाहिंॅ सीः ॥ इति लोहक्षुरमादाय ॥ निवर्त्तयाम्या युषेन्नाद्द्या यप्प्रजननायरा यस्पोषा यसुप्प्रजास्त्वाय सुवीर्याय ॥ **इति लोहक्षुरं केशानामुपरि निधाय केशच्छेदने मंत्रविशेषः ॥**

ॐत्र्यायुषं जमदग्नेः कश्यपश्यत्र्यायुषम् । यद्देवेषुत्र्यायुषं तन्नोऽ अस्तुत्र्यायुषम् ॥ **एवं तूर्ष्णी वारद्वयम् ॥** यथा उन्दनम् । विनयनम् । **त्रिकुशतरुणान्तर्धानम्** । क्षुरग्रहणम् । संलग्नीकरणम् ॥ छेदनम् ॥ गोमयपिंडे निधानम् ॥२॥ पुनः उन्दनम् । विनयनम् । **त्रिकुशतरुणान्तर्धानम्** । क्षुरग्रहणम् । संलग्नीकरणम् ॥ छेदनम् ॥ गोमयपिंडे निधानम् ॥३॥ इति पश्चिम गोदानम् ॥

**३–हस्ते जलमादाय– अस्य कुमारस्य चूडाकर्मकर्तुमधिकारार्थं उत्तर गोदानं मुण्डनं च करिष्ये ॥** ॐसवित्रा प्रसूता दैव्याऽआपऽ उन्दन्तुतेतनूम् ॥ दीर्घायुत्वायवर्चसे ॥ त्र्येण्या शलल्या विनयनम् ॥ त्रिकुशतरुणान्तर्धानकरणम् ॥ ॐओषधेत्रायस्व ॥ इत्यनेनमंत्रेण ॥ ॐ शिवोनामा सिस्वधितिस्ते पिता नमस्तेऽ अस्तु मामाहिंॅ सीः ॥ **इति लोहक्षुर मादाय** ॥ निवर्त्तयाम्या युषेन्नाद्द्या यप्प्रजननायरा यस्पोषा यसुप्प्रजास्त्वाय सुवीर्याय ॥ **इति लोहक्षुरं केशानामुपरि निधाय केशच्छेदने मंत्रविशेषः ॥**

ॐयेनभूरिश्चरादिवंज्योक्पश्चाद्धिसूर्यम् ॥ तेनतेवपामिब्रह्मणा जीवातवेजीवनायसुश्लोक्यायस्वस्तये ॥ इति छेदनम् ॥ गोमयपिंडे प्राशनम् ॥१॥ **एवं तूर्ष्णी द्विरपरम्** ॥ यथा पुनः–उन्दनम् । विनयनम्। **त्रिकुशतरुणान्तर्धानम्** । क्षुरग्रहणम् । संलग्नीकरणम्॥ छेदनम् ॥ गोमयपिंडे निधनम् ॥२॥ पुनः उन्दनम् । विनयनम्। **त्रिकुशतरुणान्तर्धानम्** । क्षुरग्रहणम् । संलग्नीकरणम् ॥ छेदनम्॥ गोमयपिंडे निधानम् ॥३॥ इति उत्तरगोदानम् ॥

**ततस्त्रिः क्षुरेण शिरः प्रदक्षिणं परिहरति** ॥ ॐयत्क्षुरेण मज्जयतासुपेशसावप्तावावपति केशाञ्छिन्धिशिरोमास्यायुः प्रमोषीः ॥ इति सकृन्मन्त्रेण द्विस्तूष्णीम् ॥ ततस्तेनैवोदकेन सर्वं शिर आर्द्रं कृत्वा क्षुरं नापिताय प्रयच्छति ॥ ॐअक्षुण्वन्परिवप ॥ वपामीति नापितो ब्रूयात् ॥ नापितः उदङ्मुख स्थितस्य कुमारस्य प्राक्संस्थं प्राङ्मुख स्थितस्योदक्संस्थं केशवपनं कुर्यात् ॥ (कुलव्यवस्थया शिखास्थापनं केशशेषं करोति) ॥ **ततः सर्वान् केशान् गोमयपिंडे वस्त्रादिनाऽऽवेष्टय अनुगुप्तं कृत्वा गवां गोष्ठे स्थापयेत् अथवा तडागे जलमध्ये वा प्रक्षिपेत्** ॥ **ततः कुमारं स्नापयित्वा मस्तके स्वस्तिकं तथाच ललाटे तिलकं कुर्यात्** ॥ (गां केशान्ते संवत्सरं ब्रह्मचर्यमवपनं च । केशान्ते द्वादशरात्रथं षड्रात्रं त्रिरात्रमंततः ॥)

**संकल्पः**–कृतस्य चौलाख्यस्य कर्मणः सांगतासिद्ध्यर्थं स्मृत्युक्तान् दशसंख्याकान् ब्राह्मणान् यथाकाले यथा संपन्नेनान्नेनाहं भोजयिष्ये ॥ तेनकर्मांगदेवता प्रीयताम् न मम ॥ लम्बो दरनमस्तुभ्यं सततं मोदकप्रिय । निर्विघ्नं कुरु मे देव सर्व कार्येषु सर्वदा ॥ चौलविधेः परिपूर्णताऽस्तु ॥ अस्तुपरिपूर्णता

## ॥ अथ उपनयन संस्कार प्रयोगः ॥

तत्रोदगयने ज्योतिःशास्त्रोक्त शुभे मासे शुभे दिने सुमुहूर्ते उपनयनं कर्तुं तत्पूर्वेद्युः यजमानः पत्नी कुमाराभ्यां सह मंगलस्नानं कृत्वा अहतवाससी परिधायालंकृत्य धृततिलको बहिः शालायां शुभासने प्राङ्मुख उपविश्य स्वदक्षिणः पत्नीं तद्दक्षिणतः संस्कार्यं बटुं चोपवेश्य ॥

**आचम्य प्राणानायम्य** ॥ सुमुखश्चैकेत्यादि पठित्वा **अद्येत्यादि०** अमुकशर्मणो मम सुतस्य उपनयन संस्कार कर्मणि अधिकारसिद्ध्यर्थं त्रीन्संख्याकान् प्राजापत्यान् रजतप्रत्याम्नायद्वारा अहमाचरिष्ये ॥

**अनेन** मम सुतस्य उपनयनसंस्कार कर्मण्यधिकार सिद्धिरस्तु।। (इस प्रकार बालक से भी प्रायश्चित संकल्प करावे) एवं कुमारस्यापि प्रायश्चितं कारयेत् ।। यथा

**अद्येत्यादि०** मम कामचार–कामवाद कामभक्षणादि दोषनिवृत्ति पूर्वकोपनयन संस्कार कर्माधिकारार्थं त्रीन्संख्याकान् प्राजापत्यान् रजतप्रत्याम्नायद्वारा अहमाचरिष्ये ।। तेन मम कामचारकामवाद कामभक्षणादि दोषनिवृत्ति पूर्वकोपनयन संस्कार कर्मण्यधिकार सिद्धिरस्तु ।।

**अद्येत्यादि०** । आचार्यो हस्ते जलमादाय अमुकशर्मा आचार्योऽहं अमुकशर्मणो यजमानसुतस्य उपनयन संस्कारकर्माधिकारार्थं द्वादशसहस्त्रगायत्रीजपमहं करिष्ये ।।

**ततो यजमानोहस्ते जलं गृहीत्वा** अद्येत्यादि० अमुकगोत्रोत्पन्नामुक शर्माहं मम सुतस्य द्विजत्वसिद्धयै वेदाध्ययनाधिकारार्थम् उपनयनाख्यं कर्म करिष्ये ।। पुनः

**अद्येत्यादि०**करिष्य माणोपनयन कर्माङ्गभूतं निर्विघ्नतासिद्धयर्थं षोडशोपचारैः वा पंचोपचारैः महागणपति पूजनमहं करिष्ये।। ॐ गणानान्त्वा गणपति ठँ हवामहे प्रियाणां त्वा प्रियपति ठँ हवामहे निधीनां त्वा निधिपति ठँ हवामहे वसो मम । आहमजानि गब्भधमा त्वमजासिगब्भधम् ।। सर्वोपचारार्थे गन्धाक्षत्पुष्पाणि समर्पयामि ।।

**ततः कुमारस्य वपनं (मुंडनं) कारयेत्:**– देशकालौ संकीर्त्य अद्येत्यादि० मम सुतस्य उपनयनं कर्त्तं तत्प्राच्याङ्गभूतं वपनं च कारयिष्ये ।। एवं वपनं कारयित्वा स्नापयेत् (कुमारस्य मुडनं कृत्वा) ।।

**ततो ब्राह्मण त्रयभोजनम् अद्येत्यादि०** अमुकशर्मणः मम सुतस्य उपनयन कर्मण्यधिकारार्थं त्रिभ्योऽधिकान् ब्राह्मणान् अद्याहं भोजयिष्ये ।। तेन अमुकशर्मणो मम सुतस्य उपनयन कर्मण्यधिकार

सिद्धिरस्तु ॥(ब्राह्मण बालको के साथ बटुक भी दूधचावल खाये) ततो ब्राह्मणपङ्क्तौ मुंडित शिरसं कुमारमपि भोजयेत् ॥ (मातासह भुञ्जीत यथाचारं वा) ततो कुमारपिता बहिः शालायां वेद्युपरि पञ्चभूसंस्कार पूर्वकं समुद्भवनामानं **लौकिकाग्निं स्थापयेत्** ॥

## ॥ प्रथम वेदी संस्कार ॥

**प्रथमस्थन्डिलोपरि पञ्चभूसंस्कारान् कृत्वा**:- ॐदर्भैः परिसमुह्य ३ गोमयेनोपलिप्य ३ स्रुवेणोल्लिख्य ३ अनामिकांऽगुष्ठेनोद्धृत्य ३ उदकेनाऽभ्युक्ष्य अग्निमुप समाधाय (तत्पश्चात् अग्नि सुहासिन के हाथ से काँस्य पात्र में ढककर मँगाना) ॥

ॐअग्निन्दूतं पुरोदधे हव्यवाहमुपब्रुवे । देवाँ २॥ आ सादयादिह ॥ ॐआवो देवासऽ ईमहे वामं प्रयत्य ध्वरे । आवो देवास ऽ आशिषो यज्ञियासो हवामहे ॥ इत्यग्निमुपसमाधाय ॥ अग्निं आवाहयामि स्थापयामि ॥ दक्षिणतो ब्रह्मासनं, उत्तरतः प्रणितासनम् तत्र ब्रह्मोऽपवेशनम् यावत् कर्म समाप्यते तावत् त्वं ब्रह्म स्थिरोभव ॥ .

**पूजनम्**:-ॐ ब्रह्मणे नमः सर्वोपचारार्थे गन्धाक्षत्पुष्पाणि समर्पयामि ॥

(पश्चात् आचार्य बालक को अग्नि के पीछे पूर्वाभिमुख और अपने दक्षिण भाग में बैठा देवें । अब आचार्य मङ्गल पाठ इन पद्यों से करे और बालक पर पुष्प और अक्षत फेंके ॥)

ततः पुष्पमालादिभिरलंकृतं बटुम् आचार्य समीपमानयति ॥ ततः मध्येऽन्तर्पटं धारयित्वा ॥ **ब्राह्मणाः सुमङ्गल पद्यानि पठेयुः** ॥

भास्वान्काश्यप गोत्रजोऽरुणरुचिर्यः सिंहराशीश्वरः ॥ षट्त्रिस्थो दशशोभनो गुरुशशीभौमेषुमित्रं सदा ॥शुक्रो मन्दरिपुः कलिङ्गजनितश्चाग्नीश्वरौ देवते मध्ये वर्तुलपूर्वदिग्दिनकरः कुर्यात् बटोर्मंगलम् ॥१॥

ॐमनो जुतिर्ज्जुषतामाज्यस्य बृहस्पतिर्य्यज्ञमिमन्तनोत्वरिष्टं यज्ञ ठँ समिमन्दधातु । विश्वे देवासऽइह मादयन्तामोउँ ॥ म्प्रतिष्ठ ॥ एषवै प्रतिष्ठानाम यज्ञो यत्रै तेन यज्ञे यजंतेन सर्वमेव प्रतिष्ठितं भवति । ॐ मुहूर्ते सुप्रतिष्ठितमस्तु ॥ **इति मंत्रमाचाराद् द्विजाः पठेयुः** ॥(ततः आचार्यः अंतर्पटं निः सार्य कुमारः आचार्य पादौ प्रणमति, स्वदक्षिणतः पश्चादग्रेस्तमवस्थापयेत्) ॥ ततः प्रेषद्वयम्ः–

(बालक आचार्य के हाथ जोडे तब आचार्य कहे)

बटुक गुरु से आज्ञा माँगेः– ब्रह्मचर्यमागामिति ॥

बटुक खड़ा रहे तथा बटुक उवाचः–ॐब्रह्मचर्यं मागाम् ॥

गुरु उवाचः– ॐब्रह्मचार्यसानि

तत्पश्चात् बटुक को वस्त्र धारण कराना :– (पुराने वस्त्रों को उतरवादे)

**विनियोगः**–ॐअथैनं माणवकम् आचार्यो वासः परिधापयति येनेन्द्रायेति मंत्रस्य आङ्गिरस ऋषिः बृहतीच्छंदः बृहस्पतिर्देवता वासः परिधाने विनियोगः

ॐ अथैनं वासः परिधापयति जितेन्द्राय बृहस्पति र्व्वासः पर्यदधादमृतम् । तेनत्वा परिदधाम्यायुषे दीर्घायुत्वाय बलायवर्च्चसे ॥

**आचमनम्** ॥ (बालक की कमर में मेखला बांधे)

**मेखला विनियोगः**–इयं दुरुक्त मिति वामदेव ऋषिः त्रिष्टुपृछन्दः मेखला देवता मेखला बंधने विनियोगः ॥

ॐइयं दुरुक्तं परिबाधमानावर्णं पवित्रं पुनतीमऽआगात् ॥ प्राणापानाभ्यां बलमादधानास्वसा देवी सुभगामेखलेयम् ॥ **मेखलां बध्नीयात्** ॥ (इति माणवकस्य मंत्रपाठः)

**कोपीन धारणः**–ॐ युवा सुवासाः परिवीत आगात्स उ श्रेयान्भवति जायमानः।तं धीरासः कवय उन्नयन्ति स्वाध्यो मनसा

देवयन्त:॥(कोपीन धारण कराकर बटुक को बैठा देवें)॥ **आचमनम्**॥अत्रावसरे आचारात् यज्ञोपवीतदानम्॥ ततोयज्ञोपवीतपरिधानम् ॥ तत्रादावाचार्येण **आपोहिष्ठे-तित्रिभिर्मन्त्रैर्यज्ञोपवीतं प्रक्षाल्य** ॥(यज्ञोपवीत प्रक्षालन करें) विनियोग:-आपोहिष्ठेति तिसृणां सिंधुद्वीप ऋषि: गायत्रीछन्द: आपो देवता यज्ञोपवीत प्रक्षालने विनियोग: ॥

ॐ आपोहिष्ठा मयो भुवस्तान ऊर्जे दधातन । महेरणाय चक्षसे ॥१॥ यो व: शिवतमो रसस्तस्य भाजयतेह न: । उशतीरिव मातर: ॥२॥ तस्मा ऽअरङ्गमाम वो यस्य क्षयाय जिन्वथ । आपोजनयथा च न: ॥३॥ **इति यज्ञोपवीतं प्रक्षाल्य करसम्पुटे धृत्वा दशधा गायत्र्या अभिमंत्र्य** ॥ (यज्ञोपवीत को अंगुष्ठ पर तीन बार घुमावें) ॐब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमत: सुरुचोव्वेन ऽ आव:। सबुध्न्या ऽ उपमा ऽऽ अस्यविष्ठा: सतश्च योनिमसतश्चव्विव: ॥ ॐइदं विष्णुर्विचक्रमे त्रेधानिदधे पदम्। समूढमस्यपा ᳪसुरेस्वाहा ॥ ॐनमस्ते रूद्र मन्यव ऽउतोत ऽ इषवे नम: । बाहुभ्या मुतते नम: ॥ इति त्रिभिर्मन्त्रैरंगुष्ठमुपवीते भ्रामयित्वा ॥

**ततो नवतंतुषु देवता आवाहयेत्**॥(अक्षतपुष्प लेकर यज्ञोपवीत पर छोड़े)

प्रथम तंतौ:-ॐ काराय नम: । ॐकारमावाहयामि स्थापयामि ॥
द्वितीय तंतौ:- ॐ अग्रये नम: । अग्निमावाहयामि स्थापयामि ॥
तृतीय तंतौ:- ॐनागेभ्यो नम: । नागानावाहयामि स्थापयामि ॥
चतुर्थ तंतौ:- ॐसोमाय नम: । सोममावाहयामि स्थापयामि ॥
पंचम तंतौ:- ॐपितृभ्यो नम: । पितृनावाहयामि स्थापयामि ॥
षष्ठ तंतौ:-ॐप्रजापतये नम:। प्रजापतिमावाहयामि स्थापयामि ॥
सप्तम तंतौ:-ॐअनिलाय नम:। अनिलमावाहयामि स्थापयामि ॥
अष्टम तंतौ:-ॐ यमाय नम: । यममावाहयामि स्थापयामि ॥

नवम तंतौ:- ॐ विश्वेभ्यो देवेभ्यो नमः । विश्वान्देवानावाहयामि स्थपयामि ॥

## ❋ ॥ ततः यज्ञोपवीत ग्रन्थि देवतानामावाहनम् ॥ ❋

ॐ ब्रह्मणे नमः । ब्रह्माणम् आवाहयामि स्थापयामि ॥
ॐ विष्णवे नमः । विष्णुम् आवाहयामि स्थापयामि ॥
ॐरुद्राय नमः । रुद्रम् आवाहयामि स्थापयामि ॥

**ततो ध्यानम्:**- प्रजापतेर्यत्सहजं पवित्रं कार्पास सूत्रोद्भव ब्रह्मसूत्रम् ॥ ब्रह्मत्वसिद्धये च यशः प्रकाशं जपस्य सिद्धिं कुरु ब्रह्मसूत्रम् ॥ इति ध्यात्वा ॥

ॐ प्रणवादि नवतंतु देवता सहित ब्रह्म विष्णु रुद्रेभ्यो नमः सर्वोपचारार्थे गन्धाक्षत्पुष्पाणि समर्पयामि ॥ इति संपूज्य ॥

**सूर्याय दर्शयेत्** ॥

(यज्ञोपवीत को सूर्य नारायण भगवान को दिखाये)

विनियोग:-उदुत्यमिति प्रस्कण्व ऋषिः गायत्री छंदः सूर्योदेवता सूर्यावलोकने विनियोगः॥

ॐउदुत्त्यञ्जात वेदसन्देवं व्वहन्तिकेतवः । दृशेव्विश्वाय सूर्य्यम् ॥ **इति सूर्याय दर्शयित्वा धारणम्** ॥ (बालक को यज्ञोपवीत धारण करवायें) (पहले मूंज की फिर सूत की)

**विनियोग:**-यज्ञोपवीतमिति मंत्रस्य परमेष्ठी ऋषिः त्रिष्टुप्छन्दः लिंगोक्ता देवता श्रौतस्मार्त कर्मानुष्ठान सिद्धयर्थे यज्ञोपवीत धारणे विनियोगः ॥

ॐयज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् ॥ आयुष्यमग्रं प्रतिमुञ्चशुभ्रं यज्ञोपवीतं बलमस्तुतेजः ॥ यज्ञोपवीत मसि यज्ञस्यत्वा यज्ञोपवीतेनो पनह्यामि ॥ इति मंत्रं पठित्वा दक्षिणबाहुमुद्धृत्य वामस्कंधे यज्ञोपवीतं धारयेत् ॥ **आचमनम्** ॥ अथाचार्यो

माणवकस्याजिनं प्रयच्छति ॥ (बालक को मृगचर्म धारण करवायें)

**विनियोग:**– मित्रस्य चक्षुरिति मंत्रस्य परमेष्ठी ऋषि: त्रिष्टुप्छंद: लिंगोक्ता देवता अजिन धारणे विनियोग: ॥

**मंत्र:**–ॐमित्रस्य चक्षुर्वरुणं बलीयस्तेजो यशस्वीस्थविर ठं समिद्धम् ॥ आवाहमस्मिन् वरुणं च जिष्णुं कृष्णाजिनं परिमृज्याजिनन्दधेयम् ॥ (इति माणवकस्य मंत्र) ॥ **आचमनम्** ॥

तत: आचार्यो माणवकस्य दंडं प्रयच्छति ॥ ( एड़ी से मस्तक पर्यंत पलाश का दंड बालक को धारण करवायें)

**विनियोग:**–योमे दंड इति प्रजापति ऋषि: यजुश्छंद: दंडो देवता दंडग्रहणे विनियोग: ॥

**मंत्र:**–ॐयोमेदंड: परापतद्वै हायसोऽधिभूम्याम् ॥

तमहम्पुनरादधाम्यायुषेब्रह्मणे ब्रह्मवर्चसाय ॥

बटुक उवाच:–दंडं प्रति गृह्णामि ॥

तत आचार्य: स्वांजलिना अद्भिर्बटोरंजलिं पूरयति, आचार्य पठितैस्त्रिभिर्मन्त्रै: माणवक: सूर्यायार्घत्रयं दद्यात् ॥

(आचार्य जल से अपनी अञ्जलि भरे और उसी जल को बालक की अञ्जलि में भर दें बालक सूर्य को तीन बार अर्घ दें )

**मंत्र:**–ॐ आपोहिष्ठा मयो भुवस्तान ऊर्जे दधातन । महेरणाय चक्षसे । श्री सूर्याय नम: इदमर्घ्यं दत्तं न मम ॥१॥ यो व: शिवतमो रसस्तस्य भाजयतेह न: । उशतीरिव मातर: । श्री सूर्याय नम: इदमर्घ्यं दत्तं न मम ॥२॥ तस्मा ऽअरङ्गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च न: । श्री सूर्याय नम: इदमर्घ्यं दत्तं न मम ॥३॥ तत: आचार्यो माणवकं प्रेषयति, सूर्यमुदीक्षस्वेति, ततो माणवकस्तच्चक्षुरिति सूर्यं पश्यति ॥ (बाद में बटुक को सूर्य के सामने खडा करें तथा उपस्थान के लिये दोनों हाथ उठावें)

**विनियोग**:-तच्चक्षुरिति दध्यङ्ङाथर्वण ऋषि: उष्णिक् छंद: सूर्यो देवता सूर्यदर्शने विनियोग: ॥

ॐतच्चक्षुर्द्देवहितम्पुरस्ताच्छुक्रमुच्चरत् ॥ पश्येमशरद: शतञ्जीवेमशरद: शतर्ठ श्रृणुयामशरद: शतम्प्रब्ब्रवामशरद: शतमदीना: स्यामशरद: शतम्भूयश्चशरद: शतात् ॥

तत आचार्यो माणवकस्य दक्षिणस्कंधोपरि हस्तं नीत्वा तस्य हृदयमालभते ॥

(आचार्य बालक के दाहिने कन्धे और हृदय का अपने दाहिने हाथ से स्पर्श करें)

**विनियोग**:-मम व्रते इति मंत्रस्य प्रजापति र्ऋषि स्त्रिष्टुप् छन्द: बृहस्पतिर्देवता हृदयालंभने विनियोग: ॥

**मंत्र**:-ॐमम व्रते ते हृदयंदधामि, ममचित्त मनुचित्तन्तेऽअस्तु, मम वाचमेकमना जुषस्व, बृहस्पतिष्ट्वा नियुनक्तु मह्यम् ॥

तत आचार्यो माणवकस्य दक्षिणहस्तं गृहीत्वाऽऽह ॥

(आचार्य बालक का दक्षिण हाथ अपने दक्षिण हाथ मेंलेकर प्रश्न करे)

आचार्य:-को नामासि (क्या नाम हैं तुम्हारा)

बटुक जवाब दें:-अमुक शर्माऽहं भो,

(बटुक अपना नाम उच्चारण करें)

आचार्य:- कस्य ब्रह्मचार्यसि (आप किसके शिष्य हैं)

बटुक:-भवत: (मैं आपका शिष्य हूँ)

आचार्य:-इन्द्रस्य ब्रह्मचार्यस्याग्निराचार्य स्तवाहमाचार्य: ॥ स्तवासौ अमुकशर्मन्निति

(इन्द्र और अग्नि भी आप के आचार्य हैं और मैं भी तुम्हारा आचार्य हुँ)

अथैनं माणवकं भूतेभ्य: परिददात्याचार्य: ॥ यथा ॥

(आचार्य बटुक के पञ्चभूत शरीर के रक्षणार्थ निम्न मंत्र उच्चारण करें)

**विनियोग:**-प्रजापतयेत्वा इत्यादीनां मन्त्राणां प्रजापतिर्ऋषि: यजुश्छंद: लिङ्गोक्ता देवता कुमार रक्षणे विनियोग: ॥ (सभी दिशाओं में प्रणाम करें)

**मंत्र:**-ॐप्रजापतयेत्वा परिददामि प्राच्याम् (पूर्व) ॥ ॐदेवायत्वा सवित्रे परिददामि इति दक्षिणस्याम् (दक्षिण) ॥ ॐअद्भयस्त्वौषधीभ्य: परिददामि इति प्रतीच्याम् (पश्चिम) ॥ ॐद्यावापृथिवीभ्यान्त्वा परिददामि इतिउदीच्याम् (उत्तर) ॥ ॐविश्वेभ्यस्त्वादेवेभ्य: परिददामि इति अध: (नीचे) ॥ ॐसर्वेभ्यस्त्वा भूतेभ्य: परिददाम्यरिष्टयै इति ऊर्ध्वम् (ऊपर) ॥

(इत्याचार्य पठितमन्त्रेण माणवकस्य रक्षणम्)

(बटुक अग्नि की एक प्रदक्षिणा कर बैठ जावे)

(प्रदक्षिणमग्निं पर्यक्ष्योपविशत्याचार्यस्योत्तरतो माणवक:) ॥

ततो ब्रह्मोपवेशनादि चरुवर्ज्यं सर्वं प्रकृतिवत् पवित्रप्रणीतानिधानान्ते दक्षिणं जान्वाच्य ब्रह्मान्वारब्ध: स्त्रुवेण ॥ मनसा ॥

(ॐप्रजापतये स्वाहा) इदं प्रजापतये न मम ॥ ॐ इन्द्राय स्वाहा इदं इन्द्राय न मम ॥ ॐ अग्नये स्वाहा इदमग्नये न मम ॥ ॐ सोमाय स्वाहा इदं सोमाय न मम ॥ हस्ते अक्षतान् गृहीत्वा ॥

ॐअग्ने नयसुपथा रायेऽ अस्मान्विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमऽउक्तिं विधेम ॥

**व्रतादौ जातवेदस: नाम्ने वैश्वानराय नम:** गंधाक्षत पुष्पाणि समर्पयामि ॥

**विनियोग:**-भूर्भुव: स्वरिति महाव्याहृतीनां प्रजापतिर्ऋषि: गायत्र्युष्णिगनुष्टुप्छन्दांसि अग्निवायुसूर्या देवता उपनयनाङ्गप्रधान होमे विनियोग: ॥

ॐ भू: स्वाहा इदमग्नये न मम ॥१॥ ॐ भुव: स्वाहा इदं वायवे न मम ॥२॥ ॐ स्व: स्वाहा इदं सूर्याय न मम ॥३॥

ॐ त्वन्नोऽ अग्ने व्वरुणस्य विद्वान्देवस्यहेडोऽ अवयासिसीष्ठाः॥ यजिष्ठोवह्नितमः शोशुचानो विश्वा द्वेषाथ्ठं सिप्रमुमुग्ध्यस्मत् स्वाहा॥ इदमग्नीवरुणाभ्यां न नमः॥४॥

ॐ सत्वन्नोऽ अग्ग्नेवमो भवोतीनेदिष्ठोऽ अस्याऽउषसोव्युष्टौ॥ अवयक्ष्वनो वरुणथ्ठं रराणोव्वीहिमृडीकथ्ठं सुहवो न एधि स्वाहा॥ इदमग्नीवरुणाभ्यां न मम॥५॥

ॐ अयाश्चाग्नेस्यनभि शस्तिपाश्चसत्यमित्वमयाअसि॥ अयानो यज्ञंवहास्ययानोधेहि भेषजथ्ठ स्वाहा॥ इदमग्नयेअयसे न मम॥६॥

ॐयेते शतंवरुणं येसहस्त्रं यज्ञिया: पाशाविततामहान्त:॥ तेभिर्न्नोऽअद्यसवितोत विष्णुर्विश्वेमुञ्चतु मरुत: स्वर्का: स्वाहा॥ इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्य: स्वर्केभ्यश्च न मम॥७॥

ॐ उदुत्तमंवरुण पाशमस्मदवाधमं व्विमद्ध्यमथ्ठंश्रथाय॥ अथावयमादित्त्यव्रते तवानागसोऽ अदितयेस्याम स्वाहा॥ इदं वरुणायादितये न मम॥८॥

ॐप्रजापतये स्वाहा इदं प्रजापतये न मम॥९॥

ॐअग्नये स्विष्टकृते स्वाहा इदं अग्नये स्विष्टकृते न मम॥ संस्त्रवप्राशनम्॥ पवित्राभ्यां मार्ज़नम् अग्नौ पवित्रप्रतिपत्तिः॥ ब्रह्मणे पूर्णपात्रदानम्॥ कृतस्य उपनयनाख्यस्य कर्मणः सांगतासिद्ध्यर्थं ब्रह्मन् इदं पूर्णपात्रं तुभ्यमहं सम्प्रददे॥ पश्चिमे प्रणीताविमोक: तज्जलेन मार्जनम्॥

आप: शिवा: शिवतमास्तास्ते०॥

तत आचार्य: कुमारं शिक्षयति:-(आचार्य बालक को शिक्षा दें)

**आचार्य:**-ब्रह्मचार्यसि (तुम ब्रह्मचारी हो)

**बटुक:**-असानि (अवश्य ब्रह्मचारी हूँ)

**आचार्यः**–आपोशान (भोजन करने से पहले उसी भोजन में से आपोशान निकालना चाहिये वह इस प्रकार है भोजन के चारो और जल का मंडल करके)

ॐभूपतये नमः । ॐभुवनपतये नमः । ॐभूतानांपतये नमः ॥ (इन मंत्रों से तीन ग्रास भूमि पर रख कर जल छोडे ॥ फिर घृत मिश्रित पांच ग्रास इन मंत्रों से ग्रहण करे) ॥

ॐ प्राणाय स्वाहा, ॐ अपानाय स्वाहा, ॐ व्यानाय स्वाहा, ॐ उदानाय स्वाहा, ॐ समानाय स्वाहा ।

**बटुकः**–अश्नानि (अवश्य करूँगा)

**आचार्यः**–कर्म कुरु (कर्म करना होगा)

**बटुकः**–करवाणीति (मै वैदिक कर्म करुँगा)

**आचार्यः**–मा दिवा सुषुप्थाः (दिन में कभी मत सोना)

**बटुकः**–न स्वपानि (नहीं सोया करूँगा)

**आचार्यः**–वाचं यच्छ (सत्य वाणी बोलना होगा)

**बटुकः**–यच्छानि (अवश्य सत्य बोलूँगा)

**आचार्यः**–समिधमाधेहि (समिधा हवन करना होगा)

**बटुकः**–आदधानि (अवश्य करूँगा)

तत्रादौः–आचारात्कांस्यपात्रे तंडुलान्प्रसार्य तत्र सुवर्णशलाकया ॐ कारव्याहृतिपूर्वकं गायत्री मंत्रं लिखित्वा ॥

(आचार्य कांसी की थाली में चावल फैलाकर सोने की शलाका से गायत्री मंत्र लिखकर उसकी पूजन कर आचार्य गायत्री मंत्र बालक को सुनावें)

**बटुर्जलं–गृहीत्वा–संकल्पः**–अद्येत्यादि०मम ब्रह्मवर्चस सिद्धि पूर्वक वेदाध्ययनाधिकारसिद्ध्यर्थं गायत्र्युपदेशाङ्गविहितं गायत्रीपूजनमाचार्यपूजनं चाहं करिष्ये॥ तत्रादौ गणपतेः पञ्चोपचारैः पूजनमहं करिष्ये ॥

ॐएकदन्ताय विद्महे वक्रतुण्डाय धीमहि । तन्नो दन्ती प्रचोदयात् ॥

ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो योनः प्रचोदयात्॥ गंधाक्षत पुष्पाणि समर्पयामि॥ इदम् मोदकम् श्रीफलास्यार्घं मुद्रार्पणम् प्रदक्षिणा नमस्कारं पूजनं परिपूर्णतास्तु॥ ततः क्षौमं कार्पासकं वा वस्त्रमवगुण्ठय उपदेशं माणवकाय दद्यात्॥

(बटुक गुरु जी के चरण पकड़ कर अपना मस्तक नवावें॥ बटुक के दक्षिण कर्ण में आचार्य बटुक का दक्षिण हस्त अपने हाथ में पकड कर ऊपर अबोट वस्त्र ओढाकर शंख (गरुड) घंटी की ध्वनि में तीनबार गायत्री मंत्र का उपदेश करें) :

**विनियोगः**–ॐ तत्सवितुरिति विश्वमित्र ऋषिः गायत्रीछन्दः सूर्यो देवता उपदेश ग्रहणे विनियोगः॥ **तत आचार्यो गायत्रीं ब्रूयात्॥**

ॐभूर्भुवः स्वः तत्सवितुर्वरेण्यम्। ॐ स्वस्ति॥ ॐभूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। ॐस्वस्ति॥ ॐभूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो योनः प्रचोदयात्॥ ॐ स्वस्ति॥

गुरवे दक्षिणां समर्पयेत् प्रणामं च विदधीत॥

(गुरु जी बालक की थोडी सी चोटी काट ले बालक गुरु जी को यथा शक्ति दक्षिणा दे और प्रणाम करें) (गुरु जी बालक को आशीर्वाद दें)

**आचार्यः**–आयुष्मान् भव सौम्य॥

(बटुक द्वारा घी में डुबोकर पाँच छाँणा रा टुकडा होमावें)

विनियोगः–अग्ने सुश्रवादीनां ब्रह्माऋषिः यजुश्छन्दः अग्निर्देवता संधुक्षणे विनियोगः॥

ॐ अग्रे सुश्रवः सुश्रव संमाकुरु॥१॥ (स्वाहा)

ॐ यथात्वमग्ने सुश्रवः सुश्रवाऽअसि॥२॥ (स्वाहा)

ॐएवंमाꣳ सुश्रवः सौश्रवसंकुरु॥३॥ (स्वाहा)

ॐयथात्वमग्ने देवानां यज्ञस्य निधिपाऽअसि॥४॥ (स्वाहा)

ॐएवमहं मनुष्याणां वेदस्यनिधिपोभूयासम् ॥५॥ (स्वाहा)

**बटुक एक अग्नि की प्रदक्षिणा करें** ॥ (बटुक को खड़ा कर समिधा देवें)

(और इसी मंत्र से तीन समिधा एक एक करके अग्नि के अर्पण करावें)

विनियोग:–अग्ने समिधमिति प्रजापतिर्ऋषि: आकृतिच्छंद: सविता देवता समिदाधाने विनियोग: ॥

ॐअग्ने समिध माहार्षम्बृहते जातवेदसे ॥ यथात्वमग्ने समिधा समिध्यसऽ एवमहमायुषा मेधयावर्च्चसा प्रजयापशुभि र्ब्रह्मवर्चसेन समिधे जीवपुत्रोममाचार्यो मेधाव्यहमसान्यनिरा करिष्णु र्यशस्वी तेजस्वी ब्रह्मवर्चस्यन्नादो भूयासथ्ठं स्वाहा ॥

**इत्यनेन मंत्रेण प्रथमां तथा द्वितीयां तथैव तृतीयां जुहुयात्** ॥ उपविश्य ॥

(पुन: बटुक द्वारा घी में डुबोकर पाँच छाँणा रा टुकडा होमावें)

**विनियोग:**–अग्ने सुश्रवादीनां ब्रह्मात्रृषि: यजुश्छन्द: अग्निर्देवता संधुक्षणे विनियोग: ॥

ॐ अग्ने सुश्रव: सुश्रव संमाकुरु ॥१॥ (स्वाहा)

ॐ यथात्वमग्ने सुश्रव: सुश्रवाऽअसि ॥२॥ (स्वाहा)

ॐएवंमाथ्ठं सुश्रव: सौश्रवसंकुरु ॥३॥ (स्वाहा)

ॐयथात्वमग्ने देवानां यज्ञस्य निधिपाऽअसि ॥४॥ (स्वाहा)

ॐएवमहं मनुष्याणां वेदस्यनिधिपोभूयासम् ॥५॥ (स्वाहा)

तत: तूष्णीं पाणी प्रतप्य ॥ तनूपाऽअग्नेसि इत्यादि सप्तभिर्मन्त्रै: प्रतिमंत्रं मुखविमर्शनं करोति ब्रह्मचारी ॥

(बटुक चुपचाप अपने हाथों को अग्नि में तपाकर प्रत्येक मंत्र के अन्त में मुँहपर लगावें)

**विनियोग:**–तनूपाअग्नेइत्यादि सप्तमंत्राणां बृहदेवा ऋषय: यजुथ्ठंषि छन्दांसि अग्निर्देवता मुखविमर्शने विनियोग: ॥

ॐ तनूपाऽअग्नेसि तन्वम्मेपाहि ॥१॥

ॐआयुर्दाऽ अग्नेस्यायुर्मे देहि ॥२॥
ॐवर्चोदाऽ अग्नेसिवर्चोमे देहि ॥३॥
ॐअग्नेयन्मे तन्वाऽ ऊनन्तन्मऽ आपृण ॥४॥
ॐमेधाम्मेदेवः सविताऽ आदधातु ॥५॥
ॐमेधाम्मे देवी सरस्वतीऽ आदधातु ॥६॥
ॐ मेधामश्विनौ देवा वाधत्तां पुष्करस्त्रजौ ॥७॥ इत्येते मुखविमर्शन मंत्राः ॥

(बटुक अपने दक्षिण हाथ से शरीर के अंगो का स्पर्श करे)
अत्र शिष्टाचारतोऽनुष्ठेयाः पदार्थाः ॥ (बालक विनियोग करें)

**विनियोगः**–अंगानिचैत्यादिनां प्रजापतिर्ऋषिः यजुश्छन्दः लिंगोक्ता देवता अंगाप्यायने विनियोगः ॥

ॐवाक्चमऽ आप्यायतामिति मुखालंभनम्॥ (मुख का स्पर्श करें)
ॐप्राणश्चमऽ आप्यायतामिति नासिकयोरालंभनम् ॥ (नाक का स्पर्श करें)
ॐचक्षुश्चमऽ आप्यायतामिति नेत्रयोरालंभनम्॥(नेत्रों का स्पर्श करें)
ॐश्रोत्रञ्चमऽ आप्यायतामिति दक्षिणकर्णमालभ्यानेनैव मन्त्रेण वामकर्णालंभनम् ॥
(दोनों कानो का स्पर्श करें)
ॐयशोबलञ्चमऽ आप्यायतामिति मन्त्रजपः ॥ (दोनो भुजाओ का स्पर्श करे)

**अत्रावसरे भस्म धारणम् ॥**

**विनियोगः**–त्र्यायुषमिति नारायण ऋषिः उष्णिक् छन्दः अग्निर्देवता भस्मना तिलककरणे विनियोगः ॥

ॐत्र्यायुषं जमदग्नेरिति ललाटे ॥ ॐकश्यपश्य त्र्यायुषमिति ग्रीवायाम् ॥ ॐयद्देवेषुत्र्यायुषमिति स्कन्धे ॥ ॐ तन्नोऽ अस्तुत्र्यायुषमिति हृदि ॥

**ततो गोत्रनाम पूर्वकं वैश्वानरादीनाम् अभिवादनम् ॥**

(बटुक गोत्र और नाम का उच्चारण कर सभी को प्रणाम करें और आशीर्वाद लें)

अमुकगोत्रः अमुकप्रवरान्वितः अमुकशर्मा अहं भो वैश्वानर त्वामभिवादयामि ॥ आयुष्मान् भव सौम्य ॥

भो गुरो त्वाम् अभिवादयामि ॥ आयुष्मान् भव सौम्य ॥

भो आचार्य त्वाम् अभिवादयामि ॥ आयुष्मान् भव सौम्य ॥

भो मातापितरौ युवाम् अभिवादयामि ॥ आयुष्मान् भव सौम्य ॥

भो सूर्याचन्द्रमसौ युवाम् अभिवादयामि ॥ आयुष्मान् भव सौम्य ॥

सर्वान्ब्राह्मणान् अभिवादयामि ॥ आयुष्मान् भव सौम्य ॥ इत्यभिवादनम् ॥

अथ भिक्षाचरणम् ब्रह्मचारी दण्डं भिक्षापात्रं च प्रतिगृह्य सावित्र्या आदित्यमुपस्थाय अग्निं प्रदक्षिणीकृत्य प्रथमं मातरं भिक्षेत् ॥

(भिक्षापात्र के लिये बाँसरी छावडी १, (गरणां श्वेत) या चावल ४ डोवे, खाजा ७ सेवियांरा लाडू ७ या (मूँग के), नारियल १, रूपये ११ ,२१,५१ ,१०१, इत्यादि ॥)

(ब्रह्मचारी भिक्षापात्र ले पावड़ी पहने हाथ में दण्ड लेकर अग्नि की एक परिक्रमा करके । प्रथम माता से भिक्षा ले माता चार पस्से चावल रखें । सात खाजे रखे सात लड्डू रखें एक नारियल रखें । दक्षिणा रखें फिर बालक अन्य लोगों से भिक्षा ले पहली भिक्षा आचार्य जी को । दूसरी भिक्षा मामी जी को । और तीसरी भिक्षा माँ को दे दें)

१–ॐ भवति भिक्षां देहि ॥ ॐ स्वस्ति ॥ (इति ब्राह्मणः) ॥

२–ॐ भिक्षां भवति देहि ॥ (इति क्षत्रियः) ॥

३–ॐ भिक्षां देहि भवति ॥ (इति वैश्यः) ॥

तिस्रः षट् द्वादश वा अपरिमिता भिक्षा ग्राह्याः ॥ आचार्याय भैक्ष्यं निवेदयित्वा भुंक्ष्व इति आचार्यानुज्ञातो भिक्षां स्वीकुर्यात् ॥

(प्रथम भिक्षा में प्राप्त सामग्री गुरु को भेंट करे)

ॐ वाग्यतोऽहश्शेषं तिष्ठेदित्येकेऽ हिर्ठ सन्नरण्या आहृत्य तस्मिन्नग्नौ पूर्ववत आधाय ततः पाणिनाऽग्निं परिसमूहति ॥
(मन वचन और कर्म से ब्रह्मचर्य का पालन करते हुये ब्रह्मचारी रहे । और निम्न धर्मो का पालन करे)

## ॥ ब्रह्मचारिधर्माः ॥

**प्राचीनः**–अधः शयीत। (धरती पर सोये) अक्षारलवणाशी स्यात्। (खारा भोजन न करे) दंडधारणम्। (दण्ड धारण करे) अग्निपरिचरणं समिदाधानं कर्तव्यम्। (अग्नि पूजन और समिदाधान करे) गुरुसुश्रूषा कर्तव्या। (गुरु सेवा करे) भिक्षाचर्यं कर्तव्यम्। (भिक्षा माँगे) मधुमांसाशनं न कर्तव्यम्। (मधु,मांस भोजन न करे) मज्जनं न कर्तव्यम्। (पानी मे डूब कर स्नान न करे) पर्यासने नोपविशेत्। (अपने से बडों के सामने ऊँचे आसन पर न बैठे) स्त्रीणां मध्येऽवस्थानं न कर्तव्यम्। (स्त्रियों के बीच मे न बैठे) अदत्तं न गृह्णीयात्। (बिना दिये कोई चीज न ले) अनृतं न वदेत्। (झूँट न बोले) अस्तसमये भास्करावलोकनं न कुर्यात्। (सूर्यास्त के समय सूर्य को न देखे) कांस्यपात्रे मृन्मयपात्रे भोजनं न कुर्यात्। (काँसी के पात्र और मिट्टी के बर्तन (चीणी) मे भोजन न करे) तांबूलभक्षणं न कुर्यात्। (पान का बीडा न चबाये) अभ्यंगमक्ष्णोरंजनमुपानच्छत्रादर्शं च वर्जयेत् ॥(आखों में काजल न लगाये, जूते धारण न करे, छाता न लगावे और काँच न देखे) इति नियमाः ॥

**आधुनिकः**–अथ क्षारलवण मधुमांसादि निवृत्तिः उद्घृत जलस्नान दण्डकृष्णाजिनधारणम् ।वृक्षारोहण विषम भूमिलंघन–नग्नस्त्रीनिरीक्षण– स्त्रीसम्भोग व्यसनव्यावृत्तिरूपा लघुशंका शौचकाले दक्षिणकर्णे यज्ञोपवीत धारणम् प्रत्यहं संध्योपासना गायत्रीजपश्च ब्रह्मचारिणो नियमाः ॥

खारी चीजें नमक, शहद, मांस शराब बासी रोटी आदि न खाये। किसी का झूँठा न खाना, किसी की हिंसा न करना, झूठ न बोलना, जल को अलग निकालकर स्नान करना । दण्ड और काला मृगचर्म धारण करना । नग्न स्त्री को न देखना, मैथुन और दुर्व्यसनों से अत्यन्त दूर रहना । वृक्ष पर न चढ़ना । ऊँची नीची भूमि पर न कूदना । किसी की बुराई नहीं करना। उदय अस्त सूर्य को नहीं देखना । लघुशंका शौच जाते समय दक्षिणवाम कर्ण में यज्ञोपवीत धारण करना । प्रतिदिन संध्योपासना कर गायत्री की कम से कम २१,११,५, माला तो फेरनी ही चाहिये । ये सब नियम ब्रह्मचारी को करने होंगे॥

**पिता हस्ते जलमादायः**–कृतस्य मम पुत्रस्योपनयनाख्यस्य कर्मणः सांगता सिद्धयर्थं स्मृत्युक्तान् पंचाशत्संख्याकान् ब्राह्मणान् यथासंपन्नेनान्नेनाहं भोजयिष्ये तेन कर्मांगदेवताः प्रीयन्ताम् ॥ यथाशक्त्या उपनयनविधेः परिपूर्णताऽस्तु ॥ अस्तु परिपूर्णता ॥

## ॥ द्वितीय वेदी वेदारंभ संस्कार ॥

आचम्य प्राणानायम्य ॥ सुमुखश्चैकेत्यादि पठित्वा ॥

**संकल्पः**–अद्येत्यादि० अस्य ब्रह्मचारिणः स्वशाखापूर्वकं वेदारंभमहं करिष्ये ॥

**द्वितीय स्थन्डिलोपरि पञ्चभूसंस्कारान् कृत्वाः**– ॐदर्भैः परिसमुह्य ३ गोमयेनोपलिप्य ३ स्रुवेणोल्लिखय ३ अनामिकांऽगुष्ठेनोद्धृत्य ३ उदकेनाऽभ्युक्ष्य । अग्निमुप समाधाय ॥ ॐअग्निन्दूतं पुरोदधे हव्यवाहमुपब्रुवे । देवाँ २॥ आ सादयादिह ॥ अग्निं आवाहयामि स्थापयामि ॥ दक्षिणतो ब्रह्मासनं, उत्तरतः प्रणितासनम्, तत्र ब्रह्मोऽपवेशनम्, यावत् कर्म समाप्यते तावत् त्वं ब्रह्म स्थिरोभव ॥

**पूजनम्**:–ॐ ब्रह्मणे नमः सर्वोपचारार्थे गन्धाक्षत्पुष्पाणि समर्पयामि ॥

ब्रह्मान्वारब्धे स्रुवेण होमः ॥ मनसा ॥(ॐप्रजापतये स्वाहा) इदं प्रजापतये न मम ॥ ॐ इन्द्राय स्वाहा इदं इन्द्राय न मम ॥ ॐ अग्नये स्वाहा इदमग्नये न मम ॥ ॐ सोमाय स्वाहा इदं सोमाय न मम ॥ हस्ते अक्षतान् गृहीत्वा ॥

ॐअग्ने नयसुपथा रायेऽ अस्मान्विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमऽउक्तिं विधेम ॥

**व्रतादेशे समुद्भव नाम्ने वैश्वानराय नमः** ॥ गंधाक्षत पुष्पाणि समर्पयामि ॥

ततः सर्वाश्च वेदाहुतयो होतव्याः ॥ यथा :-

**अथ यजुर्वेदाहुतयः**:-ॐ अन्तरिक्षाय स्वाहा इदं अन्तरिक्षाय न मम। ॐ वायवे स्वाहा इदं वायवे न मम। ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे न मम । ॐछन्दोभ्यः स्वाहा इदं छन्दोभ्यो न मम ॥

**अथ ऋग्वेदाहुतयः**:-ॐपृथिव्यै स्वाहा इदं पृथिव्यै न मम । ॐअग्नये स्वाहा इदमग्नये न मम । ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे न मम । ॐ छन्दोभ्यः स्वाहा इदं छन्दोभ्यो न मम ॥

**अथ सामवेदाहुतयः**:-ॐ दिवे स्वाहा इदं दिवे न मम । ॐ सूर्याय स्वाहा इदं सूर्याय न मम । ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे न मम । ॐ छन्दोभ्यः स्वाहा इदं छन्दोभ्यो न मम ॥

**अथ अर्थवणवेदाहुतयः**:-ॐ दिग्भ्यः स्वाहा इदं दिग्भ्यो न मम । ॐ चन्द्रमसे स्वाहा इदं चन्द्रमसे न मम । ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे न मम । ॐ छन्दोभ्यः स्वाहा इदं छन्दोभ्यो न मम । ॐप्रजापतये स्वाहा इदं प्रजापतये न मम । ॐदेवेभ्यः स्वाहा इदं देवेभ्यो न मम । ॐ ऋषिभ्यः स्वाहा इदं ऋषिभ्यो न मम । ॐश्रद्धायै स्वाहा इदं श्रद्धायै न मम । ॐमेधायै स्वाहा इदं मेधायै न मम । ॐसदसस्पतये स्वाहा इदं सदसस्पतये न मम । ॐअनुमतये स्वाहा इदं अनुमतये न मम ।

**ततो नवाहुतयः**:-

ॐ भूः स्वाहा इदमग्नये न मम ॥१॥ ॐ भुवःस्वाहा इदं वायवे न मम ॥२॥ ॐ स्वः स्वाहा इदं सूर्याय न मम ॥३॥

ॐ त्वन्नोऽ अग्ने व्वरुणस्य विद्वान्देवस्यहेडोऽ अवयासिसीष्ठाः॥ यजिष्ठोवह्नितमः शोशुचानो विश्वा द्वेषाꣳसि प्रमुमुग्ध्यस्मत् स्वाहा॥ इदमग्नीवरुणाभ्यां न मम ॥४॥

ॐ सत्वन्नोऽ अग्ग्नेवमो भवोतीनेदिष्ठोऽ अस्याऽउषसोव्युष्टौ॥ अवयक्ष्वनो वरुणꣳ रराणोव्वीहिमृडीकꣳ सुहवो न एधि स्वाहा॥ इदमग्नीवरुणाभ्यां न मम ॥५॥

ॐ अयाश्चाग्नेस्यनभि शस्तिपाश्चसत्यमित्वमयाअसि ॥ अयानो यज्ञंवहास्ययानोधेहि भेषजꣳ स्वाहा॥ इदमग्नयेअयसे न मम ॥६॥

ॐयेते शतंवरुणं ये सहस्त्रं यज्ञियाः पाशाविततामहान्तः॥ तेभिर्न्नोऽअद्यसवितोत

विष्णुर्विश्वेमुञ्चतु मरुतः स्वर्काः स्वाहा ॥ इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भयः स्वर्केभ्यश्च न मम ॥७॥

ॐ उदुत्तमंवरुण पाशमस्मदवाधमं व्विमद्ध्यमꣳश्रथाय॥ अथावयमादित्त्यव्रते तवानागसोऽ अदितयेस्याम स्वाहा॥ इदं वरुणायादितये न मम ॥८॥

ॐप्रजापतये स्वाहा इदं प्रजापतये न मम ॥९॥

ॐअग्नये स्विष्टकृते स्वाहा इदं अग्नये स्विष्टकृते न मम॥ संस्त्रवप्राशनम्॥ पवित्राभ्यां मार्जनम्। अग्नौ पवित्रप्रतिपत्तिः॥ **ब्रह्मणे पूर्णपात्रदानम्**॥ कृतस्य वेदारंभसाङ्गता सिद्धयर्थं ब्रह्मन् इदं पूर्णपात्रं तुभ्यमहं सम्प्रददे॥ **पश्चिमे प्रणीताविमोकः तज्जलेन मार्जनम्**॥ आपः शिवाः शिवतमाः शान्ताः शान्ततमास्तास्ते कृण्वन्तु भेषजम्॥ कृतस्य वेदारंभकर्मणः साङ्गतासिद्धयर्थं यथासंख्याकान् ब्राह्मणान् यथाकाले यथासंपन्नेनान्नेनाहं भोजयिष्ये तेन कर्मांग देवताः प्रीयन्ताम् न मम॥

## ॥ ततः काशी गमनम् ॥

ततः शिष्टाचारात् वेदसरस्वती पूजनम् ॥

**संकल्पः**–अद्येत्यादि० तिथौ ब्रह्मवर्चससिद्ध्यर्थं वेदसरस्वती पूजनमहं करिष्ये ॥

ॐव्वेदोसियेन त्वन्देवव्वेद देवेभ्यो व्वेदोभवस्तेनमह्यं व्वेदोभयाः॥ ॐ पावकानः सरस्वती व्वाजेभिर्व्वाजिनीवती । यज्ञंव्वष्टुधियावसुः । ॐ भूर्भुवः स्वः भगवते वेदनारायणाय नमः तथाच भगवतीमहासरस्वत्यै नमः इति पञ्चोपचारैः सम्पूज्य ॥

**अंजलौ पुष्पाण्यादाय** ॥ शुक्लां ब्रह्मविचारसार परमामाद्यां जगद्व्यापिनीं, वीणा पुस्तक धारिणीमभयदां जाड्यांधकारापहाम् ॥ हस्ते स्फाटिक मालिकां विदधतीं पद्मासने संस्थितां, वंदे तां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम् ॥१॥ ॐ भूर्भुवः स्वः भगवत्यै महासरस्वत्यै नमः प्रार्थनां समर्पयामि ॥ अनया पूजया वेदसरस्वत्यौ प्रीयेतां न मम ॥

**ततो यजुर्वेदादिमारभेत्**:–श्री गणेशाय नमः॥ ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो योनः प्रचोदयात् ॥ ॐ इषेत्वोर्ज्जेत्वा वायवस्थदेवोवः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणऽ आप्यायध्वमघ्न्याऽ इन्द्रायभागं प्रजावतीरनमीवाऽ अयक्ष्मामावस्तेन ईशतमाघशꣳसो ध्रुवाऽ अस्मिन् गोपतौ स्यात बह्वीर्यजमानस्य पशून्पाहि ॥ ॐस्वस्ति ॥ **यजुर्वेदाय नमः** ॥ ॐ अग्निमीले पुरोहितं यज्ञस्य देवमृत्विजम् ॥ होतारं रत्नधातमम् ॥ ॐ स्वस्ति ॥ **ऋग्वेदाय नमः** ॥

ॐअग्नऽ आयाहि वीतये गृणानो हव्यदातये । निहोता सत्सि बर्हिषि ॥ॐ स्वस्ति ॥ **सामवेदाय नमः** ॥ ॐ शन्नो देवीरभिष्टय आपो भवन्तुपीतये । शँय्योरभिस्रवंतुनः ॥ ॐ स्वस्ति ॥ **अथर्वणवेदाय नमः** ॥ **एवं वेदाध्ययनं कृत्वा संकल्पयेत्** ॥

कृतस्य वेदारम्भाख्यास्य कर्मणः साङ्गतासिद्ध्यर्थं यथाशक्ति ब्राह्मणान् भोजयिष्ये तेन श्रीकर्माङ्गदेवता प्रीयतां न मम । वेदारम्भविधेः परिपूर्णतास्तु । अस्तु परिपूर्णता ॥

## ॥ तृतीय वेदी समावर्तन संस्कार प्रयोगः ॥

आचम्य प्राणानायम्य ॥ सुमुखश्चैकेत्यादि पठित्वा ॥

**संकल्पः**–अद्येत्यादि० अस्य ब्रह्मचारिणः पश्चाद् गृहस्थाश्रमप्राप्ति द्वारा श्री परमेश्वर प्रीत्यर्थं समावर्तनाख्यं कर्म करिष्ये ॥

भो आचार्य अहं स्नास्यामि इति ब्रह्मचारिणः प्रश्नः ॥

स्नाहीति गुरुः ॥ पूर्ववदुपसंगृह्य गुरुम् ॥

**तृतीय स्थन्डिलोपरि पञ्चभूसंस्कारान् कृत्वा**:– ॐदर्भैः परिसमुह्य ३ गोमयेनोपलिप्य ३ स्रुवेणोल्लिख्य ३ अनामिकांऽगुष्ठेनोद्धृत्य ३ उदकेनाऽभ्युक्ष्य । अग्निमुप समाधाय ॥ ॐअग्निन्दूतं पुरोदधे हव्यवाहमुपब्रुवे । देवाँ २॥ आ सादयादिह ॥ अग्निं आवाहयामि स्थापयामि ॥ दक्षिणतो ब्रह्मासनं, उत्तरतः प्रणितासनम्, तत्र ब्रह्मोऽपवेशनम्, यावत् कर्म समाप्यते तावत् त्वं ब्रह्म स्थिरोभव ॥

**पूजनम्**:–ॐ ब्रह्मणे नमः सर्वोपचारार्थे गन्धाक्षत्पुष्पाणि समर्पयामि ॥

ब्रह्मान्वारब्धः । स्रुवेण होमः ॥ मनसा ॥(ॐप्रजापतये स्वाहा) इदं प्रजापतये न मम ॥ ॐ इन्द्राय स्वाहा इदं इन्द्राय न मम ॥ ॐ अग्नये स्वाहा इदमग्नये न मम ॥ ॐ सोमाय स्वाहा इदं सोमाय न मम ॥ हस्ते अक्षतान् गृहीत्वा ॥

ॐअग्ने नयसुपथा रायेऽ अस्मान्विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमऽउक्तिं विधेम ॥

**व्रतविसर्गे सूर्य नाम्ने वैश्वानराय नमः** ॥ गंधाक्षत पुष्पाणि समर्पयामि ॥ इति संम्पूज्य

ततः सर्वाश्च वेदाहुतयो होतव्याः ॥ यथा :–

**अथ ऋग्वेदाहुतयः**-ॐ अन्तरिक्षाय स्वाहा इदं अन्तरिक्षाय न मम । ॐ वायवे स्वाहा इदं वायवे न मम । ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे न मम । ॐछन्दोभ्यः स्वाहा इदं छन्दोभ्यो न मम ॥

**अथ यजुर्वेदाहुतयः**-ॐपृथिव्यै स्वाहा इदं पृथिव्यै न मम । ॐअग्नये स्वाहा इदमग्नये न मम । ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे न मम । ॐ छन्दोभ्यः स्वाहा इदं छन्दोभ्यो न मम ॥

**अथ सामवेदाहुतयः**-ॐ दिवे स्वाहा इदं दिवे न मम । ॐ सूर्याय स्वाहा इदं सूर्याय न मम । ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे न मम । ॐ छन्दोभ्यः स्वाहा इदं छन्दोभ्यो न मम ॥

**अथ अर्थवणवेदाहुतयः**-ॐ दिग्भ्यः स्वाहा इदं दिग्भ्यो न मम । ॐ चन्द्रमसे स्वाहा इदं चन्द्रमसे न मम । ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे न मम । ॐ छन्दोभ्यः स्वाहा इदं छन्दोभ्यो न मम । ॐप्रजापतये स्वाहा इदं प्रजापतये न मम । ॐदेवेभ्यः स्वाहा इदं देवेभ्यो न मम । ॐ ऋषिभ्यः स्वाहा इदं ऋषिभ्यो न मम । ॐश्रद्धायै स्वाहा इदं श्रद्धायै न मम । ॐमेधायै स्वाहा इदं मेधायै न मम । ॐसदसस्पतये स्वाहा इदं सदसस्पतये न मम । ॐअनुमतये स्वाहा इदं अनुमतये न मम ।

**ततो नवाहुतयः**-

ॐ भूः स्वाहा इदमग्नये न मम ॥१॥ ॐ भुवःस्वाहा इदं वायवे न मम ॥२॥ ॐ स्वः स्वाहा इदं सूर्याय न मम ॥३॥

ॐ त्वन्नोऽ अग्ने व्वरुणस्य विद्वान्देवस्यहेडोऽ अवयासिसीष्ठाः ॥ यजिष्ठोवह्नितमः शोशुचानो विश्वा द्वेषाꣳसि प्रमुमुग्ध्यस्मत् स्वाहा ॥ इदमग्नीवरुणाभ्यां न मम ॥४॥

ॐ सत्वन्नोऽ अग्नेवमो भवोतीनेदिष्ठोऽ अस्याऽउषसोव्युष्टौ ॥ अवयक्ष्वनो वरुणꣳ रराणोव्वीहिमृडीकꣳ सुहवो न एधि स्वाहा ॥ इदमग्नीवरुणाभ्यां न मम ॥५॥

ॐ अयाश्चाग्रेस्यनभि शस्तिपाश्चसत्यमित्वमयाअसि ॥ अयानो यज्ञंवहास्ययानोधेहि भेषजथ्ठं स्वाहा ॥ इदमग्नयेअयसे न मम ॥६॥

ॐयेते शतंवरुणं येसहस्रं यज्ञिया: पाशावितताम‌हान्त: ॥ तेभिर्न्नोऽअद्यसवितोत विष्णुर्विश्वेमुञ्चतु मरुत: स्वर्का: स्वाहा॥ इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भय: स्वर्केभ्यश्च न मम ॥७॥

ॐ उदुत्तमंवरुण पाशमस्मदवाधमं व्विमद्ध्यमथ्ठंश्रथाय ॥ अथावयमादित्त्यव्रते तवानागसोऽ अदितयेस्याम स्वाहा ॥ इदं वरुणायादितये न मम ॥८॥

ॐप्रजापतये स्वाहा इदं प्रजापतये न मम ॥९॥

ॐअग्नये स्विष्टकृते स्वाहा इदं अग्नये स्विष्टकृते न मम ॥ संस्रवप्राशनम् ॥ पवित्राभ्यां मार्जनम् । अग्नौ पवित्रप्रतिपत्ति: ॥ **ब्रह्मणे पूर्णपात्रदानम्** ॥ कृतस्य समावर्तनाख्यस्य कर्मण: साङ्गतासिद्धयर्थं ब्रह्मन् इदं पूर्णपात्रं सदक्षिणाकं तुभ्यमहं सम्प्रददे ॥

पश्चिमे प्रणीताविमोक: तज्जलेन मार्जनम् :-

आप: शिवा: शिवतमा: शान्ता: शान्ततमास्तास्ते कृण्वन्तु भेषजम् ॥

(पुन: बटुक द्वारा घी में डुबोकर पाँच छाँणा रा टुकडा होमावें)

अत्र पूर्ववदग्ने: सन्धुक्षणं पञ्चभिर्मन्त्रैरिन्धन प्रक्षेपणम् ॥ तद्यथा:-

पाणिनाऽग्निं परिसमूहति

**विनियोग**:-अग्ने सुश्रवादीनां ब्रह्माऋषि: यजुश्छन्द: अग्निर्देवता संधुक्षणे विनियोग: ॥

१-ॐ अग्ने सुश्रव: सुश्रव संमाकुरु ॥१॥ (स्वाहा)

२-ॐ यथात्वमग्ने सुश्रव: सुश्रवाऽअसि ॥२॥ (स्वाहा)

३-ॐएवंमाथ्ठं सुश्रव: सौश्रवसंकुरु ॥३॥ (स्वाहा)

४-ॐयथात्वमग्ने देवानां यज्ञस्य निधिपाऽअसि ॥४॥ (स्वाहा)

५-ॐएवमहं मनुष्याणां वेदस्यनिधिपोभूयासम् ॥५॥ (स्वाहा)

(बटुक को खड़ा कर समिधा देवें बटुक अग्नि की प्रदक्षिणा करें)
(और इसी मंत्र से तीन समिधा एक एक करके अग्नि के अर्पण करावें)
विनियोग:–अग्ने समिधमिति प्रजापतिर्ऋषि: आकृतिच्छंद: सविता देवता समिदाधाने विनियोग: ॥
ॐअग्ने समिध माहार्षम्बृहते जातवेदसे ॥ यथात्वमग्ने समिधा समिध्यसऽ एवमहमायुषा मेधयावर्च्चसा प्रजयापशुभि र्ब्रह्मवर्चसेन समिधे जीवपुत्रोममाचार्यो मेधाव्यहमसान्यनिरा करिष्णु र्यशस्वी तेजस्वी ब्रह्मवर्चस्यन्नादो भूयासᳬं स्वाहा ॥
**इत्यनेन मंत्रेण प्रथमां तथा द्वितीयां तथैव तृतीयां जुहुयात्** ॥
तत उपविश्य पुन: ॥
(पुन: बटुक द्वारा घी में डुबोकर पाँच छाँणा रा टुकडा होमावें)
अत्र पूर्ववदग्ने: सन्धुक्षणं पञ्चभिर्मन्त्रैरिन्धन प्रक्षेपणम् ॥ तद्यथा:–
पाणिनाऽग्निं परिसमूहति
**विनियोग:**–अग्ने सुश्रवादीनां ब्रह्माऋषि: यजूश्छन्द: अग्निर्देवता संधुक्षणे विनियोग: ॥
१–ॐ अग्ने सुश्रव: सुश्रव संमाकुरु ॥१॥ (स्वाहा)
२–ॐ यथात्वमग्ने सुश्रव: सुश्रवाऽअसि ॥२॥ (स्वाहा)
३–ॐएवंमाᳬं सुश्रव: सौश्रवसंकुरु ॥३॥ (स्वाहा)
४–ॐयथात्वमग्ने देवानां यज्ञस्य निधिपाऽअसि ॥४॥ (स्वाहा)
५–ॐएवमहं मनुष्याणां वेदस्यनिधिपोभूयासम् ॥५॥ (स्वाहा)
(बटुक अपने दोंनो हाथों को अग्नि में तपाकर प्रत्येक मंत्र के अन्त में मुँहपर लगावें)
तत: अग्नेपर्युक्षणम् । पाणी प्रतप्य मुखं विमृष्टयेत् ॥
**विनियोग:**–तनूपाअग्नेइत्यादि सप्तमंत्राणां बृहदेवा ऋषय: यजुᳬंषि छन्दांसि अग्निर्देवता मुखविमर्शने विनियोग: ॥
१–ॐ तनूपाऽअग्नेसि तन्वम्मेपाहि ॥१॥ (~~स्वाहा~~)
२–ॐआयुर्दाऽ अग्नेस्यायुर्मे देहि ॥२॥ (~~स्वाहा~~)

३–ॐवर्चोदाऽ अग्नेसिवर्चोमे देहि ॥३॥ (स्वाहा)
४–ॐअग्नेयन्मे तन्वाऽ ऊनन्तन्मऽ आपृण ॥४॥ (स्वाहा)
५–ॐमेधाम्मेदेव: सविताऽ आदधातु ॥५॥ (स्वाहा)
६–ॐमेधाम्मे देवी सरस्वतीऽ आदधातु ॥६॥ (स्वाहा)
७–ॐ मेधामश्विनौ देवा वाधत्तां पुष्करस्रजौ ॥७॥ इत्येते मुखविमर्शन मंत्रा: ॥

**अत्रावसरे भस्म धारणम्** ॥

**विनियोग:**–त्र्यायुषमिति नारायण ऋषि: उष्णिक् छन्द: अग्निर्देवता भस्मना तिलककरणे विनियोग: ॥

**मंत्र:**–ॐत्र्यायुषं जमदग्नेरिति ललाटे॥ ॐकश्यपस्य त्र्यायुषमिति ग्रीवायाम् ॥ ॐयद्देवेषुत्र्यायुषमिति स्कन्धे ॥ ॐ तन्नोऽ अस्तुत्र्यायुषमिति हृदि ॥

ततः आचार्य परिश्रितस्योत्तरत: भूयसीत्यादिना कमेण अष्टानामुदकुम्भानां दक्षिणोत्तरागतानां स्थापनं कुर्यात् ॥
(अथ: ताम्रस्य अष्ट कुम्भ दक्षिण से उत्तर की तरफ स्थापित करें)॥

**१–अथ कलश स्थापन मंत्र:**–ॐभूरसि भूमिरस्य दितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री ॥ पृथिवीयच्छ पृथिवीन्द्र ठं ह पृथिवीम्माहिर्ठ सी: ॥ **इति भूमिं स्पृष्ट्वा** ॥ २–ॐधान्यमसि धिनुहि देवान् प्राणाय त्वोदानाय त्वा व्यानाय त्वा । दीर्घामनु प्रसितिमायुषे धां देवो व: सविता हिरण्यपाणि: प्रतिगृभ्णात्वच्छिद्रेण पाणिना चक्षुषे त्वा महीनां पयोसि ॥ **इति यवान्निक्षिप्य** ॥

३–ॐआजिघ्र कलशं मह्या त्वा व्विशंत्विन्दव: । पुनरुर्ज्जा निवर्त्तस्व सा न: सहस्त्रं धुक्ष्वोरुधारा पयस्वती पुनर्म्माऽ ऽविशताद्रयि: ॥ **इति कुम्भं संस्थाप्य** ॥

४–ॐवरुणस्योत्तं भनमसि व्वरुणस्यस्कं भसर्जनीस्त्थो व्वरुणस्यऋत सदन्यसि व्वरुणऋतसदनमसि व्वरुणस्य ऋत सदनमासीद ॥ **इति जलं प्रपूर्य** ॥

५–ॐत्वां गन्धर्वाऽ अखनँस्त्वामिन्द्रस्त्वां बृहस्पतिः। त्वामोषधे सोमो राजा विद्वान् यक्ष्मा दमुच्यत ॥ **इति गन्धम् ॥**

६–ॐयाऽओषधीः पूर्वाजाता देवेभ्यस्त्रियुगं पुरा। मनै नु बभ्रूणामह छं शतं धामानि सप्त च ॥ **इति सर्वोषधी प्रक्षेपः ॥**

७–ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि ॥ एवानो दूर्वे प्रतनुसहस्रेण शतेन च ॥ **इति दूर्वाः ॥**

८–ॐ अश्वत्थे वो निषदनं पर्णे वो व्वसतिष्कृता। गोभाजऽइत्किला सथयत्त्सनवथ पूरुषम् ॥ **इति पंचपल्लवान् ॥**

९–स्योना पृथिविनो भवानृक्षरा निवेशनी। यच्छा नः शर्म सप्रथाः ॥ **इति मृत्तिकाप्रक्षेपः ॥**

१०–ॐ याः फलिनीर्या ऽअफलाऽ अपुष्पायाश्च पुष्पिणीः। बृहस्पति प्रसूतास्तानो मुंचन्त्वᳪ हसः ॥ **इति पूगीफलम् प्रक्षेपः ॥**

११–ॐ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत। स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥ **इति हिरण्यम् ॥**

१२–ॐपरिवाजपतिः कविरग्निर्हव्या न्यक्रमीत्। दधद्रत्नानि दाशुषे ॥ **इति पंचरत्नानि प्रक्षेपः ॥**

१३–ॐ सुजातो ज्योतिषा सहशर्म व्वरूथमासदत्स्वः। वासो अग्रे विश्वरूपछं संव्ययस्व विभावसो ॥ **इति मंत्रेण सूत्रवेष्टनम् ॥**

१४–ॐ पूर्णा दर्वि परा पत सुपूर्णा पुनरा पत ॥ व्वस्ने वव्विक्रीणा वहाऽइषमूर्ज ठं शतक्रतो ॥ **इति तण्डुल पूर्णपात्रम् निधाय ॥**

**प्रतिष्ठाः**–ॐमनो जूतिर्ज्जुषतामाज्यस्य बृहस्पतिर्य्यज्ञमिमन्तनोत्वरिष्टं यज्ञ ठँ समिमन्दधातु। विश्वे देवासऽइह मादयन्तामो ३ँ म्प्रतिष्ठ ॥ **इति मंत्रेण प्रतिष्ठा कार्या ॥**

ॐउदकुंभाधिष्ठातृदेवताः सुप्रतिष्ठा वरदा भवन्तुः ॥ ॐउदकुंभाधिष्ठातृदेवताभ्यो नमः सर्वोपचारार्थे गंधाक्षत पुष्पाणि समर्पयामि ॥ **इति गंधादिपञ्चोपचारैः पूजनं कुर्यात् ॥**

ॐ तदस्तुमित्रा वरुणा तदग्ने शँय्यो रस्मभ्यमिदमस्तु शस्तम्। अशीमहिगा धमुत प्रतिष्ठान्नमो दिवे बृहते सादनाय ॥ इति मन्त्रेण प्रतिष्ठा पूजनं परिपूर्णतामस्तु ॥

(तत् पश्चात् निम्न मंत्रेणानुसार बालक पर कलशों के जल से मार्जन करे)

१–**प्रथम कलशः**–ॐ येऽअप्स्वन्तरग्नयः प्रविष्टागोह्यऽ उपगोह्योमयूषोमनो हास्खलो विरुजस्तनूदूषुरिंद्रियहातान्विजहामि यो रोचनस्तमिह गृह्णामि ॥ इतिमंत्रेण प्रथमकलशादुदकं गृहीत्वा तेनोदकेन ॥ ॐतेनमामभिषिञ्चामिश्रियै यशसेब्रह्मणे ब्रह्मवर्चसाय ॥

२–**द्वितीय कलशः**–येन श्रियमकृणुतां येनावमृशताꣳ सुराम् । येनाक्ष्यावभ्यषिंचतांयद्वांत दश्विनायशः ॥

३–**तृतीय कलशः**–ॐआपोहिष्ठा मयो भुवस्तान ऊर्जे दधातन । महेरणाय चक्षसे ॥

४–**चतुर्थ कलशः**–ॐयो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥

5–**पञ्चम कलशः**–ॐतस्माऽअरङ्गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥

6–**षष्ठ कलशः**–ॐउदुत्तमंवरुण पाशमस्मदवाधमं व्विमद्‌ध्य मथ्ꣳश्रथाय ॥ अथावयमा दित्त्यव्रते तवानागसोऽ अदितये स्याम॥

७–**सप्तम कलशः**–ॐउदुत्तमंवरुण पाशमस्मदवाधमं व्विमद्‌ध्य मथ्ꣳश्रथाय ॥ अथावयमा दित्त्यव्रते तवानागसोऽ अदितये स्याम ॥

८–**अष्टम कलशः**– तूष्णीधारेण (ॐउदुत्तमंवरुण) धीरे धीरे बोलकर स्नान करावें तथा मेखला छोडें व दण्ड रख देवें

(ॐवासोन्यत परिधादिस मुपतिष्ठते) नये वस्त्र धारण करें तथा सूर्य प्रार्थना करें:-

ॐउद्यन्भ्राजभृष्णुरिन्द्रो मरुद्भिरस्थात्प्रातर्याविभिरस्था द्दशसनिरसि दशसनिंमा कुर्वाविदन्मा गमयोद्यन्भ्राजभृष्णुरिन्द्रो मरुद्भिरस्था द्दिवायावभिरस्थाच्छत सनिरसिशात सनिंमाकुर्वा विदन्मागममयोद्यन्भ्राजभृष्णुरिन्द्रो मरुद्भिरस्थात्सा यंयावभिरस्थात्सहस्त्रसनिरसिसहस्त्र सनिंमाकुवाविदन्मागमयेति ॥

ततस्तुष्णीं दधि तिलान्वा प्राश्य

अत: दधि तिलान्न प्राशनम् तथा जटा लिरावें:-(ॐ जटान् लोमानषाँ च ठं हस:) जटा लोमनखान्संहृत्य ॥

(दही तिल खाकर आचमन करें फिर गूलर की दांतून करें)

**औदुम्बरेण काष्ठेन दन्तान् धावयेत्:-**

**विनियोग:**-अन्नाद्येति मन्त्रस्य अथर्वण ऋषि: अनुष्टुप्छन्द: सोमो देवता दन्तधावने विनियोग: ॥

ॐअन्नाद्यायव्यूहध्व ᳪ सोमोराजायमागमत् । समेमुखंप्रमाक्ष्यंते यशसा च भगेन च ॥

**ततो दन्तकाष्ठं परित्यज्य** ॥ आचम्य ॥ तत उदकेन मुखशोधनम् ॥ स्नानं कृत्वा गन्ध लेपनम्:-ॐप्राणापानौ मे तर्पय ॥ ( नाक के लगावे) चक्षुर्मे तर्पय ॥(नेत्रों के लगाये) श्रोत्रम्मे तर्पय ॥ (कानों के लगायें)

तत: पाण्योरवनेजनं कृत्वा तदुदकमादाय ॥ अपसव्यं कृत्वा ॥ दक्षिणाभिमुखो भूत्वा तदुदकं दक्षिणस्यां दिशि निनयेत् ॥

(इसके बाद पितरों का तर्पण करे दक्षिण दिशा की और मुख करके अपसव्य होकर अँजली ले अंगूठे के नीचे से जल छोड़े ॥)

यथा:-

**विनियोगः**–ॐ पितरः शुन्धध्वमिति प्रजापतिर्ऋषिः यजुश्छन्दः अश्वीन्द्रासरस्वती देवताः पाण्यावनेजनस्य दक्षिणस्यां दिशि निषेके विनियोगः ॥

मंत्रः–ॐ पितरः शुन्धध्वमिति पितरः शुन्धध्वम् । सव्यम् ॥ उदकस्पर्शः

**ततः पूर्ववत् द्वितीय यज्ञोपवीतधारणं कुर्यात्** ॥

(बालक को द्वितीय यज्ञोपवीत धारण करवायें)

**विनियोगः**–यज्ञोपवीतमिति मंत्रस्य परमेष्ठी ऋषिः त्रिष्टुप्छन्दः लिंगोक्ता देवता श्रौतस्मार्त कर्मानुष्ठान सिद्ध्यर्थे यज्ञोपवीत धारणे विनियोगः ॥

ॐयज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् ॥ आयुष्यमग्र्यं प्रतिमुञ्चशुभ्रं यज्ञोपवीतं बलमस्तुतेजः ॥ यज्ञोपवीत मसि यज्ञस्यत्वा यज्ञोपवीतेनो पनंह्यामि ॥ इति मंत्रं पठित्वा दक्षिणबाहुमुद्धृत्य वामस्कंधे यज्ञोपवीतं धारयेत् ॥ **आचमनम्**॥ बालक को सुन्दर वस्त्र पहनावें ॥ पुष्पमाला पहनाये ॥ सुवर्ण कुण्डल धारण करवाये ॥

**नवीनवस्त्रधारणम्**:–ॐ युवा सुवासाः परिवीत आगात्स उ श्रेयान्भवति जायमानः । तं धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्तः ॥

**सुवर्ण कुण्डल धारणम्**:–ॐ अलङ्करणमसि भूयोलङ्करणम्भूयात् । पुनर्वामिकर्णे च ॥

ततो वृत्रस्येत्यक्षिणी अञ्जेत् (प्रथमं दक्षिणं ततो वाममनेनैव मन्त्रेण)

(मामी जी बालक के काजल लगायें पहले दक्षिण नेत्र में फिर वाम नेत्र में) यथाः–

**कज्जल धारण विनियोगः**–वृत्रस्येति मंत्रस्य प्रजापतिर्ऋषिः गायत्रीछन्दः अञ्जनो देवता चक्षुरञ्जने विनियोगः ॥

मंत्रः–ॐवृत्रस्यासिकनीनकश्चक्षुर्दाऽ असिचक्षुर्मे देहि ॥ ततो रोचिष्णुरसि ॥ आदर्शे आत्मानं दर्शयेत् ॥ (काँच देखे)

संस्रवप्राशनम् ॥ पवित्राभ्यां मार्जनम् अग्नौ पवित्रप्रतिपत्तिः ॥ **ब्रह्मणे पूर्णपात्रदानम्** ॥ कृतस्य समावर्तनाख्यस्य कर्मणः साङ्गता सिद्ध्यर्थं ब्रह्मन् इदं पूर्णपात्रं तुभ्यमहं सम्प्रददे ॥ **पश्चिमे प्रणीताविमोकः तज्जलेन मार्जनम्** :– आपः शिवाः शिवतमाः शान्ताः शान्ततमास्तास्ते कृण्वन्तु भेषजम् ॥ **कृतस्य** समावर्तनाख्यस्य कर्मणः साङ्गतासिद्ध्यर्थं यथासंख्याकान् ब्राह्मणान् बटुकान् कुमारिकाः सुवासिनीश्च यथाकाले यथासंपन्नेनान्नेनाहं भोजयिष्ये तेन कर्मांग देवताः प्रीयन्ताम् न मम ॥

**कृतस्य** समावर्तनाख्यस्य कर्मणः साङ्गतासिद्ध्यर्थं नानागोत्रेभ्यो ब्राह्मणेभ्यो यथोत्साहं भूयसीं दक्षिणां दातुमहमुत्सृजे तेन श्री कर्मांग देवताः प्रीयन्ताम् न मम ॥

**तत आचार्यादीन् गंधवस्त्रादिना संपूज्य तेभ्यश्च दक्षिणां दत्वा तेषामाशिषो गृह्णीयात्**

**आशीर्वादः**–ॐशतञ्जीवशरदो वर्द्धमानः शतंहेमन्ताच्छत मुवसन्तान् ॥ शतमिन्द्राग्निसविता बृहस्पतिः शतायुषा हविषेमं पुनर्दुः ॥ ॐ शतमिन्नुशरदो अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम् । पुत्रासो यत्र पितरो भवन्ति मा नो मध्यारीरिषतायुर्गन्तोः ॥ॐ विश्वानिदेव सवितर्दुरितानि परासुव ॥ यद्भद्रन्तन्नऽआसुव ॥

॥ इति समावर्तन संस्कार प्रयोगः ॥

## अथ गृहवास्तु पूजनम् ॥

आचम्य प्राणानायम्य शान्तिसूक्तं पठेत्॥ ततः सुमुखश्चेत्यादि पठित्वा ॥

**संकल्पः**–अद्येत्यादि० मम सर्वापच्छान्ति पूर्वकं दीर्घायुर्विपुल

धनधान्य पुत्रपौत्राद्यनवच्छिन्नसन्तति वृद्धि स्थिरलक्ष्मी कीर्तिलाभ शत्रुपराजय सदभीष्ट सिद्धयर्थं भवनदोषपरिहारार्थं नानाविध जीवहिंसादिजन्य सकलदोष परिहारपूर्वक सर्वारिष्टोप शान्त्यर्थम् अस्मिन्गृहे चिरकालनिवासार्थं श्रीपरमेश्वर प्रीतये सग्रहमखां शालाकर्मपूर्विकां वास्तुशान्तिं करिष्ये ॥ तदंगतया दिग्रक्षणं कलशाराधनं गणपतिपूजनं पुण्याहवाचनं मातृकापूजनं वसोर्द्धारायुष्यमंत्रजपं नान्दीश्राद्धं ब्रह्माचार्यऋत्विग वरणं च करिष्ये ॥

(यजमान गृहद्वार पर वर्धनीकलश व देहली इत्यादि पूजन करें, शुभ लाभ इत्यादि लिखे)

**गृह-द्वारपरः**-ततः सपत्निको यजमानो वर्धनीकलशं गृहीत्वा गृहाद्बहिर्निष्क्रम्य द्वारदेवतानां पूजनं कुर्यात् ॥ इति संकल्प्य तानि ग्रहशान्तिवत् कुर्यात् ॥

**अक्षतपुष्पाणि गृहीत्वाः-पूर्वद्वारे**-ग्रामणीपीठे ॐपक्षीन्द्राय नमः । **दक्षिणेः**-ॐचण्डाय नमः । **वामेः**-ॐप्रचण्डाय नमः । **ऊर्ध्वंः**-ॐद्वारश्रियै नमः ।

**देहल्यां द्वारपीठस्यमध्येः**-ॐवास्तुपुरुषाय नमः । **दक्षिणशाखायांः**-ॐगंगायै नमः ।

**वामशाखायांः**-ॐयमुनायै नमः । **दक्षिणेः**-ॐशंखनिधये नमः । **वामेः**-पद्मनिधये नमः । **द्वारस्यऊर्ध्वंः**-आग्नेय्यां-गणपतये नमः । **अधःः**- नैर्ऋत्यां दुर्गायै नमः । **अधःः- वायव्यांः**- सरस्वत्यै नमः । **ऊर्ध्वम्ः**-ईशान्यां क्षेत्रपालाय नमः । द्वारश्रियाद्यावाहित देवताभ्यो नमः । सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि । **तोरणाय नमः** । सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि ।

**ततो यजमान आचार्यं पृच्छेत् । ब्रह्मन् प्रविशामि । आचार्येण प्रविशस्व इत्युक्तेः-**

ॐ ऋचं वाचं प्रपद्ये इत्युक्वा **शान्तिसूक्तं पठित्वा** ॥ दक्षिणपादपुरः

सरं स्वदक्षिणस्कन्धेन द्वारवामशाखां च देहलिं स्पृशन् गृहान्तः प्रविश्य वर्द्धनीकलशमैशान्यां स्थापयेत् ॥

## ।। नैर्ऋत्यकोणे वास्तुदेवतास्थापनम् ॥

तत्रादौ वास्तुपीठे श्वेतवस्त्रं प्रसार्य तदुपरि तंदुलैरेकाशीतिपदं वास्तुमंडलं कृत्वा **हस्तेजलमादायः**–अद्येत्यादि० प्रारब्धस्य कर्मणः सांगतासिद्ध्यर्थं वास्तुमंडले देवतास्थापनं पूजनं चाहं करिष्ये ॥ **तत्रादौ** वास्तुपीठस्य आग्नेयादिकोणेषु चतुरः शंकून् रोपयेत् ॥

१–ॐ विशन्तु भूतले नागा लोकपालाश्च सर्वतः ।
अस्मिन् गृहेऽवतिष्ठन्तामायुर्बल कराः सदा ॥

इति **मंत्रेण शंकुम् रोपयेत्** ॥

अनेनैव मंत्रेण **द्विगुणीकृतसूत्रेण** सर्वेषां वेष्टनं कुर्यात् ॥

आग्नेयादि कोणेषु क्रमेण शंकुपार्श्वे माषभक्त दध्योदनबलिं दद्यात्।

तत्र मंत्राः :–

**१–अग्निकोणे :**–ॐअग्निभ्योऽप्यथ सर्पेभ्यो ये चान्ये तान्समाश्रिताः। बलिं तेभ्यः प्रयच्छामि पुण्यमोदन मुत्तमम् ॥ अग्नये नमः इमं बलिं समर्पयामि ॥

**२–नैर्ऋत्य कोणेः**–ॐनैर्ऋत्याधि पतिश्चैव नैर्ऋत्यां ये च राक्षसाः। बलिं तेभ्यः प्रयच्छामि पुण्य मोदन मुत्तमम् ॥ नैर्ऋतये नमः इमं बलिं समर्पयामि ॥

**३–वायव्य कोणे** :–ॐ नमो वै वायु रक्षेभ्यो ये चान्ये तान्समाश्रिताः। बलिं तेभ्यः प्रयच्छामि पुण्य मोदन मुत्तमम् ॥ वायवे नमः इमं बलिं समर्पयामि ॥

**४–ईशान कोणेः**–ॐरुद्रेभ्यश्चैव सर्पेभ्यो ये चान्ये तान्समाश्रिताः बलिं तेभ्यः प्रयच्छामि पुण्य मोदन मुत्तमम् ॥ ईशानाय नमः इमं बलिं समर्पयामि ॥

(ततो वेद्युपरि प्रसारितवस्त्रे कुंकुमादि सुवर्णरजतादि शलाकया नाममंत्रै:॥)

**१–रेखा–करणम्:**–पश्चादारभ्य: प्रागन्ता च उकद्संस्था: समा अंगुलद्वयान्तरा गृह वास्तुत्वादेकाशीति पदमण्डले दश रेखा: कुर्यात् ॥

**रेखादेवता: स्थापयेत्:**–शान्तायै नम: । यशोवत्यै नम: । कान्त्यै नम: । विशालायै नम: । प्राणवाहिन्यै नम: । सत्यै नम: । सुमत्यै नम: । नन्दायै नम: । सुभद्रायै नम: । सुरथायै नम: ।

**२–रेखा–करणम्:**–तथैव दक्षिणारंभा उदगन्ता: प्राक्संस्था: दश रेखा: कुर्यात् ।

**रेखादेवता: स्थापयेत्:**–हिरण्यायै नम: । सुव्रतायै नम: । लक्ष्म्यै नम: । विभूत्यै नम: । विमलायै नम: । प्रियायै नम: । जयायै नम: । ज्वालायै नम: । विशोकायै नम: । इडायै नम: ।

**प्रतिष्ठा:**–ॐमनो जूतिर्ज्जुषतामाज्ज्यस्य बृहस्पति र्य्यज्ञमिमन्तनोत्वरिष्टं यज्ञ ठँ समिमन्दधातु । विश्वे देवासऽइह मादयन्तामों ३ँ म्प्रतिष्ठ ॥ रेखादेवताभ्यो नम: ॥ सर्वोपचारार्थे गंधाक्षत पुष्पाणि समर्पयामि ॥

## अथ एकाशीतिपदवास्तुमण्डल देवतास्थापनम् ॥

**१–ऐशान कोणे पदे:**–ॐभूर्भुव: स्व: शिखिने नम: । शिखिनमावाहयामि स्थापयामि ॥

**२–तद्दक्षिणैकपदे:**–पर्जन्याय नम: । पर्जन्यमावाहयामि स्थापयामि ॥

**३–तद्दक्षिणपदद्वये:**–जयन्ताय नम: । जयन्तमावाहयामि स्थापयामि ॥

**४–तद्दक्षिणपदद्वये:**–कुलिशायुधाय नम: । कुलिशायुधमावाहयामि स्थापयामि ॥

**५–तद्दक्षिणपदद्वये:**–सूर्याय नम: । सूर्यमावाहयामि स्थापयामि ॥

६–**तद्दक्षिणपदद्वये:**–सत्याय नमः। सत्यमावाहयामि स्थापयामि॥

७–**तद्दक्षिणपदद्वये:**–भृशाय नमः। भृशमावाहयामि स्थापयामि॥

८–**तद्दक्षिणैकपदे:**–आकाशाय नमः। अकाशमावाहयामि स्थापयामि॥

९–**तद्दक्षिणाग्नेयकोणेपदे:**–वायवे नमः। वायुमावाहयामि स्थापयामि॥

१०–**तत्पश्चिमैकपदे:**–पूष्णे नमः। पूषाणमावाहयामि स्थापयामि॥

११–**तत्पश्चिमपदद्वये:**–वितथाय नमः। वितथमावाहयामि स्थापयामि॥

१२–**तत्पश्चिमपदद्वये:**–गृहक्षताय नमः। गृहक्षतमावाहयामि स्थापयामि॥

१३–**तत्पश्चिमपदद्वये:**–यमाय नमः। यममावाहयामि स्थापयामि॥

१४–**तत्पश्चिमपदद्वये:**–गन्धर्वाय नमः। गन्धर्वमावाहयामि स्थापयामि॥

१५–**तत्पश्चिमपदद्वये:**–भृङ्गराजाय नमः। भृङ्गराजमावाहयामि स्थापयामि॥

१६–**पश्चिमोपरिस्थितैकपदे:**–मृगाय नमः। मृगमावाहयामि स्थापयामि॥

१७–**तत्पश्चिमे नैर्ऋत्यकोणेपदे:**–पितृभ्यो नमः। पितॄनावाहयामि स्थापयामि॥

१८–**तदुत्तरैकपदे:**–दौवारिकाय नमः। दौवारिकमावाहयामि स्थापयामि॥

१९–**तदुत्तरपदद्वये:**–सुग्रीवाय नमः। सुग्रीवमावाहयामि स्थापयामि॥

२०–**तदुत्तरपदद्वये:**–पुष्पदन्ताय नमः। पुष्पदन्तमावाहयामि स्थापयामि॥

२१–**तदुत्तरपदद्वये:**–वरुणाय नमः। वरुणमावाहयामि स्थापयामि॥
२२–**तदुत्तरपदद्वये:**–असुराय नमः। असुरमावाहयामि स्थापयामि॥
२३–**तदुत्तरपदद्वये:**–शोषाय नमः। शेषमावाहयामि स्थापयामि॥
२४–**तदुत्तरोपरिस्थितैकपदे:**–पापाय नमः। पापमावाहयामि स्थापयामि॥
२५–**तदुत्तरवायव्यकोणेपदे:**–रोगाय नमः। रोगमावाहयामि स्थापयामि॥
२६–**तत्प्रागेकपदे:**–अहये नमः। अहयमावाहयामि स्थापयामि॥
२७–**तत्प्राक्पदद्वये:**–मुख्याय नमः। मुख्यमावाहयामि स्थापयामि॥
२८–**तत्प्राक्पदद्वये:**–भल्लाटाय नमः। भल्लाटमावाहयामि स्थापयामि॥
२९–**तत्प्राक्पदद्वये:**–सोमाय नमः। सोममावाहयामि स्थापयामि॥
३०–**तत्प्राक्पदद्वये:**–सर्पाय नमः। सर्पमावाहयामि स्थापयामि॥
३१–**तत्प्राक्पदद्वये:**–अदित्यै। अदितिमावाहयामि स्थापयामि॥
३२–**तत्प्रागुपरिस्थितैकपदे:**–दित्यै नमः। दितिमावाहयामि स्थापयामि॥
३३–**तद्दक्षिणे शिखिपदाध:**–आपाय नमः। अपः आवाहयामि स्थापयामि॥
३४–**आग्नेय वायुपदाध:**–सवित्राय नमः। सवित्रमावाहयामि स्थापयामि॥
३५–**नैर्ऋत्यपितृपदाध:**–जयाय नमः। जयमावाहयामि स्थापयामि॥
३६–**वायव्यरोगपदाध:**–रुद्राय नमः। रुद्रमावाहयामि स्थापयामि॥
३७–**मध्येनवपदात्पूर्वं पदत्रये:**–अर्यम्णे नमः। अर्यमणमावाहयामि स्थापयामि॥

**३८–तद्दक्षिणाग्नेयकोणैकपदेः**–सवित्रे नमः । सवित्रमावाहयामि स्थापयामि ॥

**३९–तत्पश्चिमपदत्रयेः**–विवस्वते नमः । विवस्वन्तमावाहयामि स्थापयामि ॥

**४०–तत्पश्चिमनैर्ऋत्यकोणैकपदेः**–विबुधाधिपाय नमः । विबुधाधिपमावाहयामि स्थापयामि ॥

**४१–तदुत्तरपदत्रयेः**–मित्राय नमः । मित्रमावाहयामि स्थापयामि ॥

**४२–तदुत्तरवायव्यकोणैकपदेः**–राजयक्ष्मणे नमः । राजयक्ष्मणमावाहयामि स्थापयामि ॥

**४३–तत्प्राक्पदत्रयेः**–पृथ्वीधराय नमः । पृथ्वीधरमावाहयामि स्थापयामि ॥

**४४–तत्पाक् ईशानकोणैकपदेः**–आपवत्साय नमः । आपवत्समावाहयामि स्थापयामि ॥

**४५–मध्ये नवपदेषुः**–ब्रह्मणे नमः । ब्रह्माणमावाहयामि स्थापयामि ॥

**मण्डलाद्बहिः श्वेतपरिधौ :–**

**४६–ईशान्याम्ः**–चरक्यै नमः । चरकीमावाहयामि स्थापयामि ॥

**४७–आग्नेय्याम्ः**–विदार्यै नमः । विदारीमावाहयामि स्थापयामि ॥

**४८–नैर्ऋत्याम्ः**–पूतनायै नमः । पूतनामावाहयामि स्थापयामि ॥

**४९–वायव्याम्ः**–पापराक्षस्यै नमः । पापराक्षसीमावाहयामि स्थापयामि ॥

## मण्डलाद्बहिः–

**५०–पूर्वेः**–स्कन्दाय नमः । स्कन्दमावाहयामि स्थापयामि ॥

**५१–दक्षिणेः**–अर्यम्णे नमः । अर्यमणमावाहयामि स्थापयामि ॥

**५२–पश्चिमेः**–जृम्भकाय नमः । जृम्भकमावाहयामि स्थापयामि ॥

**५३–उत्तरेः**–पिलिपिच्छाय नमः । पिलिपिच्छमावाहयामि स्थापयामि ॥

**मण्डलाद्बहिः– ५४–पूर्वे:**–इन्द्राय नमः । इन्द्रमावाहयामि स्थापयामि ॥
**५५–आग्नेय्याम्:**–अग्नये नमः । अग्निमावाहयामि स्थापयामि ॥
**५६–दक्षिणस्याम्:**–यमाय नमः । यममावाहयामि स्थापयामि ॥
**५७–निर्ऋत्याम्:**–निर्ऋतये नमः । नैर्ऋतिमावाहयामि स्थापयामि ॥
**५८–पश्चिमे:**–वरुणाय नमः । वरुणमावाहयामि स्थापयामि ॥
**५९–वायव्याम्:**–वायवे नमः । वायुमावाहयामि स्थापयामि ॥
**६०–उत्तरे:**–कुबेराय नमः । कुबेरमावाहयामि स्थापयामि ॥
**६१–ईशान्याम्:**–ईश्वराय नमः । ईश्वरमावाहयामि स्थापयामि ॥
**६२–पूर्वेशानयोर्मध्ये:**–ब्रह्मणे नमः । ब्रह्माणमावाहयामि स्थापयामि ॥
**६३–निर्ऋतिपश्चिमयोर्मध्ये:**–अनन्ताय नमः । अनन्तमावाहयामि स्थापयामि ॥
**६४–पूर्वेइन्द्रादुत्तरत:**–उग्रसेनाय नमः । उग्रसेनमावाहयामि स्थापयामि ॥
**६५–दक्षिणेयमादुत्तरत:**–डामराय नमः । डामरमावाहयामि स्थापयामि ॥
**६६–पश्चिमे वरुणादुत्तरत:**–महाकालाय नमः । महाकालमावाहयामि स्थापयामि ॥
**६७–उत्तरे सोमादुत्तरत:**–पिलिपिच्छाय नमः । पिलिपिच्छमावाहयामि स्थापयामि ॥

## तृतीयकृष्णपरिधौ देवतास्थापनम् :–

**६८–पूर्वे:**–हेतुकाय नमः । हेतुकमावाहयामि स्थापयामि ॥
**६९–आग्नेय्याम्:**–त्रिपुरान्तकाय नमः । त्रिपुरान्तकमावाहयामि स्थापयामि ॥
**७०–दक्षिणे:**–अग्निवैतालाय नमः । अग्निवैतालमावाहयामि स्थापयामि ॥

७१–**नैर्ऋत्याम्ः**–असिवैतालाय नमः । असिवैतालमावाहयामि स्थापयामि ॥
७२–**पश्चिमेः**–कालाय नमः । कालमावाहयामि स्थापयामि ॥
७३–**वायव्याम्ः**–करालाय नमः । करालमावाहयामि स्थापयामि ॥
७४–**उत्तरेः**–एकपादाय नमः । एकपादमावाहयामि स्थापयामि ॥
७५–**ईशान्याम्ः**–भीमरूपाय नमः । भीमरूपमावाहयामि स्थापयामि ॥
७६–**पूर्वेशानयोर्मध्येः**–खेचराय नमः । खेचरमावाहयामि स्थापयामि ॥
७७–**निर्ऋतिपश्चिमयोर्मध्येः**–
तलवासिने नमः । तलवासिनावाहयामि स्थापयामि ॥
ॐवास्तोष्पते प्रतिजानीह्यस्मान्स्वावेशो अनमीवो भवानः । यत्वेमहे प्रतितन्नो जुषस्वशन्नोऽस्तु द्विपदे शं चतुष्पदे आवाहयामि स्थापयामि ॥

**प्रतिष्ठाः**–ॐमनो जूतिर्ज्जुषतामाज्ज्यस्य बृहस्पति र्य्यज्ञ मिमन्तनोत्वरिष्टं यज्ञ ठँ समिमन्दधातु । विश्वे देवासऽइह मादयन्तामों ३ँ म्प्रतिष्ठ ॥ वास्तुमंडलदेवताभ्यो नमः ॥
(ततो मध्य ताम्रकलशं संस्थाप्य तत्र वास्तुध्रुवमूर्त्यौ अग्न्युत्तरण पूर्वकं प्राण प्रतिष्ठा कृत्वा मूर्त्यौ कलशोपरि संस्थाप्य ॥)
वास्तुध्रुवमूर्तिभ्यां नमः **षोडशोपचारैः पूजयेत्** ॥

**पूजनं कुर्यात्ः**–आसनार्थे पुष्पाणि समर्पयामि ॥ पादयोः पाद्यं समर्पयामि ॥ हस्तयोः अर्घ्यं समर्पयामि ॥ मुखे आचमनीयं जलं समर्पयामि ॥ सर्वांगे स्नानं समर्पयामि ॥ मिश्रित पंचामृत स्नानं समर्पयामि ॥ शुद्धोदक स्नानं समर्पयामि ॥ वस्त्रं समर्पयामि ॥ यज्ञोपवीतं समर्पयामि ॥ आचमनीयं जलं समर्पयामि ॥ उपवस्त्रं समर्पयामि ॥ चन्दनं समर्पयामि ॥ गंधं समर्पयामि ॥ अक्षतान्

समर्पयामि ॥ पुष्पाणि समर्पयामि ॥ परिमलद्रव्याणि समर्पयामि ॥ सुगंधितैलं समर्पयामि ॥ धूपं आघ्रापयामि ॥ दीपं दर्शयामि ॥ नैवेद्यं निवेदयामि ॥ आचमनीयं जलं समर्पयामि ॥ ऋतुफलं समर्पयामि ॥ ताम्बूलं समर्पयामि ॥ द्रव्यदक्षिणां समर्पयामि ॥ श्रीफलं समर्पयामि ॥

**मंत्रः**-वास्तुदेव नमस्तेऽस्तु भूशय्याभिरत प्रभो ।
मद्गृहे धनधान्यादि समृद्धिं कुरु सर्वदा ॥
ततो नाममंत्रेण पायसबलिं दद्यात् ॥
(हवन इत्यादि के पश्चात्)

ततः पूर्वादिक्रमेण ध्वजापताकां रोपयेत् ॥ त्रिरावृत्तेन सूत्रेण रक्षोघ्नमंत्रेण गृहं वेष्टयेत् ॥

दुग्धजलेन गृहस्य परितः पवमानरक्षोघ्नसूक्तं पठन् अविच्छिन्नधारां पातयेत् ॥

तथा आग्नेयकोणे जानुपरिमितगर्तं खनयित्वा मृत्पेटिकायां शैवालादिकं क्षित्वा तत्र वास्तुमूर्तिं संस्थाप्य सर्वोपचारार्थे गंद्याक्षत पुष्पाणि समर्पयामि ॥ ततः पेटिकां गर्ते शनैर्निक्षिपेत् । तस्मिन् गर्ते शनैर्जलं मृदं च निक्षिपेत् ॥ ततो गोपयेनोपलिप्य सर्वोपचारार्थे गंद्याक्षत पुष्पाणि समर्पयामि ॥ पञ्चगव्येन, पुण्याहवाचन जलेन गृहं प्रोक्षयेत् ॥ **इति गृहवास्तुमण्डलपूजन** ॥

## ॥ चतुः षष्टिपद वास्तुमण्डल देवानांस्थापनम् ॥

ॐ तत्सद्य पूर्व संकल्पानुसारेण चतुः षष्टिपद वास्तु मण्डलोपरि शिख्यादि देवतां सह वास्तु पुरुष देवता स्थापन पूजनबलि दानञ्च करिष्ये ॥

**वास्तुपीठस्याग्नेयादि कोणेषु प्रदक्षिणा क्रमेण शंकु चतुष्टयं रोपयेत्।**

ॐ विशन्तु भूतले नागा लोकपालाश्च सर्वतः।
मण्डपेऽत्रावतिष्ठन्तु आयुर्बल कराः सदा ॥ इति मंत्रेण

शंकुम् रोपयेत्

आग्नेयादि रोपण कमेण शंकूनां पार्श्वे बलिदानम् कुर्यात् ॥

**१-अग्निकोणे :-** ॐअग्निभ्योऽप्यथ सर्पेभ्यो ये चान्ये तान्समाश्रिताः। बलिं तेभ्यः प्रयच्छामि पुण्य मोदन मुत्तमम् ॥

**२-नैर्ऋत्य कोणे:-** ॐनैर्ऋत्याधि पतिश्चैव नैर्ऋत्यां ये च राक्षसाः । बलिं तेभ्यः प्रयच्छामि पुण्य मोदन मुत्तमम् ॥

**३-वायव्य कोणे :-** ॐ नमो वै वायु रक्षेभ्यो ये चान्ये तान्समाश्रिताः। बलिं तेभ्यः प्रयच्छामि पुण्य मोदन मुत्तमम् ॥

**४-ईशान कोणे:-** ॐरुद्रेभ्यश्चैव सर्पेभ्यो ये चान्ये तान्समाश्रिताः । बलिं तेभ्यः प्रयच्छामि पुण्य मोदन मुत्तमम् ॥

**रेखा करणम्:-** पश्चिमारम्भाः प्रागन्ता उकद्संस्थाः समा नवरेखाः तथा दक्षिणारम्भाः उदगन्ता प्राक्संस्था नवरेखाः कुर्यात् ॥

**पश्चिमारम्यः रेखापूजनम्:-** ॐलक्ष्म्यै नमः । ॐयशोवत्यै नमः॥ ॐकान्तायै नमः ॥ ॐसुप्रियायै नमः ॥ ॐविमलायै नमः ॥ ॐशिवायै नमः॥ ॐसुभगायै नमः॥ ॐसुमत्यै नमः॥ ॐइडायै नमः॥ **सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि ॥**

**दक्षिणारम्भाः-** ॐधान्यायैनमः॥ ॐप्राणायै नमः॥ ॐविमलायै नमः॥ ॐस्थिरायै नमः॥ ॐभद्रायै नमः॥ ॐजयायै नमः॥ ॐनिशायै नमः ॥ ॐविरजायै नमः॥ ॐविभवायै नमः ॥ ॐ रेखा देवताभ्यो नमः ॥ **सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि ॥**

**१-ईशानकोण दक्षिणार्ध पदे रक्तम्:-** ॐतमीशानं जगतस्तस्थुषस्पतिं धियञ्जिन्वमवसे हूमहे वयम् । पूषा नो यथा वेदसामसद् वृधे रक्षिता पायुरदब्धः स्वस्तये ॥१॥ ॐ नमः शम्भवाय च मयो भवाय च नमः शंकराय च मयस्कराय च नमः शिवा यच शिवतरा यच ॥२॥ ॐभूर्भुवः स्वः **शिखिने नमः** । शिखिनमावाहयामि स्थापयामि ॥

**२–तद्दक्षिणे सार्धपदे पीतवर्णे:**–ॐशन्नो व्वातः पवताॐ शं नस्तपतु सूर्यः । शं नः कनिक्रद्ददेवः पर्जन्योऽअभिवर्षतु ॥ ॐभूर्भुवः स्वः **पर्जन्याय नमः** । पर्जन्यमावाहयामि स्थापयामि ॥

**३–तद्दक्षिणेद्विपदे पीतवर्णे:**–ॐमर्माणिते व्वर्म्मणाच्छादयामि सोमस्त्वा राजा मृतेनानुवस्ताम् । उरोर्व्वरीयो व्वरुणस्ते कृणोतु जयन्तन्त्वातु देवा मदन्तु ॥ ॐभूर्भुवः स्वः **जयन्ताय नमः** । जयन्तमावाहयामि स्थापयामि ॥

**४–तद्दक्षिणेद्विपदेपीतवर्णे:**–ॐ सजोषा ऽइन्द्र सगणो मरुद्भिः सोमं पिब वृत्रहा शूर विद्वान् । जहि शत्रूँ२ऽरप मृधोनुदस्वाथाभयं कृणुहि विश्वतो नः ॥१॥ ॐआयात्विन्दोऽवसऽ उप न ऽइहस्तुतः सवमादस्तु शूरः । ववृधानस्तविषीर्यस्य पूर्वीर्द्यौर्न क्षत्रमभिभूति पुष्यात् ॥२॥ ॐभूर्भुवः स्वः **कुलिशायुधाय नमः** । कुलिशायुधमावाहयामि स्थापयामि ॥

**५–तद्दक्षिणेद्विपदे रक्त वर्णम्:**– ॐ आकृष्णेनरजसा व्वर्त्तमानोनिवेशयन्नमृतंमर्त्त्यंच । हिरण्ययेन सवितारथेना देवोयाति भुवनानि पश्यन् ॥१॥ ॐभूर्भुवः स्वः **सूर्याय नमः** ॥ सूर्यमावाहयामि स्थापयामि ॥

**६–तद्दक्षिणेद्विपदे श्वेतवर्णम्:**–ॐ व्रतेन दीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम् । दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते ॥ ॐभूर्भुवः स्वः **सत्याय नमः ॥** सत्यमावाहयामि स्थापयामि ॥

**७–तद्दक्षिणेसार्द्धपदे कृष्ण वर्णः**–ॐआत्वाहार्ष मन्तर भूर्ध्रुवस्तिष्ठा विचाचलिः । व्विशस्त्वा सर्वा व्वाञ्छन्तु मा त्वद्द्रष्ट्रा मधिब्भ्रशत् ॥ ॐभूर्भुवः स्वः **भृशाय नमः** भृशमावाहयामि स्थापयामि ॥

**८–तद्दक्षिणेअर्द्धपदे कृष्ण वर्णः**–ॐया वां कशा मधुमत्यश्विना सूनृतावती । तयायज्ञंमिमिक्षतम् ॥ ॐभूर्भुवः स्वः **आकाशाय नमः** ॥ आकाशमावाहयामि स्थापयामि।

**९–तत्पश्चिमे अर्द्धपदे धूम्रवर्णे**:–ॐवायो ये ते सहस्त्रिणो रथासस्तेभिरा गहि । नियुत्वान्त्सोमपीतये ॥ ॐभूर्भुवः स्वः **वायवे नमः** ॥ वायुमावाहयामि स्थापयामि।

**१०–तत्पश्चिमेसार्द्धपदे रक्तवर्णे**:–ॐपूषन् तव व्व्रते व्वयं नरिष्येम कदाचन । स्तोस्तारस्तऽइह स्मसि ॥ॐभूर्भुवः स्वः **पूष्णे नमः**॥ पूषाणमावाहयामि स्थापयामि ॥

**११–तत्पश्चिमेद्विपदेश्वेतवर्णे**:–

ॐ तत्सूर्यस्यदेवत्वन्तन्महित्वम्मद्धयाकर्तोर्विततर्ठसञ्जभार । यदेदयुक्तहरितः सधस्थादाद्रात्रीव्वासस्तनुतेसिमस्मै ॥ ॐभूर्भुवः स्वः **वितथाय नमः** ॥ वितथमावाहयामि स्थापयामि ॥

**१२–तत्पश्चिमेद्विपदे पीतवर्णे**:–ॐ अक्षन्नमीमदन्तह्य व प्रियाऽ अधूषत । अस्तोषतस्व भानवो विप्रान विष्ठया मती योजान्विन्द्रते हरिः ॥ ॐभूर्भुवः स्वः **गृहक्षताय नमः** ॥ गृहक्षतमावाहयामि स्थापयामि ॥

**१३–तत्पश्चिमेद्विपदे कृष्ण वर्णे**:–ॐयमाय त्वाङ्गिरस्वते पितृमते स्वाहा । स्वाहा घर्माय स्वाहा घर्मः पित्रे ॥ ॐभूर्भुवः स्वः **यमाय नमः** ॥ यममावाहयामि स्थापयामि।

**१४–तत्पश्चिमेद्विपदे रक्त वर्णे**:–ॐगन्धर्व्वस्त्वा व्विश्वावसुः परिदधातु विश्वस्यारिष्ट्ये यजमानस्य परिधिरस्य ग्निरिडऽईडितः।इन्द्रस्य बाहुरसि दक्षिणो व्विश्वस्यया रिष्ट्यै यजमानस्य परिधि रस्यग्नि रिडऽईडितः।मित्रा वरूणौ त्वोत्तरतः परिधत्तां ध्रुवेण धर्मणा व्विश्वस्या रिष्ट्यै यजमानस्य परिधिरस्यग्निरिडऽईडितः ॥ ॐभूर्भुवः स्वः **गन्धर्वाय नमः**॥ गन्धर्वमावाहयामि स्थापयामि ॥

**१५–तत्पश्चिमेसार्द्धपदे कृष्ण वर्णे**:–ॐसौरी बलाका शार्गः सृजयः शयाण्डकस्ते मैत्राः सरस्वत्यै शारिः। पुरूषवाक्श्वाविद्भौमी शार्दूलो वृकः पृदाकुस्ते मन्न्यवे सरस्वते

श्रृकः पुरुषवाक् ॥ ॐभूर्भुवः स्वः **भृङ्गराजाय नमः** ॥ भृङ्गराजमावाहयामि स्थापयामि

**१६–तत्पश्चिमेअर्द्धपदे पीतवर्णे:**–ॐमृगो न भीमः कुचरोगिरिष्ठाः परावतऽआजगन्था परस्याः । सृकठं सठं शाय पविमिन्द्रतिग्मं विशत्रून्ताढिव्विमृधो नुदस्व ॥१॥

ॐचन्द्रमा मनसो जातश्चक्षोः सूर्योऽअजायत । श्रोत्राद्वा युश्चप्राणश्च मुखा दग्निरजायत ॥ ॐभूर्भुवः स्वः **मृगाय नमः**॥ मृगमावाहयामि स्थापयामि ॥

**१७–तत्दुत्तरेअर्द्धपदेरक्तवर्णे:**–ॐउशन्तस्त्वा निधीमहयुशन्तः समिधीमहि। उशन्नुशतऽआवह पितृन्हविषेऽअत्तवे ॥ ॐभूर्भुवः स्वः **पितृगणेभ्यो नमः** ॥ पितृगणान् आवाहयामि स्थापयामि ॥

**१८–तत्दुत्तरेसार्द्धपदे रक्त वर्णे:**–ॐद्वे विरूपे चरतः स्वर्थेऽ अन्त्यान्या व्वत्समुपधापयेते ॥ हरिरन्यन्यां भवति स्वधावाञ्छुक्रो ऽअन्यस्यां ददृशे सुवर्चाः ॥२॥ ॐभूर्भुवः स्वः **दौवारिकाय** नमः॥ दौवारिकमावाहयामि स्थापयामि ॥

**१९–तत्दुत्तरेद्विपदे श्वेत वर्णे:**–ॐनीलग्रीवाः शितिकण्ठा दिवꣳ रुद्राऽउपश्रिताः । तेषाꣳसहस्त्रयो जनेव धन्वानितन्तसि ॥ ॐभूर्भुवः स्वः **सुग्रीवाय नमः** ॥ सुग्रीवमावाहयामि स्थापयामि ॥

**२०–तत्दुत्तरेद्विपदे रक्त वर्णे:**–ॐनमो गणेभ्यो गणपतिभ्यश्चवो नमोनमो व्व्रातेभ्यो व्व्रातपतिभ्यश्चवो नमोनमो गृत्सेभ्यो गृत्सपतिभ्यश्चवो नमोनमो व्विरूपेभ्यो व्विश्वरूपेभ्यश्चवो नमोनमः ॥ ॐभूर्भुवः स्वः **पुष्पदन्ताय नमः** ॥ पुष्पदन्तमावाहयामि स्थापयामि ॥

**२१–तत्दुत्तरेद्विपदे श्वेत वर्णे:**–ॐइमम्मे व्वरुण श्रुधी हवमद्या च मृडय। त्वा मवस्युरा चके ॥ ॐभूर्भुवः स्वः **वरुणाय नमः** ॥ वरुणमावाहयामि स्थापयामि ॥

**२२–तत्दुत्तरेद्विपदे पीत वर्णे:**–ॐयमश्विना नमुचेरा सुरा दधि सरस्वत्य सुनोदिन्द्रियाय । इमं तथं शुक्रं मधुमन्त मिन्द्र थं सोम थं राजानमिह भक्षयामि ॥ ॐभूर्भुवः स्वः **असुराय नमः** ॥ असुरमावाहयामि स्थापयामि ॥

**२३–तत्दुत्तरेसार्द्ध पदे कृष्ण वर्णे:**–ॐ शन्नोदेवीरभिष्ट्यऽ आपोभवन्तुपीतये ॥ शँय्यो रभिस्त्रवन्तुनः ॥ ॐभूर्भुवः स्वः **शोषाय नमः** ॥ शोषमावाहयामि स्थापयामि ॥

**२४–तत्दुत्तरे वायव्यपदार्धे पीत वर्णे:**–

ॐएतत्तेरुद्रावसंतेनपरोमूजवतोतीहि । अवततधन्वा पिनाकावसः कृत्तिवासाऽअहि ठं सन्नः शिवोतीहि ॥ ॐ भूर्भुवः स्वः **पापाय नमः** ॥ पापमावाहयामि स्थापयामि ॥

**२५–तत्पूर्वे अर्द्धपदे रक्त वर्णे:**–ॐद्रापेऽअन्ध सस्पते दरिद्रनी ललोहित। आसाम्प्रजानामे षाम्पशूनाम्माभेर्म्मा रोङ्मोचनः किञ्चनाममत् ॥ ॐ भूर्भुवः स्वः **रोगाय नमः** ॥ रोगमावाहयामि स्थापयामि ॥

**२६–तत्पूर्वेसार्द्धपदे रक्त वर्णे:**–ॐ अहिरिवभोगैः पर्येतिवाहुंज्याया हेतिम्परि बाधमानाः । हस्तग्घ्नो विश्वाव्वयनुनानि विद्वान्पुमान्पुमाथं सम्परिपातु विश्वतः ॥ ॐ भूर्भुवः स्वः **अहिर्बुध्न्याय नमः** ॥ अहिर्बुध्न्यमावाहयामि स्थापयामि ॥

**२७–तत्पूर्वेद्विपदे रक्त वर्णे:**–ॐअवतत्त्यधनुष्ट्व ठं सहस्राक्ष शते षुधे । निशीर्यशल्या नाम्मुखा शिवोनः सुमनाभव ॥ ॐ भूर्भुवः स्वः **मुख्याय नमः** ॥ मुख्यमावाहयामि स्थापयामि ॥

**२८–तत्पूर्वेद्विपदे कृष्ण वर्णे:**– ॐइमारुद्रायतवसेकपर्द्दिने क्षयद्वीरायप्प्रभरामहेमतीः। यथा शमसद्विपदे चतुष्पदे व्विश्वम्पुष्टमषग्रामेऽअस्मिन्ननातुरम् ॥ ॐ भूर्भुवः स्वः **भल्लाटाय नमः** ॥ भल्लाटमावाहयामि स्थापयामि ॥

**२९–तत्पूर्वेद्विपदे श्वेत वर्णे:**–ॐव्वय ठं सोमव्रते

तवमनस्तनूषुविब्भ्रतः प्रजावन्तः सचेमहि ॥ ॐ भूर्भुवः स्वः **सोमाय नमः** ॥ सोममावाहयामि स्थापयामि ॥

**३०–तत्पूर्वेद्विपदे कृष्ण वर्णेः**–ॐ नमोस्तु सर्पेभ्यो येके च पृथिवी मनु । ये ऽ अन्तरिक्षे येदिवि तेभ्यः सर्पेभ्यो नमः ॥ ॐ भूर्भुवः स्वः **सर्पेभ्यो नमः** ॥ सर्पान् आवाहयामि स्थापयामि ॥

**३१–तत्पूर्वेसार्द्धपदे पीत वर्णेः**– ॐइडऽएह्यदितऽएहि काम्याऽएत । मयि वः कामधरणं भूयात् ॥ ॐ भूर्भुवः स्वः **अदित्यै नमः** ॥ अदितिमावाहयामि स्थापयामि ॥

**३२–तत्पूर्वेअर्द्धपदे पीत वर्णेः**– अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः । विश्वे देवाऽ अदितिः पञ्च जनाऽ अदितिर्जातमदितिर्जनित्वम् ॥ ॐ भूर्भुवः स्वः **दित्यै नमः** ॥ दितिमावाहयामि स्थापयामि ॥

**३३–ततो मध्य पदेषु ईशान पदोत्तरार्द्धे श्वेत वर्णेः**–ॐ आपोहिष्ठा मयो भुवस्तान ऊर्जे दधातन । महेरणाय चक्षसे ॥ ॐ भूर्भुवः स्वः **अद्भयो नमः** ॥ अप आवाहयामि स्थापयामि ॥

**३४–आग्नेय पदोत्तरार्द्धे श्वेत वर्णेः**–ॐ हस्त आधाय सविता विभ्रद्दभ्रिः हिरण्ययीम्। इग्नेर्ज्योतिर्न्निचाय पृथिव्याऽ अद्धया भरदानुष्टुभेनच्छदसाङ्गिरस्वत् ॥ ॐ भूर्भुवः स्वः **सवित्राय नमः** ॥ सवित्रमावाहयामि स्थापयामि ॥

**३५–नैर्ऋत्यपदोत्तरार्द्धे श्वेत वर्णेः**–ॐअषाढं व्युत्सु पृतनासु पप्रिꣳ स्वर्षामप्सां व्वृजनस्य गोपाम् भरेषुजाꣳसुक्षिति ꣳ सुश्रवसं जयन्तं त्वामनुमदेम सोम ॥ॐ भूर्भुवः स्वः **जयाय नमः** ॥ जयमावाहयामि स्थापयामि ॥

**३६–वायव्यपदोत्तरार्द्धे रक्तवर्णेः**–ॐअवरुद्रमदीमह्य वदेवन्त्र्यम्बकम् । यथानोवस्य सस्करद्यथानः श्रेयसस्कर द्यथानो व्यवसाययात् ॥ ॐ भूर्भुवः स्वः **रुद्राय नमः** ॥ रुद्रमावाहयामि स्थापयामि ॥

**३७–पूर्वपदद्वये कृष्ण वर्णे:**–ॐयदद्यकच्चवृत्रहन्नुदगाऽअभि सूर्य ॥ सर्व्वन्तदिन्द्रतेव्वशे ॥ ॐ भूर्भुव: स्व: **अर्यम्णे नम:** ॥
अर्यमणमावाहयामि स्थापयामि ॥

**३८–आग्नेयपददक्षिणार्द्धे रक्त वर्णे:**–ॐविश्वानि देव सवितर्दुरितानि परासुव । यद्भद्रन्तन्न आसुव ॥ ॐ भूर्भुव: स्व: **सवित्रे नम:** ॥ सवितारमावाहयामि स्थापयामि ॥

**३९–तत्पश्चिमेपदद्वये श्वेत वर्णे:**–ॐअसि यमोऽअस्या दित्यो ऽअर्वन्नसि त्रितो गुह्येन व्रतेन । असि सोमेन समया विपृक्तऽआहुस्ते त्रीणि दिवि बन्धनानि ॥ ॐ भूर्भुव: स्व: **विवस्वते नम:** ॥ विवस्वन्तमावाहयामि स्थापयामि ॥

**४०–नैर्ऋत्यपदपूर्वार्द्धे रक्त वर्णे:**–ॐसबोधि सूरिर्म्मघवा वसुपते वसुदावन् । युयोध्यस्मद् द्वेषाथ्ठंसि व्विश्वकर्म्मणे स्वाहा ॥ ॐ भूर्भुव: स्व: **विबुधाधिपाय नम:** ॥ विबुधाधिपमावाहयामि स्थापयामि ॥

**४१–उत्तरेपदद्वये श्वेत वर्णे:**–ॐमित्रो नऽएहि सुमित्रधऽइन्द्रस्यो रुमाविश दक्षिण मुशन्नुशन्त थ्ठं स्योन: स्योन् । स्वानब्भाङ्गारेऽबम्भारे हस्त सुहस्त कृशानवे ते व: सोमक्रयणास्ता न्नुक्षद्वं मावो दभन् ॥ ॐ भूर्भुव: स्व: **मित्राय नम:** ॥ मित्रमावाहयामि स्थापयामि ॥

**४२–वायव्यपददक्षिर्द्धे रक्त वर्णे:**–ॐनाशयित्री बलासस्यार्शसऽ उपचितामसि। शतस्य वक्ष्माणां पाकारोरसि नाशनी ॥ ॐ भूर्भुव: स्व: **राजयक्ष्मणे नम:** ॥ राजयक्ष्मणमावाहयामि स्थापयामि ॥

**४३–तत्प्राक्पदद्वये रक्त वर्णे:**–ॐ स्योना पृथिविनो भवानृक्षरा निवेशनी । यच्छा न: शर्म सप्रथा: ॥ ॐ भूर्भुव: स्व: **पृथ्वीधराय नम:** ॥ पृथ्वीधरमावाहयामि स्थापयामि ॥

**४४–तत्प्राक्ईशानकोण दक्षिणार्द्धे एकपदे:**–ॐ आते वत्सो मनो यमत्परमाच्चित्सधस्थात्। अग्ने त्वां कामया गिरा ॥ ॐ भूर्भुवः स्वः **आपवत्साय नमः** ॥ आपवत्समावाहयामि स्थापयामि ॥

**४५–ततोमध्ये चतुष्पदे पीत वर्णे:**– ॐब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचोव्वेन ऽ आवः । सबुध्न्या ऽ उपमा ऽऽ अस्यविष्ठाः सतश्च योनिमसतश्चव्विवः ॥ ॐ भूर्भुवः स्वः **ब्रह्मणे नमः** ॥ ब्रह्माणमावाहयामि स्थापयामि ॥

**४६–ब्रह्मोत्तरे:**–वास्तोष्पते प्रतिजानीह्यस्मान्त्वावेशो अनमीवो भवानः । यत्वेमहे प्रतितन्नो जुषस्वशन्नो अस्तु द्विपदे शं चतुष्पदे ॥ ॐ भूर्भुवः स्वः **वास्तु पुरुषाय नमः** ।

**४७–मण्डलाद्वहि ईशाने धूम्रवर्णे:**–ॐइन्धानास्त्वा शतꣳ हिमा द्युमन्त ꣳ समिधीमहि। वयस्वन्तो वयस्कृत ꣳसहस्वन्तः सहस्कृतम् । अग्ने सपत्नदम्भन मदब्धासोऽअदाभ्यम् । चित्रावसो स्वस्ति ते पारमशीय ॥ ॐ भूर्भुवः स्वः **चरक्यै नमः** । चरकीमावाहयामि स्थापयामि ॥

**४८–आग्नेयां रक्तवर्णे:**–असुन्वन्तमयजमान मिच्छस्ते नस्येत्यामन्विहितस्करस्य । अन्यमस्मदिच्छसा तऽइत्या नमो देविनिर्ऋतेतुभ्यमस्तु ॥ ॐ भूर्भुवः स्वः **विदार्यै नमः** । विदारीमावाहयामि स्थापयामि ॥

**४९–नैर्ऋत्यां पीत वर्णे:**–ॐकया नश्चित्रऽआ भुवदूती सदावृधः सखा ॥ कया चिष्ठया वृता ॥ ॐ भूर्भुवः स्वः **पूतनायै नमः** । पूतनामावाहयामि स्थापयामि ॥

**५०–वायव्यां कृष्ण वर्णे:**–इन्द्रऽआसान्नेता बृहस्पति र्दक्षिणायज्ञः पुरऽएतुसोमः।देवसेनाना मभिभञ्जतीनाञ्जयन्ती नाम्मरुतो यन्त्वग्ग्रम् ॥ ॐ भूर्भुवः स्वः **पापराक्षस्यै नमः** । पापराक्षसी मावाहयामि स्थापयामि ॥

**५१–पूर्वे रक्तवर्णे**:–ॐ त्वन्नो अग्नेवरुणस्य विद्वान् देवस्य हेडो अव यासिसीष्ठाः । यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषा ꣳ सि प्रमुमुग्ध्यस्मत् ॥ ॐ भूर्भुवः स्वः **स्कन्दाय नमः** । स्कन्दमावाहयामि स्थापयामि ॥

**५२–दक्षिणे कृष्ण वर्णे**:–यदद्य सूरऽउदितेऽनागा मित्रोऽअर्यमा । सुवाति सविता भगः ॥ ॐ भूर्भुवः स्वः **अर्यम्णे नमः** । अर्यमणमावाहयामि स्थापयामि ॥

**५३–पश्चिमे रक्तवर्णे**:–ॐहिंकाराय स्वाहा हिंकृतायस्वाहा क्रंदतेस्वाहा वक्रंदायस्वाहा प्रोथतेस्वाहा प्रप्रोथायस्वाहा गन्धायस्वाहा घ्रातायस्वाहा निविष्टायस्वाहोपविष्टायस्वाहा सन्दितायस्वाहा वल्गते स्वाहा सीनाय स्वाहा शयानायस्वाहा स्वपतेस्वाहा जाग्रतेस्वाहा कूजतेस्वाहा प्रबुद्धायस्वाहा विजृम्भमाणायस्वाहा विचृत्तायस्वाहा सꣳ हानाय स्वाहो पस्थितायस्वाहायनाय स्वाहा प्रायणायस्वाहा ॥ ॐ भूर्भुवः स्वः **जृंम्भकाय नमः** । जृम्भकमावाहयामि स्थापयामि ॥

**५४–उत्तरेपीत वर्णे**:–ॐरक्षोहणोवो व्वलगहनः प्रोक्षामि वैष्णवान् रक्षोहणो वो वलगहनोवनयामि वैष्णवान् रक्षोहणो वो वलगहनोवस्तृणामि वैष्णवान् रक्षोहणौ वां वलगहनोऽ उप दधामि वैष्णवी रक्षोहणौ वां वलगहनौ पर्यूहामि वैष्णवी वैष्णवमसि वैष्णवा स्थ ॥ ॐ भूर्भुवः स्वः **पिलिपिच्छाय नमः** । पिलिपिच्छमावाहयामि स्थापयामि ॥

**५५–पूर्व पीत वर्णे**:–ॐत्रातारमिन्द्रमवितारमिंद्र ꣳ हवे हवे सुहवꣳ शूरमिन्द्रम् । ह्वयामि शक्रं पुरुहूतमिन्द्रꣳ स्वस्ति नो मघवा धात्विन्द्रः ॥ **ॐइन्द्राय नमः** । इन्द्रमावाहयामि स्थापयामि ॥

**५६–आग्नेयां रक्तवर्णे**:–ॐत्वन्नो अग्नेवरुणस्य विद्वान् देवस्य हेडो अव यासिसीष्ठाः । यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषा ꣳ सि प्र मुमुग्ध्यस्मत् ॥ **ॐअग्नये नमः** । अग्निमावाहयामि

स्थापयामि ॥

**५७–दक्षिणे कृष्ण वर्णे**:–ॐसुगन्नुपंथां प्रदिशन्न एहि ज्योतिष्मध्ये ह्यजरन्न आयुः। अपैतु मृत्युरमृतं म ऽआगाद्वैवस्वतोनो अभयं कृणोतु ॥ **ॐयमाय नमः** । यममावाहयामि स्थापयामि॥

**५८–नैर्ऋत्यां नील वर्णे**:–ॐअसुन्वन्तम यजमानमिच्छ स्तेनस्येत्यामन्विहि तस्करस्य । अन्यमस्मदिच्छ सा तऽ इत्या नमो देवि निर्ऋते तुभ्यमस्तु ॥ **ॐनिर्ऋतये नमः** । नैर्ऋतिमावाहयामि स्थापयामि ॥

**५९–पश्चिमे श्वेत वर्णे**:–ॐतत्वायामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः । अहेडमानो व्वरुणे हबोध्युरुशꣳस मा न ऽ आयुः प्र मोषीः ॥ **ॐवरुणाय नमः** । वरुणमावाहयामि स्थापयामि ॥

**६०–वायव्यां धूम्र वर्णे**:–ॐआनोनियुद्भिः शतिनीभिरध्वरꣳ सहस्रिणीभिरुप याहि यज्ञम् । वायो अस्मिन्त्सवने मादयस्व यूयं पात स्वस्तिभिः सदा नः॥ **ॐवायवे नमः** । वायुमावाहयामि स्थापयामि ॥

**६१–उत्तरे पीत वर्णे**:–ॐवयꣳ सोमव्रते तव मनस्तनूषु बिभ्रतः । प्रजावन्तः सचेमहि ॥ **ॐकुबेराय नमः** । कुबेरमावाहयामि स्थापयामि ॥

**६२–ईशाने श्वेत वर्णे**:–ॐतमीशानं जगतस्तस्थुषस्पतिं धियंजिन्वमवसे हूमहे व्वयम् । पूषा नो यथा वेदसामसद् वृधे रक्षिता पायुरदब्धः स्वस्तये ॥ **ॐईश्वराय नमः** । ईश्वरमावाहयामि स्थापयामि ॥

**६३–ईशान पूर्वयो मध्ये रक्तवर्णे**:–ॐअस्मे रुद्रा मेहना पर्वतासो वृत्रहत्ये भरहूतौ सजोषाः । यः शꣳसते स्तुवते धायि पज्रऽ इन्द्रज्येष्ठा अस्माँ२ अवन्तु देवाः ॥

**ॐब्रह्मणे नमः** । ब्रह्माणमावाहयामि स्थापयामि ॥

**६४–नैर्ऋत्यपश्चिमयो र्मध्ये कृष्ण वर्णे:**–ॐस्योना पृथिविनो भवानृक्षरा निवेशनी । यच्छा नः शर्म सप्रथाः ॥ **ॐअनन्ताय नमः** । अनन्तमावाहयामि स्थापयामि ॥

**प्रतिष्ठा:**–ॐमनो जुतिर्ज्जुषतामाज्यस्य बृहस्पतिर्य्यज्ञमिमन्तनोत्वरिष्टं यज्ञ ठँ समिमन्दधातु । विश्वे देवासऽइह मादयन्तामो ३ँ म्प्रतिष्ठ ॥

शिख्यादि वास्तु मण्डलस्थ देवानां सुप्रतिष्ठा भव यथा मिलितोपचार द्रव्यैः सम्पूज्य ।

तत्र मण्डल मध्ये चतुः पदे पीत वर्णे कोष्ठोपरि ताम्रादि कलशं स्थापनं कुर्यात् ॥ तदुपरि प्राणप्रतिष्ठा पूर्वक वास्तु मूर्तिं संस्थाप्य । वास्तुपुरुषमावाहयामि स्थापयामि ॥ आसनादि षोडशोपचारैः पूजयेत् ॥

**पूजनं कुर्यात्:**–आसनार्थे पुष्पाणि समर्पयामि ॥ पादयोः पाद्यं समर्पयामि ॥ हस्तयोः अर्घ्यं समर्पयामि ॥ मुखे आचमनीयं जलं समर्पयामि ॥ सर्वांगे स्नानं समर्पयामि ॥ मिश्रित पंचामृत स्नानं समर्पयामि ॥ शुद्धोदक स्नानं समर्पयामि ॥ वस्त्रं समर्पयामि ॥ यज्ञोपवीतं समर्पयामि ॥ आचमनीयं जलं समर्पयामि ॥ उपवस्त्रं समर्पयामि ॥ चन्दनं समर्पयामि ॥ गंधं समर्पयामि ॥ अक्षतान् समर्पयामि ॥ पुष्पाणि समर्पयामि ॥ परिमलद्रव्याणि समर्पयामि ॥ सुगंधितैलं समर्पयामि ॥ धूपं आघ्रापयामि ॥ दीपं दर्शयामि ॥ नैवेद्यं निवेदयामि ॥ आचमनीयं जलं समर्पयामि ॥ ऋतुफलं समर्पयामि ॥ ताम्बूलं समर्पयामि ॥ द्रव्यदक्षिणां समर्पयामि ॥ श्रीफलं समर्पयामि ॥ पुष्पआरार्तिकं समर्पयामि ॥

**मन्त्रपुष्पांजलि:**–ये वास्तु देवाः भुवन प्रधान शिख्यादिका वास्तुगण प्रतिष्ठा । पुष्पाञ्जलिं मे सुमनोवदातं गृहन्तु देवाः

मम कार्य सिद्धिः॥ प्रदक्षिणां समर्पयामि॥ प्रार्थना पूर्वक नमस्कारं समर्पयामि॥

**मण्डलाग्रे पायसबलिं दद्यात्ः**–ॐअमीवहा वास्तोष्पते विश्वा रूपाण्याविशन्। सखा सुशेवऽएधिनः स्वाहा। ॐवास्तु पुरुषाय बलिद्रव्याय नमः। संपूज्य भो शिख्यादि गणा सहिता वास्तुपुरुष इमं बलिं समर्पयामि। **जलमुत्सृजेत्**॥

**प्रार्थनाः**–भो वास्तु पुरुष इमं बलिं गृहाण गृहाण मम (यजमानस्य) गृहे आयु कर्ता क्षेम कर्ता शान्ति कर्ता पुष्टि कर्ता तुष्टि कर्ता निर्विध्न कर्ता कल्याण कर्ता भव।

**नमस्कारः**– नमामि वास्तु पुरुष सशिख्यादि गणवृतः।
पूजां बलिं गृहाणेमाम् सोम्यो भवतु सर्वदा॥

अनेन पूजा बलि दानेन शिख्यादि वास्तु मण्डलस्थ देवताभिः सह वास्तु पुरुषः प्रीयताम्॥

## ॥ योगिनी मण्डल पूजनम्॥

वाम भागे वेद्युपरि वस्त्रं प्रसार्य तदुपरि चतुः षष्टि कोष्ट्ठानि विधाय तस्योपरि त्रीणि त्रिकोणानि कृत्वा कमेण दक्षिणतः आरभ्योदगन्ता कलशानि प्रतिष्ठाप्य तत्र महाकालीं महालक्ष्मीं महासरस्वतीं च पूजयेत्। चतुः षष्टियोगिन्य प्रागन्ता उदगन्ता वा पूजयेत्

**संकल्पः**–देशकालौ संकीर्त्य अमुकोऽहं अस्मिन् यज्ञे महाकाली महालक्ष्मी महासरस्वती पूजन पूर्वक दिव्यादि चतुः षष्टि योगिनीनां स्थापनं पूजनं बलिदानम् च करिष्ये।

**ध्यान्ः**–आवाहयाम्यहं देवीर्योगिनीः परमेश्वरीः। योगाभ्यासेन संतुष्टाः परं ध्यानसमन्विताः॥ दिव्यकुण्डलसंकाशा दिव्यज्वाला स्त्रिलोचनाः। मूर्तिमतीर्ह्यमूर्त्ताश्च उग्राश्चैवोग्ररूपिणीः॥ अनेकभावसंयुक्ताः संसारार्णवतारिणीः। यज्ञे कुर्वन्तु निर्विघ्नं

श्रेयो यच्छन्तु मातरः॥

**१–प्रथमकलशपूर्णपात्रोपरिः**–ॐअम्बे अम्बिकेऽम्बालिके न मा नयति कश्चन । ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम्॥ ॐ भूर्भुवः स्वः **महाकाल्यै नमः** । महाकालीमावाहयामि स्थापयामि ॥

**२–तदुत्तरतः द्वितीयकलश पूर्णपात्रोपरिः**–ॐ श्रीश्चते लक्ष्मीश्चपत्क्न्या बहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौऽव्यात्तम् । इष्णन्निषाणा मुम्मऽइषाण सर्वलोकम्मऽइषाण ॥ ॐ भूर्भुवः स्वः **महालक्ष्म्यै नमः** । महालक्ष्मीमावाहयामि स्थापयामि ॥

**३–तदुत्तरतस्तृतीयकलश पूर्णपात्रोपरिः**–ॐ पावकानः सरस्वती वाजे भिर्वाजिनीवती । यज्ञं वष्टुधियावसुः॥ ॐ भूर्भुवः स्वः **महासरस्वत्यै नमः** । महासरस्वतीमावाहयामि स्थापयामि ॥

**प्रागन्तात्–प्रथमाष्ट पंक्तिः–**

१–ॐतमीशानं जगतस्तस्थुषस्पतिं धियञ्जिन्वमवसे हूमहे वयम् । पूषा नो यथा वेदसामसद् वृधे रक्षिता पायुरदब्धः स्वस्तये ॥ **ॐ भूर्भुवः स्वः दिव्ययोगायै नमः** । दिव्य योगिनीमावाहयामि स्थापयामि ॥

२–ॐआ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः शूर ऽ इषव्योतिव्याधी महारथो जायतां दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां निकामे–निकामे नः पर्जन्यो वर्षतु फलवत्यो नऽ ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम्॥ ॐ भूर्भुवः स्वः **महायोगायै नमः** । महायोगिनीमावाहयामि स्थापयामि ॥

३–ॐमहाँ३॥इन्द्रो वज्रहस्तः षोडशी शर्म यच्छतु हन्तुपाप्मानं योस्मान्द्वेष्टि उपयामगृहीतोसि महेन्द्राय त्वैषते योनिर्महेन्द्राय त्त्वा॥ ॐ भूर्भुवः स्वः **सिद्धयोगायै नमः** । सिद्ध

योगिनीमावाहयामि स्थापयामि ॥

४–ॐ आयङ्गौ:पृश्निरक्रमीदसन् मातरं पुर: । पितरं च प्रयन्त्स्व:॥ ॐ भूर्भुव: स्व: **गणेश्वर्यै नम:** । गणेश्वरीमावाहयामि स्थापयामि ॥

५–ॐआदित्यं गर्भं पयसा समङ्‌धि सहस्रस्य प्रतिमां विश्वरूपम् । परिवृङ्‌धि हरसा माभिमथंस्था: शतायुषं कृणुहि चीयमान: ॥ ॐ भूर्भुव: स्व: **प्रेताक्ष्यै नम:** ।

प्रेताक्षीमावाहयामि स्थापयामि ॥

६–ॐ स्वर्ण घर्म्म: स्वाहा स्वर्णार्क: स्वाहा स्वर्ण शुक्क्र: स्वाहा स्वर्ण ज्योति: स्वाहा स्वर्ण सूर्य: स्वाहा ॥ ॐ भूर्भुव: स्व: **डाकिन्यै नम:** । डाकिनीमावाहयामि स्थापयामि ॥

७–ॐसत्यञ्चमे श्रद्धाचमे जगच्चमे धनञ्चमे विश्वञ्चमे महश्चमे क्रीडाचमे मोदश्चमे जातञ्चमे जनिष्यमाणञ्चमे सूक्तञ्चमेसुकृतञ्चमे यज्ञेनकल्पन्ताम् ॥

ॐ भूर्भुव: स्व: **काल्यै नम:** । कालीमावाहयामि स्थापयामि॥

८–ॐभायै दार्व्वाहारं प्रभायाऽअग्ग्रेधम्ब्रध्नस्य विष्टपाया भिषेक्तारं वर्षिष्ठ्ठाय नाकाय परिवेष्टारं देवलोकाय पेशितारं मनुष्यलोकाय प्रकरितार थं सर्वेब्भ्यो लोकेब्भ्यऽ उपसेक्तरमवऽ ऋत्यै व्वधायोपमन्थि तारम्मेधाय व्वास: पल्पूलीं प्रकामाय रजयित्रीम् ॥ ॐ भूर्भुव: स्व: **कालरात्र्यै नम:** । कालरात्रीमावाहयामि स्थापयामि ॥

**द्वितीषष्टक पंक्ति:–**

९–ॐजिह्वा मे भद्रं व्वाङ्महो मनो मन्न्यु: स्वराड् भाम: । प्रमोदाऽअङ्गुली रङ्गानि मित्रं मे सह: ॥ ॐ भूर्भुव: स्व: **निशाचर्यै नम:** । निशाचरीमावाहयामि स्थापयामि ॥

१०–ॐॐहिंकाराय स्वाहा हिंकृतायस्वाहा क्रंदतेस्वाहा वक्रंदायस्वाहा प्रोथतेस्वाहा प्रप्रोथायस्वाहा गन्धायस्वाहा

घ्रातायस्वाहा निविष्टायस्वाहोपविष्टायस्वाहा सन्दितायस्वाहा वल्गाते स्वाहा सीनाय स्वाहा शयानायस्वाहा स्वपतेस्वाहा जाग्रतेस्वाहा कूजतेस्वाहा प्रबुद्धायस्वाहा विजृम्भमाणायस्वाहा विचृत्तायस्वाहा सꣳ हानाय स्वाहोपस्थितायस्वाहायनाय स्वाहा प्रायणायस्वाहा ॥ ॐ भूर्भुवः स्वः **हुँकार्यै नमः** । हुँकारीमावाहयामि स्थापयामि ॥

११–ॐअग्निश्चमे घर्म्मश्चमेर्क्कश्चमे सूर्य्यश्च्चमे प्राणश्च्चमे श्वमेधश्च्चमे पृथिवीचमेदितिश्चमे दितिश्चमे द्यौश्चमेङ्गुलयः शक्करयो दिशश्चमे यज्ञेनकल्प्पन्ताम् ॥ ॐ भूर्भुवः स्वः **सिद्धि वैतालिन्यै नमः** । सिद्धिवैतालीमावाहयामि स्थापयामि ॥

१२–ॐ पूषन् तवव्रते वयन्न रिष्येम कदाचन । स्तोता रस्तऽ इहस्मसि ॥ ॐ भूर्भुवः स्वः **खर्पर्यै** नमः । खर्परीमावाहयामि स्थापयामि ॥

१३–ॐ वेद्या व्वेदिः समाप्यते बर्हिषा बर्हिरिन्द्रियम् । यूपेन यूपऽ आप्यते प्रणीतोऽ अग्निरग्निना ॥ ॐ भूर्भुवः स्वः **भूतयामिन्यै नमः** । भूतयामिनीमावाहयामि स्थापयामि ॥

१४–ॐअयमग्निः सहस्त्रिणो व्वाजस्य शतिनस्पतिः । मूर्द्धा कवी रयीणाम् ॥ ॐ भूर्भुवः स्वः **ऊर्ध्वकेश्यै नमः** । ऊर्ध्व केशीमावाहयामि स्थापयामि ॥

१५–ॐ इमं मे वरुण श्रुधी हवमद्या च मृडय। त्वा मवस्युराचके॥ ॐ भूर्भुवः स्वः **विरूपाक्ष्यै नमः** । विरूपाक्षीमावाहयामि स्थापयामि ॥

१६–ॐ यमाय यमसूमर्थर्व्वभ्यो वतोका ꣳ संव्वत्सराय पर्य्यायिणीं परिवत्सराया विजाता मिदावत्सराया तीत्वरी

मिद्द्वत्सराय तिष्कद्वरीं व्वत्सराय विजर्जराथं संवत्सराय पलिक्नी मृभुभ्योऽ जिनसन्ध ठं साध्येभ्यश्चर्मम्नम् ॥ ॐ भूर्भुवः स्वः **शुष्काङ्ग्यै नमः** । शुष्काङ्गीमावाहयामि स्थापयामि ॥८॥

**तृतीयाष्टक् पंक्ति :-**

१७–ॐअसि यमो अस्यादित्योऽ अर्वन्नसि त्रितो गुह्येन व्व्रतेन । असि सोमेनसमया व्विपृक्त्तऽ आहुस्ते त्रीणि दिवि बन्धनानि ॥ ॐ भूर्भुवः स्वः **मांसभोजिन्यै नमः** । मांस भोजिनीमावाहयामि स्थापयामि ॥

१८–ॐमित्रस्य चर्षणी धृतोवो देवस्य सानसि । द्युम्नं चित्र श्रवस्तमम् ॥ ॐ भूर्भुवः स्वः **फेत्कार्यै** नमः । फेत्कारीमावाहयामि स्थापयामि ॥

१९–ॐ अग्रे बृहन्नुषसामूर्ध्वो ऽ अस्थान्निर्जगन्वान्तमसो ज्ज्योतिषागात् ॥ अग्निर्भानुना रुशता स्वङ्गऽ आजातोव्विश्वा सद्मान्यप्प्राः ॥ ॐ भूर्भुवः स्वः **वीर भद्राक्ष्यै नमः** । वीरभद्राक्षीमावाहयामि स्थापयामि ॥

२०–ॐ भगप्प्रणेतर्भग सत्यराधो भगेमान्धिय मुदवाददन्नः । भगप्प्रनो जनय गोभिरश्वैर्भग प्प्रनृभिर्न्नृवन्तः स्याम ॥ ॐ भूर्भुवः स्वः **धूम्राक्ष्यै नमः** । धूम्राक्षीमावाहयामि स्थापयामि ॥

२१–ॐ सुपर्णोसि गरुत्मांस्त्रिवृत्ते शिरो गायत्रं चक्षुर्बृहद्रथन्तरे पक्षौ । स्तोमऽ आत्मा छन्दाथं स्यङ्गानि यजूथंषि नाम । साम ते तनूर्वामदेव्यं यज्ञायज्ञियं पुच्छं धिष्ण्याः शफाः । सुपर्णोसि गरुत्मान्दिवं गच्छ स्वः पत ॥ ॐ भूर्भुवः स्वः **कलह प्रियायै नमः** । कलहप्रियामावाहयामि स्थापयामि ॥

२२–ॐपितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः स्वधायिभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः। अक्षन् पितरोमीमदन्त पितरोतीतृपन्त पितरः पितरः शुन्ध

वम् ॥ ॐ भूर्भुवः स्वः **रक्तायै नमः** । रक्तामावाहयामि स्थापयामि ॥

२३–ॐ वरुणस्योत्तंभनमसि व्वरुणस्यस्कंभसर्जनीस्त्थो व्वरुणस्यऋृत सदन्यसि व्वरुण ऋृतसदन मसि व्वरुणस्य ऋृत सदनमासीद ॥ ॐ भूर्भुवः स्वः **घोर रक्ताक्ष्यै नमः** । घोररक्ताक्षीमावाहयामि स्थापयामि ॥

२४–ॐ वरुणः प्राविता भुवन्मित्रवोविश्वाभिरूतिभिः । करतान्नः सुराधसः ॥ ॐ भूर्भुवः स्वः **विरूपाक्ष्यै नमः** । विरूपाक्षीमावाहयामि स्थापयामि ॥

**चतुर्थाष्ट पंक्तिः क्रमेणः–**

२५–ॐ ह र्ठ सः शुचि षद्वसुरन्तरिक्ष सद्धोता व्वेदि षद तिथिर्दुरोणसत् । नृषद्वरस द्वृत सद्व्योम सदब्जा गोजाऽ ऋृतजाऽअद्रिजा ऽऋृतम् बृहत् ॥ ॐ भूर्भुवः स्वः **भयंकर्यै नमः** । भयंकरीमावाहयामि स्थापयामि ॥

२६–ॐ सुसन्दृशं त्वा व्वयं मघवन् वन्दिषीमहि ॥ प्रनूनं पूर्ण बन्धुरः स्तुतो यासि वशाँ २॥ ऽअनु योजान्विद्रते हरी ॥ ॐ भूर्भुवः स्वः **चौरिकायै नमः** । चौरिकामावाहयामि स्थापयामि ॥

२७–ॐ प्रतिपदसि प्रतिपदे त्वानुपदस्य नुपदे त्वा सम्पदसि सम्पदे त्वा तेजोऽसि तेजसे त्वा ॥ ॐ भूर्भुवः स्वः **मारिकायै नमः** । मारीकामावाहयामि स्थापयामि ॥

२८–ॐ देवीरापो ऽअपान्नपाद्यो वऽऊर्म्मिर्हविष्ष्य ऽ इन्द्रियावान्मदिन्तमः । तं देवेभ्यो देवत्रा दत्त शुक्रपेभ्यो येषां भागस्थ स्वाहा ॥ ॐ भूर्भुवः स्वः **चण्ड्यै नमः** । चण्डीमावाहयामि स्थापयामि ॥

२९–ॐदेवी द्वारो ऽ अश्विना भिषजेन्द्रे सरस्वती । प्राणं न व्वीर्यं नसि द्वारो दधुरिन्द्रियं व्वसुवने व्वसुधेयस्य व्यन्तु. यज

॥ ॐ भूर्भुवः स्वः **वाराह्यै नमः** । वाराहीमावाहयामि स्थापयामि ॥
३०–ॐ देवी जोष्ट्री सरस्वत्यश्विनेन्द्रमवर्धयन् । श्रोत्रं न कर्ण्णयोर्यशो जोष्ट्रीभ्यां दधुरिन्द्रियं व्वसुवने व्वसुधेयस्य व्यन्तु यज ॥ ॐ भूर्भुवः स्वः **मुण्डधारिण्यै नमः** ।
मुण्डधारिणीमावाहयामि स्थापयामि ॥
३१–ॐदेवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । अश्विनोर्भैषज्ज्येन तेजसे ब्रह्मवर्च्चसायाभि षिञ्चामि सरस्वत्यै भैषज्ज्येन व्वीर्यायान्नाद्याया भिषिञ्चामीन्द्रस्येन्द्रियेण बलाय श्रियै यशसेऽ भिषिञ्चामि ॥ ॐ भूर्भुवः स्वः **भैरव्यै नमः** ।
भैरवीमावाहयामि स्थापयामि ॥
३२–ॐकदा चनस्तरीरसि नेन्द्र सश्चसि दाशुषे । उपोपेन्नु मघवन् भूयऽ ऽइन्नुते दानं देवस्य पृच्यते ॥ ॐ भूर्भुवः स्वः **चक्रिण्यै नमः** । चक्रिणीमावाहयामि स्थापयामि ॥८॥
**पंचमाष्टक पंक्ति क्रमेणः–**
३३–ॐभद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेमहि देवहितं यदायुः ॥ ॐ भूर्भुवः स्वः **क्रोधायै नमः** । क्रोधामावाहयामि स्थापयामि ॥
३४–ॐ इषे त्वोर्ज्जे त्वा वयव स्थ देवोवः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणऽ आप्यायध्वमघ्न्याऽ इंद्राय भागं प्रजावतीरनमीवाऽ अयक्ष्मा मा वस्तेनऽ ईशतमाघश ꣳसोध्रुवाऽ अस्मिन्गोपतौ स्यात बह्वीर्यजमानस्य पशून्पाहि ॥ ॐ भूर्भुवः स्वः **दुर्मुख्यै नमः** । दुर्मुखीमावाहयामि स्थापयामि ॥
३५–ॐ देवी द्यावा पृथिवी मखस्य वामद्य शिरो राध्यासं देवयजने पृथिव्याः । मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ ॐ भूर्भुवः स्वः **प्रेत वाहिन्यै नमः** । प्रेतवाहिनीमावाहयामि स्थापयामि ॥
३६–ॐ विश्वानि देव सवितर्दुरितानि परासुव । यद्भद्रन्तन्नऽ

आसुव ॥ ॐ भूर्भुवः स्वः **कंटक्यै** नमः । कंटकीमावाहयामि स्थापयामि ॥

३७–ॐ असुन्वन्तम यजमान मिच्छस्ते नस्येत्या मन्विहि तस्करस्य । अन्यमस्म दिच्छ सा तऽ इत्या नमो देवि निर्ऋते तुभ्यमस्तु ॥ ॐ भूर्भुवः स्वः **दीर्घ लम्बोष्ठ्यै नमः** । दीर्घलम्बोष्ठीमावाहयामि स्थापयामि ॥

३८–ॐअग्निश्चमे घर्म्मश्चमेर्क्कश्चमे सूर्य्यश्च्चमे प्प्राणश्च्चमे श्वमेधश्च्चमे पृथिवीचमेदितिश्चमे दितिश्चमे द्यौश्चमेङ्गुलयः शक्करयो दिशश्चमे यज्ञेनकल्पन्ताम् ॥ ॐ भूर्भुवः स्वः **मालिन्यै नमः** । मालिनीमावाहयामि स्थापयामि ॥

३९–ॐ बह्वीनां पिता व्बहुरस्य पुत्त्रश्चिच्चश्च्चा कृणोति समनावगत्य । इषुधिः सङ्काः पृतनाश्च सर्वाः पृष्ठे निनद्धो जयति प्प्रसूतः ॥ ॐ भूर्भुवः स्वः **मंत्र योगिन्यै नमः** । मंत्र योगिनीमावाहयामि स्थापयामि ॥

४०–ॐनमस्ते रुद्र मन्यव ऽउतोत ऽ इषवे नमः । बाहुभ्या मुतते नमः ॥ ॐ भूर्भुवः स्वः **कालाग्न्यै नमः** । कालाग्नीमावाहयामि स्थापयामि ॥८॥

**षष्ठाष्टक पंक्ति क्रमेण:–**

४१–ॐऋतञ्चमे मृतञ्चमे यक्ष्मञ्चमे नामयच्चमे जीवातुश्चमे दीर्ग्घा युत्वञ्चमे नमित्रञ्चमे भयञ्चमे सुखञ्चमे शयञ्चमे सूषाश्चमे सुदिनञ्चमे यज्ञेनकल्पन्ताम् ॥ ॐ भूर्भुवः स्वः **मोहिन्यै नमः** । मोहिनीमावाहयामि स्थापयामि ॥

४२–ॐ तेऽ आचरन्तो समनेव योषा मातेव पुत्रं बिभ्रतामुपस्त्थे । अपशत्रूँन्विध्यता छं संविदाने ऽ आर्त्नीऽ इमे व्विष्फुरन्ती अमित्रान् ॥ ॐ भूर्भुवः स्वः **चक्रयै नमः** । चक्रीमावाहयामि स्थापयामि ॥

४३–ॐ वेद्या वेदिः समाप्यते वर्हिषा वर्हिरिन्द्रियम् । यूपेन यूपऽ आप्यते प्रणीतो ऽ अग्नि रग्निना ॥ ॐ भूर्भुवः स्वः **कंकाल्यै**

**नमः** । कंकालीमावाहयामि स्थापयामि ॥

४४–ॐपावकानः सरस्वती व्वाजे भिर्वा जिनीवती यज्ञं वष्टु धियावसुः ॥ ॐ भूर्भुवः स्वः **भुवनेश्वर्यै नमः** । भुवनेश्वरीमावाहयामि स्थापयामि ॥

४५–ॐअस्कन्नमद्य देवेभ्य ऽआज्य ठं संभ्रियासममिङ्घ्रणा व्विष्णो मा त्वा वक्र मिषं वसुमति मग्रे ते च्छायामुपस्त्थेषं व्विष्णो स्थानमसीतऽ इन्द्रो व्वीर्यमकृणोदूर्ध्वोऽध्वर ऽआस्थात् ॥ ॐ भूर्भुवः स्वः **कुण्डलाक्ष्यै नमः** । कुण्डलाक्षीमावाहयामि स्थापयामि ॥

४६–ॐ तेऽ आचरन्तो समनेव योषा मातेव पुत्रं बिभ्रतामुपस्त्थे । अपशत्रूँन्विध्यता ठं संविदाने ऽ आर्त्नीऽ इमे व्विष्फुरन्ती अमित्रान् ॥ ॐ भूर्भुवः स्वः **लुह्यै नमः** । लुहीमावाहयामि स्थापयामि ॥

४७–ॐ मही द्यौः पृथिवी च नं ऽ इमं यज्ञम्मिमिक्षताम् पिपृतान्नो भरीमभिः ॥ ॐ भूर्भुवः स्वः **लक्ष्म्यै नमः** । लक्ष्मीमावाहयामि स्थापयामि ॥

४८–ॐउपयाम गृहीतो ऽसि सावित्रोसि चनोधाश्श्चनोधा ऽअसि चनो मयि धेहि । जिन्व यज्ञपतिं भगाय देवाय त्वा सवित्रे ॥ ॐ भूर्भुवः स्वः **यमदूत्यै नमः** । यमदूतीमावाहयामि स्थापयामि ॥

**सप्तमाष्टक पंक्ति क्रमेणः–**

४९–ॐआप्या यस्व समेतु ते विश्वतः सोम वृष्ण्यम् । भवा व्वाजस्य सङ्गथे ॥ॐ भूर्भुवः स्वः **करालिन्यै नमः** । करालिनीमावाहयामि स्थापयामि ॥

५०–ॐकार्षिरसि समुद्रस्य त्वा क्षित्याऽ उन्नयामि । समापो अद्भिरग्मत समोषधीभिरोषधीः ॥ ॐ भूर्भुवः स्वः **कौशिक्यै नमः** । कौशिकीमावाहयामि स्थापयामि ॥

५१–ॐ त्र्यम्बकं यजामहे सुगंधिम्पुष्टिवर्द्धनम् । उर्वारुकमिव

बंधनान्मृत्योर्मुक्षीय माऽमृतात् । ॐ भूर्भुवः स्वः **भक्षिण्यै नमः**। भक्षणीमावाहयामि स्थापयामि ॥

५२–ॐ श्रीश्चते लक्ष्मीश्च पत्क्ग्ना बहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्याप्तम् । इष्णन्निषाणा मुम्मऽइषाण सर्वलोकम्मऽ इषण ॥ ॐ भूर्भुवः स्वः **यक्ष्यै नमः** । यक्षीमावाहयामि स्थापयामि ॥

५३–ॐविष्णोरराटमसिविष्णोः श्नप्त्रेस्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोसि । वैष्णवमसि विष्णवेत्वा ॥ ॐ भूर्भुवः स्वः **कौमार्यै नमः** । कौमारीमावाहयामि स्थापयामि ॥

५४–ॐब्राह्मणमद्य व्विदेयं पितृमन्तं पैतृमत्यमृषिमार्षेय ठं सुधातु दक्षिणम् । अस्मद्राता देवत्रा गच्छत प्रदातारमाविशत ॥ ॐ भूर्भुवः स्वः **यन्त्रवाहिन्यै नमः** । यन्त्रवाहिनीमावाहयामि स्थापयामि ॥

५५–ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेमहि देवहितं यदायुः ॥ ॐ भूर्भुवः स्वः **विशालायै नमः** । विशालामावाहयामि स्थापयामि ॥

५६–ॐ एकाचमे तिस्त्रश्चमे तिस्त्रश्चमे पञ्चचमे पञ्चचमे सप्तचमे सप्तचमे नवचमे नवच मऽ एकादशाचमऽ एकादशाचमे त्रयोदशाचमे त्रयोदशाचमे पञ्चदशाचमे पञ्च दशाचमे सप्तदशाचमे सप्तदशाचमे नवदशाचमे नवदशाचमऽ एकविर्ठ शतिश्चमऽ एकविर्ठ शतिश्च मे त्रयोविर्ठ शतिश्चमे त्रयोविर्ठ शतिश्चमे पञ्चविर्ठशतिश्चमे पञ्चविर्ठशतिश्चमे सप्तविर्ठशतिश्चमे सप्तविर्ठ शतिश्चमे नवविर्ठ शतिश्चमे नवविर्ठ शतिश्चमऽ एकत्रिर्ठ शच्चमऽ एकत्रिर्ठ शच्चमे त्रयस्त्रिर्ठ शच्चमे यज्ञेनकल्पन्ताम् ॥ ॐ भूर्भुवः स्वः **कामुक्यै नमः** । कामुकीमावाहयामि स्थापयामि ॥

**अष्टमाष्टक पंक्ति क्रमेण:-**

५७-ॐ प्रेताजयता नरऽ इन्द्रो व: शर्म्मयच्छतु । उग्राव: सन्तु बाहबोनाधृष्या यथासथ ॥ ॐ भूर्भुव: स्व: **व्याघ्र्यै नम:** । व्याघ्रीमावाहयामि स्थापयामि ॥

५८-ॐअसङ्ख्याता सहस्राणियेरुद्राऽ अधिभूम्याम्। तेषा थ्रं सहस्रयोजनेवधन्वा नितन्मसि ॥ ॐ भूर्भुव: स्व: **यक्षिण्यै नम:** । यक्षिणीमावाहयामि स्थापयामि ॥

५९-ॐ सुपर्णोसि गरुत्मांस्त्रिवृत्ते शिरोगायत्रं चक्षुर्बृहद्रथन्तरेपक्षौ । स्तोमऽ आत्माछन्दाथ्रं स्यङ्गानि यजूथ्रंषिनाम । साम तेतनूर्वामदेव्यं यज्ञायज्ञियंपुच्छं धिष्ण्या: शफा: । सुपर्णोसि गरुत्मान्दिवं गच्छ स्व: पत ॥ ॐ भूर्भुव: स्व: **प्रेतभूषिण्यै नम:** । प्रेतभूषिणीमा वाहयामि स्थापयामि ॥

६०-ॐ याते रुद्रशिवातनूरघोरा पापकाशिनी । तयानस्तन्वाशं तमयागिरिशंताभिचा कशीहि ॥ ॐ भूर्भुव: स्व: **धूर्जटायै नम:**। धूर्जटामावाहयामि स्थापयामि ॥

६१-ॐ देवी द्यावापृथिवी मखस्य वामद्य शिरो राध्यासं देवयजने पृथिव्या: । मखायत्वा मखस्य त्वा शीर्ष्णे ॥ ॐ भूर्भुव: स्व: **विकटायै नम:** । विकटामावाहयामि स्थापयामि ॥

६२-ॐइदं विष्णुर्विचक्रमे त्रेधानिदधे पदम् । समूढमस्यपा थ्रंसुरेस्वाहा ॥ ॐ भूर्भुव: स्व: **घोरायै नम:** । घोरामावाहयामि स्थापयामि ॥

६३-ॐव्वृष्ण ऽऊर्मिरसि राष्ट्रदा राष्ट्रं मे देहि स्वाहा वृष्णऽ ऊर्म्मिरसि राष्ट्रदा राष्ट्रममुष्मै देहि । वृष सेनो ऽसि राष्ट्रदा राष्ट्रं मे देहि स्वाहा वृषसेनोऽसि राष्ट्रदा राष्ट्रममुष्मै देहि ॥ ॐ भूर्भुव: स्व: **कपालायै नम:** । कपालामावाहयामि स्थापयामि ॥

६४–ॐभायै दार्व्वा हारं प्रभायाऽ अग्न्येधं ब्रध्नस्य व्विष्टपायाभिषेक्तारं वर्षिष्ठाय नाकाय परिवेष्टारं देवलोकाय पेशितारं मनुष्य लोकाय प्रकरितार ठं सर्वेभ्यो लोकेभ्योऽ उपसेक्तारमव ऽऋत्यै वधायोपमन्थितारं मेधाय व्वासः पल्पूलीं प्रकामाय रजयित्रीम् ॥ ॐ भूर्भुवः स्वः लांग्ल्यै नमः । लांगलीमावाहयामि स्थापयामि ॥

**प्रतिष्ठाः**–ॐमनो जुतिर्ज्जुषतामाज्यस्य बृहस्पति र्य्यज्ञमिमन्तनोत्वरिष्टं यज्ञ ठं समिमन्दधातु । विश्वे देवासऽइह मादयन्तामों ३ँ॥ म्प्रतिष्ठ ॥

श्री महाकाली महालक्ष्मी महासरस्वती सहिता दिव्यादि चतुः षष्ठि योगिन्यः सुप्रतिष्ठिताः वरदाः भवन्तु ॥ ततः षोडशोपचारैः पूजयेत् ॥

**पूजनं कुर्यात्ः**–आसनार्थे पुष्पाणि समर्पयामि ॥ पादयोः पाद्यं समर्पयामि ॥ हस्तयोः अर्घ्यं समर्पयामि ॥ मुखे आचमनीयं जलं समर्पयामि ॥ सर्वांगे स्नानं समर्पयामि ॥ मिश्रित पंचामृत स्नानं समर्पयामि ॥ शुद्धोदक स्नानं समर्पयामि ॥ वस्त्रं समर्पयामि ॥ यज्ञोपवीतं समर्पयामि ॥ आचमनीयं जलं समर्पयामि ॥ उपवस्त्रं समर्पयामि ॥ चन्दनं समर्पयामि ॥ गंधं समर्पयामि ॥ अक्षतान् समर्पयामि ॥ पुष्पाणि समर्पयामि ॥ परिमलद्रव्याणि समर्पयामि ॥ सुगंधितैलं समर्पयामि ॥ धूपं आघ्रापयामि ॥ दीपं दर्शयामि ॥ नैवेद्यं निवेदयामि ॥ आचमनीयं जलं समर्पयामि ॥ ऋतुफलं समर्पयामि ॥ ताम्बूलं समर्पयामि ॥ द्रव्यदक्षिणां समर्पयामि ॥ श्रीफलं समर्पयामि ॥

**पुष्पाञ्जलिः**–दिव्यादि योगिन्यः महा प्रभावाः भूमौ तथा खे दिवि संचरतः । पुष्पाञ्जलि मञ्जुल केसराढ्यां किरामि तत्पाद वराम्बुजेषु ॥

**मण्डलाग्रे पायस बलिं दद्यात्:-**ॐयोगे योगे तवस्तरं वाजे वाजे हवामहे । सखाय ऽ इन्द्रमूतये ॥ ॐ योगिन्य: बलि दद्यात् नमः । गंधादिभिः सम्पूजयेत् ।

भो महाकाली महालक्ष्मी महासरस्वती देवता दिव्यादि चतु: षष्टियोगिनीभ्य: इमं बलिं गृह्णन्तु । जल मुत्सृजेत् ।

**प्रार्थना:-**भो दिव्यादि चतु: षष्टि योगिन्य: इमं सदीप पायसान्न बलिं गृह्णत गृह्णत मम गृहे आयु कर्ता क्षेम कर्ता शान्ति कर्ता पुष्टि कर्ता तुष्टि कर्ता वरदा भवत ॥

अनया पूजया श्रीमहाकाली महालक्ष्मी महासरस्वती सहिता: दिव्यादि चतु: षष्टि योगिन्य: प्रीयन्ताम् न मम ॥

## ॥ क्षेत्रपाल मण्ड़ल पूजनम् ॥

**संकल्प:-**देशकालौ संकीर्त्य मया पूर्वोच्चारित संकल्पाऽङ्गतया अजरादि पावन पर्यन्तानां क्षेत्रपाल मण्डलस्थ देवानामावाहनं पूर्वकं पूजनं बलि दानञ्च करिष्ये ॥

क्षेत्रपाल पीठे वस्त्रं प्रसार्य नव कोष्ठानि कुर्यात् । अन्य दिक्षु विदिक्षु अष्ट कोष्ठेषु षड्दलानि कृत्वा मध्ये अष्ट दलोपरि कलशं स्थापयेत् अजरादीन् पूजयेत् ॥

**पूर्व कोष्ठे षड्दले:-**

१-ॐइमौ ते पक्षावजरौ पतत्रिणौ याम्या छं रक्षा छं स्यपह ठ स्यग्ने । ताभ्यां पतेम सुकृतामु लोकं यत्रऽऋषयो जग्मु: प्रथमजा: पुराणा: ॥ ॐ भूर्भुव: स्व: **अजराय नम:** । अजरमावाहयामि स्थापयामि ॥

२-ॐप्रथमा वा छं सरथिना सुवर्णा देवौ पश्यन्तौ भुवनानि विश्वा । अपिप्रयं चोदना वां मिमाना होतारा ज्योति: प्रदिशा दिशन्ता ॥ ॐ भूर्भुव: स्व: **व्यापकाय नम:** । व्यापकमावाहयामि स्थापयामि ॥

३–ॐ इन्द्रस्य वज्रोऽसि मित्रा वरुणयोस्त्वा प्रशास्त्रोः प्रशिषा युनज्मि । अव्यथायै त्वा स्वधायै त्वाऽरिष्टो अर्जुनो मरुतां प्रसवेन जयापाम मनसा समिन्द्रियेण ॥ ॐ भूर्भुवः स्वः **इन्द्रचौराय नमः** । इन्द्रचौरमावाहयामि स्थापयामि ॥

४–ॐएवेदिन्द्रं वृषणं वज्रबाहुं वसिष्ठासोऽ अभ्यर्चन्त्यर्कैः । स नः स्तुतो वीरवद्धातु गोमद्यूयं पात स्वस्तिभिः सदा नः ॥ ॐ भूर्भुवःस्वः **इन्द्र मूर्तये नमः**। इन्द्र मूर्ति मावाहयामि स्थापयामि ॥

५–ॐउक्षा समुद्रो ऽअयणः सुपर्णः पूर्वस्य योनिं पितुराविवेश । मध्ये दिवो निहितः पृश्निरश्मा विचक्रमे रज सस्पात्यन्तौ ॥ ॐ भूर्भुवः स्वः **उक्षाय नमः** । उक्षमावाहयामि स्थापयामि ॥

६–ॐ यद्देवा देवहेडनं देवासश्च कृमा वयम् । अग्निर्मा तस्मा देनसो विश्वान्मुञ्चत्व ठं हसः ॥ ॐ भूर्भुवः स्वः **कूष्माण्डाय नमः** । कूष्माण्डमावाहयामि स्थापयामि ॥६॥

**अग्नि कोणे षडदले:-**

७–ॐस नऽइन्द्राय यज्यवे वरुणाय मरूद्भ्यः । वरिवो वित्परि स्त्रव ॥ ॐ भूर्भुवः स्वः **वरुणाय नमः** । वरुणमावाहयामि स्थापयामि ॥

८–ॐ बाहू मेबल मिन्द्रियथ्ठं हस्तौ मे कर्मवीर्यम् । आत्मा क्षत्रमुरो मम ॥ ॐ भूर्भुवः स्वः **बटुकाय नमः** । बटुकमावाहयामि स्थापयामि ॥

९–ॐ मुञ्चन्तु मा शपथ्यादथो वरुण्यादुत । अथो यमस्य पड्वीशात्सर्वस्माद् देव किल्विषात् ॥ ॐ भूर्भुवः स्वः **विमुक्ताय नमः** । विमुक्तमावाहयामि स्थापयामि ॥

१०–ॐकुर्वन्नेवेह कर्माणि जिजीविषेच्छत थ्ठं समाः । एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ॥ ॐ भूर्भुवः स्वः **लिप्तकाय नमः** । लिप्तमावाहयामि स्थापयामि ॥

११–ॐसन्न: सिन्धुरवभृथायोद्यत: समुद्रोऽभ्यवह्रियमाण: सलिल: प्रप्लुतो ययोरोजसा स्कभिता रजाथ्ठं सि वीर्येभिर्वीरतमा शविष्ठा। या पत्येते ऽअप्रतीता सहोभि र्विष्णुऽअगन्वरुणा पूर्वहूतौ ॥ ॐ भूर्भुव: स्व: **लीलाकाय नम:** । लीलाकमावाहयामि स्थापयामि॥

१२–ॐनमो गणेभ्यो गणपतिभ्यश्चवो नमोनमो व्व्रातेभ्यो व्व्रातपतिभ्यश्चवो नमोनमो गृत्सेभ्यो गृत्सपतिभ्यश्चवो नमोनमो व्विरूपेभ्यो व्विश्वरूपेभ्यश्चवो नमोनम: ॥ ॐ भूर्भुव: स्व: **एकदंष्ट्राय नम:**। एकदंष्ट्रमावाहयामि स्थापयामि ॥१२॥

**दक्षिण कोष्ठे षड्दले:–**

१३–ॐअर्मेभ्यो हस्तिपं तवायाश्वपं पुष्टयै गोपालं वीर्याया विपालं तेजसेऽजपाल मिरायै कीनाशं कीलालाय सुराकारं भद्राय गृहप ठें श्रेयसे वित्तधमाध्यक्ष्या यानुक्षत्तारम् ॥ ॐ भूर्भुव: स्व: **ऐरावताय नम:** । ऐरावतमावाहयामि स्थापयामि ॥

१४–ॐ याऽओषधी: पूर्वाजाता देवेभ्यस्त्रियुगं पुरा । मनै नु बभ्रूणामह थ्ठं शतं धामानि सप्त च ॥ ॐ भूर्भुव: स्व: **ओषधीघ्राय नम:** । ओषधीघ्रमावाहयामि स्थापयामि ॥

१५–ॐ त्र्यंबकं यजामहे सुगंधिम्पुष्टिवर्द्धनम् । उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय माऽमृतात् ॥ ॐ भूर्भुव: स्व: **बन्धनाय नम:** । बन्धनमावाहयामि स्थापयामि ॥

१६–ॐदेव सवित: प्रसुवयज्ञंप्रसुव यज्ञपतिं भगाय । दिव्यो गन्धर्व: केतपू: केतंन: पुनातु वाचस्पतिर्वाजं न: स्वदतु स्वाहा ॥ ॐ भूर्भुव: स्व: **दिव्यकायाय नम:** । दिव्यकायमावाहयामि स्थापयामि ॥

१७–ॐ सीसेन तन्त्र मनसा मनीषिणऽ ऊर्णासूत्रेण कवयो वयन्ति । अश्विना यज्ञथ्ठं सविता सरस्वतीन्द्रस्य रूपं वरुणो

भिषज्यन् ॥ ॐ भूर्भुवः स्वः **कम्बलाय नमः** । कम्बलमावाहयामि स्थापयामि ॥

१८–ॐआशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम् । सङ्क्रन्दनो निमिषऽ एकवीरः शत ꣳ सेनाऽअजयत्साकमिन्द्रः ॥ ॐ भूर्भुवः स्वः **भीषणाय नमः** । भीषणमावाहयामि स्थापयामि ॥१८॥

**नैऋत्य कोणे षड्दलेः–**

१९–ॐइमꣳ साहस्रꣳ शतधारमुत्सं व्यच्यमानꣳ सरिरस्य मध्ये । घृतं दुहाना मदितिं जनायाग्ने माहिꣳसीः परमे व्योमन् । गवयमारण्यमनु ते दिशामि तेन चिन्वान तन्वो निषीद । गवयं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छतु ॥ ॐ भूर्भुवः स्वः **गवयाय नमः** । गवयमावाहयामि स्थापयामि ॥

२०–ॐ कुम्भो वनिष्ठुर्जनिता शचीभिर्यस्मिन्नग्रे योन्यां गर्भोऽअन्तः । प्लाशिर्व्यक्तः शतधारऽउत्सो दुहे न कुम्भी स्वधां पितृभ्यः ॥ ॐ भूर्भुवः स्वः **घण्टाभिधाय नमः** । घण्टाभिधमावाहयामि स्थापयामि ॥

२१–ॐ आक्रन्दय बलमोजो न ऽआधा निष्टनिहि दुरिता बाधमानः । 'अप प्रोथदुन्दुभे दुच्छुनाऽ इतऽ इन्द्रस्य मुष्टिरसि वीडयस्व ॥ ॐ भूर्भुवः स्वः **व्यालाय नमः** । व्यालमावाहयामि स्थापयामि ॥

२२–ॐ इन्द्रा याहि तूतुजान ऽउप ब्रह्माणि हरिवः । सुते दधिष्व नश्चनः ॥ ॐ भूर्भुवः स्वः **अणुस्वरूपाय नमः** । अणुस्वरूपमावाहयामि स्थापयामि ॥

२३–ॐचन्द्रमा अप्स्वन्तरा सुपर्णो धावते दिवि । रयिं पिशङ्गं बहुलं पुरुस्पृह ꣳ हरिरेति कनिक्रदत् ॥ ॐ भूर्भुवः स्वः **चन्द्रवारुणाय नमः** । चन्द्रवारुणमावाहयामि स्थापयामि ॥

२४–ॐ प्रतिश्रुत्काया ऽ अर्त नं घोषाय भषमन्ताय बहुवादि

नमनन्ताय मुकर्थ्ठं शब्द याडम्बराघातं महसे व्वीणावादं कोशाय तूणवघ्ममवरस्पराय शंखध्मं वनाय व्वनपमन्न्यतोरण्याय दावपम् ॥ ॐ भूर्भुव: स्व: **पटाटोपाय नम:** । पटाटोपमावाहयामि स्थापयामि ॥२४॥

**पश्चिम कोणे षड्दले:-**

२५-ॐउग्ग्रँलोहिते न मित्र ठँ सौव्व्रत्येन रूद्रन्द्रौर्व्वत्ये नेन्द्रम्प्रक्रीडेनमरुतो बलेनसाद्ध्यान्प्रमुदा । भवस्य कण्ण्ठयर्ठ रुद्रस्यान्त: पार्श्व्यम्महा देवस्य यकृच्छर्व्वस्य व्वनिष्ठु: पशुपते: पुरीतत् ॥ ॐ भूर्भुव: स्व: **जटालाय नम:** । जटालमावाहयामि स्थापयामि ॥

२६-ॐ पवित्रेण पुनीहि मा शुक्रेण देव दीद्यत् । अग्ने क्रत्वा क्रतूँ२ऽरनु ॥ ॐ भूर्भुव: स्व: **क्रतवे नम:** । क्रतुमावाहयामि स्थापयामि ॥

२७-ॐआजिघ्र कलशं मह्या त्वा व्विशंत्विन्दव: । पुनरुर्ज्जा निवर्त्तस्व सा न: सहस्त्रं धुक्ष्वोरुधारा पयस्वती पुनर्म्माऽ ऽविशताद्रयि: ॥ ॐ भूर्भुव: स्व: **घण्टेश्वराय नम:** । घण्टेश्वरमावाहयामि स्थापयामि ॥

२८-ॐवायो शुक्रोऽ अयामिते मध्वोऽअग्रं दिविष्टिषु । आयाहि सोमपीतये स्पार्हो देव नियुत्वता ॥ ॐ भूर्भुव: स्व: **विटङ्काय नम:** । विटङ्कमावाहयामि स्थापयामि ॥

२९-ॐ दैव्या होताराऽ ऊर्ध्व मध्वरं नोऽग्ग्रेर्जिह्वामभि गृणीतम् । कृणुतं न: स्विष्टिम् ॥ॐ भूर्भुव: स्व: **मणिमानाय नम:** । मणिमानमावाहयामि स्थापयामि ॥

३०-ॐत्रीणि तऽआहुर्दिवि बन्धनानि त्रीण्यप्सु त्रीण्यन्त: समुद्रे । उतेव मे वरुणश्छन्त्स्यर्वन्यत्रा तऽआहु: परमं जनित्रम् ॥

ॐ भूर्भुवः स्वः **गणबन्धाय नमः** । गणबन्धमावाहयामि स्थापयामि ॥३०॥

**वायव्य कोणे षड्दलेः-**

३१-ॐ प्रतिश्रुत्काया ऽ अर्त नं घोषाय भषमन्ताय बहुवादि नमनन्ताय मुकथ्ठं शब्द याडम्बराघातं महसे व्वीणावादं क्रोशाय तूणब्रघ्ममवरस्परायशंखध्मं व्वनाय व्वनपमन्यतोरण्याय दावपम्॥ ॐ भूर्भुवः स्वः **डामराय नमः** । डामरमावाहयामि स्थापयामि ॥

३२-ॐ शुद्धवालः सर्व शुद्धवालो मणि बालस्तऽआश्विनाः श्वेतः श्वेताक्षोरुणस्ते रुद्राय पशुपतये कर्ण्णयामाऽअवलिप्ता रौद्रानभोरूपाः पार्ज्जन्याः॥ॐ भूर्भुवः स्वः **ढुण्ढिकर्णाय नमः** । ढुण्ढिकर्णमावाहयामि स्थापयामि ॥

३३-ॐवनस्पते वीड्वङ्गो हि भूयाऽअस्मत्सखा प्रतरणः सुवीरः । गोभिः सन्नद्धोऽअसि वीडयस्वास्थाता ते जयतु जेत्वानि॥ ॐ भूर्भुवः स्वः **स्थविराय नमः** । स्थविरमावाहयामि स्थापयामि ॥

३४-ॐसुपर्ण वस्ते मृगोऽअस्या दन्तो गोभिः सन्नद्धा पतति प्रसूता । यत्रा नरः सं च विच द्रवन्ति तत्रास्मभ्यमिषवः शर्म यथ्ठं सन्॥ ॐ भूर्भुवः स्वः **दन्तुराय नमः** । दन्तुर मावाहयामि स्थापयामि ॥

३५-ॐ अग्नेऽ अच्छा वदेह नः प्रति नः सुमना भव । प्रनो यच्छ सहस्रजित् त्वथ्ठं हि धनदाऽ असि स्वाहा॥ ॐ भूर्भुवः स्वः **धनदाय नमः** । धनदमावाहयामि स्थापयामि ॥

३६-ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः। स्थिरैरङ्गैस्तुष्टुवाथ्ठं सस्तनूभिर्व्यशेमहि देवहितं यदायुः॥ॐ भूर्भुवः स्वः **नागकर्णायनमः** । नागकर्णमावाहयामि स्थापयामि ॥३६॥

**उत्तर कोणे षड्दलेः-**

३७-ॐबाहू मे बलमिन्द्रिय थ्ठं हस्तौ मे कर्म वीर्यम् । आत्मा

क्षत्रमुरो मम ॥ॐ भूर्भुवः स्वः **महाबलाय नमः** ।
महाबलमावाहयामि स्थापयामि ॥

३८–ॐअपां फेनेन नमुचेः शिरऽ इन्द्रोदबर्तयः । विश्वा यदजय स्पृधः॥ ॐ भूर्भुवः स्वः **फेत्काराय नमः** । फेत्कारमावाहयामि स्थापयामि ॥

३९–ॐ इदथ्ठं हविः प्रजननम्मेऽअस्तु दशवीर थ्ठं सर्वगणथ्ठं स्वस्तये । आत्मसनि प्रजासनि पशुसनि लोकसन्न्यभयसनि अग्निः प्रजाम्बहुलाम्मे करोत्वन्नम्पयोरेतोऽस्मासुधत्त ॥ ॐ भूर्भुवः स्वः **चीत्काराय नमः** । चीत्करमावाहयामि स्थापयामि ॥

४०–ॐ या व्याग्घ्रं विषूचिकोभौ वृकं च रक्षति । श्येनं पतत्रिण ठं सि ठं हठं सेमं पात्व ठं हसः ॥ ॐ भूर्भुवः स्वः **सिंहाय नमः** । सिंहमावाहयामि स्थापयामि ॥

४१–ॐमृगो न भीमः कुचरो गिरिष्ठाः परावतऽ आजगन्था परस्याः । सृक ठं स ठं शाय पविमिन्द्र तिग्मं वि शत्रून्ताढि विमृधो नुदस्व ॥ ॐ भूर्भुवः स्वः **मृगाय नमः** । मृगमावाहयामि स्थापयामि ॥

४२–ॐइन्दुर्दक्षः श्येनऽ ऋतावा हिरण्यपक्षः शकुनो भुरण्युः । महान्त्सधस्थे ध्रुवऽआ निषत्तो नमस्ते अस्तु मामाहिथ्ठंः सीः॥ ॐ भूर्भुवः स्वः **यक्षप्रियाय नमः** । यक्षप्रियमावाहयामि स्थापयामि ॥४२॥

**ईशान कोणे षड्दलेः–**

४३–ॐ जीमूतस्येव भवति प्रतीकं यद्वर्मी याति समदामुपस्थे । अनाविद्धया तन्वा जयत्व ठं सत्वा वर्मणो महिमा पिपर्त्तु ॥ ॐ भूर्भुवः स्वः **मेघवाहनाय नमः** । मेघवाहन मावाहयामि स्थापयामि ॥

४४–ॐतीव्रान् घोषान् कृण्वते वृषपाणयोऽश्वा रथेभिः सह वाजयन्तः । अवक्रामन्तः प्रपदैरमित्रान् क्षिणन्ति शत्रूँ १ऽ

रनपव्ययन्तः ॥ ॐ भूर्भुवः स्वः **तीक्ष्णोष्ठाय नमः** । तीक्ष्णोष्ट्रमावाहयामि स्थापयामि ॥

४५–ॐवायुष्ट्वा पचतैरवत्वसितग्रीवश्छार्गैर्न्यग्रोधश्चमसैः शल्मलिर्वृद्धया । एषस्य राथ्यो वृषा पड्भिश्चतु र्भिरिदगन्ब्रह्मा कृष्णश्च नोऽवंतु नमोऽग्नये ॥ ॐ भूर्भुवः स्वः **अनलाय नमः**। अनलमावाहयामि स्थापयामि ॥

४६–ॐ अदित्यास्त्वा पृष्ठे सादयाम्यन्तरिक्षस्य धत्री विष्टम्भनी दिशामधिपत्नीं भुवनानाम् । ऊर्मिर्द्रप्सो ऽअपामसि विश्वकर्मा तऽऋषिरश्विनाध्वर्यू सादयतामिह त्वा ॥ ॐ भूर्भुवः स्वः **शुल्कतुण्डाय नमः** । शुल्कतुण्डमावाहयामि स्थापयामि ॥

४७–ॐद्यौस्ते पृथिव्यन्तरिक्षं वायुश्छिद्रं पृणातु ते । सूर्यस्ते नक्षत्रैः सह लोकं कृणोतु साधुया ॥ ॐ भूर्भुवः स्वः अन्तरिक्षाय नमः । अन्तरिक्षमावाहयामि स्थापयामि ॥

४८–ॐसं बर्हिरंग्ध्र्क्ताथ्ठं हविषा घृतेन समादित्यैर्वसुभिः सम्मरुद्भिः। समिन्द्रो विश्वदेवेभिरंग्ध्र्क्तां दिव्यं नभो गच्छतु यत् स्वाहा ॥ ॐ भूर्भुवः स्वः **बर्बरकाय नमः** । बर्बरकमावाहयामि स्थापयामि ॥

४९–ॐपवमानः सोऽ अद्य नः पवित्रेण विचर्षणिः । यः पोता स पुनातु मा ॥ ॐ भूर्भुवः स्वः **पावनाय नमः** । पावनमावाहयामि स्थापयामि ॥४९॥

**५०–पवनाय नमः ॥ ५१–युधामन्यवे नमः ॥ ५२–क्षेत्रपालाय नमः** (५२भैरव)

ॐअजरादि पावनान्त क्षेत्रपाल मण्डलस्थ देवेभ्यो नमः । मध्ये अष्टदले कलशं स्थापयेत् । कलशोपरि स्थानक्षेत्रपाल मूर्तिं श्रीफलं वा स्थापयेत् । तत्र क्षेत्रपाल मावाहयेत् ॥

**ध्यानम्ः**–भाजच्चन्द्र जटाधरं त्रिनयनं नीलाञ्जनाद्रिप्रभं दोर्दण्डान्त गदा कपालमरुण स्रग्गन्ध वस्त्रावृतम् । घण्टाघुर्घुर

मेखलध्वनि मिलद् धूंकारभीमं विभुं। वन्दे संहित सर्प कुण्डलधरं श्रीक्षेत्रपालं भजे॥

ॐनहि स्पशमविदन्नन्य मस्माद्वैश्वानरात्पुरऽ एतारमग्नेः। एमेनमवृधन्नमृताऽ अमर्त्य वैश्वानरं क्षैत्रजित्याय देवाः॥ ॐ भूर्भुवः स्वः क्षेत्राधिपतये नमः। क्षेत्राधिपतिमावाहयामि स्थापयामि॥

ॐमनो जूतिर्ज्जुषतामाज्यस्य बृहस्पतिर्य्यज्ञमिमन्तनोत्वरिष्टं यज्ञ ठं समिमन्दधातु। विश्वे देवासऽइह मादयन्तामों ३ँ॥ म्प्रतिष्ठ॥ अजरादिपावनान्त क्षेत्रपाल मण्डलस्थ देवाः सुप्रतिष्ठिताः भवन्तु॥ क्षेत्राधिपतये नमः॥ ततः षोडशोपचारैः पूजयेत्॥

**पूजनं कुर्यात्ः**—आसनार्थे पुष्पाणि समर्पयामि॥ पादयोः पाद्यं समर्पयामि॥ हस्तयोः अर्घ्यं समर्पयामि॥ मुखे आचमनीयं जलं समर्पयामि॥ सर्वांगे स्नानं समर्पयामि॥ मिश्रित पंचामृत स्नानं समर्पयामि॥ शुद्धोदक स्नानं समर्पयामि॥ वस्त्रं समर्पयामि॥ यज्ञोवपीतं समर्पयामि॥ आचमनीयं जलं समर्पयामि॥ उपवस्त्रं समर्पयामि॥ चन्दनं समर्पयामि॥ गंधं समर्पयामि॥ अक्षतान् समर्पयामि॥ पुष्पाणि समर्पयामि॥ परिमलद्रव्याणि समर्पयामि॥ सुगंधितैलं समर्पयामि॥ धूपं आघ्रापयामि॥ दीपं दर्शयामि॥ नैवेद्यं निवेदयामि॥ आचमनीयं जलं समर्पयामि॥ ऋतुफलं समर्पयामि॥ ताम्बूलं समर्पयामि॥ द्रव्यदक्षिणां समर्पयामि॥ श्रीफलं समर्पयामि॥

**पुष्पाञ्जलिः**—ध्याये नीलाद्रि कान्तं शशि शकलधरं मुण्ड मालं महेशं। दिग्वस्त्रं पिंगकेशं डमरुमथ सृणि खड्ग पाशाभयानि॥ नागं घण्टां कपालं कर शिरसि रुहैर्विभ्रतं भीमदंष्ट्रं। सर्पा कल्पं त्रिनेत्रं मणिमय विलसत् किंकिणी नूपुराढ्यम्॥

नीलाञ्जनाद्रि निभमूर्ध्व पिंशगकेश, वृत्तोग्र लोचनमुपात्त गदा

कपालम् । रक्ताम्बरं भुजग भूषण मुग्रदंष्ट्रं, क्षेत्राधिप कुसुमपुञ्ज गृहाण शीघ्रम् ॥ पुष्पाञ्जलिं समर्पयामि

**प्रार्थना:**–क्षेत्रपाल महाबाहो महाबल पराक्रमः । क्षेत्राणां रक्षणार्थाय प्रणमामि पुनः पुनः ॥

**मण्डलाग्रे पायस बलिदद्यात्:**–ॐक्षेत्रस्य पतिनां वयं हितेनेव जयामसि । गामश्व पोषयिल्वा स नो मृलाती दृशे । क्षेत्रपाल बलिद्रव्याय नमः। भो क्षेत्रपाल इमं बलिं समर्पयामि ।**जलमुत्सृजेत्** भो क्षेत्रपाल इमं बलिं गृहाण गृहाण मम सकुटुम्बस्य सर्वान् विघ्नान्नाशय नाशय सर्वान् मनोरथान् पूरय पूरय स्वाहा ॥

अनेन पूजा बलि दानेन क्षेत्रपाल मण्डलस्थ देवाः क्षेत्राधिपति प्रीयताम् ॥

## ॥ सर्वतोभद्र मण्डल देवतानाम् पूजनम् ॥

तत्सदद्य–अस्मिन् कर्मणि महावेद्यां सर्वतोभद्रमण्डले ब्रह्मादि देवतानां स्थापनं पूजनं च करिष्ये ।

**१–मध्येकर्णिकायाम्:**–ॐब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचोव्वेन ऽ आवः । सबुध्न्या ऽ उपमा ऽ अस्य विष्ठाः सतश्च योनिमसतश्चव्विवः ॥ ॐ भूर्भुवः स्वः **ब्रह्मणे नमः** । ब्रह्माणमावाहयामि स्थापयामि ॥

**२–उत्तरे वाप्याम्:**–ॐ वयꣳ सोमव्रते तव मनस्तनूषु बिभ्रत । प्रजावन्तः सचेमहि ॥ ॐ भूर्भुवः स्वः **सोमाय नमः** । सोममावाहयामि स्थापयामि ॥

**३–ऐशान्यां खण्डेन्दौ:**–ॐतमीशानं जगतस्तस्थुषस्पतिं धियञ्जिन्वमवसे हूमहे वयम् । पूषा नो यथा वेदसामसद् वृधे रक्षिता पायुरदब्धः स्वस्तये ॥ ॐ भूर्भुवः स्वः **ईशानाय नमः** । ईशानमावाहयामि स्थापयामि ॥

**४–पूर्वे वाप्याम्:**–ॐ त्राता रमिन्द्रम वितारमिंद्रꣳ हवे हवे सुहवꣳ

शूरमिंद्रम् । ह्वयामि शक्रं पुरुहूतमिन्द्रꣳ स्वस्ति नो मघवा धात्विन्द्रः॥ ॐ भूर्भुवः स्वः **इन्द्राय नमः** । इन्द्रमावाहयामि स्थापयामि ॥

**५–आग्नेयां खण्डेन्दौः**–ॐ त्वन्नो अग्ने व्वरुणस्यविद्वान्देवस्यहेडो अवयासिसीष्ठाः ॥ यजिष्ठोवह्नितमः शोशुचानो विश्वाद्वेषाꣳसि प्रमुमुग्ध्यस्मत्स्वाहा ॥ ॐ भूर्भुवः स्वः **अग्नये नमः** । अग्निमावाहयामि स्थापयामि ॥

**६–दक्षिणे वाप्याम्ः**–ॐयमायत्त्वाङ्गिरस्वते पितृमते स्वाहा । स्वाहा घर्माय स्वाहा स्वाहा घर्म पित्रे ॥ ॐ भूर्भुवः स्वः यमाय **नमः** । यममावाहयामि स्थापयामि ॥

**७–नैर्ऋत्यां खंडेन्दौः**–ॐ असुन्वन्तमयजमान मिच्छस्तेनस्येत्या मन्विहि तस्करस्य । अन्यमस्मदिच्छ सा तऽ इत्या नमो देवि निर्ऋते तुभ्यमस्तु ॥ ॐ भूर्भुवः स्वः **निर्ऋतये नमः** । निर्ऋतिमावाहयामि स्थापयामि ॥

**८–पश्चिमे वाप्याम्ः**–ॐतत्त्वायामि ब्रह्मणा व्वन्दमानस्तदाशास्ते यजमानो हविर्भिः । अहेडमानो व्वरुणेह बोध्युरुश ꣳ स मा न आयुः प्रमोषीः ॥ ॐ भूर्भुवः स्वः **वरुणाय नमः** । वरुणमावाहयामि स्थापयामि ॥

**९–वायव्यां खंडेन्दौः**–ॐ आनोनियुद्भिः शतिनीभिरध्वरꣳ सहस्त्रिणीभिरुप याहि यज्ञम् । वायो अस्मिन्त्सवने मादयस्व यूयं पात स्वस्तिभिः सदा नः॥ ॐ भूर्भुवः स्वः **वायवे नमः** । वायुमावाहयामि स्थापयामिं ॥

**१०–वायुसोमयो–र्मध्ये भद्रेः**–ॐसुगावो देवाः सदनाऽअकर्म्म यऽआजग्मेद ꣳ सवनं जुषणाः । भरमाणा वहमाना हवीꣳ ष्यस्मे धत्त वसवो वसूनि स्वाहा ॥ ॐ भूर्भुवः स्वः **अष्टवसुभ्यो नमः** । अष्टवसूनावाहयामि स्थापयामि ॥

**११–सोमेशानयोर्मध्ये भद्रे:**–ॐरुद्रा: स ठं सृज्यपृथिवीम्वृहज्योति: समीधिरे। तेषां भानुरजस्त्रऽ इच्छुक्रो देवेषुरोचते॥ ॐ भूर्भुव: स्व: **एकादशरुद्रेभ्यो नम:**। एकादश रुद्रानावाहयामि स्थापयामि॥

**१२–ईशानेन्द्रयो मध्येभद्रे:**–ॐयज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृडयन्त:। आवोऽर्वाची सुमतिर्ववृत्याद ठं होश्चिद्या वरिवोवित्तरा सत्॥ ॐ भूर्भुव: स्व: **द्वादशादित्येभ्यो नम:**। द्वादशादित्यानावाहयामि स्थापयामि॥

**१३–इन्द्राग्न्योर्मध्ये भद्रे:**–ॐ यावांकाशा मधुमत्यश्विना सूनृतावती। तयायज्ञंमिमिक्षतं॥ ॐ भूर्भुव: स्व: **अश्विभ्यां नम:**। अश्विनौ आवाहयामि स्थापयामि॥

**१४–अग्नियमयोर्मध्येभद्रे:**–ॐविश्व देवासऽआगत श्रृणुता मइम ठं हवम्। एदं बर्हिर्निषीदत। उपयामगृहीतोऽसि विश्वभ्यस्त्वा देवेभ्यऽएषते योनिर्विश्वेभ्यस्त्वा देवेभ्य:॥ ॐ भूर्भुव: स्व: **विश्वेभ्यो देवेभ्यो नम:**। विश्वान्देवानावाहयामि स्थापयामि॥

**१५–यमनिर्ऋति मध्यभद्रे:**–अभित्यं देवठं सवितारमोण्यो: कविक्रतुमर्चामि सत्यसवठं रत्नधामभि प्रियं मतिं कविम्। ऊर्ध्वा यस्यामतिर्भाऽ अदिद्युतत्सवीमनि हिरण्यपाणिरमिमीत सुक्रतु: कृपा स्व: प्रजाभ्यस्त्वा प्रजास्त्वाऽनुप्राणन्तु प्रजास्त्वमनु प्राणिहि॥ ॐ भूर्भुव: स्व: **सप्तयक्षेभ्यो नम:**। सप्तयक्षानावाहयामि स्थापयामि॥

**१६–निर्ऋति वरुणमध्येभद्रे:**– नमोस्तु सर्पेभ्यो ये के च पृथिवी मनु। ये ऽ अन्तरिक्षे येदिवि तेभ्य: सर्पेभ्यो नम:॥ ॐ भूर्भुव: स्व: **अष्टकुलनागेभ्यो नम:**। अष्ट कुलनागानावाहयामि स्थापयामि॥

**१७-वरूणवायुमध्यभद्रे:-** ॐऋताषाड्ऋतधामाग्निर्गन्धर्वस्तस्यौषधयोप्सरसो मुदो नाम। सनऽइदंब्रह्मक्षत्रम्पातु तस्मै स्वाहाव्वाट्ताभ्यः स्वाहा ॥ ॐ भूर्भुवः स्वः **गन्धर्वाप्सरोभ्यो नमः**। गन्धर्वाप्सरसमावाहयामि स्थापयामि ॥

**१८-ब्रह्मसोमयोर्मध्येवाप्याम्:-**ॐयदक्रंदः प्रथमं जायमान ऽ उद्यन्त्समुद्रादुत वा पुरीषात्। श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं महि जातं ते ऽ अर्वन्॥ ॐ भूर्भुवः स्वः **स्कन्दाय नमः**। स्कन्दमावाहयामि स्थापयामि ॥

**१९-तत्रैव वाप्यां स्कन्दुत्तरे:-**आशुः शिशानो वृषभोन भीमो घनाघनः क्षोभणश्चर्षणीनाम्। सङ्क्रन्दनोऽनिमिषऽएकवीरः शत ठँ सेनाऽअजयत्साकमिन्द्रः॥ ॐ भूर्भुवः स्वः **नन्दिने नमः**। नन्दिनमावाहयामि स्थापयामि ॥

**२०-तत्रैव नन्द्युत्तरे:-**ॐ कार्षिरसि समुद्रस्य त्वा क्षित्याऽ उन्नयामि। समापो अद्भिरग्मत समोषधीभिरोषधीः॥ॐ भूर्भुवः स्वः **शूलमहाकालाभ्यां नमः**। शूलमहाकालमावाहयामि स्थापयामि ॥

**२१-ब्रह्मेशानयोर्मध्ये वल्ल्याम्:-**
ॐ अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः। विश्वे देवाऽ अदितिः पञ्च जनाऽ अदितिर्जात मदितिर्जनित्वम्॥ ॐ भूर्भुवः स्वः **दक्षादि-सप्तगणेभ्यो नमः**। दक्षादिसप्तगणानावाहयामि स्थापयामि ॥

**२२-ब्रह्मेन्द्रयोर्मध्ये वाप्याम्:-**ॐ अम्बे अम्बिकेऽम्बालिके न मा नयति कश्चन। ससस्त्यश्वकः सुभद्रिकां काम्पील वासिनीम्॥ ॐ भूर्भुवः स्वः **दुर्गायै नमः**। दुर्गामावाहयामि, स्थापयामि ॥

**२३-तत्रैव दुर्गापूर्वे:-**ॐ इदं विष्णुर्विचक्रमे त्रेधा नि दधे पदम्। समूढमस्यपाꣳसुरे स्वाहा ॥ ॐ भूर्भुवः स्वः **विष्णवे नमः**। विष्णुमावाहयामि स्थापयामि ॥

२४–**ब्रह्माग्नयोर्मध्ये वल्ल्याम्**:–ॐ पितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः स्वधायिभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः । अक्षन् पितरोमीमदन्त पितरोतीतृपन्त पितरः पितरः शुन्धध्वम् ॥ ॐ भूर्भुवः स्वः **स्वधायै नमः** । स्वधामावाहयामि स्थापयामि ॥

२५–**ब्रह्मयमर्योमध्ये वाप्याम्**:–ॐपरम्मृत्योऽनुपरेहि पन्थां यस्ते ऽअन्य इतरो देवयानात् । चक्षुष्मते श्रृण्वते ते ब्रवीमिमानः प्रजाथ्ठं रीरिषो मोतवीरान् ॥ ॐ भूर्भुवः स्वः **मृत्युरोगाभ्यां नमः** । मृत्युरोगामानावाहयामि स्थापयामि ॥

२६–**ब्रह्मवरूणयोर्मध्ये वाप्याम्**:–ॐगणानांत्वा गणपति ठं हवामहे प्रियाणां त्वा प्रियपतिठं हवामहे निधीनां त्वा निधिपति ठं हवामहे वसो मम । आहमजानि गर्भधमा त्वमजासि गर्भधम् ॥ ॐ भूर्भुवः स्वः **गणपतये नमः** । गणपतिमावाहयामि स्थापयामि ॥

२७–**ब्रह्मवरूणयोर्मध्येः**–ॐ आपोहिष्ठा मयो भुवस्तान ऊर्जे दधातन । महेरणाय चक्षसे ॥ ॐ भूर्भुवः स्वः **अद्भ्यो नमः** । अपः आवाहयामि स्थापयामि ॥

२८–**ब्रह्मवायोर्मध्ये वल्ल्याम्**:–ॐमरुतो यस्य हि क्षये पाथा दिवो व्विमहसः । स सुगोपातमो जनः ॥ ॐ भूर्भुवः स्वः **मरुद्भ्यो नमः** । मरुतमावाहयामि स्थापयामि ॥

२९–**ब्रह्मपादमूले कर्णिकायाम्**:–ॐ स्योना पृथिविनो भवानृक्षरा निवेशनी । यच्छा नः शर्म सप्रथाः ॥ ॐ भूर्भुवः स्वः **पृथिव्यै नमः** । पृथिवीमावाहयामि स्थापयामि ॥

३०–**अत्रैव कर्णिकायाम्**:–ॐ इमं मे वरुण श्रुधी हवमद्या च मृडय । त्वा मवस्युरा चके ॥ ॐ भूर्भुवः स्वः **गङ्गादिनदीभ्यो नमः** । गङ्गादिनदीः आवाहयामि स्थापयामि ॥

**३१–तत्रैव:**–ॐसमुद्रोऽसि नभस्वानार्द्रदानुः शम्भूर्मयोभूरभि मा वाहि स्वाहा । मारुतोऽसि मरुतां गणः शम्भूर्मयो भूरभि मा वाहि स्वाहा । अवस्यूरसि दुवस्वाञ्छम्भूर्मयो भूरभि मा वाहि स्वाहा ॥ ॐ भूर्भुवः स्वः **सप्तसागरेभ्यो नमः** । सप्तसागरानावाहयामि स्थापयामि ॥

**३२–ब्रह्मणः मस्तके कर्णिकोपरि:**–ॐपरित्वागिर्वणोगिरऽ इमाभवन्तु विश्वतः । वृद्धायु मनुवृद्धयो जुष्टा भवन्तु जुष्टयः॥ ॐ भूर्भुवः स्वः **मेरवे नमः** । मेरुमावाहयामि स्थापयामि ॥

**३३–प्रथमश्वेतपरिधौ उत्तरे:**–ॐ गणानांत्वा गणपति ठँ हवामहे प्रियाणां त्वा प्रियपति ठँ हवामहे निधीनां त्वा निधिपति ठँ हवामहे वसो मम । आहमजानि गर्ब्भधमा त्वमजासि गर्ब्भधम् ॥ ॐ भूर्भुवः स्वः **गदायै नमः** । गदामावाहयामि स्थापयामि ॥

**३४–ईशाने:**–ॐत्रि ठँ शद्धामविराजति वाक्पतङ्धीयते । प्रति वस्तोरहद्युभिः ॥ ॐ **त्रिशूलाय नमः** । त्रिशूलमावाहयामि स्थापयामि ॥

**३५–पूर्वे:**–ॐ महाँ३॥ इन्द्रो वज्रहस्तः षोडशी शर्म यच्छतु हन्तुपाप्मानं योस्मान्द्वेटि । उपयामगृहीतोसि महेन्द्राय त्त्वैषते योनिर्महेन्द्राय त्त्वा ॥ **ॐ वज्राय नमः** । वज्रमावाहयामि स्थापयामि ॥

**३६–आग्नेयाम्:**–ॐ वसुचमे व्वसतिश्चमे कर्म्मचमे शक्तिश्चमेर्थश्चमऽ एमश्चम ऽइत्याचमे गतिश्चमे यज्ञेनकल्पन्ताम् ॥ **ॐ शक्तये नमः** । शक्तिमावाहयामि स्थापयामि ॥

**३७–दक्षिणे:**–ॐइडऽएह्यदितऽ एहि काम्याऽ एत । मयि वः कामधरणं भूयात् ॥ ॐदण्डाय नमः दण्डमावाहयामि स्थापयामि ॥

**३८–नैर्ऋत्याम्**:–ॐ खड्गो वैश्वदेवः श्वा कृष्णः कर्णो गर्दभस्तरक्षुस्रे रक्षसामिन्द्रा सूकरः सिर्ठं हो मारुतः कृकलासः पिप्पका शकुनिस्ते शरव्यायै विश्वेषां देवानां पृषतः॥ **ॐ खड्गाय नमः** । खड्गमावाहयामि स्थापयामि॥

**३९–पश्चिमे**:–ॐ उदुत्तमं वरुण पाशमस्मदवाधमं व्विमध्यमर्ठ्ठंश्रथाय॥ अथावयमादित्यव्रते तवानागसो अदितयेस्यामस्वाहा॥ इदं वरुणायादितये न मम॥ **ॐ पाशाय नमः** । पाशमावाहयामि स्थापयामि॥

**४०–वायव्या**:–ॐ अर्ठशुश्चमे रश्मिश्चमे दाब्भ्यश्चमे धिपतिश्चमऽ उपार्ठ्ठंशुश्चमेन्तर्यामश्चमऽ ऐन्द्रवायवश्चमे मैत्रा वरुणश्चमऽ आश्विनश्चमे प्रतिप्रस्थानश्चमे शुक्रश्चमे मन्थीचमे यज्ञेनकल्पन्ताम्॥ **ॐ अंकुशाय नमः** । अंकुशमावाहयामि स्थापयामि॥

**४१–द्वितीय रक्तपरिधौ उत्तरे**:–ॐ आयङ्गौः पृश्निरक्रमीदसदन् मातरं पुरः । पितरं च प्रयन्त्स्वः॥ **ॐ गौतमाय नमः** । गौतममावाहयामि स्थापयामि॥

**४२–ईशान्याम्**:–अयं दक्षिणा विश्वकर्मा तस्यमनो वैश्वकर्मणं ग्रीष्मो मानसस्त्रिष्टुब् ग्रैष्मीत्रिष्टुभः स्वारम् । स्वारादन्तर्यामोऽन्तर्यामात्पञ्चदशः पञ्चदशाद् बृहद् भरद्वाजऽऋषिः प्रजापति गृहीतया त्वया मनो गृह्णामि प्रजाभ्यः॥ **ॐ भरद्वाजाय नमः** । भरद्वाजमावाहयामि स्थापयामि॥

**४३–पूर्वे**:–ॐ इदमुत्तरात् स्वस्तस्य श्रोत्रर्ठ सौवर्ठ शरच्छ्रौत्र्यनुष्टुप् शारद्यनुष्टुभऽऐडमैडान्मन्थी मन्थिनऽ एकविर्ठशऽ एकविर्ठशाद् वैराजं विश्वामित्रऽऋषिः प्रजापति गृहीतया त्वया श्रोत्रं गृह्णामि प्रजाभ्यः॥ **ॐ विश्वामित्राय नमः** । विश्वामित्रमावाहयामि स्थापयामि॥

**४४–आग्नेयाम्**:–ॐत्र्यायुषं जमदग्नेः कश्यपश्य त्र्यायुषम् । यद्देवेषुत्र्यायुषं तन्नोऽ अस्तुत्र्यायुषम् ॥ **ॐ कश्यपाय नमः** । कश्यपमावाहयामि स्थापयामि ॥

**४५–दक्षिणे**:–ॐअयं पश्चाद् विश्वव्यचास्तस्य चक्षुर्वैश्वव्यचसं वर्षाश्चाक्षुष्यो जगती वार्षी जगत्याऽ ऋक्समम् । ऋक्समाच्छुक्रः शुक्रात्सप्तदशः सप्तदशाद्वैरूपं जमदग्निर्ऋषिः प्रजापति गृहीतया त्वया चक्षुर्गृह्णामि प्रजाभ्यः ॥ **ॐजमदग्नये नमः** । जमदग्निमावाहयामि स्थापयामि ॥

**४६–नैर्ऋत्याम्**:–ॐअयं पुरो भुवस्तस्य प्राणो भौवायनो वसन्तः प्राणायनो गायत्री वासन्ती गायत्र्यै गायत्रं गायत्रादुपांशुः शुरूपांशुः शोस्त्रिवृत त्रिवतो रथन्तरं वसिष्ठऽऋषिः प्रजापतिगृहीतया त्वया प्राणं गृह्णामि प्रजाभ्यः ॥ **ॐ वशिष्ठाय नमः** । वशिष्ठमावाहयामि स्थापयामि ॥

**४७–पश्चिमे**:–ॐ अत्र पितरो मायद्ध्वं यथाभागमावृषायध्वम् । अमीमदन्त पितरो यथाभागमाबृषायित ॥ **ॐअत्रये नमः** । अत्रिमावाहयामि स्थापयामि ॥

**४८–वायव्यां**:–ॐतम्पत्नीभिरनुगच्छेम देवाः पुत्रैर्भ्रातृभिरुतवा हिरण्यैः । नाकं गृभ्णानाः सुकृतस्य लोके तृतीये पृष्ठेऽअधि रोचने दिवः ॥ **ॐअरुन्धत्यै नमः** । अरुन्धतीमावाहयामि स्थापयामि ॥

**४९–तृतीयकृष्णपरिधौ पूर्वे**:–ॐआदित्यै रास्नासीन्द्राण्याऽ उष्णीषः । पूषासि घर्म्माय दीष्व ॥ **ॐऐन्द्रयै नमः** । ऐन्द्रीमावाहयामि स्थापयामि ॥

**५०–आग्नेयाम्**:–ॐअम्बे अम्बिकेऽम्बालिके न मा नयति कश्चन । ससस्त्यश्वकः सुभद्रिकां काम्पील वासिनीम् ॥ **ॐकौमार्यै नमः** । कौमारीमावाहयामि स्थापयामि ॥

**५१–दक्षिणे**:–ॐइन्द्रायाहि धियेषितोव्विप्रजूतः सुतावतः । उपब्ब्रह्माणि व्वाघतः ॥ **ॐब्राह्म्यै नमः** । ब्राह्मीमावाहयामि स्थापयामि ॥

**५२–नैर्ऋत्याम्**:–ॐआयङ्गौः पृश्निरक्रमीदसन् मातरं पुरः । पितरं च प्रयन्त्स्वः ॥ **ॐवाराह्यै नमः** । वाराहीमावाहयामि स्थापयामि ॥

**५३–पश्चिमे**:–ॐअम्बे अम्बिकेऽम्बालिके न मा नयति कश्चन । ससस्त्यश्वकः सुभद्रिकां काम्पील वासिनीम् ॥ **ॐ चामुण्डायै नमः** । चामुण्डामावाहयामि स्थापयामि ॥

**५४–वायव्याम्**:–ॐआप्यायस्व समेतु ते व्विश्वतः सोमव्वृष्ण्यम् । भवाव्वाजस्य सङ्गथे ॥ **ॐ वैष्णव्यै नमः** । वैष्णवीमावाहयामि स्थापयामि ॥

**५५–उत्तरे**:–ॐयातेरुद्रशिवा तनूरघोरापापकाशिनी । तयानस्तन्वा शन्तमयागिरिशन्ता भिचाकशीहि ॥ **ॐमाहेश्वर्यै नमः** । माहेश्वरीमावाहयामि स्थापयामि ॥

**५६–ऐशान्याम्**:–ॐसमख्ये देव्या धिया यन्दक्षिणयोरुचक्षसा । मामऽआयुः प्रमोषीर्म्मोऽअहं तवव्वीरं व्विदेय तवदेवि सन्दृशि ॥ **ॐवैनायक्यै नमः** । वैनायकीमावाहयामि स्थापयामि ॥

**प्राण–प्रतिष्ठा**:–ॐमनो जूतिर्ज्जुषतामाज्यस्य बृहस्पति र्य्यज्ञमिमन्तनोत्वरिष्टं यज्ञ ठं समिमन्दधातु । विश्वे देवासऽइह मादयन्तामों३म् ॥ प्प्रतिष्ठ ॥

ॐ ब्रह्मादि सर्वतोभद्रमण्डलस्थ देवताः सुप्रतिष्ठिता भवन्तु ॥ ततः षोडशोपचारैः पूजयेत् :–

**पूजनं कुर्यात्** :–आसनार्थे पुष्पाणि समर्पयामि ॥ पादयोः पाद्यं समर्पयामि ॥ हस्तयोः अर्घ्यं समर्पयामि ॥ मुखे आचमनीयं जलं समर्पयामि ॥ सर्वांगे स्नानं समर्पयामि ॥ मिश्रित पंचामृत स्नानं समर्पयामि ॥ शुद्धोदक स्नानं समर्पयामि ॥ वस्त्रं समर्पयामि ॥ यज्ञोपवीतं समर्पयामि ॥ आचमनीयं जलं समर्पयामि ॥ उपवस्त्रं

समर्पयामि ॥ चन्दनं समर्पयामि ॥ गंधं समर्पयामि ॥ अक्षतान् समर्पयामि ॥ पुष्पाणि समर्पयामि ॥ परिमलद्रव्याणि समर्पयामि ॥ सुगंधितैलं समर्पयामि ॥ धूपं आघ्रापयामि ॥ दीपं दर्शयामि ॥ नैवेद्यं निवेदयामि ॥ आचमनीयं जलं समर्पयामि ॥ ऋतुफलं समर्पयामि ॥ ताम्बूलं समर्पयामि ॥ द्रव्यदक्षिणां समर्पयामि ॥ श्रीफलं समर्पयामि ॥

**पुष्पाञ्जलिः**–ये सर्वतोभद्रदलेषु देवाः, ब्रह्मादयः सर्षिगणा दिगीशाः। पुष्पाञ्जलि मंजु मनोददातं गृह्णन्तु देवा कुरु कार्य सिद्धिम् ॥

**प्रार्थनाः**–जानामिनाऽर्चनविधिं परमं क्षमध्वं, लोकाऽर्तिपुञ्जमतुलं क्षपयन्तु नित्यम्। ब्रह्मादिभद्रविबुधाः सुखमाकिरन्तु, कुर्वन्तु दूरमनिशं दुरितान्समन्तात् ॥

**अनेन पूजनेन ब्रह्मादि सर्वतोभद्रमण्डलस्थ देवताः प्रीयन्ताम् ॥**

## वास्तु मण्डलस्थ देवतानां होमः ॥

(मन्त्रभाग पूजाप्रकरणे द्रष्टव्यः)

ॐ शिखिने स्वाहा। पर्जन्याय स्वाहा। जयन्ताय स्वाहा। कुलिशायुधाय स्वाहा। सूर्याय स्वाहा। सत्याय स्वाहा। भृशाय स्वाहा। आकाशाय स्वाहा। वायवे स्वाहा। पूष्णे स्वाहा। वितथाय स्वाहा। गृहक्षताय स्वाहा। यमाय स्वाहा। गन्धर्वाय स्वाहा। भृङ्गराजाय स्वाहा। मृगाय स्वाहा। पितृभ्यो स्वाहा। दौवारिकाय स्वाहा। सुग्रीवाय स्वाहा। पुष्पदन्ताय स्वाहा। वरुणाय स्वाहा। असुराय स्वाहा। शोषाय स्वाहा। पापाय स्वाहा। रोगाय स्वाहा। अहये स्वाहा। मुख्याय स्वाहा। भल्लाटाय स्वाहा। सोमाय स्वाहा। सर्पेभ्यो स्वाहा। अदित्यै स्वाहा। दित्यै स्वाहा। अद्भ्यो स्वाहा। सवित्राय स्वाहा। जयाय स्वाहा। रुद्राय स्वाहा। अर्यम्णे स्वाहा। सवित्रे स्वाहा।

विवस्वते स्वाहा । विबुधाधिपाय स्वाहा । मित्राय स्वाहा । राजयक्ष्मणे स्वाहा । पृथ्वीधराय स्वाहा । आपवत्साय स्वाहा । ब्रह्मणे स्वाहा । वास्तोष्पतये स्वाहा । चरक्यै स्वाहा । विदार्यै स्वाहा । पूतनायै स्वाहा । पापराक्षस्यै स्वाहा । स्कन्दाय स्वाहा । अर्यम्णे स्वाहा । जृम्भकाय स्वाहा । पिलिपिच्छाय स्वाहा । इन्द्राय स्वाहा । अग्नये स्वाहा । यमाय स्वाहा । निर्ऋत्यै स्वाहा । वरुणाय स्वाहा । वायवे स्वाहा । कुबेराय स्वाहा । ईश्वराय स्वाहा । ब्रह्मणे स्वाहा । अनन्ताय स्वाहा ।

ॐवास्तोष्पते प्रतिजानीह्यस्मान्स्वावेशो अनमीवो भवानः । यत्वेमहे प्रतितन्नो जुषस्वशन्नोऽस्तु द्विपदे शं चतुष्पदे **स्वाहा** ॥

**(गृहवास्तु में यह आहुतियाँ और दे ॥)**

(उग्रसेनाय स्वाहा । डामराय स्वाहा । महाकालाय स्वाहा । पिलिपिच्छाय स्वाहा । हेतुकाय स्वाहा । त्रिपुरान्तकाय स्वाहा । अग्निवैतालाय स्वाहा । असिवैतालाय स्वाहा । कालाय स्वाहा । करालाय स्वाहा । एकपादाय स्वाहा । भीमरूपाय स्वाहा । खेचराय स्वाहा । तलवासिने स्वाहा ।

ॐवास्तोष्पते प्रतिजानीह्यस्मान्स्वावेशो अनमीवो भवानः । यत्वेमहे प्रतितन्नो जुषस्वशन्नोऽस्तु द्विपदे शं चतुष्पदे **स्वाहा** ॥)

**(अनेन हवनेन वास्तु मण्डलस्थ देवताः प्रीयन्ताम्)**

**हस्ते जल मादायः**–इमानि हवनीय द्रव्याणि या या यक्ष्यमाण देवताः ताभ्यस्ताभ्यः परित्यक्तानि इदं न मम ॥ यथा देवत मस्तु ॥

## योगिनी मण्डलस्थ देवतानां होमः ॥

(मन्त्रभाग पूजाप्रकरणे द्रष्टव्यः)

ॐमहाकाल्यै स्वाहा। महालक्ष्म्यै स्वाहा। महासरस्वत्यै स्वाहा। दिव्ययोगायै स्वाहा। महायोगायै स्वाहा। सिद्धयोगायै स्वाहा। गणेश्वर्यै स्वाहा । प्रेताक्ष्यै स्वाहा। डाकिन्यै स्वाहा। काल्यै स्वाहा । कालरात्र्यै स्वाहा । निशाचर्यै स्वाहा। हुँकार्यै स्वाहा । सिद्धिवैतालिन्यै स्वाहा । खर्पर्यै स्वाहा । भूतयामिन्यै स्वाहा । ऊर्ध्वकेश्यै स्वाहा। विरूपाक्ष्यै स्वाहा । शुष्कांग्यै स्वाहा। मांसभोजिन्यै स्वाहा । फेत्कार्यै स्वाहा। वीरभद्राक्ष्यै स्वाहा । धूम्राक्ष्यै स्वाहा । कलहप्रियायै स्वाहा । रक्तायै स्वाहा। घोररक्ताक्ष्यै स्वाहा । विरूपाक्ष्यै स्वाहा । भयंकर्यै स्वाहा । चौरिकायै स्वाहा। मारिकायै स्वाहा । चण्ड्यै स्वाहा । वाराह्यै स्वाहा । मुण्डधारिण्यै स्वाहा । भैरव्यै स्वाहा । चक्रिण्यै स्वाहा । क्रोधायै स्वाहा । दुर्मुख्यै स्वाहा । प्रेतवाहिन्यै स्वाहा । कंटक्यै स्वाहा । दीर्घलम्बोष्ठ्यै स्वाहा । मालिन्यै स्वाहा । मंत्रयोगिन्यै स्वाहा । कालाग्न्यै स्वाहा । मोहिन्यै स्वाहा । चक्रयै स्वाहा । कंकाल्यै स्वाहा । भुवनेश्वर्यै स्वाहा । कुण्डलाक्ष्यै स्वाहा । लुह्यै स्वाहा । लक्ष्म्यै स्वाहा । यमदूत्यै स्वाहा । करालिन्यै स्वाहा । कौशिक्यैस्वाहा ।भक्षिण्यैस्वाहा । यक्ष्यैस्वाहा । कौमार्यै स्वाहा । यन्त्रवाहिन्यै स्वाहा । विशालायै स्वाहा । कामुक्यै स्वाहा । व्याघ्र्यै स्वाहा । यक्षिण्यै स्वाहा । प्रेतभूषिण्यै स्वाहा । धूर्जटायै स्वाहा । विकटायै स्वाहा । घोरायै स्वाहा । कपालायै स्वाहा । लांग्ल्यै स्वाहा ॥

(अनेन हवनेन महाकाली महालक्ष्मी महासरस्वती सहिता दिव्यादि चतुः षष्टियोगिन्यः प्रीयन्ताम् न मम)

**हस्ते जल मादायः**–इमानि हवनीय द्रव्याणि या या यक्ष्यमाण देवताः ताभ्यस्ताभ्यः परित्यक्तानि इदं न मम ॥ यथा देवत् मस्तु ॥

## ॥ क्षेत्रपाल मण्डलस्थ देवतानां होमः ॥

(मन्त्रभाग पूजाप्रकरणे द्रष्टव्यः)

ॐअजराय स्वाहा । व्यापकाय स्वाहा । इन्द्रचौराय स्वाहा । इन्द्रमूर्त्तयै स्वाहा । उक्षाय स्वाहा । कुष्माण्डाय स्वाहा । वरुणाय स्वाहा । बटुकाय स्वाहा । विमुक्ताय स्वाहा । लिप्तकाय स्वाहा । लीलाकाय स्वाहा । एकदंष्ट्राय स्वाहा । ऐरावताय स्वाहा । ओषधीघ्नाय स्वाहा । बन्धनाय स्वाहा । दिव्यकायाय स्वाहा । कम्बलाय स्वाहा । क्षोभणाय स्वाहा । गवये स्वाहा । घण्टाभिधाय स्वाहा । व्यालाय स्वाहा । अणुस्वरूपाय स्वाहा । चन्द्रवारुणाय स्वाहा । पटाटोपाय स्वाहा । जटालाय स्वाहा । क्रतवे स्वाहा । घण्टेश्वराय स्वाहा । विटङ्काय स्वाहा । मणिमाणाय स्वाहा । गणबन्धाय स्वाहा । डामराय स्वाहा । ढुण्ढिकर्णाय स्वाहा । स्थविराय स्वाहा । दन्तुराय स्वाहा । धनदाय स्वाहा । नागकर्णाय स्वाहा । महाबलाय स्वाहा । फेत्काराय स्वाहा । चीत्काराय स्वाहा । सिंहाय स्वाहा । मृगाय स्वाहा । यक्षप्रियाय स्वाहा । मेघवाहनाय स्वाहा । तीक्ष्णोष्ठाय स्वाहा । अनलाय स्वाहा । शुक्लतुण्डाय स्वाहा । अन्तरिक्षाय स्वाहा । बर्बरकाय स्वाहा । पावनाय स्वाहा ।

(अनेन हवनेन क्षेत्रपाल मण्डलस्थ देवताः प्रीयन्ताम् न मम)

**हस्ते जल मादायः-** इमानि हवनीय द्रव्याणि या या यक्ष्यमाण देवताः ताभ्यस्ताभ्यः परित्यक्तानि इदं न मम ॥ यथा देवत मस्तु ॥

## ॥ सर्वतोभद्र मण्डलस्थ देवतानां होमः ॥

(मन्त्रभाग पूजाप्रकरणे द्रष्टव्यः)

ॐब्रह्मणे स्वाहा । सोमाय स्वाहा । ईशानाय स्वाहा । इन्द्राय स्वाहा । अग्नये स्वाहा । यमाय स्वाहा । निर्ऋतये स्वाहा । वरुणाय स्वाहा । वायवे स्वाहा । अष्टवसुभ्यः स्वाहा । एकादशरुद्रेभ्यः स्वाहा । द्वादशादित्येभ्यः स्वाहा । अश्विभ्यां स्वाहा । विश्वेभ्यो देवेभ्यः स्वाहा । सप्तयक्षेभ्यः स्वाहा । अष्टकुलनागेभ्यः स्वाहा । गंधर्वाप्सरोभ्यः स्वाहा । स्कन्दाय स्वाहा । नन्दीश्वराय स्वाहा । शूलकालाभ्यां स्वाहा । दक्षादिसप्तगणेभ्यः स्वाहा । दुर्गायै स्वाहा । विष्णवे स्वाहा । स्वधायै स्वाहा । मृत्युरोगाभ्यां स्वाहा । गणपतये स्वाहा । अद्भ्यः स्वाहा । मरुद्भ्यः स्वाहा । पृथिव्यै स्वाहा । गंगादि नदीभ्यः स्वाहा । सप्तसागरेभ्यः स्वाहा । मेरवे स्वाहा । गदायै स्वाहा । त्रिशूलाय स्वाहा । वज्राय स्वाहा । शक्तये स्वाहा । दण्डाय स्वाहा । खड्गाय स्वाहा । पाशाय स्वाहा । अंकुशाय स्वाहा । गौत्तमाय स्वाहा । भारद्वाजाय स्वाहा । विश्वामित्राय स्वाहा । कश्यपाय स्वाहा । जमदग्नये स्वाहा । वशिष्ठाय स्वाहा । अत्रये स्वाहा । अरुन्धत्यै स्वाहा । ऐन्द्र्यै स्वाहा । कौमार्यै स्वाहा । ब्राह्म्यै स्वाहा । वाराह्यै स्वाहा । चामुण्डायै स्वाहा । वैष्णव्यै स्वाहा । माहेश्वर्यै स्वाहा । वैनायक्यै स्वाहा ।

**(अनेन हवनेन ब्रह्मादि सर्वतोभद्रमण्डलस्थ देवताःप्रीयन्ताम् न मम)**

**हस्ते जल मादायः**—इमानि हवनीय द्रव्याणि या या यक्ष्यमाण देवताः ताभ्यस्ताभ्यः परित्यक्तानि इदं न मम ॥ यथा देवत मस्तु ॥

## ॥ मण्डप पूजनम् ॥

**१–मध्य वेदीशान कोणे रक्तवर्ण स्तम्भे ब्रह्माणं पूजयेत् ॥**

ॐब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचोव्वेनऽ आवः । सबुध्न्या ऽ उपमाऽअस्यविष्ठाः सतश्च योनिमसतश्चव्विवः ॥ॐभूर्भुवः स्वः ब्रह्मणे नमः । ब्रह्माणमावाहयामि स्थापयामि ॥ गंधादिभिः संपूज्य ।

**तत्रैव** ॐसावित्र्यै नमः । ॐवास्तुपुरुषाय नमः । ब्राह्म्यै नमः । गंगायै नमः ॥

**स्तम्भमालभेत्ः**–ॐऊर्द्धव ऽऊषुण ऽऊतये तिष्ठ्ठा देवो न सविता । ऊर्ध्वो व्वाजस्य सनिता यदञ्जिभि र्व्वाघद्भिर्व्विह्वयामहे ॥

**स्तम्भ शिरसिः**–ॐआयङ्गौः पृश्निरक्रमीदसदन्मातरं पुरः । पितरंच प्रयंत्स्वः ॥ नागमात्रे नमः । संपूज्य । शाखाबन्धनानि पूजयेत् ॥ ॐयतो यतः समीहसे ततो नो अभयं कुरु । शं नः कुरु प्रजाभ्योभयं नः पशुभ्यः ॥ **प्रणमेत् ॥**

**अनेन कृताऽर्चनेनास्मिन् स्तम्भाधिष्ठातृ ब्रह्माद्यावाहित देवताः प्रीयन्ताम् न मम ॥**

**२–आग्नेय कोणे कृष्णवर्ण स्तम्भे विष्णुं पूजयेत् ॥**

ॐ इदं विष्णुर्विचक्रमे त्रेधानिदधे पदम् । समूढमस्यपाथ्ठं सुरेस्वाहा ॥ भूर्भुवः स्वः विष्णवे नमः विष्णुमावाहयामि स्थापयामि ॥ गंधादिभिः संपूज्य ॥ **तत्रैव** ॥ ॐ लक्ष्म्यै नमः । ॐ आदित्यायै नमः । ॐ वैष्णव्यै नमः । संपूज्य ॥

**स्तम्भमालभेत्ः**–ॐऊर्ध्व ऽऊषुण ऽऊतये तिष्ठा देवो न सविता । ऊर्ध्वो व्वाजस्य सनिता यदञ्जिभिर्व्वाघद्भिर्व्विह्वयामहे ॥

**स्तम्भशिरसिः**–ॐआयङ्गौः पृश्निरक्रमीदसदन्मातरं पुरः । पितरंच प्रयंत्स्वः ॥ नागमात्रे नमः । संपूज्य । शाखाबन्धनानि पूजयेत् ॥ ॐयतो यतः समीहसे ततो नो अभयं कुरु । शं नः कुरु

प्रजाभ्योभयं
न: पशुभ्य: ॥ **प्रणमेत्** ॥
**अनेन कृताऽर्चनेनास्मिन् स्तम्भाधिष्ठातृ विष्णवाद्यावाहित देवता: प्रीयन्ताम् न मम ॥**
**३–नैर्ऋत्य कोणे श्वेत स्तम्भे शंकरं पूजयेत्** ॥
ॐ नमस्ते रुद्रमन्यव उतोतइषवे नम: । बाहुभ्यामुतते नम: ॥ भूर्भुव: स्व: शंकराय नम: शंकरमावाहयामि स्थापयामि ॥ गंधादिभि: संपूज्य ॥ **तत्रैव** ॥ ॐगौर्यै नम: । ॐमाहेश्वर्यै नम: । ॐशोभनायै नम: । भद्रायै नम: । सम्पूज्य ॥
**स्तम्भमालभेत्**:–ॐऊर्ध्व ऽऊषुण ऽऊतये तिष्ठा देवो न सविता । ऊर्ध्वो व्वाजस्य सनिता यदञ्जिभि र्व्वाघद्भिर्व्विह्वयामहे ॥
**स्तम्भ शिरसि**:–ॐआयङ्गौ: पृश्निरक्रमीदसदन्मातरं पुर: । पितरंच प्रयंत्स्व: ॥ नागमात्रे नम: । संपूज्य । शाखाबन्धनानि पूजयेत् ॥
ॐयतो यत: समीहसे ततो नो अभयं कुरु । शं न: कुरु प्रजाभ्योऽभयं न: पशुभ्य: ॥ **प्रणमेत्** ॥
**अनेन कृताऽर्चनेनास्मिन् स्तम्भाधिष्ठातृ शंकराद्यावाहित देवता: प्रीयन्ताम् न मम ॥**
**४–वेद्या वायव्य कोणे पीतवर्ण स्तम्भे इन्द्रं पूजयेत्** ॥
ॐत्रातारमिन्द्रमवितारमिंद्रꣳ हवे हवे सुहवꣳ शूरमिंद्रम् । ह्वयामि शक्रं पुरुहूतमिन्द्रꣳ स्वस्ति नो मघवा धात्विन्द्र: ॥ भूर्भुव: स्व: इन्द्राय नम: इन्द्रमावाहयामि स्थापयामि ॥ गंधादिभि: संपूज्य ॥ **तत्रैव** ॥ ॐइन्द्राण्यै नम: । ॐआनन्दायै नम: । ॐविभूत्यै नम: । ॐअदित्यै नम: । सम्पूज्य ॥
**स्तम्भ मालभेत्**:–ॐऊर्ध्व ऽऊषुण ऽऊतये तिष्ठा देवो न सविता । ऊर्ध्वो व्वाजस्य सनिता यदञ्जिभि र्व्वाघद्भिर्व्विह्वयामहे ॥
**स्तम्भ शिरसि**:–ॐआयङ्गौ: पृश्निरक्रमीदसदन्मातरं पुर: । पितरंच प्रयंत्स्व: ॥ नागमात्रे नम: । संपूज्य । शाखाबन्धनानि पूजयेत् ॥

ॐयतो यतः समीहसे ततो नो अभयं कुरु । शं नः कुरु प्रजाभ्योभयं नः पशुभ्यः ॥ **प्रणमेत्** ॥

**अनेन कृताऽर्चनेनास्मिन् स्तम्भाधिष्ठातृ इन्द्राद्यावाहित देवताः प्रीयन्ताम् न मम** ॥

**५-(ततो बाह्ये ईशानादारभ्य उत्तरेशान मध्यपर्यन्तं द्वादश स्तम्भान्पूजयेत्)** ॥

**ईशान कोणे रक्त स्तम्भे सूर्यं पूजयेत्** ॥

ॐ आकृष्णे नरजसा व्वर्त्तमानो निवेशयन्नमृतं मर्त्यंच । हिरण्ययेन सवितारथेना देवोयाति भुवनानि पश्यन् ॥ ॐ भूर्भुवः स्वः सूर्याय नमः सूर्यमावाहयामि स्थापयामि ॥ गंधादिभिः संपूज्य ॥ **तत्रैव** ॥ ॐसौर्यै नमः । ॐ भूत्यै नमः । ॐ सावित्र्यै नमः । ॐ मंगलायै नमः । सम्पूज्य ।

**स्तम्भ मालयेत्**:-ॐऊर्ध्व ऽऊषुण ऽऊतये तिष्ठा देवो न सविता । ऊर्ध्वो व्वाजस्य सनिता यदञ्जिभि र्व्वाघद्भिर्व्विह्वयामहे ॥

**स्तम्भ शिरसिः**-ॐआयङ्गौः पृश्निरक्रमीदसदन्मातरं पुरः । पितरंच प्रयंत्स्वः ॥ नागमात्रे नमः । संपूज्य । शाखाबन्धनानि पूजयेत् नमस्कारम् ॥

ॐयतो यतः समीहसे ततो नो अभयं कुरु । शं नः कुरु प्रजाभ्योऽभयं नः पशुभ्यः ॥ **प्रणमेत्** ॥

**अनेन कृताऽर्चनेनास्मिन् स्तम्भाधिष्ठातृ सूर्याद्यावाहित देवताः प्रीयन्ताम् न मम** ॥

**6-ईशान पूर्वयोर्मध्ये श्वेतवर्ण स्तम्भे गणेशं पूजयेत्** ॥

ॐ गणानांत्वा गणपति ठँ हवामहे प्रियाणां त्वा प्रियपति ठँ हवामहे निधीनां त्वा निधिपति ठँ हवामहे वसो मम । आहमजानि गर्ब्भधमा त्वमजासि गर्ब्भधम् ॥ ॐ भूर्भुवः स्वः गणपतये नमः गणपतिमावाहयामि स्थापयामि ॥ गंधादिभिः संपूज्य ॥

**तत्रैव** ॥ ॐसरस्वत्यै नमः । विघ्नहरायै नमः । जयायै नमः । संपूज्य ।

**स्तम्भ मालभेत्**:–ॐऊर्ध्व ऽऊषुण ऽऊतये तिष्ठा देवो न सविता । ऊर्ध्वो व्वाजस्य सनिता यदञ्जिभि र्व्वाघद्भिर्व्विह्वयामहे ॥

**स्तम्भ शिरसि**:–ॐआयङ्गौः पृश्निरक्रमीदसदन्मातरं पुरः । पितरंच प्रयंत्स्वः ॥ नागमात्रे नमः । संपूज्य । शाखाबन्धनानि पूजयेत् नमस्कारम् ॥

ॐयतो यतः समीहसे ततो नो अभयं कुरु । शं नः कुरु प्रजाभ्योऽभयं नः पशुभ्यः ॥ **प्रणमेत्** ॥

**अनेन कृताऽर्चनेनास्मिन् स्तम्भाधिष्ठातृ गणपत्याद्यावाहित देवताः प्रीयन्ताम् न मम** ॥

**७–पूर्वाग्नेयोर्मध्ये कृष्णवर्ण स्तम्भे यमं पूजयेत्** ॥

ॐ यमाय त्वा मखाय त्वा सूर्यस्य त्वा तपसे । देवस्त्वा सविता मध्वानक्तु पृथिव्याः सꣳ स्पृशस्पाहि । अर्चिरसि शोचिरसि तपोसि ॥ॐ भूर्भुवः स्वः यमाय नमः यममावाहयामि स्थापयामि ॥ गंधादिभिः संपूज्य ॥ **तत्रैव** ॥ ॐसन्ध्यायै नमः । ॐआञ्जन्यै नमः । ॐक्रूरायै नमः । ॐनियन्त्र्यै नमः । संपूज्य ।

**स्तम्भ मालभेत्**:–ॐऊर्ध्व ऽऊषुण ऽऊतये तिष्ठा देवो न सविता । ऊर्ध्वो व्वाजस्य सनिता यदञ्जिभि र्व्वाघद्भिर्व्विह्वयामहे ॥

**स्तम्भ शिरसि**:–ॐआयङ्गौः पृश्निरक्रमीदसदन्मातरं पुरः । पितरंच प्रयंत्स्वः ॥ नागमात्रे नमः । संपूज्य । शाखाबन्धनानि पूजयेत् नमस्कारम् ॥

ॐयतो यतः समीहसे ततो नो अभयं कुरु । शं नः कुरु प्रजाभ्योभयं नः पशुभ्यः ॥ **प्रणमेत्** ॥

**अनेन कृताऽर्चनेनास्मिन् स्तम्भाधिष्ठातृ यमाद्यावाहित देवताः प्रीयन्ताम् न मम** ॥

**८–अग्निकोणे कृष्णवर्ण स्तम्भे नागराजं पूजयेत्** ॥

ॐ नमोऽस्तु सर्पेभ्यो येके च पृथिवी मनु । ये ऽ अन्तरिक्षे येदिवि तेभ्य: सर्पेभ्यो नम: ॥ ॐ भूर्भुव: स्व: नागराजाय नम: नागराजमावाहयामि स्थापयामि ॥ गंधादिभि: संपूज्य ॥ **तत्रैव** ॥ ॐमध्यमसंध्यायै नम: । ॐधरायै नम: । ॐपद्मायै नम: । ॐमहापद्मायै नम: । संपूज्य ।

**स्तम्भ मालभेत्**:-ॐऊर्ध्व ऽऊषुण ऽऊतये तिष्ठा देवो न सविता । ऊर्ध्वो व्वाजस्य सनिता यदञ्जिभि र्व्वाघद्भिर्व्विह्वयामहे ॥

**स्तम्भ शिरसि**:-ॐआयङ्गौ: पृश्निरक्रमीदसदन्मातरं पुर: । पितरंच प्रयंत्स्व: ॥ नागमात्रे नम: । संपूज्य । शाखाबन्धनानि पूजयेत् नमस्कारम् ॥

ॐयतो यत: समीहसे ततो नो अभयं कुरु । शं न: कुरु प्रजाभ्योऽभयं न: पशुभ्य: ॥ **प्रणमेत्** ॥

**अनेन कृताऽर्चनेनास्मिन् स्तम्भाधिष्ठातृ नागराजाद्यावाहित देवता: प्रीयन्ताम् न मम** ॥

**९-अग्निदक्षिणयोर्मध्ये श्वेतवर्ण स्तम्भे स्कन्दं पूजयेत्** ॥

ॐ यदक्रंद: प्रथमं जायमान ऽ उद्यन्त्समुद्रादुत वा पुरीषात् । श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं महि जातं ते ऽऽ अर्वन् ॥ ॐ भूर्भुव: स्व: स्कन्दाय नम: स्कन्दमावाहयामि स्थापयामि ॥ गंधादिभि: संपूज्य ॥ **तत्रैव** ॥ ॐ पश्चिमसंध्यायै नम: । संपूज्य ।

**स्तम्भमालभेत्**:-ॐऊर्ध्व ऽऊषुण ऽऊतये तिष्ठा देवो न सविता । ऊर्ध्वो व्वाजस्य सनिता यदञ्जिभि र्व्वाघद्भिर्व्विह्वयामहे ॥

**स्तम्भ शिरसि**:-ॐआयङ्गौ: पृश्निरक्रमीदसदन्मातरं पुर: । पितरंच प्रयंत्स्व: ॥ नागमात्रे नम: । संपूज्य । शाखाबन्धनानि पूजयेत् नमस्कारम् ॥

ॐयतो यत: समीहसे ततो नो अभयं कुरु । शं न: कुरु प्रजाभ्योऽभयं न: पशुभ्य: ॥ **प्रणमेत्** ॥

**अनेन कृताऽर्चनेनास्मिन् स्तम्भाधिष्ठातृ स्कन्दाद्यावाहित देवताः प्रीयन्ताम् न मम ॥**

**१०–दक्षिण नैर्ऋत्ययोर्मध्ये धूम्रवर्ण स्तम्भे वायुं पूजयेत् ॥**

ॐवायो येते सहस्त्रिणो रथासस्ते भिरागहि । नियुत्वान्सोमपीतये॥ ॐ भूर्भुवः स्वः वायवे नमः वायुमावाहयामि स्थापयामि ॥ गंधादिभिः संपूज्य ॥ **तत्रैव** ॥ ॐवायव्यै नमः। ॐगायत्र्यै नमः । ॐमध्यमसंध्यायै नमः । संपूज्य ।

**स्तम्भमालभेत्**:–ॐऊर्ध्व ऽऊषुण ऽऊतये तिष्ठा देवो न सविता । ऊर्ध्वो व्वाजस्य सनिता यदञ्जिभि र्व्वाघद्भिर्व्विह्वयामहे ॥

**स्तम्भ शिरसि**:–ॐआयङ्गौः पृश्निरक्रमीदसदन्मातरं पुरः । पितरंच प्रयंत्स्वः ॥ नागमात्रे नमः । संपूज्य । शाखाबन्धनानि पूजयेत् नमस्कारम् ॥

ॐयतो यतः समीहसे ततो नो अभयं कुरु । शं नः कुरु प्रजाभ्योऽभयं नः पशुभ्यः ॥ **प्रणमेत्** ॥

**अनेन कृताऽर्चनेनास्मिन् स्तम्भाधिष्ठातृ स्कन्दाद्यावाहित देवताः प्रीयन्ताम् न मम ॥**

**११–नैर्ऋत्यै पीतवर्ण स्तम्भे सोमं पूजयेत् ॥**

ॐ आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् । भवा वाजस्य सङ्गथे ॥ ॐ भूर्भुवः स्वः सोमाय नमः सोममावाहयामि स्थापयामि ॥ गंधादिभिः संपूज्य ॥ **तत्रैव** ॥

ॐसावित्र्यै नमः । ॐ अमृतकलायै नमः । ॐ पश्चिमसंध यायै नमः । संपूज्य ।

**स्तम्भमालभेत्**:–ॐऊर्ध्व ऽऊषुण ऽऊतये तिष्ठा देवो न सविता । ऊर्ध्वो व्वाजस्य सनिता यदञ्जिभि र्व्वाघद्भिर्व्विह्वयामहे ॥

**स्तम्भ शिरसि**:–ॐआयङ्गौः पृश्निरक्रमीदसदन्मातरं पुरः । पितरंच प्रयंत्स्वः ॥ नागमात्रे नमः । संपूज्य । शाखाबन्धनानि पूजयेत् नमस्कारम् ॥

ॐसतो सतः समीहसे ततो नो अभयं कुरु । शं नः कुरु प्रजाभ्योऽभयं नः पशुभ्यः ॥ **प्रणमेत्** ॥
**अनेन कृताऽर्चनेनास्मिन् स्तम्भाधिष्ठातृ सोमाद्यावाहित देवताः प्रीयन्ताम् न मम ॥**
**१२–नैर्ऋत्य पश्चिमयोर्मध्ये श्वेतवर्ण स्तम्भे वरुणं पूजयेत् ॥**
ॐ इमं मे वरुण श्रुधी हवमद्या च मृडय । त्वा मवस्युरा चके॥ॐ भूर्भुवः स्वः वरुणाय नमः वरुणमावाहयामि स्थापयामि ॥ गंधादिभिः संपूज्य ॥ **तत्रैव** ॥ ॐवारुण्यै नमः । पाशधारिण्यै नमः । ॐबृहत्यै नमः । संपूज्य ।
**स्तम्भमालभेत्**:–ॐऊर्ध्व ऽऊषुण ऽऊतये तिष्ठा देवो न सविता । ऊर्ध्वो व्वाजस्य सनिता यदञ्जिभि र्व्वाघद्भिर्व्विह्वयामहे ॥
**स्तम्भ शिरसि**:–ॐआयङ्गौः पृश्निरक्रमीदसदन्मातरं पुरः । पितरंच प्रयंत्स्वः ॥ नागमात्रे नमः । संपूज्य । शाखाबन्धनानि पूजयेत् नमस्कारम् ॥
ॐसतो सतः समीहसे ततो नो अभयं कुरु । शं नः कुरु प्रजाभ्योऽभयं नः पशुभ्यः ॥ **प्रणमेत्** ॥
**अनेन कृताऽर्चनेनास्मिन् स्तम्भाधिष्ठातृ वरुणाद्यावाहित देवताः प्रीयन्ताम् न मम ॥**
**13–पश्चिम वायव्ययोर्मध्ये श्वेतवर्ण स्तम्भे अष्टवसून् पूजयेत् ॥**
ॐवसुभ्यस्त्वा रुद्रेभ्यत्वादित्येभ्यस्त्वा सञ्जानाथां द्यावापृथिवी मित्रावरुणौत्वा पृष्ट्यावताम् । व्यन्तु व्ययोक्त ॐ रिहाणा मरुतां पृषतीर्गच्छ व्वशा पृश्निर्भूत्वा दिवं गच्छ ततो नो व्वृष्टिमावह चक्षुष्पाऽअग्नेऽसि चक्षुर्म्मे पाहि ॥ ॐ भूर्भुवः स्वः भू अष्टवसुभ्यो नमः वसूनावाहयामि स्थापयामि ॥ गंधादिभिः संपूज्य ॥ **तत्रैव** ॥ ॐविनतायै नमः । ॐअणिमायै नमः । ॐ भूत्यै नमः । ॐगरिमायै नमः । संपूज्य ।

**स्तम्भमालभेत्**:–ॐऊर्ध्व ऽऊषुण ऽऊतये तिष्ठा देवो न सविता । ऊर्ध्वो व्वाजस्य सनिता यदञ्जिभि र्व्वाघद्भिर्व्विह्वयामहे ॥

**स्तम्भ शिरसि**:–ॐआयङ्गौः पृश्निरक्रमीदसदन्मातरं पुरः । पितरंच प्रयंत्स्वः ॥ नागमात्रे नमः । संपूज्य । शाखाबन्धनानि पूजयेत् नमस्कारम् ॥

ॐयतो यतः समीहसे ततो नो अभयं कुरु । शं नः कुरु प्रजाभ्योऽभयं नः पशुभ्यः ॥ **प्रणमेत्** ॥

**अनेन कृताऽर्चनेनास्मिन् स्तम्भाधिष्ठातृ अष्टवसुवाद्यावाहित देवताः प्रीयन्ताम् न मम** ॥

**१४–वायव्य कोणे पीतवर्ण स्तम्भे धनदं पूजयेत्** ॥

ॐ सोमो धेनुꣳ सोमो अर्वन्तमाशुꣳ सोमोवीरं कर्मण्यं ददाति । सादन्यंविदत्थ्यꣳ सभेयं पितृश्रवणं यो ददाशदस्मै ॥ ॐ भूर्भुवः स्वः धनदाय नमः धनदमावाहयामि स्थापयामि ॥ गंधादिभिः संपूज्य ॥ **तत्रैव** ॥ ॐआदित्यायै नमः । ॐलघिमायै नमः । ॐसिनिवाल्यै नमः । संपूज्य ।

**स्तम्भमालभेत्**:–ॐऊर्ध्व ऽऊषुण ऽऊतये तिष्ठा देवो न सविता । ऊर्ध्वो व्वाजस्य सनिता यदञ्जिभि र्व्वाघद्भिर्व्विह्वयामहे ॥

**स्तम्भ शिरसि**:–ॐआयङ्गौः पृश्निरक्रमीदसदन्मातरं पुरः । पितरंच प्रयंत्स्वः ॥ नागमात्रे नमः । संपूज्य । शाखाबन्धनानि पूजयेत् नमस्कारम् ॥

ॐयतो यतः समीहसे ततो नो अभयं कुरु । शं नः कुरु प्रजाभ्योऽभयं नः पशुभ्यः ॥ **प्रणमेत्** ॥

**अनेन कृताऽर्चनेनास्मिन् स्तम्भाधिष्ठातृ धनदाद्यावाहित देवताः प्रीयन्ताम् न मम** ॥

**१५–उत्तरवायव्योर्मध्ये पीतस्तम्भे गुरुं पूजयेत्** ॥

ॐ बृहस्पतेऽअतियदर्य्योऽअर्हा द्युमद्विभाति क्रतुमज्जनेषु । यद्दीदयच्छवस ऋृत प्रजा ततदस्मा सुद्रविणं धेहि चित्रम् ॥ ॐ

भूर्भुवः स्वः भू गुरवे नमः गुरुमावाहयामि स्थापयामि ॥ गंधादिभिः संपूज्य ॥ **तत्रैव** ॥ ॐपौर्णमास्यै नमः । ॐसावित्र्यै नमः। संपूज्य ।
**स्तम्भमालभेत्**:–ॐऊर्ध्व ऽऊषुण ऽऊतये तिष्ठा देवो न सविता । ऊर्ध्वो व्वाजस्य सनिता यदञ्जिभि र्व्वाघद्भिर्व्विह्वयामहे ॥
**स्तम्भ शिरसि**:–ॐआयङ्गौः पृश्निरक्रमीदसदन्मातरं पुरः । पितरंच प्रयंत्स्वः ॥ नागमात्रे नमः । संपूज्य । शाखाबन्धनानि पूजयेत् नमस्कारम् ॥
ॐयतो यतः समीहसे ततो नो अभयं कुरु । शं नः कुरु प्रजाभ्योऽभयं नः पशुभ्यः ॥ **प्रणमेत्** ॥
**अनेन कृताऽर्चनेनास्मिन् स्तम्भाधिष्ठातृ गुर्वावाहित देवताः प्रीयन्ताम् न मम** ॥
**१६–उत्तरेशानयोर्मध्ये रक्तवर्ण स्तम्भे विश्वकर्माणं पूजयेत्** ॥
ॐविश्वकर्म्मन्हविषा वर्द्धनेन त्रातारमिन्द्रमकृणोरवध्यम् । तस्मै विशः समनमन्त पूर्वीरयमुग्रो विहव्यो यथासत् ॥ ॐ विश्वकर्मणे नमः । विश्वकर्माणमावाहयामि स्थापयामि ॥ गंधादिभिः संपूज्य ॥ **तत्रैव** ॥ ॐसिनिवाल्यै नमः । ॐसावित्र्यै नमः । ॐवास्तुदेवतायै नमः । संपूज्य ।
**स्तम्भमालभेत्**:–ॐऊर्ध्व ऽऊषुण ऽऊतये तिष्ठा देवो न सविता । ऊर्ध्वो व्वाजस्य सनिता यदञ्जिभि र्व्वाघद्भिर्व्विह्वयामहे ॥
**स्तम्भ शिरसि**:–ॐआयङ्गौः पृश्निरक्रमीदसदन्मातरं पुरः । पितरंच प्रयंत्स्वः ॥ नागमात्रे नमः । शाखा बन्धनानि संपूज्य, नमस्कारम् । ॐयतो यतः समीहसे ततो नो अभयं कुरु । शं नः कुरु प्रजाभ्योऽभयं नः पशुभ्यः ॥ **प्रणमेत्** ॥
**अनेन कृताऽर्चनेनास्मिन् स्तम्भाधिष्ठातृ विश्वकर्माद्यावाहित देवताः प्रीयन्ताम् न मम** ॥
**ततः पश्चिमद्वारेण निर्गत्य पूर्वादि तोरणद्वार पूजां कुर्यात्** :–
**१–पूर्वद्वारे**:–ॐ अग्निमीले पुरोहितं यज्ञस्य देवमृत्विजम् ॥ होतारं

रत्नधातमम् ॥ ३ॐ ऋग्वेदाधिष्ठिताय सुदृढतोरणाय नमः । सुदृढतोरणमावाहयामि स्थापयामि ॥ गंधादिभिः संपूज्य । तत्र । ३ॐकृतयुगाय नमः । तत्रैव । ३ॐराहवे नमः । राहुमावाहयामि स्थापयामि । बृहस्पतिंमावाहयामि स्थापयामि । राहुबृहस्पतिभ्यां नमः । गंधादिभिः संपूज्य । भूमौ कलशं स्थापयेत् । कलशे ३ॐध्रुवाय नमः । संपूज्य । प्रणमेत् ।

**२–दक्षिणद्वारेः**–३ॐ इषेत्वोर्ज्जेत्वा वायवस्थदेवोवः सविता प्रार्पयतु श्रेष्ठतमाय कर्मण आप्यायध्वमघ्न्याऽ इन्द्रायभागं प्रजावतीरनमीवा अयक्ष्मामावस्तेन ईशतमाघशꣳसोध्रुवाऽ अस्मिन् गोपतौ स्यात बह्वीर्यजमानस्य पशून्पाहि ॥ ३ॐयजुर्वेदाधिष्ठिताय विकट तोरणाय नमः । त्रेतायुगाय नमः । संपूज्य । ३ॐसूर्याय नमः आवाहयामि स्थापयामि । ३ॐअङ्गारकाय नमः आवाहयामि स्थापयामि । सूर्याङ्गारकाभ्यां नमः आवाहयामि स्थापयामि । संपूज्य । तत्रैव । कलशं संस्थाप्य । तस्मिन्कलशे ३ॐ धरायै नमः संपूज्य ॥

**३–पश्चिमेद्वारेः**–३ॐ अग्न ऽ आयाहि वीतये गृणानो हव्यदातये । निहोता सत्सि बर्हिषि ॥ सामवेदाधिष्ठिताय सुभीमतोरणाय नमः । द्वापरयुगाय नमः । संपूज्य । तत्र शुक्राय नमः । बुधाय नमः । ३ॐशुक्रबुधाभ्यां नमः आवाहयामि स्थापयामि ॥ संपूज्य । तत्रैव कलशं स्थापयेत् । कलशे वाक्पतये नमः । संपूज्य ॥

**४–उत्तरद्वारेः**–३ॐशन्नो देवी रभिष्टयऽआपो भवन्तु पीतये। शँय्यो रभिस्त्रवंतुनः ॥ अथर्ववेदाधिष्ठिताय सुप्रभ तोरणाय नमः । कलियुगाय नमः । गंधादिभिः संपूज्य । तत्र ३ॐसोमाय नमः । ३ॐकेतवे नमः । ३ॐशनैश्चराय नमः । सोमकेतु–शनैश्चरेभ्यो नमः । संपूज्य । तत्रैव । कलशं स्थापयेत् । कलशे ३ॐविघ्नेशाय नमः ।संपूज्य ।

**५–पुनः पूर्वद्वारे गत्वाः**–प्रतिद्वारशाखां कलशद्वयं संस्थाप्य ।

कलशाभ्यां ऐरावतदिग्गजं आवाहयामि स्थापयामि ॥ गंधादिभिः संपूज्य । कलशोपरि घृतेन दीपो देयः ॥

१–ॐ अग्निमीले पुरोहितं यज्ञस्य देवमृत्विजम् ॥ होतारं रत्नधातमम् ॥ ऋग्वेदमूर्तये नमः । गंधादिभिः संपूज्य । द्वारकलशे संपूज्य ।

ॐ त्रातारमिन्द्रमवितारमिंद्रꣳ हवे हवे सुहवꣳ शूरमिंद्रम् । ह्वयामि शक्रं पुरुहूतमिन्द्रꣳ स्वस्ति नो मघवा धात्विन्द्रः ॥ इन्द्राय नमः । संपूज्य ।

ॐआशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम् । सङ्क्रन्दनो निमिषऽ एकवीरः शत ꣳ सेना ऽअजयत्साकमिन्द्रः ॥

**इतिमंत्रेण पीतौ पताकाध्वजावुच्छ्रयेत् ।**

**द्वारशाखयोः– दक्षिणेः** ॐधात्रे नमः । **उत्तरे** ॐविधात्रे नमः । **ऊर्ध्वः**–ॐद्वारश्रियै नमः । ॐगणपतये नमः । ॐ वास्तुपुरुषाय नमः । **अधः**–द्वारदेहल्यै नमः । **दक्षिण स्तम्भेः**–ॐगणेशाय नमः । **वामस्तम्भेः**–ॐस्कन्दाय नमः ।

**दक्षिणकलशेः**–ॐगंगायै नमः । वामकलशेः– ॐयमुनायै नमः । बलिदद्यात्ः–ॐइन्द्राय इमं बलिं समर्पयामि ॥

**2–आग्नेयां पूर्ववत्ः**–कलशं स्थापयेत्–ततः ॐपुण्डरीकाय नमः । ॐ अमृताय नमः । पुण्डरीकामृताभ्यां नमः । संपूज्य । **दीपं दद्यात् ।**

**कलशेः**–ॐत्वन्नोऽ अग्नेतवदेव पायुभिर्मघोनो रक्षतन्वश्चवन्द्य । त्रातातोकस्य तनये गवामस्य निमेष ꣳ रक्षमाणस्तवव्रते ॥

ॐ अग्नये नमः । संपूज्य ।

ॐ अग्निंदूतं पुरोदधे हव्यवाहमुपब्रुवे । देवां २ आसादयादिह ॥

**इति मंत्रेण रक्त पताका ध्वजावुच्छ्रयेत् । बलिदद्यात् ।**

**३–दक्षिणेः**– प्रतिद्वार शाखा कलशद्वयं संस्थाप्य । तत्र वामनाख्य

दिग्गजमावाहयेत् । ॐ वामनाख्यादिग्गजाय नमः । संपूज्य । दीपं दद्यात् ।

**यजुर्वेदमूर्तिं पूजयेत्**–ॐ इषेत्वोर्ज्जेत्वा वायवस्थदेवोवः सविता प्रार्पयतु श्रेष्ठतमाय कर्मण आप्यायध्वमघ्न्याऽ इंद्रायभागं प्रजावतीरनमीवा अयक्ष्मामावस्तेन ईशतमाघशंसो ध्रुवाऽ अस्मिन् गोपतौ स्यात बह्वीर्यजमानस्य पशून्पाहि ॥ ॐ यजुर्वेदमूर्तये नमः।

**द्वारकलशे यमं पूजयेत्** । ॐयमाय त्वाङ्गिरस्वते पितृमते स्वाहा । स्वाहा घर्माय स्वाहा घर्मः पित्रे ॥ ॐ यमाय नमः । **कृष्णवर्ण पताका ध्वजावुच्छ्रयेत्** ॥ ॐ आयङ्गौः पृश्निरक्रमीदसदन् मातरं पुरः । पितरं च प्रयन्त्स्वः ॥ संपूज्य । दक्षिण शाखाबलाय नमः । **उत्तरशाखायां**– बलाय नमः । ऊर्ध्वं श्रियै नमः । गणपतये नमः । अधः देहल्यै नमः । वास्तुपुरुषाय नमः । **दक्ष स्तम्भे**– ॐ पुष्पदन्ताय नमः । **वाम स्तम्भे**– ॐ कपर्दिने नमः । कलशे गोदावर्यै नमः । कृष्णायै नमः । संपूजयेत् । बलिंदद्यात् ।

**४–नैर्ऋत्यै कोणे कलशं स्थापयेत्**:–ॐमुकुदमावाहयामि स्थापयामि । दुर्ज्जयमावाहयामि स्थापयामि । मुकुददुर्ज्जयाभ्यां नमः । संपूज्य । **दीपो दद्यात्** ।

ॐ असुन्वन्तम यजमानमिच्छ स्तेनस्येत्यामन्विहि तस्करस्य । अन्यमस्मदिच्छ सा तऽ इत्या नमो देवि निर्ऋते तुभ्यमस्तु ॥ ॐ भूर्भुवः स्वः निर्ऋत्यै नमः । संपूज्य । **नीलवर्ण पताका ध्यजावुच्छ्रयेत्**–ॐमोषूणऽइन्द्रात्र पृत्सुदेवैरस्तिहिष्मातेशुष्मिन्नवयाः । महश्चिद्यस्यमीढुषोयव्या हविष्मतो मरुतोवन्दतेगीः॥ संपूज्य । बलिं दद्यात् ।

**५–पश्चिमे**:–कलशद्वयं स्थापयेत्–तत्रैव– अजञ्जनाख्य दिग्गजमावाहयेत्–पूजयेत् । सामवेद मूर्तये नमः । **विप्रं पूजयेत्** । ॐ अग्न ऽ आयाहि वीतये गृणानो हव्यदातये । निहोता सत्सि

बर्हिषि ॥ द्वारकलशे वरुणं पूजयेत् । **श्वेत पताका ध्वजावुच्छ्रयेत्** ॥ ॐ इमम्मे व्वरुण श्रुधी हवमद्या च मृडय । त्वा मवस्युरा चके ॥

**द्वारशाखयोः** दक्षिणे– जयाय नमः । वामे– विजयाय नमः । ऊर्ध्वे– द्वारश्रियै नमः ।गणपतये नमः । अधः देहल्यै नमः । वास्तुपुरुषाय नमः । स्तम्भयोः नन्दिने नमः । चन्द्राय नमः । कलशे– रेवायै नमः । नर्मदायै नमः । बलिं दद्यात् ॥

६–**वायव्य कोणेः**–कलशं स्थापयेत् तत्र पुष्पदन्ताय नमः । सिद्धार्थाय नमः । संपूज्य । तत्रैव । ॐ आनोनियुद्भिः शतिनीभिरध्वरꣳ सहस्त्रिणीभिरुप याहि यज्ञम् । वायो अस्मिन्त्सवने मादयस्व यूयं पात स्वस्तिभिः सदा नः ॥ ॐ वायवे नमः । संपूज्य । **धूम्रवर्ण पताका ध्वजावुच्छ्रयेत्** । ॐवायो ये ते सहस्त्रिणो रथासस्तेभिरागहि । नियुत्वान्सोमपीतये ॥ बलिं दद्यात् ॥

७–**उत्तरे पूर्ववत्**:–प्रतिशाखाकलशौ स्थापयेत्– तत्र– सार्वभौमदिग्गजाय नमः । पूजयेत् तथा दीपो दद्यात् ।

**अथर्वेद मूर्तिं पूजयेत्**– ॐशन्नो देवी रभिष्टयऽआपो भवन्तु पीतये। शँय्यो रभिस्त्रवंतुनः ॥ **कलशेः**– सोमं संपूज्य । ॐ वयꣳ सोमव्रते तव मनस्तनूषु बिभ्रतः । प्रजावन्तः सचेमहि ॥ ॐ सोमाय नमः । **तत्र हरित पताका ध्वजावुच्छ्रयेत्** ॥ ॐ आप्यायस्व समेतु ते विश्र्वतः सोम वृष्ण्यम् । भवा वाजस्य सङ्गथे॥ **उत्तरशाखायां**– चण्डाय नमः । दक्षिणशाखायां प्रचण्डाय नमः । ऊर्ध्वं द्वारश्रियै नमः । गणपतये नमः । अधः देहल्यै नमः । वास्तुपुरुषाय नमः । दक्षिण स्तम्भे महाकालाय नमः । वाम स्तम्भे भृङ्गिणे नमः । तत्रैव । कलशे वारुण्यै नमः । वेण्यै नमः । बलिं दद्यात् ।

**८–ऐशान्यां**:–कलशं स्थापयेत् तत्र– ॐसुप्रतीकाय नमः । ॐमंगलाय नमः । संपूज्य । ॐतमीशानं जगतस्तस्थुषस्पतिं धियञ्जिन्वमवसे हूमहे वयम् । पूषा नो यथा वेदसामसद् वृधे रक्षिता पायुरदब्धः स्वस्तये ॥ ईशानाय नमः । गंधादिभिः संपूज्य । श्वेतवर्ण पताका ध्वजावुच्छ्रयेत् ॥ ॐतमीशानं जगतस्तस्थुषस्पतिं धियञ्जिन्वमवसे हूमहे वयम् । पूषा नो यथा वेदसामसद् वृधे रक्षिता पायुरदब्धः स्वस्तये ॥ बलिं दद्यात् ॥

**९–ईशान पूर्वयोर्मध्ये**:–कलशं स्थापयेत् तत्र– **ब्रह्माणं पूजयेत्**– ॐब्रह्मयज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचोवेनऽ आवः । सबुध्न्याऽउपमाऽ अस्यविष्ठाः सतश्च योनिमसतश्च विवः ॥ ॐब्रह्मणे नमः । **रक्तवर्ण पताका ध्वजावुच्छ्रयेत्** । बलिं दद्यात् ॥

**१०–पश्चिम वायव्योर्मध्ये– श्वेतस्तम्भे– अष्टवसून् पूजयेत्**:–नैर्ऋति वरुणयोर्मध्ये **अधः** तत्र अनन्तं पूजयेत्:–ॐ आयङ्गौः पृश्निरक्रमीदसदन् मातरं पुरः । पितरं च प्रयन्त्स्वः ॥ ॐ अनन्ताय नमः। **धूम्रवर्ण पताकाध्वजावुच्छ्रयेत्**। बलिं दद्यात् ॥

## ॥ मण्डपमध्ये पञ्चवर्णीं महाध्वजां पूजयेत् ॥

ॐ ब्रह्मयज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचोवेनऽ आवः । सबुध्न्याऽउपमाऽ अस्यविष्ठाः सतश्च योनिमसतश्च विवः ॥ ॐ ब्रह्मणे नमः । संपूज्य । अनेन पूजनेन ब्रह्मा प्रीयताम् न मम ॥ ॐइन्द्रस्य वृष्णो वरुणस्य राज्ञऽ आदित्यानां मरुताॐ शर्द्धऽउग्रम् । महामनसां भुवनच्यवानां घोषोदेवानां जयतामुदस्थात् । इति उच्छ्रयेत् । **तत्र इन्द्रं पूजयेत्** ॥

ततः मण्डपाद् बहि पूर्वेशान समीपे– भूमिं गोमयेनोपलिप्य अष्टदलं कृत्वा–ॐ गणपतये नमः ॥

**प्रार्थयेत्**:– त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च । ब्रह्मविष्णु शिवैः सार्द्धं रक्षां कुर्वन्तु मे सदा ॥ देवदानव गन्धर्वो यक्ष राक्षस

पन्नगाः । ऋषयो मनवो गावो देवमातर एव च । सर्वे ममाध्वरे रक्षां प्रकुर्वन्तु मुदान्विता ॥ ब्रह्माविष्णुश्चरुद्रश्च क्षेत्रपाल गणैः सह । रक्षन्तु मण्डपं सर्वे घ्नन्तु रक्षांसि सर्वतः ॥

**ततो अक्षतपुंजेषु पूर्वादि क्रमेणः**–ॐ त्रैलोक्य स्थावरभूतेभ्यो नमः । त्रैलोक्यस्थानि चराणि भूतेभ्यो नमः । ॐब्रह्मणे नमः । ॐविष्णवे नमः । ॐशिवाय नमः । ॐदेवेभ्यो नमः । ॐदानवेभ्यो नमः । ॐगन्धर्वेभ्यो नमः । ॐयक्षेभ्यो नमः । ॐराक्षसेभ्यो नमः । ॐपन्नगेभ्यो नमः । ॐऋषिभ्यो नमः । ॐमनुष्येभ्यो नमः । ॐदेवमातृभ्यो नमः । **संपूज्य** । प्रत्येकं बलिं दद्यात् । ततो यजमानः साचार्यार्त्विक् हस्तौ प्रक्षाल्य मण्डपं प्रविशेत् । ब्राह्मणान् अभिवादयेत् ॥

## विवाह संस्कार प्रयोगः ॥

तत्र तावत्कन्यापिता अर्हणवेलायां मंडपे उदङ्मुख उपविश्य स्वदक्षिणतः पत्नीं चोपविश्य मंडपं समागताय वरायोपवेशनार्थं शुद्धमासनं दत्वा तत्र प्राङ्मुखं वरमूर्ध्व जानुं तिष्ठंतं मधुपर्केणार्चयेत् ॥

**आचम्य प्राणानायम्य** ॥ सुमुखश्चेत्यादि पठित्वा ॥ कन्यापिता हस्ते जलमादाय ॥

**संकल्पः**–अद्येत्यादि0 शुभपुण्यतिथौ कन्यार्थिनं मंडपम् आगतं वरं मधुपर्केणार्चयिष्ये ॥ तदङ्गत्वेन दिग्रक्षणं कलशाराधनं गणपति पूजनं च करिष्ये ॥ (तानि कृत्वा)

(ॐषडर्घ्या भवंत्याचार्य ऋत्विग्वैवाह्यो राजा प्रिय स्नातक इति प्रति संवत्सरानर्हये युक्ष्यमाणास्त्वृत्विजः । आसनमाहार्याह)

(आचार्य, ऋत्विक्, विवाहयोग्य,राजा, प्रिय और स्नातक ये छः अर्घ्य योग्य होते हैं)

**विनियोगः**–साधु भवानास्ता मिति मंत्रस्य प्रजापति ऋषिः ब्रह्मा देवता वरार्चने विनियोगः ॥

साधु भवानास्ता मर्चयिष्यामो भवन्तम् (कन्या पिता वदेत्)
अहं भवामि मां अर्चयेति (वरः प्रति वदेत्)
ततः कन्या पिता पंचविंशति कुशात्मकं विष्टरं गृहीत्वा॥
ॐ विष्टरो विष्टरो विष्टरः॥ (इति आचार्यः वदेत्)
विष्टरः प्रतिगृह्यताम् ॥ (कन्या पिता वदेत्)
विष्टरं प्रतिगृह्णामि॥ (वरो प्रति वदेत्)
(ततो यजमान विष्टरं वर हस्ते दद्यात् वरो विष्टरं गृहीत्वा)
**विनियोगः**–वर्ष्मोस्मीत्यथर्वण ऋषि विष्टरो देवता अनुष्टुप्छन्दः उपवेशने विनियोगः॥
ॐ वर्ष्मोस्मि समानाना मुद्यता मिव सूर्यः। इमन्तममितिष्ठामि यो माकश्चा भिदासति॥
विष्टरम् आसने निधाय तस्योपरि उपविशति॥
**पाद्यम्**:–ततः कन्या पिता पाद्यपात्रं गृहीत्वा॥
ॐ पाद्यम् पाद्यम् पाद्यम्॥ (इति आचार्यः वदेत्)
ॐ पाद्यम् प्रतिगृह्यताम्॥ (कन्या पिता वदेत्)
ॐपाद्यम् प्रतिगृह्णामि॥ (वरः प्रतिगृह्णामि इति प्रति वदेत् )
हस्ते पाद्यपात्रमादाय
(सव्यं पादं प्रक्षाल्य दक्षिणं प्रक्षालयति॥ ब्राह्मणश्चेद्दक्षिणं प्रथमम् प्रक्षालयेत्)
**विनियोगः**–विराजो दोहोसीति मंत्रस्य प्रजापति र्ऋषिरनुष्टुप्छन्दः आपो देवता पाद प्रक्षालने विनियोगः।
ॐ विराजो दोहोसि विराजो दोहमशीय मयिपाद्यायै विराजो दोहः॥ इत्युक्त्वा वरेण स्वयमेव पादप्रक्षालनं कर्तव्यम्॥
**द्वितीयः विष्टरः**–ततः कन्यापिता पंचविंशति कुशात्मकं विष्टरं गृहीत्वा॥
विष्टरो विष्टरो विष्टरः (कन्या पिता वदेत्) इत्युक्ते प्रतिगृह्णामि वरेणोक्ते पूर्ववत् द्वितीय विष्टरं वरहस्ते दद्यात्॥ **ततो वरः**–

ॐवर्ष्मोस्मि समानाना मुद्यता मिव सूर्यः । इमन्तममितिष्ठामि यो माकश्चा भिदासति ॥ (इत्येनमभ्युपविशति)
इति द्वितीय विष्टरं भूमौ निधाय तस्योपरि पादौ करोति
**अर्घम्**:-ततः कन्यापिता अर्ध्यपात्रं गंधपुष्पाक्षत फलोदक सहितं गृहीत्वा ॥
अर्घो अर्घो अर्घः ॥ (इति आचार्यः वदेत्)
अर्घं प्रतिगृह्यताम् ॥ (कन्या पिता वदेत्)
अर्घं प्रतिगृह्णामि ॥ (वरः प्रति वदेत्) वरहस्ते अर्घ्यं दद्यात् ॥
ततो वरः-
**विनियोगः**-आपः स्थ इतिमंत्रस्य सिन्धुद्वीप ऋषिः अनुष्टुप्छन्दः आपो देवताऽर्घ धारणे विनियोगः ॥
ॐआपस्थ युष्माभिः सर्वान् कामानवाप्नवानि (इति शिरसार्घवंदनं कृत्वानिनयन्नभि मंत्रयते)
**विनियोगः**- समुद्रं वः इति मंत्रस्य अर्थवण ऋषिः बृहती छन्दो वरुणो देवता अर्घ जल प्रवाहे विनियोगः ॥
ॐसमुद्रंवः प्रहिणोमिस्वां योनिमभि गच्छत । अरिष्टाऽअस्माकं वीरामापरासेचिमत्पयः ॥ (प्राग्वाउदग्वा क्षिपेत्)
(पूर्व या उत्तर मे अर्घ जल डाल दे)
**आचमनम्**:-ततः कन्यापिता आचमनीय पात्रं गृहीत्वा ॥
आचमनीयम् आचमनीयम् आचमनीयम् ॥ (आचार्यः वदेत्)
आचमनीयम् प्रतिगृह्यताम् (कन्या पिता वदेत्)
आचमनीयम् प्रतिगृह्णामीति वरेणोक्ते वरहस्ते आचमनीयपात्रं दद्यात् ॥
वरःविनियोगः-ॐआमागन्निति मंत्रस्य परमेष्ठी ऋषिर्बृहती छन्द आपो देवता आचमने विनियोगः ।
मंत्रः-ॐआमागन्यशसासꣳसृज वर्चसा ॥ तम्मा कुरुप्रियं

प्रजानामधिपतिं पशूनामरिष्टिं तनूनाम् (इति मन्त्रेण सकृदाचमनं कुर्यात् ॥ द्विस्तूष्णीम्)(दो बार चुपचाप,आचमन करें)
ततः कन्यापिता कांस्यपात्रे दधिमधुघृतम् एकीकृत्य ॥
(पलमेकं घृतं चैव द्विपलंदधि प्रोच्यते ॥ पलमेकं मधु कुर्यान्मधुपर्क विधिः स्मृतः)
ॐमधुपर्को मधुपर्को मधुपर्कः (आचार्यः वदेत् )
मधुपर्कः प्रतिगृह्यताम् ॥(यजमानः वदेत्)
मधुपर्कं प्रतिगृह्णामि ॥ (वरः प्रति वदेत्)
**विनियोगः**–मित्रस्येति मंत्रस्य प्रजापति र्ऋषिः पंक्तिश्छन्दो मित्रो देवता मधुपर्क दर्शने विनियोगः ॥
वरः कन्यापितुर्हस्त स्थितं मधुपर्कम् ईक्षते ॥ ॐमित्रस्यत्वा चक्षुषा प्रतीक्षे ॥
**वरःविनियोगः**–ॐ देवस्य त्वेति मंत्रस्य ब्रह्माऋषि र्गायत्रीछन्दः सविता देवता मधुपर्क ग्रहणे विनियोगः ॥
**आचार्यः**–ॐदेवस्यस्त्वा सवितुः प्रसवेश्विनो र्बाहुभ्यां पूष्णो हस्ताभ्याम् प्रतिगृह्णामि ॥ इत्युक्त्वा मधुपर्कं पाणिभ्यां गृहीत्वा वामहस्ते कृत्वा ॥
**वरःविनियोगः**–ॐनमः श्यावेति मंत्रस्य प्रजापति र्ऋषिर्गायत्री छन्दः सविता देवता मधुपर्कालोडने विनियोगः ॥
वरः दक्षिणहस्तस्यानामिकया त्रि वारं प्रदक्षिणमालोडयति ॥
**आचार्यः**–ॐनमः श्यावाश्यायान्नशनेयत्तऽ आविद्धंतत्ते निष्कृन्तामि ॥
वरः मधुपर्कं त्रिवारमालोड्य अनामिकांगुष्ठाभ्यां भूमौ क्षिपेत् त्रिवारम् ॥
तत्र त्रिः प्राश्नाति ॥
**वरःविनियोगः**–ॐयन्मधुनेति मंत्रस्य प्रजापतिर्ऋषिर्मधुपर्को देवता

अनुष्टुप्छन्दः मधुपर्क प्राशने विनियोगः ॥

**प्राशनं:**–ॐयन्मधुनो मधव्यं परमर्ठ रूपमन्नाद्यम् ॥ तेनाहं मधुनो मधव्येन परमेणरूपेणान्नाद्येन परमो मधव्योन्नादोसानि ॥

**त्रि प्राश्नाति,प्रति प्राशने चैतद् मंत्र पाठः**

ॐ मधुमतीभिर्वा प्रत्यृचं पुत्रायांते वासिनेवोत्तरतः आसीनायोच्छिष्टं दद्यात् ॥ सर्ववा प्राश्नीयात् प्राग्वासंचरे निनयेत् ॥ **आचमनं कुर्यात् ॥**

(तीन बार मधुपर्क का प्राशन करे फिर आचमन करे)

ततो यजमान वरः वामहस्ते जलं दद्यात् ॥ **वरः अङ्गन्यासं कुर्यात् ॥**

१–ॐवाङ्मऽआस्येस्तु ॥१॥ (प्राणान् संमृशति मुखं कराग्रेण)

(मुख का स्पर्श करे)

२–ॐनसोर्मे प्राणोस्तु ॥२॥ (तर्जन्य अंगुष्ठाभ्यां)

(नाक का स्पर्श करे)

३–ॐअक्ष्णोर्मेचक्षुरस्तु ॥३॥ (अनामिकाअंगुष्ठाभ्याम्)

(नेत्रों का स्पर्श करे)

४–ॐकर्णयोर्मे श्रोत्रमस्तु ॥४॥ (मध्यमा अंगुष्ठाभ्याम्)

(कान का स्पर्श करे)

५–ॐबाह्वोर्मे बलमस्तु ॥५॥ (कराग्रेण) (हाथों का स्पर्श करे)

६–ॐऊर्वोर्मे ओजोऽस्तु ॥६॥ (युगपद्धस्तेन)

(दोनो भुजाओं का स्पर्श करे)

(शिरः प्रभृति पादान्तानि सर्वांगानि उभाभ्यां हस्ताभ्याम्)

७–ॐअरिष्टानि मेऽङ्गानि तनूस्तन्वामे सहसन्तु इत्यास्यादि प्रत्येकं सर्व गात्राणि स्पृशेत् ॥

(आचान्तोदकाय सासमादायगौरीति त्रिः प्राहप्रत्याह)

(कुशा लेकर उच्चारण करे)

गौ गौं गौंः ॥ (गाय के लिये कुछ द्रव्य छुड़वावे)

ॐमाता रुद्राणां दुहिता वसूनाथं स्वसादित्या नाममृतस्य नाभिः ॥

प्रनुवोचं चिकितुषे जनाय मागामनागामदितिं वधिष्ट मम चामुष्य चा मुकशर्मणो यजमानस्योभयोः पाप्माहतः ॥ इति उपांशु ॥ (कुशा का छेदन करा दे) ततः उच्चैः–ॐउत्सृजत तृणान्यत्तु ॥ इति ब्रूयात्ः–(ॐनत्वेवा माश्छंसोर्घःस्यादधि यज्ञ मधि विवाहं कुरुतेत्येव ब्रूयाद्यद्यप्य सकृत्संवत्सरस्य सोमेनयजेत कृताघ्र्याऽ इति श्रुतेः ॥)

**कन्या पिता प्रयोग करेः**–आचमनं प्राणायामं कृत्वा

इहेत्यादि मम सुताया विवाहोत्सव कर्म प्रारम्भ निमित्तं वस्त्रादान निमित्तं वरस्य अर्चन महं करिष्ये ॥

**वरस्य ललाटे यजमानो गंधं कुर्यात्ः**–ॐसुचक्षाऽ अहमक्षीभ्यां भूयासर्ठ सुवर्चा मुखेन ॥ सुश्रुत्कर्णाब्भ्याम्भूयासम् ॥

**वरस्य ललाटे अक्षतान् दद्यात्ः**–ॐअनाधृष्टा पुरस्तादग्ग्रेरा धिपत्त्यऽ आयुर्म्मेदाः ॥ पुत्रवती दक्षिणतऽ इन्द्रस्याधिपत्त्ये प्रजाम्मेदाः सुषदापश्चा देवसय सवितुराधिपत्त्ये चक्षुर्म्मेदाऽ आ श्रुतिरूत्तरतो धातुराधिपत्त्ये रायस्पोषम्मेदाः ॥ विधृति रूपतिष्टाद्बृहरूपते राधिपत्त्य ऽओजो मेदा विश्वाब्भ्यो मानाष्ट्राब्भ्यस्प्पाहि मनोरश्वासि ॥

**वराय यज्ञोपवीत दानम्ः**–ॐयज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् ॥ आयुष्यमग्ग्रं प्रतिमुञ्चशुभ्रं यज्ञोपवीतं बलमस्तुतेजः ॥

**वराय वस्त्रं दद्यात्ः**–ॐपरिधास्यै यशोधास्यै दीर्घायुत्वाय जरदष्टिरस्मि ॥ शतंच जीवामि शरदः पुरूचीरायस्पोषमभि संव्ययिष्ये ॥

**यजमानो हस्ते जलमादाय अनेन मधुपर्कार्चिनेन लक्ष्मीनारायणौ प्रीयेताम् ॥**

**(ततो वरो विवाह वेद्यां गत्वा शुभासने उपविश्य आचम्य**

प्राणानायम्य ॥)

संकल्पः-अद्य० तिथौ धर्मार्थ कामप्रजासिद्ध्यर्थं दारपरिग्रहणं करिष्ये ॥ तथा च पंचभूसंस्कार पूर्वकं योजकनामाग्निप्रतिष्ठापनं करिष्ये ॥ इति पुनः संकल्प्य योजकनामाग्निं स्थापयेत् ॥ ततः कन्यामानयेत् । अन्तर्पटं कुर्यात् ॥ अत्रावसरे मंगलघोषं कारयेत् ॥ ब्राह्मणाश्च मंगलाष्टकं पठेयुः ॥

## अथ मंगलाष्टकम्

१-श्रीमत्पङ्कज विष्टरो हरिहरौ वायुर्महेन्द्रोऽनल-
श्चन्द्रो भास्कर वित्तपाल वरुणः प्रेताधिपादिग्रहाः ।
प्रद्युम्नो नलकूबरौ सुरगुरुश्चिन्तामणिः कौस्तुभः
स्वामी शक्तिधरश्च लांगलधरः कुर्यात् सदा मंगलम् ॥१॥

२-गौरी श्रीरदिति र्दितिश्चसुभगा कण्डूः सुपर्णा शिवा
सावित्री च सरस्वती च सुरभिः सत्यव्रताऽरुन्धती ।
स्वाहा जाम्बवती च रूक्मभगिनी दुःस्वप्नविध्वंसिनी
वेला चांबुनिधेः सुमीन मकरा कुर्यात् सदा मंगलम् ॥२॥

३-वाल्मीकः सनकः सनंदन मुनिर्व्यासो वसिष्ठो भृगु-
र्जाबालि र्जमदग्निजह्नु जनको गर्गो गिरा गौतमः ।
मान्धाता ऋतुपर्ण वेन सगरा धन्यो दिलीपो नलः
पुण्यो धर्मसुतो ययातिनहुषौ कुर्यात् सदा मंगलम् ॥३॥

४-नेत्राणि त्रितयं महत्पशुपते रग्नेस्तु पादत्रयं
तद्वद्विष्णु पदत्रयं त्रिभुवने ख्यातं च रामत्रयम् ।
गंगौघस्य गतित्रयं सुविमलं तद्वद्दृषीणां त्रयं
संध्यायास्त्रितयं द्विजैरभिमतं कुर्यात् सदा मंगलम् ॥४॥

५-गंगा गोमति गोपति र्गणपति र्गोविंद गोवर्धनौ
गीता गोमय गोरजो गिरिसुता गंगाधरो गौतमः ।
गायत्री गरुडो गदाधर गया गंभीर गोदावरी

गांधर्व गृह गोपगोकुलधरः कुर्यात् सदा मंगलम् ॥५॥
६–अश्वत्थो वटवृक्ष चन्दनतरुर्मंदार कल्पद्रुमो
जांबुर्निम्बकदंबकाम्र सरला वृक्षाश्च ये क्षीरिणः ।
सर्वैस्तैः फलपुष्प पल्लव वरैर्युक्तैः सदा मंडितं
रम्यं चैत्ररथं सनंदनवनं कुर्यात् सदा मंगलम् ॥६॥
७–गंगा सिंधु सरस्वती च यमुना गोदावरी नर्मदा
कावेरी सरयूर्महेन्द्रतनया चर्मण्वती वेदिका ।
क्षिप्रा वेत्रवती महासुरनदी ख्याता गया गंडकी
पुण्याः पुण्यजलैः समुद्रसहिताः कुर्यात् सदा मंगलम् ॥७॥
८–लक्ष्मीः कौस्तुभ पारिजातकसुरा धन्वन्तरिश्चंद्रमा
गावः कामदुघा सुरेश्वरगजो रंभादि देवाङ्गनाः ।
अश्वः सप्तमुखः सुधा हरिधनुः शंखो विषं चांबुधे
रत्नानीति चतुर्दश प्रतिदिनं कुर्वन्तु वै मङ्गलम् ॥८॥
एवं मङ्गलाष्टकं पठित्वा ततो **अन्तर्पटं निस्सार्य** ।।
(वधूवरौ परस्परं समंजयतः)
ॐसमंजंतु विश्वे देवाः समापो हृदयानिनौ । सम्मातरिश्वा संधाता समुदंष्ट्री दधातुनौ ॥
ॐ श्रीश्चते लक्ष्मीश्चपत्क्न्या वहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौऽव्यात्तम् । इष्णन्निषाणा मुम्मऽइषाण सर्वलोकम्मऽइषाण इति मंत्रेण **(कन्यापाद प्रक्षालनम्)**
(अत्रावसरे कन्यापिता वाचनिक श्राद्धंकुर्यात् ॥) यथा–आचम्य ॥
प्रजापति स्वरूपिणे वराय एतत्ते पाद्यं पादावनेजनं पादप्रक्षालनं हस्ताभ्याम् एष तेऽर्घः ॥
इदमत्रोदकं चंदनं पुष्पम् ॥ पादोदकं परित्यज्य ॥
गौरीस्वरूपिणि कन्यके एतत्ते पाद्यं पादावनेजनं पादप्रक्षालनम् एष तेऽर्घः ॥ पादोदकं परित्यज्य ॥ आचम्य ॥ स्वपादौ करौ प्रक्षाल्याचम्य ॥ दिग्बंधनम् ॥ ॐस्वस्ति नऽ इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः

स्वस्ति नो बृहस्पतिर्दधातु ॥ कन्यादान निमित्तं वाचनिक श्राद्धोपहाराणां सर्वेषां पवित्रतास्तु ॥ देशकाल पाकपात्रोपहार द्रव्यश्रद्धा संपदस्तु ॥

**कन्यापिता हस्ते जलमादाय:**–अद्येत्यादि०मम एकोत्तरशत कुलोद्धारणार्थं कन्यादानारम्भाङ्ग– निमित्तं वाचनिकश्राद्धमहं करिष्ये ॥ प्रजापति स्वरूपिणे वराय इदमासनम् ॥ गौरी स्वरूपकन्यकायै इदमासनम् ॥ प्रजापतिस्वरूपिणे वराय यथादत्तं गंधाद्यर्चनं कंकण कुंडलमुद्रिका वासांसि भोजनपात्रादीनि नानादैवतानि गंधपुष्पाद्यर्चितानि तन्निष्क्रयभूतं द्रव्यं वा तुभ्यमहं संप्रददे ॥ गौरी स्वरूपकन्यकायै यथादत्तं गंधाद्यर्चनं कंकण कुंडलमुद्रिका वासांसि भोजनपात्रादीनि नानादैवतानि गंधपुष्पाद्यर्चितानि तन्निष्क्रयभूतं द्रव्यं वा तुभ्यमहं संप्रददे ॥ दीपादीनां प्रसादात् इदं वो ज्योतिः सुज्योतिः शेषोपचाराः संपूर्णाः संभवन्तु ॥

**भोजन संकल्प:**–यथातृप्ति पर्यन्तं ब्राह्मणभोजनं सपरिवाराय प्रजापतिस्वरूपिणे वराय अहं दास्ये वा अन्नाद्येनाहं तर्पयिष्ये ॥ यथातृप्ति0गौरीस्वरूकन्यकायै अहं दास्ये ॥

दक्षिणा संकल्प::–प्रजापतिस्वरूपिणे वराय फलमुखवासतांबूलं हिरण्यदक्षिणां तुभ्यमहं संप्रददे ॥ गौरीस्वपकन्यकायै फल0 ॥अस्य हिरण्यश्राद्धविधेः परिपूर्णताऽस्तु अस्तुपरिपूर्णता ॥

**हस्ते जल मादाय:**–ॐविष्णु र्विष्णु र्विष्णु.......एवम् गुण विशेषण विशिष्टायां शुभ पुण्य तिथौ अस्मिन्पुण्याहे अस्याः कन्याया अनेन वरेण धर्म प्रजया उभयोः वंश वृद्धयर्थं तथा च मम समस्त पितृणां निरति शयानन्द ब्रह्मलोका वाप्त्यादि कन्यादान कल्पोक्त फलावाप्तये अनेन वरेण अस्यां कन्याया मुत्पादयिष्यमाण संतत्यां दश पूर्वान् दशपरान् मां च

एकविंशतिपुरुषानुद्धर्तुं ब्रह्म विवाह विधिना श्रीमहालक्ष्मी नारायण प्रीतये गोत्रोच्चार पूर्वकं कन्यादान महं करिष्ये॥

ततः आचार्य वर हस्ते सुप्रोक्षितादि करणम् :-

शिवा आपः सन्तु । सन्तु शिवा आपः॥ सौमनस्यमस्तु । अस्तु सौमनस्यम्॥ अक्षतं चारिष्टं चास्तु । अस्त्वक्षतमरिष्टं च॥ अन्नाः पान्तु सुप्रोक्षितमस्तु॥ गन्धाः पान्तु सौमंगल्यं चास्तु॥ अक्षताः पान्तु आयुष्यमस्तु॥ पुष्पाणि पान्तु सौश्रियमस्तु॥ (भूमौ) यत्पापं रोगमशुभमकल्याणं तद्दूरे प्रतिहतमस्तु॥

(कन्या के मातापिता, कन्या के हाथों में हल्दी लगाये)

**अथ हरिद्रया हस्तलेपनम्**:-लक्ष्मीप्रिया हर्षदात्री लक्ष्मीरिव जनप्रिया । सौभाग्यदा सदा स्त्रीणां हरिद्रे श्रीः सदास्तु मे॥

अथ शाखोच्चारणम् (गोत्रोच्चार)

**ततः गोत्रोच्चारः वरस्य प्रथमं पश्चाद् कन्यायाः॥**

(गोत्र उच्चारण करें पहले वर का फिर कन्या का)

## वरस्य पिताः-

मम पूर्व पुरुषाणां गोत्र प्रवर वाचन महं करिष्येः-

अमुकगोत्रोत्पन्नस्य अमुकप्रवरस्य अमुकवेदस्य अमुक शाखाध्यायिनः अमुकशर्मणः(प्रपौत्राय)

अमुकगोत्रोत्पन्नस्य अमुकप्रवरस्य अमुकवेदस्य अमुक शाखाध्यायिनः अमुकशर्मणः (पौत्राय)

अमुकगोत्रोत्पन्नस्य अमुकप्रवरस्य अमुकवेदस्य अमुक शाखाध्यायिनः अमुकशर्मणः (पुत्राय)

अमुकगोत्राय अमुकप्रवराय शुक्लयजुर्वेदाम्नायवाजि माध्यंदिनीय शाखाध्यायिने अमुक-

शर्मणे वराय स्थिरस्थावर संयोगो बहुपुत्रं बहुधनं चायुष्यं चास्तु॥

**ततः कन्याया गोत्रोच्चारः ॥**

**अतः वधु पिताः**– मम पूर्व पुरुषाणां गोत्र प्रवर वाचन महं करिष्येः–

अमुकगोत्रोत्पन्नस्य अमुकप्रवरस्य अमुकवेदस्य अमुक शाखाध्यायिनः अमुकशर्मणः(प्रपौत्रीम्)

अमुकगोत्रोत्पन्नस्य अमुकप्रवरस्य अमुकवेदस्य अमुक शाखाध्यायिनः अमुकशर्मणः (पौत्रीम्)

अमुकगोत्रोत्पन्नस्य अमुकप्रवरस्य अमुकवेदस्य अमुक शाखाध्यायिनः अमुकशर्मणः (पुत्रीम्)

अमुकगोत्राम् अमुकप्रवराम् अमुकनाम्नीं श्रीरूपिणीमिमां कन्यां दास्ये ॥ उभयोः पाणिग्रहणं भवतु ॥ **एवं पुनः द्विवारं पठित्वा** ॥ (दो बार और पढे)

**अथ वरमातुल पक्षगोत्रोच्चारः ॥**

अमुकगोत्रोत्पन्नस्य अमुकप्रवरस्य अमुकशर्मणः (प्रदौहित्राय)
अमुकगोत्रोत्पन्नस्य अमुकप्रवरस्य अमुकशर्मणः (दौहित्राय)
अमुक शर्मणे वराय ॥

**ततः कन्यामातुल पक्षगोत्रोच्चारः ॥**

अमुकगोत्रोत्पन्नस्य अमुकप्रवरस्य अमुकशर्मणः (प्रदौहित्रीम्)
अमुकगोत्रोत्पन्नस्य अमुकप्रवरस्य अमुकशर्मणः (दौहित्रीम्)
अमुक नाम्नीं श्रीरूपिणीमिमां कन्यां दास्ये ॥

**अथ कन्यादान संकल्पः**–हस्ते शंखे जलमादायः–

ॐविष्णु र्विष्णु र्विष्णुः अथ मंडपाधस्तात्कुलशील सौभाग्य सामुद्रिक लक्षण लावण्या वयवारोग्यां कांचन कुंडल कंकण वलय नुपूर कटिमेखला भुजचूडिकेयूरांगद भूषितां यवनालिकेरहस्तां भ्रमर ध्वनि सुगंधि मालालंकृतां कर्पूरागरूधूपितां गंधयक्षकर्दम द्रव्यादि सहितां मुकुटमालादि

विविधालंकृतां शृंगारराशिशय्याम् आसनछत्रोपानवासः कमंडलु कांस्यपात्र सौवर्ण रौप्यमुद्रिकोपेतां गजदंतकंकणान्विताम् एतेषां वस्तुमात्राणां स्वहस्तोपार्जित गृहवित्तानुसारेण भक्ष्यभोज्यपयः पानादिकिंचिन्मात्र द्रव्यादि सहितां श्रौत स्मार्त कर्मदक्षां प्रियंवदां कुंकुम कज्जल मुक्ताफलमालालंकृतां व्रीहिअंजलि पूरिताम् आदर्शहस्तां मदनफलवद्धां त्रिमातुलशुद्धां दशपुरुषविख्यातां वेदशास्त्र पुराणनिगमान्वितां दूर्वांकुर प्रसारित प्रयाग वटशाखाविस्तारेण एकोत्तरशत कोटिकुलोद्धारश्रेयसे अमुकगोत्राय अमुकप्रवरान्विताय यजुर्वेदमाध्यन्दिनीशाखाध्यायिने अमुकशर्मणे वराय मधुपर्केण पूजिताय तत्संतान परंपरावृद्धये आचंद्रार्कं यावत् इमां कन्यां यथाशक्त्यलंकृतां गृहमंडपोप विष्टस्वजन साक्षिभिर्विष्णु वह्नि ब्राह्मण सन्निधौ वेदशास्त्र पुराणोक्त शतगुणीकृत ज्योतिष्टोमातिरात्र फलप्राप्तिकामः भार्यत्वेन तुभ्यमहं संप्रददे ॥
(इत्युक्त्वा सकुशजलाक्षत कन्यादक्षिणहस्तं वरदक्षिण हस्त दद्यात्॥)
ॐस्वस्ति (इति वरों वदेत्)
तेन भगवन्तौ लक्ष्मीनारायणौ प्रीयेताम् न मम ॥
कृतस्य कन्यादानस्य साङ्गतासिद्ध्यर्थं सुवर्ण निष्क्रयीं दक्षिणां तुभ्य महं संप्रददे ॥

**ततः कन्यामाता पितरौ उभौ पठतः॥**

(कन्या के माता पिता प्रार्थना करे)

कन्यां लक्षण संपन्नां कनका भरणैर्युताम् । दास्यामि ब्रह्मणे तुभ्यं ब्रह्मलोक जिगीषया॥ ऋषय सर्व भूतानां साक्षिण्यः सर्वदेवताः। इमां कन्यां प्रदास्यामि पितृणां तारणाय च॥ कन्या दानं महादानं सर्व दानेषु दुर्लभम् । तदद्य देव योगेन त्वं गृहाण वरोत्तम॥ मम वंशकुले जाता यावद्वर्षाणि पोषिता । तुभ्यं वर मया दत्ता पुत्रपौत्र विवर्धिनी॥ गौरीं कन्यामिमां विप्र यथाशक्ति विभूषिताम् । गोत्राय शर्मणे तुभ्यं दत्तां विप्र समाश्रय॥ "मयापि दत्ता" (इति

माता वदेत्) "मया प्रतिगृहीता" (इति वर:) कोदात् इति पठेत्:-ॐकोदात्कस्म्मा ऽअदात्कामायादात् । कामोदाताकाम: प्रतिग्रहीता कामैतत्ते ॥ (यस्त्वया धर्मश्चरितव्य: सोऽनया सह धर्मे चार्थे च कामे च त्वयेयं नातिचरितव्या "अहं न अतिचरामि" इति वर: एवं त्रिवारं पठित्वा)

(इस कन्या को धर्म अर्थ कामादि मे हमेशा साथ रखना है)

(वर कहे मैं हमेशा इसके साथ चतुर्वर्ग धर्म का पालन करूँगा)

**(स रजतां तांबूलरागं वधू वरयोः करे स्थापयेत्** ॥ वधू वरयो: कंधे वर मालां च आरोपयेत् ) (तांबूलकत्था पीसकर हथलेवा जोड़ देवें) (मंगलां च ग्रंथि बध्नीयात्)

हरिद्रा रक्त रंजित सूतग्रंथि वरमाला वधु वरस्य च कण्ठे धारयित्वा ॥

**(वर मालार्पणम्) वर माला मंत्रः–** ॐपतित्वा गिर्व्वणो गिरऽइमा भवन्तु व्विश्वत: । वृद्धायुमनु वृद्धयो जुष्टा भवन्तु जुष्टय: ॥

**वस्त्रग्रन्थीबन्धनम्:–**(छेडाछेडी) ॐ यदाबध्नंदाक्षायणा हिरण्य ꣳ शतानीकाय सुमनस्यमाना: । तन्मऽआबध्नामि शतशारदा यायुष्मान् जरदष्टिर्यथासम् ॥ मंगलं भगवान विष्णु: मंगलं गरुडध्वज:। मंगलं पुण्डरीकाक्ष: मंगलायतनो हरि: ॥

**गोदानम्:–**हस्ते जलमादाय–कन्यादान सांगतासिद्धयर्थं मिमां गां रुद्रदैवत्यां वा गोनिष्क्रयी भूतमिदं द्रव्यं प्रजापतिरूपिणे वराय तुभ्यमहं संप्रददे ॥

**ततः कन्यामाता कृतांजलिः** कन्यादक्षिणकर्णे पठति– ब्रह्मासावित्रीनुं सौभाग्य मिले और ईश्वर पार्वती के जैसा सौभाग्य प्राप्त हो ॥

**ततः आचारप्राप्तं स्वस्ति पुण्याहवाचनं कुर्यात्** ॥

तत: आपोहिष्ठेति त्रिभिर्मन्त्रै: पंचवारुणैर्वाऽभिषेक: ॥

ॐ आपोहिष्ठा मयो भुवस्तान ऊर्जे दधातन । महेरणाय चक्षसे ॥१॥ यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥२॥ तस्मा ऽअरङ्गमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः ॥३॥ ॐ त्रातारमिन्द्रमवितारमिंद्रꣳ हवे हवे सुहवꣳ शूरमिंद्रम् । ह्वयामि शक्रं पुरुहूतमिन्द्रꣳ स्वस्ति नो मघवा धात्विन्द्रः ॥४॥ ॐ व्वरुणस्योत्तंभनमसि वरुणस्य स्कम्भसर्जनीस्थो वरुणस्यऋतसदन्यसि वरुणस्यऋतसदनमसि वरुणस्य ऋतसदनमासीद ॥५॥

**वधुपिता-विनियोगः-** कन्यादान कर्मणः कृते सांगतासिद्ध्यर्थं यथा संख्याकान् ब्राह्मणान् कुमारिकाः बटुकान् सुवासिन्यादीन् अद्याहं भोजयिष्ये ॥

**पुनः** कृतस्य कन्यादान कर्मण सांगतासिद्ध्यर्थं नानानामगोत्रेभ्यो ब्राह्मणेभ्यो यथोत्साहं दक्षिणां दास्ये ॥

**पुनः** कन्यादान कृतस्य यन्न्यूनाति रिक्तं सर्वं भवतां ब्राह्मणानां वचनात् श्री गणेश गोत्रदेव्या प्रसादात् सर्वं परिपूर्ण मस्तु ॥

**अथ विवाहहोमः-**

(वर वधू चवरी में प्रवेश करे वर कन्या दोनों दक्षिण पैर चवरी में रखे)

वरहस्ते जलमादाय ॥

**संकल्पः**-अद्येत्यादि० प्रारीप्सितकर्मणः सांगतासिद्ध्यर्थं भार्यात्वसिद्ध्यर्थं विवाह होममहं करिष्ये ॥ तदंगत्वेन गणपति पूजनमहं करिष्ये इति संकल्प्य गणपतिं षोडशोपचारैः पूजयेत् ॥ ततः आचार्यः पंचभूसंस्कार पूर्वकम् अग्निं स्थापयेत् ॥

**पञ्च भू संस्कारं कृत्वा**:-अत्राद्य. अमुक गोत्रस्य यजमानस्य अमुक कर्मांगतभूतं अस्मिन्स्थंडिले पंच भूसंस्कारपूर्वकमग्नि स्थापनं करिष्ये ॥ तद्यथा ॥

त्रिभिद्दर्भैः परिसमुह्य ३ तान्कुशानैशान्यां क्षिप्त्वा ॥ गोमयेनोपलिप्य ३ ॥ स्रुवेणोल्लिख्य ३ मध्ये प्रदेशमात्रमुत्तरोत्तर क्रमेण स्रुवमूलेन त्रिरुल्लिख्य ॥ उल्लेखन क्रमेणोद्धृत्य दक्षिणानामिकांगुष्ठाभ्यां ॥ ईशान्यां क्षिपेत् ॥ कुशोदकेनाभ्युक्ष्य ३ ॥ सौभाग्यवत्या कास्यपात्र द्वय संपुटितेन तमग्निमानीय मात्माभिमुखे अग्निकोणे प्रतिष्ठाप्य ॥ तस्मादाचार्यः हुँ फट् इति मंत्रेण क्रव्यादांशं नैर्ऋत्यां क्षित्वा तस्योपरि अक्षतान् विकीरयेत् ॥ आच्छादनं दूरीकृत्य ॥ आत्माभिमुखमग्निं स्थापयेत्

ॐअग्निन्दूतं पुरोदधे हव्य वाहमुपब्रुवे । देवाँ २॥ आ सादयादिह ॥ ॐआवो देवासऽईमहे वामं प्रयत्यध्वरे । आवो देवास ऽ आशिषो यज्ञियासो हवामहे ॥ इत्यग्निमुपसमाधाय ॥

दक्षिणतो ब्रह्मासनम् ॥ उत्तरतः प्रणितासनम् ॥ ततः ब्रह्मोपवेशनम् यावत् कर्म समाप्यते । तावत् त्वं ब्रह्मा स्थिरो भव ॥

**ब्रह्मापूजनम्ः**–ॐ आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे राजन्यः शूर ऽ इषव्योतिव्याधी महारथो जायतां दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां निकामे–निकामे नः पर्जन्यो वर्षतु फलवत्यो नऽ ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ॥ आसनार्थे पुष्पाणि समर्पयामि ॥ पादयोः पाद्यं समर्पयामि ॥ हस्तयोः अर्घ्यं समर्पयामि ॥ मुखे आचमनीयं जलं समर्पयामि ॥ सर्वांगे स्नानं समर्पयामि ॥ मिश्रित पंचामृत स्नानं समर्पयामि ॥ शुद्धोदक स्नानं समर्पयामि ॥ वस्त्रं समर्पयामि ॥ यज्ञोपवीतं समर्पयामि ॥ उपवस्त्रं समर्पयामि ॥ चन्दनं समर्पयामि ॥ गंधं समर्पयामि ॥ अक्षतान् समर्पयामि ॥ पुष्पाणि समर्पयामि ॥ परिमलद्रव्याणि समर्पयामि ॥ सुगंधितैलं समर्पयामि ॥ धूपं आघ्रापयामि ॥ दीपं दर्शयामि ॥ नैवेद्यं निवेदयामि ॥ आचमनीयं

जलं समर्पयामि ॥ ऋतुफलं समर्पयामि ॥ ताम्बूलं समर्पयामि ॥ द्रव्यदक्षिणां समर्पयामि ॥ श्रीफलं समर्पयामि ॥ मंत्रपुष्पाञ्जलिम् समर्पयामि प्रार्थना पूर्वकं नमस्कारान् समर्पयामि ॥

ब्रह्मासनमास्तीर्येत्यादि चरुवर्ज्य पात्रासादनादि प्रोक्षण्या: प्रत्युत्पवनान्तं कर्म कृत्वा ॥

तत्र उपकल्पनीयानि ॥ उत्तरे शमीपलाश मिश्रालाजा: ॥ अश्मा ॥ अखंडलोहितम् आनडुहं चर्म ॥ कुमारीभ्राता ॥ शूर्पम् ॥ दृढपुरुष: ॥ पूर्णपात्रं वरो वा ॥ (प्रोक्षणकाले उपकल्पनीयानां प्रोक्षणम्)

तत: उपयमन कुशानादाय तिष्ठन् समिधोभ्याधाय स्वाहा ॥ प्रोक्षणी शेषोदकेन अग्निं प्रदक्षिणी कृत्य इतरथावृत्ति: ॥ पवित्रयो: प्रणीतासु निधानम् ॥ (वरेणान्वारब्ध आचार्यो वा)

ब्रह्मणा दक्षिणहस्तेनान्वारब्ध: वर: दक्षिणं जान्वाच्य स्रुवेण जुहुयात् ॥ (मनसा)ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम ॥१॥ अग्नेरुत्तरभागे ॥ ॐ इन्द्राय स्वाहा इदं इन्द्राय न मम ॥२॥ ततोत्तरपूर्वार्द्धे ॥ ॐ अग्नये स्वाहा इदमग्नये न मम ॥३॥ ततो दक्षिणे पूर्वार्द्धे ॥ ॐ सोमाय स्वाहा इदं सोमाय न मम ॥४॥ इत्याघारावाज्यभागं संस्रवं हुत्वा ॥ हस्ते अक्षतान् गृहीत्वा ॥ ॐअग्नेनय सुपथारायऽअस्मान्विश्वा निदेवव्वयुनानि व्विद्वान् । युयोद्ध्यस्म्मज्जुहुराणमेनो भूयिष्ठान्तेनमऽउक्तिं विधेम ॥ विवाहे योजकनाम्ने वैश्वानराय नम: । सर्वोपचारार्थे गन्धाक्षत्पुष्पाणि समर्पयामि ॥ इत्यग्निं संपूज्य अष्टप्रायश्चित्ताहुती जुहुयात् ॥

ॐ भू: स्वाहा इदमग्नये न मम ॥१॥ ॐ भुव:स्वाहा इदं वायवे न मम ॥२॥ ॐ स्व: स्वाहा इदं सूर्याय न मम ॥३॥

ॐ त्वन्नोऽ अग्ने व्वरुणस्य विद्वान्देवस्यहेडोऽ अवयासिसीष्ठा: ॥ यजिष्ठोवह्नितम: शोशुचानो विश्वा द्वेषाꣳसि प्रमुमुग्ध्यस्मत् स्वाहा ॥ इदमग्नीवरुणाभ्यां न मम ॥४॥

ॐ सत्वन्नोऽ अग्ग्रेवमो भवोतीनेदिष्ठोऽ अस्याऽउषसोव्युष्टौ ॥ अवयक्ष्वनो वरुणथ्ठं रराणोव्वीहिमृडीकथ्ठं सुहवो न एधि स्वाहा ॥ इदमग्नीवरुणाभ्यां न मम ॥५॥

ॐ अयाश्चाग्रेस्यनभि शस्तिपाश्चसत्यमित्वमयाअसि ॥ अयानो यज्ञंवहास्ययानोधेहि भेषजथ्ठं स्वाहा ॥ इदमग्नयेअयसे न मम ॥६॥

ॐयेते शतंवरुण येसहस्रं यज्ञिया: पाशावितताममहान्त: ॥ तेभिर्न्नोऽअद्यसवितोत विष्णुर्विश्वेमुञ्चतु मरुत: स्वर्का: स्वाहा ॥ इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भय: स्वर्केभ्यश्च न मम ॥७॥

ॐ उदुत्तमंवरुण पाशमस्मदवाधमं व्विमद्ध्यमथ्ठंश्रथाय ॥ अथावयमादित्त्यव्रते तवानागसोऽ अदितयेस्याम स्वाहा ॥ इदं वरुणायादितये न मम ॥८॥

## ॥ अथः राष्ट्रभृद्धोमः ॥

वरो हस्ते जलं गृहीत्वा:-

**विनियोग:**-ऋताषाडित्यादि द्वाद्वशानां प्रजापतिर्ऋषि: तत्तन्मन्त्रोक्ता देवता: यजुश्छन्द: राष्ट्रभृद्धोमे विनियोग: ॥

वर आज्येन जुहुयात् ॥

ॐऋताषाडृत धामाग्ग्नि र्गन्धर्व: सनऽइदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट् ॥ इदमृताषाहे ऋतधाम्ने अग्नये गंधर्वाय न मम ॥१॥

ॐऋताषाडृत धामाग्ग्नि र्गन्धर्वस्तस्यौषधयो प्सरसोमुदो नामताभ्य: स्वाहा ॥ इदमौषधिभ्यो प्सरोभ्यो मुद्भयो न मम ॥२॥

ॐसथ्ठं हितो विश्वसामासूर्यो गन्धर्व: सनऽइदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट् ॥ इदं सथ्ठंहिताय विश्वसाम्ने सूर्याय गंधर्वाय न मम ॥३॥

ॐसथ्ठं हितो विश्वसामासूर्यो गन्धर्वस्तस्य मरीचयो प्सरसऽ आयुवो नामताभ्य: स्वाहा ॥ इदं मरीचिभ्यो प्सरसोभ्यऽ आयुभ्यो न मम ॥४॥

ॐसुषुम्णः सूर्यरश्मिश्चंद्रमा गंधर्वः सनऽइदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट्॥ इदं सुषुम्णाय सूर्यरश्मये चंद्रमसे गंधर्वाय न मम ॥५॥
ॐसुषुम्णः सूर्यरश्मिश्चंद्रमा गंधर्वस्तस्य नक्षत्राण्यप्सरसो भेकुरयो नामताभ्यः स्वाहा ॥ इदं नक्षत्रेभ्यो प्सरोभ्यो भेकुरिभ्यो न मम ॥६॥
ॐ इषिरो विश्वव्यचा वातो गंधर्वः सनऽइदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट्॥ इदमिषिराय विश्वव्यचसे वाताय गंधर्वाय न मम ॥७॥
ॐ इषिरो विश्वव्यचा वातो गंधर्वस्तस्यापोऽप्सरसऽऊर्जो नामताभ्यः स्वाहा ॥ इदमद्भयो प्सरोभ्यऽऊग्भ्यों न मम ॥८॥
ॐभुज्युः सुपर्णोयज्ञो गंधर्वः सनऽइदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट्॥ इदं भुज्यवे सुपर्णाय यज्ञाय गंधर्वाय न मम ॥९॥
ॐ भुज्युः सुपर्णोयज्ञो गंधर्वस्तस्य दक्षिणाऽअप्सरसस्ता वानामताभ्यः स्वाहा ॥ इदं दक्षिणाभ्यो प्सरोभ्यस्तावाभ्यो न मम ॥१०॥
ॐप्रजापति र्विश्वकर्मा मनोगंधर्वः सनऽइदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट्॥ इदं प्रजापतये विश्वकर्मणे मनसे गंधर्वाय न मम ॥११॥
ॐप्रजापति र्विश्वकर्मा मनोगंधर्वस्तस्यऽ ऋक्सामान्यप्सरसऽ एष्टयोनामताभ्यः स्वाहा ॥ इदं ऋक्सामभ्यो प्सरोभ्यऽ एष्टिभ्यो न मम ॥१२॥ इति राष्ट्रभृद्धोमः ॥

## ❊ अथ जयाहोमः ॥ ❊

**विनियोगः**-ॐचित्तं चेत्यादित्रयोदश मंत्राणां परमेष्ठी ऋषिः सर्वाणि यजुश्रृंषि छन्दांसि लिंगोक्ता देवताः विवाह कर्मणि जयाहोमे विनियोगः ॥
ॐचित्तं च स्वाहा इदं चित्ताय न मम ॥१॥
ॐचित्तिश्च स्वाहा इदं चित्त्यै न मम ॥२॥
ॐआकूतं च स्वाहा इदं आकूताय न मम ॥३॥
ॐआकूतिश्च स्वाहा इदं आकूत्यै न मम ॥४॥
ॐविज्ञातं च स्वाहा इदं विज्ञाताय न मम ॥५॥

ॐविज्ञातिश्च च स्वाहा इदं विज्ञात्यै न मम ॥६॥

ॐमनश्च स्वाहा इदं मनसे न मम ॥७॥

ॐशक्वर्यश्च स्वाहा इदं शक्वरीभ्यो न मम ॥८॥

ॐदर्शश्च स्वाहा इदं दर्शाय न मम ॥९॥

ॐपौर्णमासं च स्वाहा इदं पौर्णमासाय न मम ॥१०॥

ॐबृहच्च स्वाहा इदं बृहते न मम ॥११॥

ॐरथन्तरं च स्वाहा इदं रथन्तराय न मम ॥१२॥

ॐप्रजापति र्जया निन्द्राय वृष्णे प्रायच्छदुग्रः पृतनाजयेषु । तस्मैविशः समनमन्त सवाः सऽउग्रः सऽइहव्यो बभूव स्वाहा ॥ इदं प्रजापतये जयानिन्द्राय न मम ॥१३॥ इति जयाहोमः ॥

## अथाभ्यातानहोमः ॥

**विनियोगः**–अग्निर्भूताना मित्याद्यष्टा दशानां मंत्राणां प्रजापति र्ऋषिः त्रिष्टुप्छन्दः तत्तन्मंत्रोक्ता देवताः अभ्यातानहोमे विनियोगः ॥

ॐअग्निर्भूताना मधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याꣳ स्वाहा ॥१॥ इदमग्नये भूतानामधिपतये न मम ॥

ॐइन्द्रो ज्येष्ठानामधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याꣳ स्वाहा ॥२॥ इदमिन्द्राय ज्येष्ठानामधिपतये न मम ॥

१–**अन्तर्पटं कुर्यात्ः–**

ॐयमः पृथिव्या अधिपतिः समावत्वस्मिन्ब्रह्म ण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याꣳ स्वाहा ॥३॥ इदं यमाय पृथिव्या अधिपतये न मम ॥

(दक्षिणस्याम् अन्यपात्रं निधाय तन्मध्ये त्यागः) ॥

**अन्तर्पटं निःसार्य** ॥ प्रणीतोदक स्पर्शः ॥

यथा बाणप्रहाराणां कवचं वारणं स्मृतम् ।
तथा देवोपघातानां शान्ति र्भवति वारणम् ॥१॥
शान्तिरस्तु ॥ पुष्टिरस्तु ॥ तुष्टिरस्तु ॥ वृद्धिरस्तु ॥

ॐवायुरन्तरिक्षानाममधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याꣳ स्वाहा ॥४॥ इदं वायवे अन्तरिक्षानामधिपतये न मम ॥

ॐसूर्यो दिवोऽधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याꣳ स्वाहा ॥५॥ इदं सूर्याय दिवोऽधिपतये न मम ॥

ॐचंद्रमा नक्षत्राणामधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याꣳ स्वाहा ॥६॥ इदं चद्रमसे नक्षत्राणामधिपतये न मम ॥

ॐबृहस्पति र्ब्रह्मणोऽधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याꣳ स्वाहा ॥७॥ इदं बृहस्पतये ब्रह्मणोऽधिपतये न मम ॥

ॐमित्रः सत्यनामधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याꣳ स्वाहा ॥८॥ इदं मित्राय सत्यानामधिपतये न मम ॥

ॐवरुणोऽपामधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याꣳ स्वाहा ॥९॥ इदं वरुणयापामधिपतये न मम ॥

ॐसमुद्रः स्त्रोत्यानामधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याꣳ स्वाहा ॥१०॥ इदं समुद्राय स्त्रोत्यानामधिपतये न मम ॥

ॐअन्नꣳ साम्राज्यानामधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन्

क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याॐ स्वाहा ॥११॥ इदमन्नाय साम्राज्यानापतये न मम ॥

ॐसोमऽओषधीनामधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याॐ स्वाहा ॥१२॥ इदं सोमाय ओषधीनामधिपतये न मम ॥

ॐसविता प्रसवानामधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याॐ स्वाहा ॥१३॥ इदं सवित्रे प्रसवानामधिपतये न मम ॥

२-**अन्तर्पटं कुर्यात्** ॥

ॐरुद्रः पशूनामधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याॐ स्वाहा ॥१४॥ इदं रुद्राय पशूनामधिपतये न मम ॥

(ऐशान्याम् अन्यपात्रं निधाय तन्मध्ये त्यागः॥

**अन्तर्पटं निःसार्य**॥ प्रणीतोदक स्पर्शः

यथा बाणप्रहाराणां कवचं वारणं स्मृतम् ।
तथा देवोपघातानां शान्ति र्भवति वारणम् ॥

शान्तिरस्तु ॥ पुष्टिरस्तु ॥ तुष्टिरस्तु ॥ वृद्धिरस्तु ॥

ॐत्वष्टा रूपाणामधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याॐ स्वाहा ॥१५॥ इदं त्वष्ट्रे रूपाणामधिपतये न मम ॥

ॐविष्णुः पर्वतानामधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेस्यामा शिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याॐ स्वाहा ॥१६॥ इदं विष्णवे पर्वतानामधिपतये न मम ॥

ॐमरुतो गणानामधिपतयः समावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेस्यामा शिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याॐ स्वाहा ॥१७॥ इदं मरुद्भ्यो गणानामधिपतिभ्यो न मम ॥

३-**अन्तर्पटं कुर्यात्** ॥

ॐ पितरः पितामहाः परेवरे ततास्तततामहाः समावत्वस्मिन् ब्रह्मण्यस्मिन्क्षत्रेस्यामा शिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याꣳ स्वाहा ॥१८॥ इदं पितृभ्यः पितामहेभ्यः परेभ्योऽवरेभ्यस्ततेभ्यस्तततामहेभ्यश्च न मम ।।

(दक्षिणाग्न्योर्मध्ये अन्य पात्रं निधाय तन्मध्ये त्यागः)

**अन्तर्पटं निः सार्य** ॥ प्रणीतोदक स्पर्शः

यथा बाणप्रहाराणां कवचं वारणं स्मृतम् ।

तथा देवोपघातानां शान्ति र्भवति वारणम् शान्तिरस्तु ॥

पुष्टिरस्तु ॥ तुष्टिरस्तु ॥ वृद्धिरस्तु ॥ इति अभ्यातानहोमः ॥

## अथ अग्निरित्यादि पञ्चाहुतयः ॥

**विनियोगः**-अग्निरैत्वित्यादि पञ्चानां प्रजापति र्ऋषि रंतिमस्य संकर्षणर्षि रग्निर्देवता चतुर्थस्य वैवस्वतो देवता पंचमस्य मृत्युर्देवता त्रिष्टुप्छन्दः सर्वेषां होमे विनियोगः ॥

ॐअग्निरैतु प्रथमो देवतानाꣳ सोस्यै प्रजांमुञ्चतु मृत्युपाशात् । तदय ꣳराजा वरुणो नुमन्यतां यथेयꣳ स्त्रिपौत्रमघन्नरोदात् स्वाहा ॥१॥ इदमग्नये न मम ॥

ॐइमामग्नि स्त्रायतां गार्हपत्यः प्रजामस्यै नयतुदीर्घमायुः । अशून्योपस्था जीवतामस्तु मातापौत्रमानंदमभिविबुध्यता मियꣳ स्वाहा ॥२॥ इदमग्नये न मम ॥

ॐस्वस्तिनोऽ अग्नेदिवऽ आपृथिव्या विश्वानिधेह्ययथा यजत्र । यदस्यां महिदिविजातं प्रशस्तं तदस्मा सुद्रविणं धेहिचित्रꣳ स्वाहा ॥३॥ इदमग्नये न मम ॥

ॐसुगन्नुपन्था प्रदिशन्नऽएहिज्योतिष्मध्येह्यजरन्नऽआयुः । अपैतु मृत्युरमृतंनऽआगाद्वैवस्वतोनो ऽअभयंकृणोतु स्वाहा ॥४॥ इदमग्नये न मम ॥

(दक्षिणस्याम् अन्यपात्रे त्यागः) प्रणीतोदक स्पर्शः ॥

यथा बाणप्रहाराणां कवचं वारणं स्मृतम् ।
तथा देवोपघातानां शान्ति र्भवति वारणम् ॥
शान्तिरस्तु ॥ पुष्टिरस्तु ॥ तुष्टिरस्तु ॥ वृद्धिरस्तु ॥
४-**अन्तर्पटं कुर्यात्** ॥
ॐ परंमृत्त्योऽ अनुपरेहिपन्थां यस्तेऽअन्यऽ इतरोदेवयानात् । चक्षुष्म्मते शृण्वतेते ब्रवीमिमानः प्प्रजाछं रीरिषोमोतव्वीरान् स्वाहा ॥५॥ इदं मृत्यवे न मम ॥
(इत्यग्नौ त्यागो वा भूमौ त्यागः ॥)
**अन्तर्पटं निस्सार्य** ॥ प्रणीतोदक स्पर्शः ॥
यथा बाणप्रहाराणां कवचं वारणं स्मृतम् ।
तथा देवोपघातानां शान्ति र्भवति वारणम् ॥
शान्तिरस्तु ॥ पुष्टिरस्तु ॥ तुष्टिरस्तु ॥ वृद्धिरस्तु ॥
इति पञ्चकहोमः ॥

## अथ लाजाहोमः ॥

अथ कुमार्या भ्राता नासादित शूर्पस्थान्लाजानंजलिनाऽऽदाय कुमार्या अंजलावावपति । तान् लाजान् प्राङ्मुखो तिष्ठन्ती कुमारी अंजलिना जुहोति ॥
**विनियोगः**-अर्यमणमित्यादि त्रयाणामाथर्वण ऋषि स्त्रिष्टुप्छन्दस्तृतीयस्यानुष्टुप्छन्दो ऽग्निर्देवता लाजाहोमे विनियोगः ॥
ॐअर्यमणं देवंकन्याऽ अग्निमयक्षत । सनोऽअर्यमा देवः प्रेतो मुञ्चतुमापतेः स्वाहा ॥१॥ इदमर्यम्णे न मम ॥
**(अनेन मंत्रेण अञ्जलिस्थलाजानां तृतीयांशं जुहोति** ॥
ॐइयंनार्युपब्रूते लाजानावपन्तिका । आयुष्मानस्तुमे पतिरेधन्तां ज्ञातयोमम स्वाहा ॥२॥ इदमग्नये न मम ॥
**(अनेन अंजलिस्थलाजार्द्धं जुहोति** ॥)

ॐइमां लाजानावपाम्यग्नौ समृद्धि करणंतव । ममतुभ्यं च संवननंतदग्निरनु मन्यतामियॐ स्वाहा ॥३॥ इदमग्नये न मम ॥

**(इत्यनेन मंत्रेणाञ्जलिस्थान्सर्वांलाजाञ्जुहोति ॥ इदं मंत्रत्रयं कन्यैव पठति )**

वरः कन्याया दक्षिणहस्तं सांगुष्ठम् उत्तानं गृह्णाति पठति च

(वर कन्या के दक्षिण हाथ को अंगुठे सहित पकड़ कर मंत्र पढ़े)

**विनियोगः**–गृभ्णामीत्यादीनां चतुर्णां याज्ञवल्क्य भरद्वाजात्रि प्रजापतय ऋषयः । त्रिष्टुबुष्णिगष्टुब् यजुश्छन्दांसि लिंगोक्ता देवताः वध्वाः पाणिग्रहणे विनियोगः ॥

**मंत्रः**–ॐगृभ्णामिते सौभगत्वायहस्तं मयापत्या जरदष्टिर्यथासः । भगोऽअर्यमा सविता पुरंधिर्मह्यंत्वा दुर्गार्हपत्याय देवाः ॥१॥

ॐअमोहमस्मि सात्वॐ सात्वमस्यमोऽअहम् ॥ सामाहमस्मिऽ ऋक्त्वंद्यौरहं पृथिवीत्वम् ॥२॥

ॐतावेव विवहावहै सहरेतोदधावहै । प्रजांप्रजनया वहैपुत्रान्विद्या वहैबहून् ॥३॥

ॐतेसन्तु जरदष्टयः संप्रियौरोचिष्णू सुमनस्यमानौ पश्येमशरदः शतंजीवेमशरदः शत:ॐ श्रृणुयामशरदः शतम् ॥४॥

**(वरस्य मन्त्रपाठः)**

ततः वधूमग्रे कृत्वा अग्नेरुत्तरतो गत्वा तत्र वरो वध्वा दक्षिणपादं सव्यहस्तेन गृहीत्वा दक्षिणेन वा गृहीत्वा ॥ पूर्वोपकल्पित दृषदुपरि करोति ॥

(शिला खंड पर वधू का दक्षिण पैर का अंगूठा स्पर्श करावे)

**विनियोगः**–आरोहेममेति मंत्रस्य आथर्वण ऋषिः त्रिष्टुप्छन्दः अग्निर्देवता अश्मारोहणे विनियोगः ॥

ॐआरोहेममश्मान मश्मेवत्वॐस्थिराभव । अभितिष्ठ पृतन्यतो वबाधस्व प्रतनायतः ॥

**(इत्याश्मारोहणे वरस्य मंत्र पाठ )** ॥

अथ गाथां गायति:- सरस्वति प्रेदमवसुभगे वाजिनीवती । यान्त्वाविश्वस्य भूतस्य प्रजामस्याग्रत: ॥ यस्यांभूतꣳ समभवद्यस्यां विश्वमिदं जगत् । तामद्यगाथां गास्यामियास्त्रीणा मुत्तमंयश: ॥(इत्यन्तं वरो गाथां गायति)

अथ परिक्रामत: **(अग्रे कन्या वर: पृष्ठत:)**

**विनियोग:**-तुभ्यमग्रे इत्याथर्वण ऋषि: अनुष्टुप् छन्द: अग्निर्देवता अग्निपरिक्रमणे विनियोग: ॥

ॐतुभ्यमग्रे पर्यवहन् सूर्यां वहतुनासह । पुन: पतिभ्योजायांदाग्ने प्रजयासह ॥

**(इति परिक्रमणे वरस्य मंत्रपाठ:)** ॥ एवं कुमार्या भ्राता शमीपलाश मिश्राँल्लाजानञ्जलिनाञ्जलावावपति ॥ **इत्यारभ्य पतिक्रमणान्तं पुन: वारद्वयं कुर्यात्** ॥

तत: तृतीय प्रदक्षिणान्तरं शूर्पकोणे प्रदेशेन कुमार्या भ्राता कुमार्यंजलौ सर्वान्लाजान् आवपति ॥ कुमारी तिष्ठन्ती सर्वान् लाजाञ्जुहोति ॥

४-ॐ भगाय स्वाहा इदं भगाय न मम ॥

**( इति मंत्रं कन्यां वाचायति वर:)**

तत: समाचारात् तूष्णीं चतुर्थ परिक्रमणं कुरुत: ॥

**(तत्र अग्रे वर: पृष्ठे कन्या)**

नेतरथावृत्ति: (पतिक्रमणान्ते वर: कन्याया आसने स्वयं स्थित्वा कन्यां च स्वस्यासने उपवेशयेत् ॥) ततश्च पुन: उभौ पश्चादग्ने: प्राग्वत् स्वासने उपविशेताम् ॥

वरो ब्रह्मान्वारब्ध: प्राजापत्यहोमं कुर्यात् ॥

ॐ प्रजापतये स्वाहा । इदं प्रजापतये न मम ॥ इति प्रोक्षण्यां त्याग: ॥ इति लाजाहोम: ॥

## अथ सप्त पदाक्रमणम् ॥

तत्रादौ शिष्टाचारात् अग्नेरुत्तरत उदकसंस्थान् सप्ततंडुल पुंजान्कृत्वा वरः तत्र सप्ताचल पूजनं कुर्यात् ॥

**संकल्पः**–वरो हस्ते जलमादाय देशकालौ संकीर्त्य मम गृहीत कन्या पतित्व सिद्धयें सप्ताचल पूजनमहं करिष्ये ॥

ॐप्रतिपदसि प्प्रतिपदेत्त्वानु पदस्यनुपदेत्त्वा सम्पदसिसम्पदेत्त्वा तेजोसितेजसेत्त्वा ॥ इति मंत्रेण गंधादिपंचोपचारैः संपूज्य वरः सप्तपदानि प्रक्रमस्वेति प्रैषं कुर्यात् ॥

१–ॐएकमिषे विष्णुस्त्वानयतु ॥१॥

(इति वरोक्ते वधूर्दक्षिणैक पदमुदग्धान्याचले दद्यात् ॥ एवं सर्वत्र ॥)

२–ॐद्वे ऊर्जे विष्णुस्त्वानयतु ॥ इति द्वितीयम् ॥

३–ॐत्रीणि रायस्पोषाय विष्णुस्त्वा नयतु ॥ इति तृतीयम् ॥

४–ॐचत्वारि मायोभवाय विष्णुस्त्वा नयतु ॥ इति चतुर्थम् ॥

५–ॐपंच पशुभ्यो विष्णुस्त्वा नयतु ॥ इति पंचमम् ॥

६–ॐषड् ऋतुभ्यो विष्णुस्त्वा नयतु ॥ इति षष्ठम् ॥

७–ॐसखे सप्तपदा भव सा मामनुव्रता भव विष्णुस्त्वा नयतु ॥ इति सप्तमम् ॥

**वर कन्या के पगरो. अंगुष्ठ से सप्तपदी ढेरी को गिरा दे ॥** (मिला दें)

## कन्या प्रतिज्ञा प्रति वचनम्:–

1–त्वत्तो मे ऽखिल सौभाग्यं पुण्यैस्त्वं विविधैः कृतैः ।
देवैः संपादितो मह्यं वधूराद्ये पदेऽब्रवीत् ॥

हे स्वामी मेरे अनेक पुण्यों और देवताओं की कृपा से आप मुझे पति रूप में प्राप्त हुये हैं ॥ आप मेरे निरन्तर पूज्यनीय है ॥ गृहस्थाश्रम में तो सुख दुःख पड़ते ही रहते है परन्तु उसमें आप सर्वदा प्रसन्न चित्त रहें ॥

२–कुटुम्बं पालयिष्यामि ह्यावृद्ध बालकादिकम् ।
यथालब्धेन संतुष्टा ब्रूते कन्या द्वितीयके ॥

हे स्वामी मै आपके कुटुम्ब के वृद्ध पुरुषों के वचनों का पालन करूँगी । और आपके कुटुम्ब के बालक वृद्धों की सेवा करूँगी घर में जैसा भी वैभव होगा उसके अनुसार ही संतुष्ट रहूँगी। और किसी भी प्रकार के खोटे वचन नहीं बोलूँगी ॥

३–मिष्टान्नव्यञ्जनादीनि काले संपादये तब ।
आज्ञा संपादिनी नित्यं तृतीये साऽब्रवीद्वरम् ॥

हे स्वामी आप को तथा आपके कुटुम्ब को हमेशा समय पर उत्तम भोजन मिष्टान्न व्यंजनादि बनाकर दूँगी तथा प्रतिदिन आपकी आज्ञा का पालन करूँगी ॥

४–शुचिः शृङ्गार भूषाऽहं वाङ्मनः कायकर्मभिः ।
क्रीडिष्यामि त्वया सार्धं तुरीये साऽब्रवीदिदम् ॥

हे स्वामी मैं हमेशा पवित्र भावना से, सुन्दर सौभाग्य श्रृंगार धारण कर मन से, वचन से, सत्कर्म से, आपको प्रसन्न करूँगी और आपका ही हित चिन्तन करूँगी ॥

५–दुःखे धीरा सुखे हृष्टा सुख दुःख विभागिनी ।
नाहं परतरं गच्छे पञ्चमे साऽब्रवीत्पतिम् ॥

हे स्वामी आपके आपत्ति समय में मै धीरज रखूँगी और आपके सुख दुःख में मेरा भी सहयोग रहेगा । और मैं पर पुरुष की कदापि इच्छा नहीं रखूँगी ॥

६–सुखेन सर्वकर्माणि करिष्यामि गृहे तव ।
सेवां श्वसुरयोश्चापि बन्धूनां सत्कृतं तथा ॥
यत्र त्वं वा ह्यहं तत्र नाहं वञ्चे प्रियं क्वचित् ।
नाहं प्रियेण वञ्चयाऽस्मि कन्या षष्ठे पदेऽब्रवीत् ॥

हे स्वामी मै अपने घर का सब काम अपने हाथ से, योग्यतानुसार कर आपके माता पिता की सेवा करूँगी, और आप जहाँ

जाओगे मै आपके साथ चलूँगी और आप जहाँ रहोगे वहीं पर मै भी रहूँगी, मै अकेली आपके बिना नहीं रहूँगी क्योंकि आप मुझे कभी भूलोगें नहीं और मैं भी आपको कभी भूलूँगी नहीं ॥

७–होमेयज्ञादि कार्येषु भवामि च सहायकृत् ।
धर्मार्थ कामकार्येषु मनोवृत्तानु सारिणी ॥
सर्वे च साक्षिण्यस्त्वं मे पतिभूतोऽसि सांप्रतम् ।
देहो मयाऽर्पितस्तुभ्यं सप्तमे सा ब्रवीद्वरम् ॥

हे स्वामी होम तथा यज्ञादि धर्म कार्य में मैं आपका हमेशा साथ दूँगी धर्म अर्थ तथा काम ये तीन पुरुषार्थ कार्य में मैं आपके इच्छा प्रमाण कार्य करूँगी ॥ और देव ब्राह्मण सब की साक्षी में आप मेरे पति बने है और मैं मेरा शरीर आपको अर्पण कर रही हूँ इसका संसार साक्षीभूत हैं ॥

## ॥ वरस्य प्रति वचनम् ॥

आदौ धर्मधरा कुटुम्ब सुखदा मिष्ट प्रिया भाषिणी ।
क्रोधालस्य निवारिका सुखकरी आज्ञानुगावर्तिनी ॥
शास्त्रा मोदित वृद्ध शासन परा धर्मानुगा सादरम् ।
एते तस्य गुणा वसन्ति सततं वामे हि सा त्वंभव ॥

हमारे कुल का जो धर्म है उसका पालन करो, हमारे कुटुम्ब को सुख दो, धर्मानुकूल वृद्ध जनों के उपदेश को स्वीकार करो, मेरी आज्ञा का पालन करो, मेरे माता पिता की सेवा करो, मेरी बहन से क्रोध न करो, ये सब गुण तुम्हारे में हो तो वामांग में आओ तुम्हारा स्वागत है ॥

॥ अथवा ॥

## ॥ कन्या वचनम् ॥

तीर्थ व्रतोद्यापन यज्ञदानं ,
मया सह त्वं यदि कान्त कुर्याः ।
वामांगमायामि तदा त्वदीयं
ब्रवीति वचनं प्रथमं कुमारी ॥१॥

हे स्वामी तीर्थ, व्रत, उद्यापन, यज्ञ, दान, आदि कोई कार्य करें तो मुझे भी साथ लेकर करें, तो मै आप के वामांग में आऊँ ॥१॥

हव्य प्रदानैः अमरान् पितृंश्च,
कव्यप्रदानैर्यदि पूजयेथाः ।
वामांगमायामि तदा त्वदीयं,
ब्रवीति कन्या वचनं द्वितीयम् ॥२॥

यदि आप देवताओं के लिये द्रव्य या भोगप्रसाद अर्पण करें और पितरों को उनके निमित्त कोई श्राद्धीय द्रव्य दे । पूजन कर प्रसन्न करें तो मै वामांग मै आऊँ ॥२॥

कुटुम्ब सम्पालन सर्वकार्य,
कर्तुं प्रतिज्ञां यदि कान्त कुर्याः ।
वामांगमायामि तदा त्वदीयं,
ब्रवीति कन्या वचनं तृतीयम् ॥३॥

हे स्वामी आप अब तक तो घर बार की चिन्ता से मुक्त थे पर अब विवाह किया हैं तो कुटुम्ब के भार को सम्भालना है यदि आप इस भारको सहन करने की प्रतिज्ञा करो तो मैं आपके वामांग आना स्वीकार करती हूँ ॥३॥

आय व्यये धान्य धनादिकानां,
पृष्ट्वा हि मां स्वीयगृहे विदध्याः ।
वामांगमायामि तदा त्वदीयं,
ब्रवीति कन्या वचनं चतुर्थम् ॥४॥

आय व्यय धन समृद्धि के विषय में आप मुझे जानकरी देवें, मेरी सलाह से खर्चादि करें ताकि उसी परिस्थिति अनुरूप मै गृहस्थ का संचालन, अथिति सेवा कर सकूँ, ताकि आपकी प्रतिष्ठा यथावत् बनी रहें। किसी मित्र बंधु रिश्तेदार को दिया लिया होतो उसका भी मुझे ज्ञान रहे तो अच्छा हैं। यह बात आपको स्वीकार हो तो मैं आपके वामाङ्ग में आऊँ ॥४॥

न मेऽपमानं सविधे सखीनां,
द्यूतं न वा दुर्व्यसनं भजेश्चेत्।
वामांगमायामि तदा त्वदीयं,
ब्रवीति कन्या वचनं च पंचमम् ॥५॥

यदि मैं मेरी सखियों में या अन्य स्त्रियों में बैठी होऊँ तब वहाँ पर मेरा अपमान न करें तथा जुआ आदि खेलने में और अन्य किसी दुर्व्यसन में न लगे तो मैं आपके वामाङ्ग में आना स्वीकार करती हूँ ॥५॥

देशान्तरे वा स्वपुरान्तरे वा,
पृष्ट्वा विदध्याः व्यवहार कार्यम्।
वामांगमायामि तदा त्वदीयं,
ब्रवीति कन्या वचनं षष्ठम् ॥६॥

क्रय विक्रय कार्य या व्यावहारिक कार्य हेतु आप बाहर जायें अथवा अपने देशग्राम में जायें तो मुझे बताकर जायें ताकि आवश्यकता पड़ने पर आपसे संपर्क किया जा सके और अधिक समय का प्रवास हो तो उसकी व्यवस्था करें तो मै आपके वामाङ्ग में आना स्वीकार करती हूँ ॥६॥

परस्त्रियं मातृसमां समीक्ष्य,
स्नेहं सदा चेन्मयि कान्त कुर्याः।
वामांगमायामि तदा त्वदीयं,
ब्रूते वचः सप्तममत्र कन्या ॥७॥

हे प्रिय आप परस्त्रियों को माता के समान समझें और मुझ पर ही सदा प्रेम रखा करें और क्रोध न करें तो मैं आपके वामाङ्ग में आना स्वीकार करती हूँ कन्या ने सातवाँ वचन मांगा ॥७॥

## ॥ वर वचनम् ॥

उद्याने विपिने तथा पर गृहेष्वेकाकिनीनो चराऽऽभाषेथा रहसीतरैर्नहि नरैः पुंसां पुरो नो हसेः । सच्छीला मृदुभाषिणी श्वशुरयोर्भक्ता मदाज्ञाकरी धर्म्या भक्तिपरायणा भवसि चेदागम्यतां स्वागतम् ॥

हे प्रिये तुम बाग बगीचे में, बन में तथा पराये घरों में अकेली न जाओ और दूसरे मनुष्यों के साथ एकांत में वार्तालाप न करो, तथा पुरुषों के सामने न हंसो । और सुशील मिष्टभाषिणी होकर सासु ससुर की सेवा करो और पतिव्रतादि धर्मयुक्त ईश्वर भक्ति परायण रहती हुई आज्ञा का पालन करो, तो आइये मैं आपका स्वागत करता हूँ ॥

ततोऽग्नेः पश्चादुपविश्य पुरुष स्कन्ध स्थित कुम्भादाम्र पल्लवेन जलमानीय तेन वरोवधु माभिषिञ्चति ॥

**विनियोगः**-आप इति प्रजापति ऋषिः लिंगोक्ता देवता सुप्रतिष्ठा छन्दः मूर्ध्न्यभिषेचने विनियोगः ॥ आपः शिवाः शिवतमाः शान्ताः शान्ततमास्तास्ते कृण्वन्तु भेषजम् ॥

ॐ आपोहिष्ठा मयो भुवस्तान ऊर्जे दधातन । महेरणाय चक्षसे ॥१॥ यो वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः ॥२॥ तस्मा ऽअरङ्गमाम वो यस्य क्षयाय जिन्वथ । (भूमौ निक्षेप) (पुनः हस्तयोः) आपो जनयथा च नः ॥३॥

ततो दिवा विवाहे सूर्यदर्शनं रात्रि विवाहे च ध्रुवदर्शनं कारयेत् ॥

ॐतच्चक्षुर्देव हितम्पुरस्ताच्छुक्रमुच्चरत् पश्येमशरदः शतञ्जीवेमशरदः शतठंश्रृणुया मशरदः शतम्प्रब्र्वामशरदः

शतमदीना: स्यामशरद: शतम्भूयश्चशरद: शतात् ॥
ॐध्रुवमसि ध्रुवं त्वा पश्यामि ध्रुवैधि पौष्येमसि मह्यं त्वाऽदाद् बृहस्पतिर्मया पत्या प्रजावती संजीव शरद: शतम् ॥

**हृदयालंभनं** ॥ ततो वरो वध्वा दक्षिणस्कंधोपरिहस्तं नीत्वा ममव्रतेति स्वपठितमंत्रेण तस्या हृदयामालभते ॥

(वर, वधू के दक्षिण कंधे पर अपना दक्षिण हाथ रखें)

ॐमम व्रते ते हृदयंदधामि ममचित्त मनुचित्तन्तेऽअस्तु ॥
मम वाचमेकमना जुषस्व प्रजापतिष्ट्वा नियुनक्तु मह्यम् ॥

ततो वरोऽनामिकाग्रे वधू शिरसी धृत्वा:-

**वर: वधूमस्तके रजत मुद्रया सिन्दूरं ददाति ॥**

ॐसुमंगली रियं वधूरिमा ठं समेत पश्यत ।
सौभाग्य मस्यैदत्त्वायाथास्तं विपरेतन ॥

अत्र आचाराच्चतस्त्र: स्त्रियो मंगलं कुर्वन्ति ॥

(चार सौभाग्यवती वधु को आशीर्वाद दें ब्रह्मसावित्र्यो: सौभाग्यं । इन्द्रेन्द्राण्यो: सौभाग्यं । शिवपार्वत्यो: सौभाग्यं । लक्ष्मी नारायण्यो: सौभाग्यं अखण्ड सौभाग्यवती पुत्रपौत्रवती भव)

(मण्डपं मधुपर्कं च लाजाहोमस्थैव च ।
यवत्कन्या न वामांगे तावत्कन्या कुमारिका ॥)

**ततो वधूं वरस्य वामभागे उपवेशयति** ॥(मंत्रपाठो वरस्य)

ॐव्वाममद्य सवितर्व्वाममुश्वो दिवेदिवे व्वाममस्मभ्य ठं सावी ।
व्वामस्य हि क्षयस्य देव भूरेरया धिया व्वामभाज: स्याम ॥

(ततस्तां दृढपुरुषेणोन्मथ्याग्रे: प्राग्वोदग्वानुगुप्तऽआगारे प्राग्ग्रीवऽ उत्तरलोमास्तीर्णे रोहिते ऽआनडुहचर्मण्युपवेशयतीहगावइति)

ॐइहगावो निषीदंत्विहाश्वाऽ इहपूरुषा: । इहोसहस्त्र दक्षिणो यज्ञऽइहपूषानिषीदतु ॥

**पश्चात्**:-अथ स्विष्टकृद्धोम:-ॐ अग्नये स्विष्टकृते स्वाहा ।

इदमग्नये स्विष्टकृते न मम ॥ संस्रवप्राशनम् ॥ अथाचम्य ॥ पवित्राभ्यां मार्जनम् ॥ अग्नौ पवित्रप्रतिपत्तिः ॥ **पूर्णपात्रदानम्** ॥ ॐअद्य कृतैतद्विवाह होम कर्मणि कृता कृता वेक्षण रूप ब्रह्मकर्म प्रतिष्ठार्थमिदं पूर्णपात्रं प्रजापति दैवतममुक गौत्रायामुक शर्मणे ब्राह्मणाय ब्रह्मणे दक्षिणां तुभ्य महं संप्रददे ॥ इति ब्रह्मणे दक्षिणां दद्यात् ॥ स्वस्तीति प्रति वचनं ॥

**ततो ब्रह्मग्रन्थि विमोकः** ॥

**हस्ते जलमादायः**–कृतस्य विवाहाख्यस्य कर्मणः सांगतासिद्ध्यर्थं यथा संख्याकान् ब्राह्मणान् यथाकाले यथा संपन्नेनान्नेनाहं तर्पयिष्ये तेन कर्मांग देवताः प्रीयतां न मम ॥

**पुनः**–कृतस्य विवाहहोम कर्मणः सांगता सिद्ध्यर्थं आचार्यादि नाना नाम गोत्रेभ्यो ब्राह्मणेभ्यो गंधादिभिः सम्पूज्य यथोत्साहं दक्षिणां दास्ये ॥ अथ तिलक मंत्र आशीर्वादान् दद्यात् ॥

ॐसुमित्रियान आपऽओषधयः सन्तु इति शिरसि मार्जनं ॥

ॐ दुर्मित्रियास्तस्मै सन्तुयोस्मान्द्वेष्टि यं च वयं द्विष्मः इति प्रणीतोदकमीशान्यां क्षिप्त्वा ॥ प्रणीता विमोकः ॥ पवित्रे अग्नौ प्रक्षिप्य ॥ उपयमनमग्नौ प्रक्षेपः ॥ ततस्तरण क्रमेण बर्हिनुत्थाप्याज्येनाभिघार्य ॥ ॐ देवागातु विदोगातुं वित्वा गातुमित । मनसस्पत इमं देव यज्ञꣳ स्वाहा वातेधाः ॥( स्वाहा) ॥

**ततो विवाह दिन मारभ्य दम्पत्यो र्नियमाः** ॥

त्रिरात्रमक्षारलवणाशिनौ स्याताम् ॥ त्रिरात्रमघः शयीयाताम् ॥ संवत्सरं न मिथुनमुपेयातां द्वादशरात्रꣳ षड्रात्रं त्रिरात्रमन्ततः॥

**इति विवाह संस्कार प्रयोगः समाप्तः** ॥

## ॥ अथ चतुर्थी कर्म प्रयोगः ॥

विवाहदिवसाच्चतुर्थ्यामिपररात्रे भार्यया सह मंगलं स्नात्वाऽहत वाससी परिधाय धृत मंगल तिलकः शुभासने वर उपविशति ॥ तत्र दक्षिणतो वधूः ॥ वरः आचम्य प्राणानायम्य ॥ सुमुखश्चेति पठित्वा ॥ अद्येत्यादि० विवाहांगभूतं चतुर्थी कर्म करिष्ये ॥ तत्रादौ निर्विघ्नता सिद्धयर्थं गणपतेः षोडशोपचारैः पूजनमहं करिष्ये ॥ तत्र गृहाभ्यंतरतः स्थंडिले पंच भूसंस्कार पूर्वकं वैवाहिकाग्रेः स्थापनं कुर्यात् ॥ ततो अग्रेर्दक्षिणः ब्रह्मासनाद्यासादनं कृत्वा अग्रेरुत्तरत उदकुंभं स्थापयेत् ॥

**अथ कलश स्थापन मंत्रः**– ॐभूरसि भूमिरस्य दितिरसि विश्ववधाया विश्वस्य भुवनस्य धर्त्री ॥ पृथिवी यच्छ पृथिवीन्द्र ठँ ह पृथिवीम्माहिठँ सीः ॥ **इति भूमिं स्पृष्ट्वा** ॥ ॐधान्यमसि धिनुहि देवान् प्राणाय त्वोदानाय त्वा व्यानाय त्वा । दीर्घामनु प्रसितिमायुषे धां देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना चक्षुषे त्वा महीनां पयोसि ॥**इति यवान्निक्षिप्य**॥ ॐआजिघ्र कलशं मह्या त्वा व्विशंत्विन्दवः । पुनरुर्ज्जा निवर्त्तस्व सा नः सहस्त्रं धुक्ष्वोरुधारा पयस्वती पुनर्म्माऽऽविशताद्रयिः ॥ **इति कुम्भं स्थापयेत्** ॥ ॐवरुणस्योत्तं भनमसि व्वरुणस्यस्कं भसर्जनीस्थो व्वरुणस्यऋृत सदन्यसि व्वरुणऋृतसदनमसि व्वरुणस्य ऋृत सदनमासीद ॥ **इति जलं प्रपूर्य** ॥ ॐत्वां गन्धर्वाऽ अखनँस्त्वा मिन्द्रस्त्वां बृहस्पतिः । त्वामोषधे सोमो राजा विद्वान् यक्ष्मा दमुच्यत ॥ **इति गन्धम्** ॥ ॐयाऽओषधीः पूर्वाजाता देवेभ्यस्त्रियुगं पुरा । मनै नु बभ्रूणामह ध्ठं शतं धामानि सप्त च ॥ **इति सर्वोषधी प्रक्षेपः** ॥ ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि ॥ एवानो दूर्वे प्रतनुसहस्त्रेण शतेन च ॥ **इति दूर्वाः** ॥ ॐ अश्वत्थे वो निषदनं पर्णे वो व्वसतिष्कृता । गोभाजऽइत्किला सथयत्त्सनवथ पुरूषम् ॥ **इति पंचपल्लवान्** ॥ स्योना पृथिविनो भवानृक्षरा

निवेशनी । यच्छा नः शर्म सप्रथाः ॥ **इति मृत्तिकाप्रक्षेपः** ॥ ॐ याः फलिनीर्या ऽअफलाऽ अपुष्पायाश्च पुष्पिणीः । बृहस्पति प्रसूतास्तानो मुंचन्त्वᳪ हसः ॥ **इति पूगीफलम् प्रक्षेपः** ॥ ॐ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत्। स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥ **इति हिरण्यम्** ॥ ॐपरिवाजपतिः कविरग्निर्हव्या न्यक्रमीत् । दधद्रत्नानि दाशुषे ॥ **इति पंचरत्नानि प्रक्षेपः** ॥ ॐ सुजातो ज्योतिषा सहशर्म व्वरूथमासदत्स्वः । वासो अग्ने विश्वरूपᳪं संव्ययस्व विभावसो ॥ **इति मंत्रेण सूत्रवेष्टनम्** ॥ ॐ पूर्णा दर्वि परा पत सुपूर्णा पुनरा पत ॥ व्वस्ने वव्विक्रीणा वहाऽइषमूर्ज ᳪ शतक्रतो ॥ **इति तण्डुल पूर्णपात्रम् निधाय** ॥

ॐमनो जूतिर्ज्जुषतामाज्यस्य बृहस्पतिर्य्यज्ञमिमन्तनोत्वरिष्टं यज्ञ ᳪ समिमन्दधातु । विश्वे देवासऽइह मादयन्तामोउँ॥म्प्रतिष्ठ ॥ **इति मंत्रेण प्रतिष्ठा कार्या** ॥ ॐउदकुंभाधिष्ठातृदेवताभ्यो नमः ॥ **इति षोडशोपचारैः पूजनं कार्यम्** ॥

ततः पात्रासादनादिकम् आज्योद्वासनं चरोरुद्वासनं च आज्योत्पवनादि प्रोक्षण्याः प्रत्युत्पवनान्तं कृत्वा उपयमन कुशानादाय ॥ ॐ तिष्ठन् समिधोऽभ्यादाय स्वाहा ॥

प्रोक्षणी शेषोदकेन अग्निं प्रदक्षिणी कृत्य पवित्रयोः प्रणीतासु निधाय ॥ इतरथावृत्तिः ॥ ब्रह्मान्वारब्धेन स्त्रवेण होमः (मनसा)

ॐप्रजापतये स्वाहा । इदं प्रजापतये न मम ॥

ॐ इन्द्राय स्वाहा । इदं इन्द्राय न मम ॥ ॐ अग्नये स्वाहा इदमग्नये न मम ॥ ॐ सोमाय स्वाहा इदं सोमाय न मम ॥

हस्ते अक्षतान् गृहीत्वा ॥

ॐअग्ग्नेनय सुपथारायऽअस्मान्विश्वा निदेवव्वयुनानि व्विद्द्वान् । युयोद्ध्यस्म्मज्जुहुराणमेनो भूयिष्ठान्तेनमऽउक्तिं विधेम ॥ **चतुर्थी**

**कर्मणि साक्षिनाम्ने वैश्वानराय नमः** गंधाक्षत पुष्पाणि समर्पयामि ॥
**ततो वर आज्येन पञ्चाज्याहुती जुहुयात्** (उदपात्रे सर्वासां त्यागः) यथा:-
ॐअग्ने प्रायश्चित्ते त्वंदेवानां प्रायश्चित्ति रसिब्राह्मणस्त्वा नाथकामऽउपधावामि यास्यै पतिघ्नी तनूस्तामस्यै नाशय स्वाहा ॥ इदमग्नये न मम ॥१॥
ॐवायो प्रायश्चित्ते त्वंदेवानां प्रायश्चित्ति रसिब्राह्मणस्त्वा नाथकामऽउपधावामि यास्यै प्रजाघ्नी तनूस्तामस्यै नाशय स्वाहा ॥ इदं वायवे न मम ॥२॥
ॐसूर्य प्रायश्चित्ते त्वंदेवानां प्रायश्चित्ति रसिब्राह्मणस्त्वा नाथकामऽउपधावामि यास्यै पशुघ्नी तनूस्तामस्यै नाशय स्वाहा ॥ इदं सूर्याय न मम ॥३॥
ॐचन्द्र प्रायश्चित्ते त्वंदेवानां प्रायश्चित्ति रसिब्राह्मणस्त्वा नाथकामऽउपधावामि यास्यै गृहघ्नी तनूस्तामस्यै नाशय स्वाहा ॥ इदं चन्द्रमसे न मम ॥४॥
ॐ गन्धर्व प्रायश्चित्ते त्वंदेवानां प्रायश्चित्ति रसिब्राह्मणस्त्वा नाथकामऽउपधावामि यास्यै यशोघ्नी तनूस्तामस्यै नाशय स्वाहा ॥ इदं गन्धर्वाय न मम ॥५॥
(एक आहुति चावल की दे)
**ततः स्थालीपाकेन एकामाहुतिं जुहुयात्** ॥ चरुमभिधार्य ॥ ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम ॥ ॐ अग्नये स्विष्टकृते स्वाहा । इदमग्नये स्विष्टकृते न मम ॥
**ततो आज्येन भूराद्या नवाहुतयः** ॥
ॐ भूः स्वाहा इदमग्नये न मम ॥१॥ ॐ भुवः स्वाहा इदं वायवे न मम ॥२॥ ॐ स्वः स्वाहा इदं सूर्याय न मम ॥३॥
ॐत्वन्नोऽ अग्ने व्वरुणस्य विद्वान्देवस्यहेडोऽ अवयासिसीष्ठाः ॥ यजिष्ठोवह्नितमः शोशुचानो विश्वा द्वेषाᳫंसि प्रमुमुग्ध्यस्मत् स्वाहा ॥ इदमग्नीवरुणाभ्यां न मम ॥४॥

ॐसत्वन्नोऽ अग्ग्रेवमो भवोतीनेदिष्ठोऽ अस्याऽउषसोव्युष्टौ ॥ अवयक्ष्वनो वरुणथ्ठं रराणोव्वीहिमृडीकथ्ठं सुहवो न एधि स्वाहा ॥ इदमग्रीवरुणाभ्यां न मम ॥५॥

ॐअयाश्चाग्रेस्यनभि शस्तिपाश्चसत्य मित्वमयाअसि ॥ अयानो यज्ञंवहास्य यानोधेहि भेषजथ्ठं स्वाहा ॥ इदमग्रयेअयसे न मम ॥६॥

ॐ येते शतंवरुण ये सहस्रं यज्ञिया: पाशा विततामहान्तः ॥ तेभिर्न्नोऽअद्यसवितोत विष्णुर्विश्वेमुञ्चतु मरुतः स्वर्का: स्वाहा ॥ इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च न मम ॥७॥

ॐ उदुत्तमंवरुण पाशमस्मदवाधमं व्विमद्‌ध्यमथ्ठंश्रथाय ॥ अथावयमादित्त्यव्रते तवानागसोऽ अदितयेस्याम स्वाहा ॥ इदं वरुणायादितये न मम ॥८॥

ॐ प्रजापतये स्वाहा ॥ इदं प्रजापतये न मम ॥९॥ **ततः संस्रव प्राशनम्** ॥ पवित्राभ्यां मार्जनम् ॥ अग्नौ पवित्रप्रतिपत्तिः ॥ **ब्रह्मणे पूर्णपात्रदानम्** ॥

कृतस्य चतुर्थीकर्मणः सांगतासिद्ध्यर्थं ब्रह्मन् पूर्णपात्रं तुभ्यमहं संप्रददे ॥ तत आचार्याय पूर्णपात्रं तुभ्यमहं सम्प्रददे ॥ पश्चिमे प्रणीता विमोकः ॥

**तज्जलेन**, आपः शिवाः शिवतमाः शान्ताः शान्ततमास्तास्ते कृण्वन्तु भेषजम् ॥ ॐ आपोहिष्ठा मयो भुवस्तान ऊर्जे दधातन। महेरणाय चक्षसे ॥ यो वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः ॥ तस्मा ऽअरङ्गमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः ॥ इति मार्जनम् ॥(**तत उदपात्र जलेन वरो वधूमूधर्न्यभिषिंचति याते पतिघ्नीरिति** ॥)

(अभिषेक करे वर वधू पर)

ॐयाते पतिघ्नी प्रजाघ्नी पशुघ्नी गृहघ्नी यशोघ्नी निंदितातनूर्जा रघ्नीततऽएनां करोमि साजीर्यत्वं मया सहासौ ॥(**असौस्थाने वधुनामग्रहणं करोति वरः**) अमुकी देवी इति ॥

अथैना छं स्थाली पाकं परोशयतिः-(कंसार)वरः प्राशयति। कन्यामात्रा चतुर्वारं परिवेषणं कार्यम्

(यज्ञ कार्य सम्पूर्ण करने के बाद अग्नि को ढ़क कर उस पर बाजोट लगाकर एक थाल में वधू की माता चार श्रुवा चावल परोसे तथा घी और शक्कर परोसे पहले वर कन्या को जिमावे बाद में कन्या वर को जिमावे ॥) ततो वर एनां प्राशयति ॥

ॐ प्राणैस्ते प्राणान्संदधामि ॥१॥ ॐअस्थिभिरस्थीनि संदधामि ॥२॥ ॐमांसै र्मांसं संदधामि ॥३॥ त्वचा त्वचं संदधामि ॥४॥ अत्र वधूः शुद्ध्यर्थमाचामेत् ॥ अत्र समाचारात् वधूः वरमपि पूर्वोक्तै र्मंत्रैः प्राशयेत् ॥ **तत आचार्यो हस्ते अक्षतान्गृहीत्वा** ॥

ॐ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञछंसमिमं दधातु । विश्वे देवास ऽ इह मादन्तामों ३ँ॥ म्प्रतिष्ठा॥ **उभयोर्वधू वरयोः सुप्रतिष्ठितमस्तु** ॥ इति तयोः शिरसी क्षिपेत्॥

**ततो वरः वधू दक्षिण स्कंधोपरि हस्तं नीत्वा पठेत्** ॥

ॐयत्ते सुसीमे हृदयं दिवि चंद्रमसिश्रितम् ॥ वेदाहंतन्मांत द्विद्यात्पश्येमशरदः शतंजीवे मशरदः शतछं शृणुयामशरदः शतम् इति ॥

**संकल्पः**-कृतस्य चतुर्थीकर्मणः सांगतासिद्धयर्थं यथासंख्याकान् ब्राह्मणान् कुमारिकाः बटुकान् यथाकाले यथासंपन्नेनान्नेनाहं तर्पयिष्ये ॥

**वरपिता प्रयोग करेः-आचमनं प्राणायामं कृत्वाः**-इहाद्य तिथौ मम सुतस्य विवाहोत्सव कर्म प्रतिष्ठा सिद्धयर्थं इदं द्रव्यं अग्निर्देवतं गन्ध पुष्पाद्यर्चितं शास्त्रोक्त कृत पुण्य फलावाप्त्यर्थम् कन्या प्रतिग्रह दोष निवारणार्थम् श्री विष्णो लक्ष्मी प्रीत्यर्थम् आचार्य ब्रह्मणः प्रतिष्ठा सिद्धयर्थं तथा उपविष्ट ब्राह्मणेभ्योऽहं संप्रददे ॥

**आचार्य ने गौदान प्रयोगः**-मम सुतस्य विवाहोत्सव कर्म परिपूर्णार्थं गौदान परिकल्पितं इदं द्रव्यं अग्निर्देवतं पुष्पाद्यर्चितं शास्त्रोक्त

कृत पुण्य फल प्राप्त्यर्थम् आचार्य ब्राह्मणेभ्योहं संप्रददे ॥ प्रणिता पात्र विमोकः सुप्रोक्षितादि करणम् ॥

**अग्निब्रह्मा विसर्जनम्**:–गच्छ गच्छ सुर श्रेष्ठ स्वस्थाने परमेश्वरः यत्र ब्रह्मादयो देवा तत्र गच्छ हुताशन ॥ तिलक मन्त्र आशीर्वादः ॥

इति चतुर्थी कर्म सम्पूर्णम् ॥

(व्रत यज्ञ विवाहेषु श्राद्धे होमेऽर्चने जपे ॥ आरब्धे सूतकं न स्यादनारब्धे तु सूतकम् ॥१॥ प्रारम्भे वरण यज्ञे संकल्पो व्रत सत्रयोः ॥ नान्दीमुखं विवाहादौ श्राद्धे पाक परिक्रिया ॥२॥विवाहे वितते यज्ञे संस्कारे च कृते यदा । कन्या ऋतुमति दृष्टवा कथं कुर्वीत याज्ञिकाः ॥३॥ स्नापयित्वा तु तां कन्या मर्चयित्वा यथा विधि ॥ युँञ्जाना माहुतिं हुत्वा तत स्तत्र प्रवर्तयेत् ॥४॥ अर्थः–व्रत,यज्ञ,विवाह,श्राद्ध,होम,पूजा, जप, प्रारम्भ करने पर सूतक नहीं लगता । कर्म आरम्भ के पूर्व सूतक लगता है ॥१॥ कार्यारम्भ करने पर ऐसी स्थिति वन जाये तो विवाहादि कार्य नान्दीश्राद्ध करके सम्पन्न करलें ॥२॥ विवाहादि कार्य मे कन्या यदि ऋतुमती हो जाये तो कन्या को यथाविधि स्नान कराकर उसे युँञ्जाना मंत्र से आहुती देकर कार्य सम्पन्न करालें ॥३॥ पुत्र को जन्म देने पर 20 दिन के बाद और पुत्री को जन्म देने पर 30 दिन के बाद विवाह, उपनयन तथा चौल कर्म करने का स्त्री को अधिकार जानना चाहिये)

## ❋ अथ सीमन्तोन्नयन संस्कार विधिः ॥ ❋

॥ श्री गणेशाय नमः ॥ प्रथमे गर्भे षष्ठेऽष्टमे वा मासे पुन्नक्षत्रे चन्द्रतारा ग्रहानुकूलदिने पत्न्या सह मङ्गलस्नानं कृत्वा अहतेवासो युगालंकृतः शुचिर्दर्भपाणिः पत्न्या सह बहिः शलायां शुभासने प्राङ्मुख उपविश्याचम्य प्राणानायम्य गीतवाद्यमङ्गलघोषैः पतिगृहमागत्य ॥ सीमन्ते च विवाहेच पत्नी दक्षिणतः सदा ॥ सुमुहूर्तं सुलग्नं क्षेमं कल्याणं आरोग्यं शुभं भवतु ॥

सुमुखश्चैकेत्यादि० पठित्वा ॥

**संकल्पः**– देशकालसंकीर्तनान्ते मम तनुरुधिरप्रिया लक्ष्मीभूत राक्षसीगण दूर निरसन क्षेम सकलसौभाग्य निदान भूत महालक्ष्मी समावेशन द्वारा प्रति गर्भबीज गर्भ समुद्भवैनो निबर्हण जनकातिशय द्वारा च श्रीपरमेश्वर प्रीत्यर्थं स्त्रीसंस्काररूपं सीमन्तोन्नयनाख्यं कर्म करिष्ये ॥

**तत्रादौ** निर्विघ्नता सिद्ध्यर्थं गणपतिपूजनं, स्वस्तिपुण्याहवाचनम्, अविघ्नपूजनं, मण्डपस्थापनं, मातृकापूजनं, वसोर्धारा आयुष्यमन्त्रजपं, नान्दीश्राद्धं च करिष्ये ॥

**तत्र** बहिः शालायां स्थण्डिले पञ्चभूसंस्कारपूर्वकं मङ्गलनामाग्नेः स्थापनं करिष्ये ॥

ततः स्थण्डिले पञ्च भूसंस्कारान् कुर्यात् ॥

दर्भैः परिसमुह्य 3 ॥ गोमयेनोपलिप्य 3 ॥ स्रुवेणोल्लिख्य 3 ॥ अनामिकाङ्गुष्ठेनोधृत्य 3 ॥ कुशोदकेनाऽभ्युक्ष्य 3 ॥ अग्निमुपसमाधाय ॥ सौभाग्यवत्या काँस्यपात्र द्वय संपुटितेन तमग्निमानीयमात्माभिमुखेअग्निकोणे प्रतिष्ठाप्य ॥ तस्मादाचार्यः हुँ फट् इति मंत्रेण क्रव्यादांशं नैर्ऋत्यां क्षित्वा तस्योपरि अक्षतान् विकीरयेत् ॥ आच्छादनं दूरीकृत्य ॥ आत्माभिमुखमग्निं स्थापयेत् ॥ ॐअग्निन्दूतं पुरोदधे हव्य वाहमुपब्रुवे । देवाँ २॥ आ सादयादिह ॥ ॐआवो देवासऽईमहे वामं प्रयत्य ध्वरे । आवो देवास ऽ आशिषो यज्ञियासो हवामहे ॥ इत्यग्निमुपसमाधाय ॥

अग्नेर्दक्षिणतो ब्रह्मासनम् ॥ उत्तरतः प्रणीतासनद्वयम् ॥ तत्र ब्रह्मोपवेशनम् ॥ यावत्कर्म समाप्यते तावत्वं ब्रह्मा भव ॥ ब्रह्मा भवामि इति प्रतिवचनम् ॥ औदुम्बरफल संलग्नशाखा (गूलर शाखा फल वाली) ॥ त्रयोदर्भाः ॥ (तीन कुशा पुंज) स्थानत्रये श्वेता त्रीणि शल्लली ॥(सफेद सहेली का काँटा) वीरतर शंकुः (अश्वत्थो वैल्वः शारेषीको वा)(पीपल या बिल्व या सरीस

का कीला) पूर्णपात्रं ॥ मृदुपीठं ॥( गूलर की कोमल चौकी) वीणा गाथिनौच(वीणा वादक) औदुम्बरमाला च (गूलर फल की माला) ॥ इत्याद्युपकल्पयेत् ॥ (इत्यादि की व्यवस्था कर लें) आज्य निर्वपणान्तरं चरुपात्रे (चावल पकाने का बर्तन) मुद्गप्रक्षेपं (हरे मूँग) कृत्वाऽधिश्रयणम् (पकाने को अग्नि पर चढा दें) ॥ ईषच्छ्रतेषु (कुछ पकने पर) तिलतण्डुल प्रक्षेपः (श्वेत तिल और चावल डाले) ॥

ॐसमिधोभ्याधायस्वाहा ॥ प्रोक्षणी शेषोदकेन सपवित्रहस्तेन पर्युक्षणं कुर्यात् ॥ पवित्रयोः प्रणीतागमनं ॥ दक्षिण जान्वाच्य ॥ ब्रह्मान्वारब्धे स्रुवेण होमः ॥ ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम ॥ ॐ इन्द्राय स्वाहा इदं इन्द्राय न मम ॥ ॐ अग्नये स्वाहा इदमग्नये न मम ॥ ॐ सोमाय स्वाहा इदं सोमाय न मम ॥ ततोग्निपूजनं ॥ सीमंते मंगलनाम्ने वैश्वानराय नमः गधाक्षतपुष्पाणि समर्पयामि ॥ ततस्तिल मुद्गमिश्र चरुहोमः ॥ (मूँग मिले तिल चरु की एक आहुति दे) ॐ प्रजापतयेस्वाहा ॥ इदं प्रजापतये न मम ॥ ॐ अग्नयेस्विष्टकृते स्वाहा ॥ इदं अग्नये न मम ॥

**ततो भूराद्यानवाहुतयः-**

ॐ भूः स्वाहा इदं अग्नये ॥ ॐ भुवः स्वाहा इदं वायवे ॥ ॐ स्वः स्वाहा इदं सूर्याय ॥

ॐ त्वन्नो अग्ने वरुणस्य विद्वान् देवस्य हेडो अवया सिसीष्ठाः । यजिष्ठो वह्नितमः शोशुचानो विश्वाद्वेषा ꣳसि प्रमुमुग्ध्यस्मत् स्वाहा ॥ इदमग्नी वरुणाभ्यां न मम ॥

ॐ सत्वन्नो अग्नेऽ वमो भवोती नेदिष्ठो अस्याऽ उषसोव्युष्टौ अवयक्ष्वनो व्वरुण ꣳ रराणोव्वीहि मृडीक ꣳ सुहवोन ऽएधि स्वाहा । इदमग्नि वरुणाभ्यां न मम ॥

ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्यमित्वमयाअसि ॥ अयानो यज्ञं वहास्ययानो धेहि भेषज ꣳ स्वाहा ॥ इदमग्नये न मम ॥

ॐ येतेशतं वरुणं ये सहस्त्रं यज्ञिया: पाशवितता महांत: ॥ तेभिर्न्नो ऽअद्य सवितु र्विष्णुर्विश्वे मुञ्चन्तुमरुत: स्वर्क्का: स्वाहा ॥ इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्य: स्वर्केभ्य न मम ॥

ॐ उदुत्तमं वरुण पाशमस्म दबाधमंव्विमध्यमठं श्रथाय । अथावयमादित्य व्रते तवानागसोऽअदितये स्याम स्वाहा । इदं वरुणाय आदित्याय अदितये च न मम ॥

ॐ प्रजापतये स्वाहा ॥ इदं प्रजापतये ॥ **इति नवाहुतय:** ॥

औदुम्बर फलयुग्मयुतशाखा दर्भत्रयेण शलजीपूर्णं शरेणसह एकीकृत्यैनंवध्वा सीमंत ललाटादुपरि शिरोमध्य भागस्थ केशान्विनयेत् पति: ॥(गूलर की शाखा, तीनकुशा, सहेली का काँटा,बाण सहित एकीकृत करके बहु के ललाट के ऊपर सिर के मध्य भाग मे पति केशो को विभाजित कर मुकुट बाँधे)

ॐ भूर्विनयामि ॥ ॐ भुवर्विनयामि ॥ ॐ स्वर्विनयामि ॥

ततोवध्वाशिरसि त्रिर्वेष्टनेन त्रिर्बध्नीयात् ॥ **तत्र मन्त्र:** ॥

अयमूर्जावतोवृक्ष ऊर्ज्जीवफलिनी भवेति ॥ औदुम्बरपुष्पमालांच धारयेत् ॥

(गूलर की माला पहना दें)

ततो भर्ता वीणागाथिनौ राजार्ठं संगायेतामिति प्रैषमाह । ततश्च तौ सोत्साहौ गायेताम् स च गाथा

(तब पति वीणा वादक के साथ यह मंत्र बोलें)

**मंत्र:** ॐ सोमऽ एवनोराजे मामानुषी प्रजा: ॥ अविमुक्त चक्रआसीरंस्तीरे तुभ्यमसाविति ॥ असौ स्थाने समिपावस्थिताया: नद्या नामग्रहणं स्त्रयेव करोति ॥ गङ्गा यमुनेत्येवमादि प्रथमान्तम् ॥

(असौ की जगह समीपस्थ नदी का नाम उच्चारण करे)

तत: संस्त्रवप्राशनं ॥ पवित्राभ्यां मार्जनं ॥ पवित्र प्रतिपत्ति: ॥ पवित्रे अग्नौ प्रक्षेप: ॥ प्रणीता विमोक: ॥

स्वभावतोऽपास्तसमस्तदोषमशेषकल्याणगुणैकराशिम् । व्यूहाङ्गिनं ब्रह्म परं वरेण्यं ध्यायेम कृष्णं कमलेक्षणं हरिम् ॥



**ब्रह्मणे पूर्णपात्रं:**–कृतस्य कर्मणः सांगता सिद्ध्यर्थं कृता कृता वेक्षणरूप ब्रह्मकर्म प्रतिष्ठा सिद्ध्यर्थं इदं पूर्णपात्रं ब्रह्मणे तुभ्यमहं संप्रददे ॥

**ब्राह्मणभोजन संकल्पः**– सीमन्तोन्नयनकर्मणः सांगता सिद्ध्यर्थस्मृत्युक्तान् दशसङ्ख्याकान् ब्राह्मणान् भोजयिष्ये ॥

तेन श्रीकर्माङ्गदेवता प्रीयन्ताम् न मम ॥

ब्राह्मणान् गन्धादिभिः सम्पूज्य ॥ तेभ्यश्च दक्षिणां दत्वा ॥ तेषाम् आशिषो गृहीत्वा ॥ अग्निं विसृज्य ॥ मातृणां विसर्जनम् ॥ **सुवर्णरक्षां वामकरे बध्नीयात्** ॥ बध्वो पितु वस्त्रदानं कुर्यात् ॥

॥ इति सीमन्तोन्नयन संस्कारः ॥

## ॥ विष्णु पूजनम् ॥

**ध्यानम्:**–शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं,
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ।
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानिगम्यं,
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥१॥
सशङ्खचक्रं सकिरीटकुण्डलं सपीतवस्त्रं सरसीरुहेक्षणम् ।
सहारवक्षः स्थलकौस्तुभश्रियं नमामि विष्णुं शिरसा चतुर्भुजम् ॥२॥
ॐ नमोऽस्त्वनन्ताय सहस्रमूर्त्तये सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः ॥३॥
ध्यानार्थे पुष्पाणि समर्पयामि ॥

हिरण्यवर्णां **आवाहन:**–ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् । सभूमिर्ठं सर्वत स्पृत्वाऽत्यतिष्ठद्दशाङ्गुलम् ॥ आगच्छ भगवन् देव स्थाने चात्र स्थिरो भव । यावत् पूजां करिष्यामि तावत् त्वं संनिधौ भव ॥ श्रीमन्नारायणाय नमः आवाहनार्थे पुष्पं समर्पयामि ॥

ताम्र आवह **आसन:**–ॐ पुरुषऽ एवेदर्ठं सर्वं यद्भूतं यच्चभाव्यम् । उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ अनेकरत्नसंयुक्तं



अङ्गे तु वामे वृषभानुजां मुदा विराजमानामनुरूपसौभगाम् । सखीसहस्रैः परिसेवितां सदा स्मरेम देवीं सकलेष्टकामदाम् ॥

नानामणिगणान्वितम् । भावितं हेममयं दिव्यमासनं प्रतिगृह्यताम्॥ श्रीमन्नारायणाय नमः । आसनार्थे पुष्पाणि समर्पयामि ॥

**पाद्य**:–ॐ एतावानस्य महिमातो ज्यायाँश्च पूरुषः । पादोस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥ गङ्गोदकं निर्मलं च सर्वसौगन्ध य संयुतम् । पादप्रक्षालनार्थाय दत्तं मे प्रतिगृह्यताम् ॥ श्रीमन्नारायणाय नमः । पादयोः पाद्यं समर्पयामि ॥

**अर्घ्य**:–ॐत्रिपादूर्ध्वऽउदैत्पुरुषः पादोस्येहाभवत् पुनः । ततो विष्वङ् व्यक्रामत्साशनानशने अभि ॥ गन्धपुष्पाक्षतैर्युक्तमर्घ्यं सम्पादितं मया । गृहाणार्घ्यं मया दत्तं प्रसन्नो वरदो भव ॥ श्रीमन्नारायणाय नमः । हस्तयोरर्घ्यं समर्पयामि ॥

**आचमन**:–ॐ ततो विराडजायत व्विराजो अधि पूरुषः । स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः॥ कर्पूरेण सुगन्धेन वासितं स्वादु शीतलम् । तोयमाचमनीयार्थं गृहाण परमेश्वर ॥ श्रीमन्नारायणाय नमः । मुखे आचमनीयं जलं समर्पयामि ॥

**स्नान**:–ॐ तस्माद्यज्ञात्सर्वहुतः सम्भृतं पृषदाज्यम् । पशूँस्ताँश्चक्रे वायव्यानारण्या ग्राम्याश्चये॥ मन्दाकिन्यास्तु यद् वारि सर्वपापहरं शुभम् । तदिदं कल्पितं देव स्नानार्थं प्रतिगृह्यताम् ॥ श्रीमन्नारायणाय नमः । स्नानीयं जलं समर्पयामि ॥

**दुग्धस्नान**:–ॐ पयः पृथिव्यां पयओषधीषु पयोदिव्यं तरिक्षेपयोधाः । पयस्वतीः प्रदिशः संतुमह्यम्॥ काम धेनु समुत्पन्नं सर्वेषां जीवनं परम् । पावनं यज्ञहेतुश्च पयः स्नानार्थमर्पितम् ॥ श्रीमन्नारायणाय नमः । पयः स्नानं समर्पयामि ॥ पयस्नानान्ते शुद्धोदकस्नानं समर्पयामि शुद्धोदकस्नानान्ते आचमनीयं समर्पयामि।

**दधिस्नान**:–ॐ दधिक्राव्णो अकारिषंजिष्णोरश्वस्य वाजिनः । सुरभिनो मुखाकरत्प्रणऽ आयू छं षितारिषत् ॥

पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम् । दध्यानीतं मया देव स्नानार्थं प्रतिगृह्यताम् ॥ श्रीमन्नारायणाय नमः । दधिस्नानं समर्पयामि ॥ दधिस्नानान्ते शुद्धोदकस्नानं समर्पयामि शुद्धोदकस्नानान्ते आचमनीयं समर्पयामि ॥

**घृतस्नानः**–ॐ घृतं घृतपावानः पिवतवसां वसा पावानः पिबतांतरिक्षस्य हविरसि स्वाहा ॥ दिशः प्रदिशऽआदिशो विदिश ऽ उद्दिशोदिग्भ्यः स्वाहा ॥

नवनीतसमुत्पन्नं सर्वसंतोषकारकम् । घृतं तुभ्यं प्रदास्यामि स्नानार्थं प्रतिगृह्यताम् ॥ श्रीमन्नारायणाय नमः । घृतस्नानं समर्पयामि । घृतस्नानान्ते शुद्धोदकस्नानं समर्पयामि शुद्धोदकस्नानान्ते आचमनीयं समर्पयामि ॥

**मधुस्नानः**–ॐमधुव्वाताऋृतायते मधुक्षरंति सिंधवः माध्वीर्नः सन्त्वोषधीः ॥ मधुनक्तमुतोषसो मधुमत्पार्थिव ७ं रजः । मधु द्यौरस्तु नः पिता ॥ मधुमान्नो वनस्पतिर्मधुमाँ२ अस्तु सूर्यः माध्वीर्गावो भवन्तु नः ॥

तरुपुष्पसमुद्भूतं सुस्वादु मधुरं मधु । तेजः पुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम् ॥ श्रीमन्नारायणाय नमः । मधुस्नानं समर्पयामि ॥ मधुस्नानान्ते शुद्धोदकस्नानं समर्पयामि शुद्धोदकस्नानान्ते आचमीयं समर्पयामि ॥

**शर्करास्नानः**–ॐ अपा७ं रसमुद्वय स७ं सूर्येसंत ७ं समाहितम् ॥ अपा७ं रसस्ययो रसस्तंवो गृह्णाम्युत्तममुपयाम गृहीतोसीन्द्रा यत्वा जुष्टं गृह्णाम्येष ते योनिरिंद्राय त्वा जुष्टतमम् ॥

इक्षुसारसमुद्भूता शर्करा पुष्टिकारिका । मलापहारिका दिव्या स्नानार्थं प्रतिगृह्यताम् ॥ श्रीमन्नारायणाय नमः । शर्करास्नानं समर्पयामि ॥ शर्करास्नानान्ते शुद्धोदकस्नानं समर्पयामि शुद्धोदकस्नानान्ते आचमीयं समर्पयामि ॥

**पञ्चमृतस्नान**:-ॐ पंचनद्यः सरस्वती मपियंति सस्त्रोतसः । सरस्वतीतु पंचधासो देशे भवत्सरित् ॥
पयो दधि घृतं चैव मधु च शर्करायुतम् । पञ्चामृतं मयाऽऽनीतं स्नानार्थं प्रतिगृह्यताम् ॥ श्रीमन्नारायणाय नमः । पञ्चामृतस्नानं समर्पयामि ॥

**गन्धोदकस्नान**:-ॐ अꣳशुनाते अꣳशुः पृच्यतां परुषापरुः । गन्धस्ते सोममवतु मदाय रसो अच्युतः ॥ मलयाचल सम्भूतं चन्दनेन विमिश्रितम् । इदं गन्धोदकस्नानं कुङ्कुमाक्तं नु गृह्यताम् ॥ श्रीमन्नारायणाय नमः । गन्धोदकस्नानं समर्पयामि ॥

**शुद्धोदकस्नान**:-ॐशुद्धवालः सर्वशुद्धवालो मणि बालस्तऽ आश्विनाः श्वेतः श्वेताक्षोरुणस्ते रुद्राय पशुपतये कर्ण्णयामाऽ अवलिप्ता रौद्रानभोरूपाः पार्ज्जन्याः ॥ श्रीमन्नारायणाय नमः। शुद्धोदकस्नानं समर्पयामि ॥ शुद्धोदकस्नानान्ते आचमनीयं समर्पयामि ॥ श्रीमन्नारायणाय नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि ॥

## ॥ पुरुष सूक्तम् ॥

**अभिषेकं कुर्यात्:-हरिःॐ सहस्रशीर्षापुरुषः सहस्राक्षः सहस्रपात् । सभूमिꣳ सर्वतस्पृत्वाऽत्यतिष्ठद्दशाङ्गुलम् ॥१॥**
**पुरुषऽएवेदꣳ सर्वँय्यद्भूतँयच्चभाव्यम् ।** उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥२॥ एतावानस्यमहिमातोज्यायाँश्चपूरुषः ।
पादोस्यव्विश्वाभूतानित्रिपादस्यामृतन्दिवि ॥३॥
त्रिपादूर्द्ध्वऽउदैत्पुरुषः पादोस्येहाभवत्पुनः ।
ततोव्विष्वङ्व्यक्रामत्साशनानशने अभि ॥४॥
ततो व्विराडजायतव्विराजोऽअधिपूरुषः ।
सजातोऽअत्यरिच्यतपश्चाद्भूमिमथो पुरः ॥५॥
तस्माद्यज्ञात्सर्व्वहुतः सम्भृतम्पृषदाज्यम् ।
पशूँस्ताँश्चक्रेव्वायव्यानारण्याग्ग्राम्याश्चये ॥६॥

तस्माद्यज्ञात्सर्वहुतऽऋचः सामानिजज्ञिरे ।
छन्दाᳪंसिजज्ञिरेतस्माद्यजुस्तस्मादजायत ॥७॥
तस्म्मादश्श्वाऽ अजायन्तयेकेचोभयादतः ।
गावोहजज्ञिरेतस्मात्तस्माज्जाताऽअजावयः ॥८॥
तँय्यज्ञम्बर्हिषिप्प्रौक्षन्पुरुषञ्जातमग्ग्रतः । तेनदेवाऽ
अयजन्तसाध्याऽ ऋषयश्श्चये ॥९॥
यत्पुरुषँव्यदधुः कतिधाव्यकल्पयन् ।
मुखङ्किमस्यासीत्किम्बाहूकिमूरू पादाउच्येते ॥१०॥
ब्राह्मणोस्यमुखमासीद्बाहूराजन्न्यः कृतः ।
ऊरूतदस्ययद्वैश्यः पभ्द्याᳪंशूद्रोअजायत ॥११॥
चन्द्रमामनसोजातश्श्चक्षोः सूर्यो ऽअजायत ॥
श्रोत्राद्वायुश्श्चप्प्राणश्श्चमुखादग्ग्निरजायत ॥१२॥
नाभ्याऽआसीदन्तरिक्षᳪं शीर्ष्णोद्यौः समवर्त्तत ।
पभ्द्याम्भूमिर्द्दिशः श्रोत्रात्तथालोका 2ँ॥ ऽअकल्पयन् ॥१३॥
यत्पुरुषेणहविषा देवायज्ञमतन्वत ।
व्वसन्तोस्यासीदाज्ज्यङ्ग्रीष्मऽइध्ध्मः शरद्धविः ॥१४॥
सप्तास्यासन्परिधयस्त्रिः सप्तसमिधः कृताः ।
देवायद्यज्ञन्तन्न्वाना ऽ अबध्नन्पुरुषम्पशुम् ॥१५॥
यज्ञेनयज्ञमयजन्तदेवास्तानिधर्माणि प्रथमान्यासन् । तेहनाकं
महिमानः सचन्तयत्रपूर्वेसाध्याः सन्तिदेवाः ॥१६॥

पुनः शुद्धोदकस्नानः-ॐशुद्धवालः सर्वशुद्धवालो मणि बालस्तऽआश्विनाः श्वेतः श्वेताक्षोरुणस्ते रुद्राय पशुपतये कर्ण्णयामाऽअवलिप्ता रौद्रानभोरूपाः पार्ज्जन्याः ॥ श्रीमन्नारायणाय नमः । शुद्धोदकस्नानं समर्पयामि ॥ शुद्धोदकस्नानान्ते आचमनीयं समर्पयामि ॥

**वस्त्रः**-ॐतस्माद्यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे ।

उपैतु मां०

छन्दाथंसिजज्ञिरे तस्माद्यजुस्तस्मा दजायत ॥ शीतवातोष्णसंत्राणं लज्जाया रक्षणं परम् । देहालङ्करणं वस्त्रमतः शान्तिं प्रयच्छ मे ॥ श्रीमन्नारायणाय नमः । वस्त्रं समर्पयामि । आचमनीयं जलं च समर्पयामि ॥

क्षुत्पिपासा॰

**यज्ञोपवीत:**–ॐ तस्मादश्वाऽ अजायन्त ये के चोभयादतः । गावो ह जज्ञिरे तस्मात्तस्माज्जाताऽ अजावयः ॥ नवभिस्तन्तुभिर्युक्तं त्रिगुणं देवता मयम् । उपनीतं चोत्तरीयम् गृहाण परमेश्वर ॥ श्रीमन्नारायणाय नमः । यज्ञोपवीतं समर्पयामि । यज्ञोपवीतान्ते आचमनीयं जलं च समर्पयामि ॥

**उपवस्त्र:**–उपवस्त्रं प्रयच्छामि देवाय परमात्मने । भक्त्या समर्पितं देव प्रसीद परमेश्वर ॥ श्रीमन्नारायणाय नमः । उपवस्त्रं समर्पयामि । आचमनीयं जलं च समर्पयामि ॥

गन्धद्वारां॰

**गन्ध:**– तँय्यज्ञम्बर्हिषिप्प्रौक्षन्त्पुरुषञ्जातमग्ग्रतः । तेन देवाऽ अयजन्त साध्याऽ ऋषयश्चये ॥ श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् । विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम् । गन्धं विलेपयामि ॥ श्रीमन्नारायणाय नमः । चन्दनं समर्पयामि ।

(शालग्राम जी पर अक्षत नहीं चढाया जाता, अतः अक्षत के स्थान पर श्वेत तिल अर्पित करना चाहिये।)

**अक्षत:**–ॐ अक्षन्नमीमदन्तह्य व प्रियाऽ अधूषत । अस्तोषतस्व भानवो विप्रान विष्ठ्या मतीयोजान्विन्द्रते हरिः ॥ श्रीमन्नारायणाय नमः । अक्षतान् समर्पयामि ॥

मनसः कामम॰

**पुष्प:**– :–ॐइदं विष्णुर्विचक्रमे त्रेधानिदधे पदम् । समूढमस्यपाथं सुरेस्वाहा ॥ माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो । मयानीतानि पुष्पाणि गृहाण परमेश्वर ॥ श्रीमन्नारायणाय नमः । पुष्पं पुष्पमालां च समर्पयामि ॥

**तुलसीपत्र:**–ॐयत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् । मुखं

किमस्यासीत् किं बाहू किमूरू पादा उच्येते ॥ ॐ विष्णोः कर्मांणि पश्यत यतो व्रतानि पस्पशे । इन्द्रस्य युज्यः यखा ॥ तुलसीं हेमरूपां च रत्नरूपां च मञ्जरीम् । भवमोक्षप्रदां तुभ्यमर्पयामि हरिप्रियाम् ॥ श्रीमन्नारायणाय नमः । तुलसीदलं तुलसीमञ्जरीं च समर्पयामि ॥

**दूर्वा**:–ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि ॥ एवानो दूर्वे प्रतनुसहस्रेण शतेन च ॥ विष्ण्वादिसर्वदेवानां दूर्वे त्वं प्रीतिदा सदा । क्षीरसागरसम्भूते वंशवृद्धीकरी भव ॥ दूर्वाङ्कुरान् सुहरितानमृतान् मङ्गलप्रदान् । आनीतांस्तव पूजार्थं गृहाण परमेश्वर ॥ श्रीमन्नारायणाय नमः । दूर्वाङ्कुरान् समर्पयामि ॥

**आभूषण**:–वज्रमाणिक्य वैदूर्य मुक्ताविद्रुममण्डितम् । पुष्पराग समायुक्तं भूषणं प्रतिगृह्यताम् ॥ श्रीमन्नारायणाय नमः । अलङ्करणार्थे आभूषणानि समर्पयामि ॥

गंधाक्षतपुष्पाणि गृहीत्वाः–

**अङ्गपूजा**:–ॐपद्मनाभाय नमः पादौ पूजयामि । ॐजनार्दनाय नमः जंघे पूजयामि । ॐजगन्नाथाय नमः जानुनी पूजयामि । ॐउरू विक्रमाय नमः ऊरू पूजयामि । ॐनारायणाय नमः नाभिं पूजयामि । ॐउरग–शयनाय नमः उदरं पूजयामि । ॐवैकुण्ठ–सदनाय नमः वक्षः पूजयामि । ॐभूतभृते नमः भुजान् पूजयामि । ॐकैटभारये नमः कण्ठं पूजयामि । ॐचक्रायुधाय नमः चिबुकं पूजयामि । ॐमधुसूदनाय नमः मुखं पूजयामि । ॐनवनीरदाभाय नमः नेत्रे पूजयामि । ॐकौस्तुभधराय नमः कर्णौ पूजयामि । ॐलक्ष्मीपतये नमः ललाटं पूजयामि । ॐश्रीधराय नमः शिरः पूजयामि । ॐसहस्रशीर्षाय नमः सर्वाण्यङ्गामि पूंजयामि ॥

**सुगन्धित तैल**:–ॐ अहिरिवभोगै: पर्येतिवाहुंज्याया हेतिम्परि बाधमाना: । हस्तग्घ्नो विश्वाव्वयनुनानि विद्वान्पुमान्पुमाथ्ठं सम्परिपातु विश्वत: ॥

तैलानि च सुगन्धीनि द्रव्याणि विविधानि च । मया दत्तानि लेपार्थं गृहाण परमेश्वर ॥

**धूप**:–ॐब्राह्मणोस्य मुखमासीद् बाहू राजन्य: कृत: । ऊरू तदस्य यद्वैश्य: पभ्द्या थ्ठंशूद्रो अजायत ॥ वनस्पति रसोद्भूतो गन्धाढ्यो गन्ध उत्तम: । आघ्रेय: सर्व देवानाम् धूपोऽयं प्रतिगृह्यताम् ॥ श्रीमन्नारायणाय नम: । धूपमाघ्रापयामि ॥

**दीप**:–चन्द्रमा मनसो जातश्चक्षो: सूर्यो ऽअजायत ॥ श्रोत्राद्वायुश्च प्राणश्च मुखा दग्निरजायत ॥ साज्यं च वर्तिसंयुक्तं वह्निना योजितं मया । दीपं गृहाण देवेश त्रैलोक्यतिमिरापहम् ॥ श्रीमन्नारायणाय नम: । दीपं दर्शयामि ॥ **हस्तौ प्रक्षाल्य** ।

**नैवेद्य**:–ॐ नाभ्याऽआसीदन्तरिक्षथ्ठं शीर्ष्णो द्यौ: समवर्त्तत पद्भ्याम्भूमिर्दिश: श्रोत्रा तथालोका 2ँ॥ ऽअकल्पयन् ॥ ॐ अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिण: । प्रप्र दातारं तारिषऽऊर्जं नो धेहि द्विपदे चतुष्पदे ॥ त्वदीयं वस्तु गोविन्द तुभ्यमेव समर्पये । गृहाण सुमुखो भूत्वा प्रसीद परमेश्वर ॥ ॐ प्राणाय स्वाहा, ॐ अपानाय स्वाहा, ॐ व्यानाय स्वाहा, ॐ उदानाय स्वाहा, ॐ समानाय स्वाहा । ॐभूर्भुव: स्व: श्रीमन्नारायणाय नम: । नैवेद्यं निवेदयामि मध्ये पानीयं जलं समर्पयामि, आचमनीयं जलं समर्पयामि, उत्तरापोषणार्थे हस्त प्रक्षालनं, मुखप्रक्षालनं आचमनीयं जलं समर्पयामि ।

**ऋतुफल**:–ॐ या: फलिनीर्या ऽअफलाऽ अपुष्पायाश्च पुष्पिणी÷ । बृहस्पति प्रसूतास्तानो मुंचन्त्वध्ठं हस: ॥ इदं फलं मया देव स्थापितं पुरतस्तव । तेन मे सफला वाप्तिर्भवेज्जन्मनि जन्मनि ॥ श्रीमन्नारायणाय नम: । अखण्डऋतुफलं समर्पयामि ॥

**ताम्बूल**:-मुख वासार्थे ताम्बूलम् ॥ ॐ यत्पुरुषेण हविषा देवा यज्ञ मतन्वत । व्वसन्तोस्या सीदाज्यं ग्रीष्मऽइध्म: शरद्धवि: ॥ ॐ उतस्मास्य द्रवतस्तुरण्यत: पर्णं न वेरनुवाति प्रगर्धिन: श्येनस्येव ध्रजतो अङ्कसं परि दधिक्राव्ण: सहोर्जा तरित्रत: स्वाहा ॥
पूगीफलं महद्दिव्यम् नागवल्ली दलैर्युतम् ।
एला चूर्णादि संयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥
श्रीमन्नारायणाय नम: । एलालवङ्गपूगीफलयुतं ताम्बूलं समर्पयामि ॥

**दक्षिणा**:-ॐ हिरण्यगर्भ: समवर्त्तताग्रे भूतस्य जात: पतिरेक आसीत् । स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥
हिरण्यगर्भगर्भस्थं हेमबीजं विभावसो: । अनन्तपुण्यफलदमत: शान्तिं प्रयच्छमे ॥ श्रीमन्नारायणाय नम: । सांगतासिद्ध्यर्थं हिरण्यगर्भदक्षिणां समर्पयामि।

**श्रीफलम्**:-ॐ श्रीश्चते लक्ष्मीश्चपत्क्यग्रा बहोरात्रे पार्श्वे नक्षत्राणिरूपमश्विनौऽ व्याप्तम् । इष्णन्निषाणा मुम्मऽ इषाण सर्वलोकम्मऽ इषाण ॥
फलेन फलितं सर्वं त्रैलोक्यं सचराचरम्। तस्मात्फल प्रदानेन पूर्णा: सन्तु मनोरथा: ॥ श्रीमन्नारायणाय नम: । श्रीफलं समर्पयामि ।

**आरती**:-ॐइदꣳ हवि: प्रजननम्मेऽअस्तुदशवीरꣳ सर्वगणꣳ सस्तये । आत्मसनि प्रजासनि पशुसनि लोकसन्न्यभयसनि अग्नि: प्रजाम्बहुलाम्मे करोत्वन्नम्पयोरेतोऽस्मासुधत्त ॥

**मंत्र-पुष्पाञ्जलि**:-यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् । ते ह नाकं महिमान: सचन्त यत्र पूर्वे साध्या: सन्ति देवा: ॥ ॐराजाधिराजाय प्रसह्य साहिने नमो वयं वैश्रवणाय कुर्महे । स मे कामान् कामकामाय मह्यं कामेश्वरो वैश्रवणो ददातु ॥ कुबेराय वैश्रवणाय महाराजाय नम: । ॐस्वस्ति साम्राज्यं

भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठयं राज्यं महाराज्यमाधिपत्यमयं समन्तपर्यायी स्यात् सार्वभौम: सार्वायुषान्तादापरार्धात् पृथिव्यै समुद्रपर्यन्ताया एकराडिति तदप्येष श्लोकोऽभिगीतो मरुत: परिवेष्टारो मरुत्तस्यावसन् गृहे । आविक्षितस्य कामप्रेर्विश्वेदेवा: सभासद इति ॥

ॐविश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात् । संबाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन् देव एक: ॥

ॐतत्पुरुषाय विद्महे नारायणाय धीमहि तन्नो विष्णु: प्रचोदयात् श्रीमन्नारायणाय नम: । पुष्पाञ्जलिं समर्पयामि ॥

**प्रार्थना:**–यं ब्रह्मावरुणेन्द्र रुद्र मरुत: स्तुन्वति दिव्यै: स्तवै-
र्वेदै: साङ्गपदक्रमोपनिषदैर्गायन्ति यं सामगा: ।
ध्यानावस्थिततद्गतेन मनसा पश्यन्ति यं योगिनो
यस्यान्तं न विदु: सुराऽसुरगणा: देवाय तस्मै नम: ॥
सत्यव्रतं सत्यपरं त्रिसत्यं
सत्यस्य योनिं निहितं च सत्ये ।
सत्यस्य सत्यमृतसत्यनेत्रं
सत्यात्मकं त्वां शरणं प्रपन्ना: ॥

**प्रदक्षिणा:**–सप्तास्यासन् परिधयस्त्रि: सप्तसमिध: कृता: । देवा यद्यज्ञं तन्वाना ऽ अबध्नन् पुरुषं पशुम् ॥ यानि कानि च पापानि जन्मान्तरकृतानि च । तानि सर्वाणि नश्यन्तु प्रदक्षिण पदे पदे ॥ श्रीमन्नारायण पूजनं परिपूर्णमस्तु ॥

## ॥ महालक्ष्मी पूजन ॥

**संकल्प:**–ॐ विष्णु.......मासोत्तमे मासे कार्तिकमासे कृष्णपक्षे पुण्याममावास्यायां तिथौ अमुक वासरे अमुकगोत्रोत्पन्न: अमुक नाम शर्मा(वर्मा,गुप्त:,दास:) अहं श्रुति स्मुतिपुराणोक्त फलावाप्तिकामनया ज्ञाताज्ञातकायिकवाचिकमानसिकसकलपापनिवृत्तिपूर्वकं स्थिरलक्ष्मी प्राप्तये

श्रीमहालक्ष्मीप्रीत्यर्थं महालक्ष्मीपूजनं कुबेरादीनां च पूजनं करिष्ये। तदङ्गत्वेन गौरीगणपत्यादि पूजनं च करिष्ये ॥(गणेश जी षोडश मातृका नवग्रह कलश पूजन पहले कर लें)

**ध्यानम्:**–या सा पद्मासनस्था विपुलकटितटी पद्मपत्रायताक्षी,
गम्भीरावर्तनाभिस्तनभरनमिता शुभ्रवस्त्रोत्तरीया ।
या लक्ष्मीर्दिव्यरूपैर्मणिगणखचितैः स्नापिता हेमकुम्भैः,
सा नित्यं पद्महस्ता मम वसतु गृहे सर्वमाङ्गल्ययुक्ता ॥१॥
अरुण कमल संस्था तद्रजः पुञ्जवर्णा,
कर युगल धृतेष्टा भीति युग्माम्बुजा च ।
मणि मय–मुकुटाढ्या–ऽलंकृता कल्पजालै,
र्भवतु भुवनमाता सन्ततं श्रीः श्रियै नः ॥२॥
पद्मासनां पद्मकरां पद्ममालाविभूषिताम् ।
क्षीरसागर संभूतां हेमवर्ण–समप्रभाम् ॥
क्षीरवर्णसमं–वस्त्रं–दधानां हरिवल्लभाम् ।
भावये भक्तियोगेन भार्गवीं कमलां शुभाम् ॥३॥

ॐहिरण्यवर्णां हरिणीं सुवर्ण रजतस्त्रजाम् । चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥ **ॐमहालक्ष्म्यै नमः । ध्यानार्थे पुष्पाणि समर्पयामि ॥**

**आवाहन:**–ॐतां मऽआवह जातवेदो लक्ष्मी मनपगामिनीम् । यस्यां हिरण्यं विन्देयङ्गामश्वं पुरुषानहम् ॥ सर्वलोकस्य जननीं सर्वसौख्यप्रदायिनीम् । सर्वदेवमयीमीशां देवीमावाहयाम्यहम् ॥ ॐमहालक्ष्म्यै नमः । महालक्ष्मीमावाहयामि, आवाहनार्थे पुष्पाणि समर्पयामि ॥

**आसन:**–ॐअश्वपूर्वां रथमध्यां हस्तिनाद प्रबोधिनीम् । श्रियं देवीमुपह्वये श्रीर्मा देवीर्जुषताम् ॥ तप्तकाञ्चनवर्णाभं मुक्तामणिविराजितम् । अमलं कमलं दिव्यमासनं प्रतिगृह्यताम् ॥ ॐमहालक्ष्म्यै नमः । आसनार्थे कमल पुष्पं समर्पयामि ॥

**पाद्यः**–ॐ कांसोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् । पद्मेस्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ॥ गङ्गादितीर्थसम्भूतं गन्धपुष्पादिभिर्युतम् । पाद्यं ददाम्यहं देवि गृहाणाशु नमोऽस्तु ते ॥ **ॐमहालक्ष्म्यै नमः । पादयोः पाद्यं समर्पयामि ॥**

**अर्घ्यः**–ॐ चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम् । तां पद्मनेमिं शरणमहं प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणोमि ॥ अष्टगन्धसमायुक्तं स्वर्णपात्रप्रपूरितम् । अर्घ्यं गृहाण मद्दत्तं महालक्ष्मि नमोऽस्तु ते ॥ **ॐमहालक्ष्म्यै नमः । हस्तयोरर्घ्यं समर्पयामि ॥**

**आचमनः**–ॐ आदित्यवर्णे तपसोधिजातो वनस्पतिस्तव वृक्षोऽथबिल्वः । तस्य फलानि तपसा नुदन्तु मायान्तरायाश्च बाह्याऽअलक्ष्मीः ॥ सर्वलोकस्य या शक्तिर्ब्रह्मविष्ण्वादिभिः स्तुता । ददाम्याचमनं तस्यै महालक्ष्म्यै मनोहरम् ॥ **ॐमहालक्ष्म्यै नमः । आचमनीयं जलं समर्पयामि ॥**

**स्नानः**–ॐवरुणस्योत्तंभनमसि व्वरुणस्यस्कं भसर्जनीस्त्थो व्वरुणस्यऋृत सदन्यसि व्वरुणऋृतसदनमसि व्वरुणस्य ऋृत सदनमासीद ॥ मन्दाकिन्याः समानीतैर्हेमाम्भोरुहवासितैः । स्नानं कुरुष्व देवेशि सलिलैश्च सुगन्धिभिः ॥ **ॐमहालक्ष्म्यै नमः । स्नानान्ते आचमनीयं जलं समर्पयामि ॥**

**दुग्धस्नानः**–ॐ पयः पृथिव्यां पयओषधीषु पयोदिव्यं तरिक्षेपयोधाः । पयस्वतीः प्रदिशः संतुमह्यम् ॥ काम धेनु समुत्पन्नं सर्वेषां जीवनं परम् । पावनं यज्ञहेतुश्च पयः स्नानार्थमर्पितम् ॥**ॐमहालक्ष्म्यै नमः** । पयः स्नानं समर्पयामि ॥ पयस्नानान्ते शुद्धोदक स्नानं समर्पयामि शुद्धोदकस्नानान्ते आचमनीयं समर्पयामि ॥

**दधिस्नानः**–ॐ दधिक्राव्णो अकारिषंजिष्णोरश्वस्य वाजिनः। सुरभिनो मुखाकरत्प्रणऽ आयू ᳬ षितारिषत्॥ पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम्। दध्यानीतं मया देव स्नानार्थं प्रतिगृह्यताम्॥ **ॐमहालक्ष्म्यै नमः**। दधिस्नानं समर्पयामि॥ दधिस्नानान्ते शुद्धोदक स्नानं समर्पयामि शुद्धोदकस्नानान्ते आचमनीयं समर्पयामि॥

**घृतस्नानः**–ॐ घृतं घृतपावानः पिवतवसां वसा पावानः पिबतांतरिक्षस्य हविरसि स्वाहा॥ दिशः प्रदिशऽआदिशो विदिश ऽ उद्दिशोदिग्भ्यः स्वाहा॥ नवनीतसमुत्पन्नं सर्वसंतोषकारकम्। घृतं तुभ्यं प्रदास्यामि स्नानार्थं प्रतिगृह्यताम्॥ **ॐमहालक्ष्म्यै नमः**। घृतस्नानं समर्पयामि। घृतस्नानान्ते शुद्धोदक स्नानं समर्पयामि शुद्धोदकस्नानान्ते आचमनीयं समर्पयामि॥

**मधुस्नानः**–ॐ मधुव्वाताऋृतायते मधुक्षरंति सिंधवः माध्वीर्नः सन्त्वोषधीः॥ मधुनक्तमुतोषसो मधुमत्पार्थिव ᳬ रजः। मधु द्यौरस्तु नः पिता॥ मधुमान्नो वनस्पतिर्मधुमाँ२ अस्तु सूर्ष्यः माध्वीर्गावो भवन्तु नः॥ तरुपुष्पसमुद्भूतं सुस्वादु मधुरं मधु। तेजःपुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम्॥ **ॐमहालक्ष्म्यै नमः**। मधुस्नानं समर्पयामि॥ मधुस्नानान्ते शुद्धोदक स्नानं समर्पयामि शुद्धोदकस्नानान्ते आचमनीयं समर्पयामि॥

**शर्करास्नानः**–ॐ अपाᳬ रसमुद्वय सᳬ सूर्येसंत ᳬ समाहितम्॥ अपाᳬ रसस्ययो रसस्तंवो गृह्णाम्युत्तममुपयाम गृहीतोसीन्द्रा यत्वा जुष्टं गृह्णाम्येष ते योनिरिंद्राय त्वा जुष्टतमम्॥ इक्षुसारसमुद्भूता शर्करा पुष्टिकारका। मलापहारिका दिव्या स्नानार्थं प्रतिगृह्यताम्॥**ॐमहालक्ष्म्यै नमः**। शर्करास्नानं समर्पयामि॥ शर्करास्नानान्ते शुद्धोदक स्नानं समर्पयामि शुद्धोदकस्नानान्ते आचमीयं समर्पयामि॥

**पञ्चमृतस्नान:**–ॐ पंचनद्य: सरस्वती मपियंति सस्रोतस: । सरस्वतीतु पंचधासो देशे भवत्सरित् ॥ पयो दधि घृतं चैव मधु च शर्करायुतम् । पञ्चामृतं मयाऽऽनीतं स्नानार्थं प्रतिगृह्यताम् ॥ **ॐमहालक्ष्म्यै नमः** । पञ्चामृतस्नानं समर्पयामि ॥

**गन्धोदकस्नान:**–ॐ अꣳशुना ते अꣳशु: पृच्यतां परुषा परु: । गन्धस्ते सोममवतु मदाय रसो अच्युत: ॥ मलयाचल सम्भूतं चन्दनेन विमिश्रितम् । इदं गन्धोदकस्नानं कुङ्कुमाक्तं नु गृह्यताम् ॥ **ॐमहालक्ष्म्यै नमः** । गन्धोदकस्नानं समर्पयामि ॥

**शुद्धोदकस्नान:**–ॐशुद्धवाल: सर्वशुद्धवालो मणि बालस्तऽआश्विना: श्वेत: श्वेताक्षोरुणस्ते रुद्राय पशुपतये कर्ण्णायामाऽअवलिप्ता रौद्रानभोरूपा: पार्ज्जन्या: ॥ **ॐमहालक्ष्म्यै नमः** । शुद्धोदकस्नानं समर्पयामि ॥ शुद्धोदकस्नानान्ते आचमनीयं समर्पयामि ॥ सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि ॥

**॥ श्री सूक्तम् अभिषेकं कुर्यात् ॥**

**ॐहिरण्यवर्णां हरिणीं सुवर्ण रजतस्रजाम् । चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥१॥ ॐ तांमऽआवह जातवेदो लक्ष्मी मनपगामिनीम् । यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥२॥ ॐ अश्वपूर्वां रथमध्यां हस्तिनाद प्रबोधिनीम् । श्रियं देवीमुपह्वये श्रीर्मा देवीर्जुषताम् ॥३॥ ॐ कांसोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् । पद्मेस्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ॥४॥ ॐ चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम् । तां पद्मनेमिं शरणमहं प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणोमि ॥५॥ ॐआदित्यवर्णे तपसोधिजातो वनस्पतिस्तव वृक्षोऽथबिल्व: । तस्य फलानि तपसा नुदन्तु मायान्तरायाश्च बाह्याऽअलक्ष्मी: ॥६॥ ॐ उपैतु मां देवसख: कीर्तिश्च मणिना सह । प्रादुर्भूतोस्मि राष्ट्रेऽस्मिन् कीर्तिं वृद्धिं ददातु मे ॥७॥ ॐ क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं**

नाशयाम्यहम् । अभूतिमसमृद्धिंच सर्वान्निर्णुद मे गृहात् ॥८॥ ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टाङ्करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोपह्वयेश्रियम् ॥९॥ ॐ मनसः काममाकूतिं वाचः सत्यमशीमहि । पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥१०॥ ॐ कर्दमेन प्रजा भूता मयि सम्भव कर्दम । श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥११॥ ॐ आपःस्रजन्तु स्निग्धानि चिक्लीत वस मे गृहे । निच देवीं मातरं श्रियं वासय मे कुले ॥१२॥ ॐआर्द्रां यः करिणीं यष्टीं सुवर्णां हेममालिनीम् । सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥१३॥ ॐआर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीं । चन्द्रां हिरण्मयींलक्ष्मींजातवेदो म आवह ॥१४॥ ॐ तांमऽआवह जातवेदो लक्ष्मीमनपगामिनीम् । यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान्विन्देयं पुरुषानहम् ॥१५॥ अभिषेकं समर्पयामि ॥

**शुद्धोदकस्नानः**-ॐशुद्धवालः सर्वशुद्धवालो मणि बालस्तऽ आश्विनाः श्वेतः श्वेताक्षोरुणस्ते रुद्राय पशुपतये कर्ण्णयामाऽअवलिप्ता रौद्रानभोरूपाः पार्ज्जन्याः ॥ **ॐमहालक्ष्म्यै नमः** । शुद्धोदकस्नानं समर्पयामि ॥ शुद्धोदकस्नानान्ते आचमनीयं समर्पयामि ॥

**वस्त्रः**-ॐउपैतु मां देवसखः कीर्तिश्च मणिना सह । प्रादुर्भूतोस्मि राष्ट्रेस्मिन् कीर्तिं वृद्धिं ददातु मे ॥ दिव्याम्बरं नूतनं हि क्षौमं त्वतिमनोहरम् । दीयमानं मया देवि गृहाण जगदम्बिके ॥ **ॐमहालक्ष्म्यै नमः** । वस्त्रं समर्पयामि ॥ आचमनीयं जलं च समर्पयामि ॥

**उपवस्त्रः**- कञ्चुकी मुपवस्त्रं च नानारत्नैः समन्वितम् । गृहाण त्वं मया दत्तं मङ्गले जगदीश्वरि ॥



**पुष्पमाला:**–ॐ मनसः काममाकूतिं वाचः सत्यमशीमहि । पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः॥ माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो । मयानीतानि पुष्पाणि गृहाण परमेश्वरि॥ **ॐमहालक्ष्म्यै नमः** । पुष्पं पुष्पमालां च समर्पयामि॥

(गन्ध अक्षत पुष्प लेकर अङ्गपूजन करें)

**अङ्गपूजा:**–ॐचपलायै नमः, पादौ पूजयामि । ॐचञ्चलायै नमः, जानुनी पूजयामि । ॐकमलायै नमः, कटिं पूजयामि । ॐकात्यायिन्यै नमः, नाभिं पूजयामि । ॐजगन्मात्रे नमः, जठरं पूजयामि । ॐ विश्ववल्लभायै नमः, वक्षः स्थलं पूजयामि । ॐ कमलवासिन्यै नमः, हस्तौ पूजयामि । ॐपद्माननायै नमः, मुखं पूजयामि । ॐकमलपत्राक्ष्यै नमः, नेत्रत्रयं पूजयामि । ॐ श्रियै नमः, शिरः पूजयामि ।

ॐमहालक्ष्म्यै नमः, सर्वाङ्गं पूजयामि॥

(लक्ष्मीजी के पास गन्ध अक्षतपुष्प छोडे)

**अष्टसिद्धिपूजनम्:**–१–ॐअणिम्ने नमः(पूर्वे), २–ॐमहिम्ने नमः (अग्निकोणे), ३–ॐगरिम्णे नमः (दक्षिणे), ४–ॐलघिम्ने नमः(नैर्ऋत्ये), ५–ॐप्राप्त्यैनमः (पश्चिमे), ६–ॐप्राकाम्यै नमः (वायव्ये), ७–ॐईशितायै नमः (उत्तरे), ८–ॐवशितायै नमः (ऐशान्याम्)॥

**अष्टलक्ष्मीपूजनम्:**–१–ॐआद्यलक्ष्म्यै नमः ।२–ॐविद्यालक्ष्म्यै नमः । ३–ॐसौभाग्यलक्ष्म्यै नमः । ४–ॐअमृतलक्ष्म्यै नमः । ५–ॐकामलक्ष्म्यै नमः । ६–ॐसत्यलक्ष्म्यै नमः । ७–ॐभोगलक्ष्म्यै नमः । ८–ॐयोगलक्ष्म्यै नमः॥

**धूप:**–ॐ कर्दमेन प्रजा भूता मयि सम्भव कर्दम । श्रियं वासय मे कुले मातरं पद्ममालिनीम्॥ वनस्पति रसोद्भूतो गन्धाढ्यो गन्ध उत्तमः । आघ्रेयः सर्व देवानाम् धूपोऽयं प्रतिगृह्यताम्॥ **ॐमहालक्ष्म्यै नमः** । धूपमाघ्रापयामि॥

**दीप:**–ॐ आप: स्रजन्तु स्निग्धानि चिक्लीत वस मे गृहे । निच देवीं मातरं श्रियं वासय मे कुले ॥ साज्यं चवर्ति संयुक्तं वह्निना योजितं मया । दीपं गृहाण देवेश त्रैलोक्य तिमिरापहम् ॥ **ॐमहालक्ष्म्यै नम:** । दीपं दर्शयामि ॥ हस्तौ प्रक्षाल्य ॥

**नैवेद्य:**–ॐ आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीं । चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥ नैवेद्यं गृह्यतां देवि भक्ष्यभोज्यसमन्वितम् । षड्रसैरन्वितं दिव्यं लक्ष्मि देवि नमोऽस्तुते ॥ **ॐमहालक्ष्म्यै नम:** । नैवेद्यं निवेदयामि मध्ये पानीयं जलं समर्पयामि, आचमनीयं जलं समर्पयामि, उत्तरापोषणार्थे हस्त प्रक्षालनं, मुखप्रक्षालनं आचमनीयं जलं समर्पयामि ॥

**ऋतुफल:**– फलेन फलितं सर्वं त्रैलोक्यं सचराचरम् । तस्मात् फलप्रदानेन पूर्णा: सन्तु मनोरथा: ॥ **ॐमहालक्ष्म्यै नम:** । अखण्डऋतुफलं समर्पयामि ॥ आचमनीयं जलं च समर्पयामि ॥

**ताम्बूल-पूगीफल:**–ॐआर्द्रां य: करिणीं यष्टीं सुवर्णां हेममालिनीम् । सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥ पूगीफलं महद्दिव्यम् नागवल्ली दलैर्युतम् । एला चूर्णादि संयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥ **ॐमहालक्ष्म्यै नम:** । मुखवासार्थे ताम्बूलं समर्पयामि ॥

**दक्षिणा:**–ॐ तांमऽआवह जातवेदो लक्ष्मीमनपगामिनीम् । यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान्विन्देयं पुरुषानहम् ॥ ॐ हिरण्यगर्भ: समवर्त्तताग्रे भूतस्य जात: पतिरेक आसीत् । स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥ **ॐमहालक्ष्म्यै नम:** । दक्षिणां समर्पयामि ॥

**श्रीफल:**–ॐ श्रीश्चते लक्ष्मीश्चपत्क्यग्रा बहोरात्रे पार्श्वे नक्षत्राणिरूपमश्विनौ ऽव्यात्तम् । इष्णन्निषाणा मुम्मऽइषाण सर्वलोकम्मऽइषाण ॥ **ॐमहालक्ष्म्यै नम:** । श्रीफलं समर्पयामि ॥ **प्रार्थना:**–सुरासुरेन्द्रादिकिरीट मौक्तिकै–

युक्तं सदा यत्तव पादपङ्कजम् ।
परावरं पातु वरं सुमङ्गलं,
नमामि भक्त्या खिलकामसिद्धये ॥
भवानि त्वं महालक्ष्मीः सर्वकामप्रदायिनी ।
सुपूजिता प्रसन्ना स्यान्महालक्ष्मि नमोऽस्तुते ॥
नमस्ते सर्वदेवानां वरदासि हरिप्रिये ।
या गतिस्त्वत्प्रपन्नानां सा मे भूयात् त्वदर्चनात् ॥
**कृतेनानेन पूजनेन भगवती महालक्ष्मीदेवी प्रीयताम् न मम ॥**

## ॥ देहली विनायक पूजन ॥

(स्वस्तिक चिह्न शुभ लाभ आदि का पूजन करें)
ॐदेहलीविनायकाय नमः ॥ संपूज्य ॥

## ॥ श्रीमहाकाली (दवात)पूजन ॥

ॐश्रीमहाकाल्यै नमः ॥ **संपूज्य** ॥
**प्रार्थना**:-कालिके त्वं जगन्मातर्मसिरूपेण वर्तसे ।
उत्पन्ना त्वं च लोकानां व्यवहारप्रसिद्धये ॥
या कालिका रोगहरा सुवन्द्या भक्तैः समस्तैर्व्यवहारदक्षैः ।
जनैर्जनानां भयहारिणी च सा लोकमाता मम सौख्यदास्तु ॥

## ॥ लेखिनी पूजन ॥

ॐलेखिनीस्थायै देव्यै नमः ॥ **संपूज्य** ॥
(मौली बाँधकर गन्धाक्षतपुष्प से पूजन कर दें)
**प्रार्थना**:-लेखिनी निर्मिता पूर्वं ब्रह्मणा परमेष्ठिना ।
लोकानां च हितार्थाय तस्मात्तां पूजयाम्यहम् ॥
शास्त्राणां व्यवहाराणां विद्यानामाप्नुयाद्यतः ।
अतस्त्वां पूजयिष्यामि मम हस्ते स्थिरा भव ॥

## सरस्वती (बही खाता)पूजन ॥

**ध्यानम्ः**-शुक्लां ब्रह्मविचारसार परमा माद्यां जगद्व्यापिनीं,
वीणा पुस्तकधारिणीमभयदां जाड्यांधकारापहाम् ॥
हस्ते स्फाटिक मालिकां विदधतीं पद्मासने संस्थितां,
वंदे तां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम् ॥१॥
या कुन्देन्दु तुषारहारधवला या शुभ्रवस्त्रावृता,
या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना ।
या ब्रह्माच्युतशङ्करप्रभृतिभिर्देवैः सदा वन्दिता,
सा मां पातु सरस्वती भगवती निःशेषजाडयापहा ॥२॥
आरूढा श्वेतहंसे भ्रमति च गगने दक्षिणे चाक्षसूत्रम्,
वामेहस्ते च दिव्याम्बर कनकमयं पुस्तकं ज्ञानगम्यम् ॥
स्वां वीणां वादयंती स्वकरकरजपैः शास्त्रविज्ञान शब्दैः,
क्रीडंती दिव्यरूपा करकमलधरा भारती सुप्रसन्ना ॥३॥
वाणीं पूर्णनिशाकरोज्ज्वलमुखीं कर्पूरकुन्दप्रभां,
चन्द्रार्धाङ्कित मस्तकां सुतिलकां सम्बिभ्रतीमादरात् ।
वीणामक्षगुणं सुधाढयकलशं विद्यां च तुङ्गस्तनीं,
दिव्यैराभरणैर्विभूषिततनुं हंसाधिरूढां भजे ॥४॥

ॐवीणापुस्तकधारिण्यै श्री सरस्वत्यै नमः । सर्वोपचारार्थे गंधाक्षत पुष्पाणि समर्पयामि ॥

## ॥ कुबेरपूजन ॥

(तिजोरी में सिन्दूर से स्वस्तिक बनाकर पूजन करें)

ॐ वयꣳ सोमव्रते तव मनस्तनूषु बिभ्रतः । प्रजावन्तः सचेमहि ॥ आवाहयामि देव त्वामिहायाहि कृपां कुरु । कोशं वर्द्धय नित्यं त्वं परिरक्ष सुरेश्वर ॥ कुबेर इहागच्छ इहतिष्ठ **कुबेराय नमः** कुबेरमावाहयामि स्थापयामि ॥ सर्वोपचारार्थे गंधाक्षत पुष्पाणि समर्पयामि ॥ (गल्ले में पाँच हल्दी की गांठ, पाँच कमल गट्टे सुखे सिगाड़े, साबत धनिया, मूँगसाबत, एक सिक्का इत्यादि डाल दें)

**प्रार्थना:**–धनदाय नमस्तुभ्यं निधिपद्माधिपाय च । भगवन् त्वत्प्रसादेन धनधान्यादिसम्पद:॥ वज्रहस्त: पुरन्दर: धनाध्यक्षश्च यक्षराट् । मम पूजां प्रगृह्णातु कुबेरो नरवाहन:॥

## ॥ तुला तथा मान–पूजन ॥

(तराजू में स्वस्तिक बनाकर व मौली बाँधकर पूजन करें)

**ध्यानम्:**– नमस्ते सर्वदेवानां शक्तितत्वे सत्यमाश्रिता ।
साक्षीभूता जगद्धात्री निर्मिता विश्वयोनिना ॥

**ॐतुलाधिष्ठातृदेवतायै नम:**॥ सर्वोपचारार्थे गंधाक्षत पुष्पाणि समर्पयामि ॥

## दीपमालिका (दीपक) पूजन ॥

(किसी पात्र में सोलह दीपकों को प्रज्वलित कर पूजन करें)

ॐदीपावल्यै नम: । सर्वोपचारार्थे गंधाक्षत पुष्पाणि समर्पयामि ॥

**प्रार्थना:**–त्वं ज्योतिस्त्वं रविश्चन्द्रो विद्युदग्निश्च तारका: । सर्वेषां ज्योतिषां ज्योतिर्दीपावल्यै नमो नम:॥

## ॥ श्री लक्ष्मीजी की आरती ॥

ॐजय लक्ष्मी माता (मैया) जय लक्ष्मी माता ।
तुमको निसिदिन सेवत, हर विष्णु धाता ॥ ॐ ॥
उमा, रमा, ब्रह्माणी, तुम ही जग माता ।
सूर्य–चन्द्रमा ध्यावत, नारद ऋषि गाता ॥ ॐ ॥
दुर्गारूप निरञ्जनी, सुख–सम्पति दाता ।
जो कोई तुमको ध्यावत, ऋद्धि–सिद्धि धन पाता ॥ ॐ ॥
तुम पाताल निवासिनी, तुम ही शुभ दाता ।
कर्म प्रभाव प्रकाशिनी, भवनिधि की त्राता ॥ ॐ ॥
जिस घर तुम रहती, तहँ सब सद्गुण आता ।
सब सम्भव हो जाता, मन नहिं घबराता ॥ ॐ ॥
तुम बिन यज्ञ न होवे, वस्त्र न होय राता ।

खान–पान को वैभव सब तुमसे आता ॥ ॐ ॥
शुभ–गुण–मन्दिर सुन्दर, क्षीरनिधि जाता ।
रत्न चतुर्दश तुम बिन, कोई नहिं पाता ॥ ॐ ॥
श्री महालक्ष्मी (जी) की आरती, जो कोई नर गाता ।
उर आनन्द समाता, पाप उतर जाता ॥ ॐ ॥

**मन्त्र–पुष्पाञ्जलिः**–ॐयज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् । ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः॥ ॐराजाधिराजाय प्रसह्य साहिने नमो वयं वैश्रवणाय कुर्महे । स मे कामान् कामकामाय मह्यं कामेश्वरो वैश्रवणो ददातु॥ कुबेराय वैश्रवणाय महाराजाय नमः । ॐस्वस्ति साम्राज्यं भोज्यं स्वाराज्यं वैराज्यं पारमेष्ठयं राज्यं महाराज्यमाधिपत्यमयं समन्तपर्यायी स्यात् सार्वभौमः सार्वायुषान्तादापरार्धात् पृथिव्यै समुद्रपर्यन्ताया एकराडिति तदप्येष श्लोकोऽभिगीतो मरुतः परिवेष्टारो मरुत्तस्यावसन् गृहे । आविक्षितस्य कामप्रेर्विश्वेदेवाः सभासद इति ॥

ॐविश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात् । संबाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन् देव एकः ॥
ॐ महालक्ष्म्यै च विद्महे विष्णुपत्न्यै च धीमहि तन्नो लक्ष्मीः प्रचोदयात् । पुष्पाञ्जलिं समर्पयामि ॥ प्रार्थना पूर्वकं नमस्कारान् समर्पयामि ॥

## ॥ वैदिक शिव पूजनम् ॥

(सर्वप्रथम शिवपूजन तथा रुद्राभिषेक की अधिकारप्राप्ति के लिये प्रायश्चित्तरूप में गोनिष्क्रय या गोतृण दान का सङ्कल्प करें)

**अधिकारप्राप्त्यर्थ प्रायश्चित्त संकल्पः**–विष्णुर्विष्णुर्विष्णुः अद्य. ...गोत्रः.....शर्मा/वर्मा/गुप्तोहं क्रियमाणरुद्राभिषेक कर्मणि अधिकारप्राप्त्यर्थं कायिक वाचिक मानसिक सांसर्गिक

चतुर्विधपापशमनार्थं शरीरशुद्ध्यर्थं च गोनिष्क्रयद्रव्यं अमुकगोत्राय अमुकशर्मणे आचार्याय भवते सम्प्रददे ॥

निम्न मंत्र से प्रत्यक्ष गौ की भावना कर प्रार्थना करे ॥

गोप्रार्थना:-गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश । यस्मात्तस्माच्छिवं मे स्यादिहलोके परत्र च ॥

**हस्ते साक्षत जलं गृहीत्वा सङ्कल्पं पठेत्** ॥ ॐ विष्णुर्विष्णुर्विष्णुः श्री मद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य अद्य श्री ब्रह्मणो द्वितीये परार्धे श्रीश्वेतवाराहकल्पे सप्तमे वैवस्वत मन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे भारतवर्षे कौमारिका क्षेत्रे जम्बूद्वीपे श्रीशालिवाहनशके अस्मिन्वर्तमाने अमुकनामसंवत्सरे अमुकायने अमुकऋतौ अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकनक्षत्रे अमुकराशिस्थिते चन्द्रे अमुकराशिस्थिते श्रीसूर्ये अमुकराशिस्थिते देवगुरौ शेषेषु ग्रहेषु यथायथं राशिस्थानस्थितेषु सत्सु एवं गुणविशेषण विशिष्टायां शुभपुण्यतिथौ अमुकगोत्रोत्पन्नोहं अमुकशर्मा-गुप्ता-वर्माऽहं ममात्मनः श्रुतिस्मृति पुराणोक्त फलप्राप्त्यर्थं ऐश्वर्याभिवृद्ध्यर्थं अप्राप्तलक्ष्मीप्राप्त्यर्थं प्राप्तलक्ष्म्याश्चिरकालसंरक्षणार्थं सकलमनईप्सित- कामनासंसिद्ध्यर्थं लोके सभायां राज्यद्वारे वा सर्वत्र यशो विजयलाभादि प्राप्त्यर्थं इह जन्मनि जन्मान्तरे वा सकलदुरितोपशमनार्थं मम सभार्यस्य सपुत्रस्य सबान्धवस्य अखिल कुटुम्ब सहितस्य सपशोः समस्तभयव्याधि जरापीडामृत्युपरिहारद्वारा आयुरारोग्यैश्वर्याभिवृद्ध्यर्थं मम जन्मराशेः सकाशाद्ये केचिद्विरुद्ध चतुर्थाष्टमद्वादशस्थान स्थितक्रूरग्रहास्तैः सूचितं सूच्ययिष्यमाणं च यत्सर्वारिष्टं तद्विनाशद्वारा एकादशस्थानस्थितवच्छुभफलप्राप्त्यर्थं आदित्यादि नवग्रहानुकूलतासिद्ध्यर्थं पुत्रपौत्रादिसन्ततेरविच्छिन्नवृद्ध्यर्थं इन्द्रादि दशदिक्पाल प्रसन्नता सिद्ध्यर्थं आधिदैविकाऽऽधिभौतिकाऽऽध्यात्मिक

त्रिविधतापोपशमनार्थं धर्मार्थकाममोक्षसिद्धिद्वारा सर्वव्याधि निरासनपूर्वकं सर्वाभीष्टसिद्धयर्थं श्रीनर्मदेश्वर लिङ्गपूजनमहं करिष्ये ॥तदंगत्वेन गणपत्यादि अम्बिकानन्दीश्वर वीरभद्रस्वामिकार्तिककुबेरकीर्तिमुखपूजनञ्च करिष्ये ॥

वक्रतुण्ड महाकाय कोटि सूर्य समप्रभ । निर्विघ्नं कुरु मे देव सर्व कार्येषु सर्वदा ॥

## ॥ गणपति–पूजनम् ॥

ॐ गणानांत्वा गणपति ठँ हवामहे प्रियाणां त्वा प्रियपतिठँ हवामहे निधीनां त्वा निधिपति ठँ हवामहे वसो मम । आहमजानि गर्ब्भधमा त्वमजासिगर्ब्भधम् ॥

ॐनमो गणेब्भ्यो गणपतिब्भ्यश्चवो नमोनमो व्व्रातेब्भ्यो व्व्रातपतिब्भ्यश्चवो नमोनमो गृत्सेब्भ्यो गृत्सपतिंब्भ्यश्चवो नमोनमो व्विरूपेब्भ्यो व्विश्वरूपेब्भ्यश्चवो नमोनमः ॥

ध्यानान्ते अक्षतपुष्पाणि समर्पयामि ॥ **षोडशोपचारैः पूजयेत्**॥

## ॥ जगदम्बा–पूजनम् ॥

ॐ अम्बे अम्बिकेऽम्बालिके न मा नयति कश्चन । ससस्त्यश्वकः सुभद्रिकां काम्पील वासिनीम् ॥ हिमाद्रितनयां देवीं वरदां भैरव प्रियां । लम्बोदरस्य जननीं गौरीमावाहयाम्यहम् ॥

ध्यानान्ते अक्षतपुष्पाणि समर्पयामि ॥ **षोडशोपचारैः पूजयेत्**॥

## ॥ नन्दीश्वर–पूजनम् ॥

ॐआशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम् । सङ्क्रन्दनो निमिषऽ एकवीरः शत ठं सेनाऽअजयत्साकमिन्द्रः॥ ॐआयङ्गौः पृश्निरक्रमीदसदन् मातरं पुरः । पितरं च प्रयन्त्स्वः ॥ ध्यानान्ते अक्षतपुष्पाणि समर्पयामि ॥ **षोडशोपचारैर्नंदीश्वरं पूजयेत्**॥ ततः प्रार्थना ॥

(पूजन करके नीचे लिखी प्रार्थना करे)

**प्रार्थना:**–ॐप्रैतु व्वाजी कनिक्रदन्नानदद्रासभ: पत्त्वा । भरन्नग्निं पुरीष्यं मा पाद्यायुष: पुरा ॥

## ॥ ततो वीरभद्र–पूजनम् ॥

ॐभद्रं कर्णेभि: शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्रा: । स्थिरैरङ्गैस्तुष्टुवाꣳस स्तनूभिर्व्यशेमहि देवहितं यदायु: ॥
**षोडशोपचारैर्वीरभद्रं पूजयेत्** ॥ तत: प्रार्थना ॥
(पूजन करके नीचे लिखी प्रार्थना करे)
**प्रार्थना:**–ॐभद्रोनोऽ अग्निराहुतो भद्रारातिः सुभग भद्रो अध्वर: । भद्रा उतप्रशस्तय: ॥

## ॥ तत: स्वामिकार्तिक–पूजनम् ॥

**ध्यानम्:**–ॐयदक्रंद: प्रथमं जायमान ऽ उद्यन्त्समुद्रादुत वा पुरीषात् । श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं महि जातं तेऽऽ अर्वन् ॥ **षोडशोपचारै: स्वामिकार्तिकं पूजयेत्** ॥
तत: प्रार्थना ॥ (पूजन करके नीचे लिखी प्रार्थना करे)
**प्रार्थना:**–ॐ यत्र बाणा: सम्पतन्ति कुमारा व्विशिखा इव । तन्नऽ इन्द्रो बृहस्पतिरदिति: शर्म्म यच्छतु व्विश्वाहा शर्म यच्छतु ॥

## ॥ तत: कुबेरपूजनम् ॥

ॐ कुविदङ्ग यवमन्तो यव च्चिद्यथा दान्त्यनुपूर्वं व्वियूय । इहेहैषां कृणुहि भोजनानि ये बर्हिषो नमऽ उक्तिँ यजन्ति ॥
**षोडशोपचारै: कुबेरं पूजयेत्** ॥ तत: प्रार्थना ॥
(पूजन करके नीचे लिखी प्रार्थना करे)
**प्रार्थना:**–ॐव्वय ꣳ सोमव्रते तवमनस्तनूषुबिभ्रत: प्रजावन्त: सचेमहि ॥ इति कुबेरं प्रार्थयेत् ॥

## ॥ ततः कीर्तिमुख पूजनम् ॥

ॐअसवे स्वाहा व्वसवे स्वाहा व्विभुवे स्वाहा व्विवस्वते स्वाहा गणश्रिये स्वाहा गणपतये स्वाहाभिभुवे स्वाहाधिपतये स्वाहा शूषाय स्वाहा सर्ठ्ठं सर्पाय स्वाहा चन्द्राय स्वाहा ज्योतिषे स्वाहा मलिम्लुचाय स्वाहा दिवा पतये स्वाहा ॥ **षोडशोपचारैः कीर्तिमुखं पूजयेत्** ॥ ततः प्रार्थना ॥

(पूजन करके नीचे लिखी प्रार्थना करे)

ॐओजश्चमे सहश्चमऽ आत्माचमे तनूश्चमे शर्मचमे वर्मचमेङ्गानिचमेस्थीनिचमे परूर्ठ्ठं षिचमे शरीराणिचमऽ आयुश्चमेजराचमे यज्ञेनकल्पन्ताम् ॥ इति कीर्तिमुखं प्रार्थयेत्॥

## ॥ शिव पूजनम् ॥

**ध्यानम्**:-ॐध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं,

रत्नाकल्पोज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम् ।

पद्मासीनं समन्तात् स्तुतममरगणैर्व्याघ्र कृत्तिं वसानम्

विश्वाद्यं विश्ववन्द्यं निखिल भयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥

ॐनमस्ते रुद्रमन्यवऽ उतोतऽइषवे नमः । बाहुभ्यामुतते नमः॥ ॐ भूर्भुवः स्वः नर्मदेश्वराय नमः ॥ ध्यानार्थे अक्षतपुष्पाणि समर्पयामि ॥

**आसनः**-ॐ यातेरुद्रशिवा तनूरघोरा पापकाशिनी । तया नस्तन्वाशं तमयागिरिशन्ताभिचा कशीहि ॥ ॐ भूर्भुवः स्वः भगवते श्री नर्मदेश्वराय नमः ॥ पुष्पासनं समर्पयामि ॥

**पाद्यम्**:-यामिषुङ्गिरिशन्त हस्तेबिभर्ष्यस्तवे ॥ शिवाङ्गिरि त्रताङ्कुरुमाहि र्ठ सीः पुरुषञ्जगत् ॥ ॐ भूर्भुवः स्वः भगवते श्री नर्मदेश्वराय नमः । पाद्यं समर्पयामि ॥

**अर्घः**-ॐशिवेनव्वचसात्वा गिरिशाच्छा व्वदामसि ॥ यथानः सर्व्वमिज्जगदयक्ष्म र्ठ सुमनाऽ असत् ॥ ॐ भूर्भुवः स्वः भगवते श्री नर्मदेश्वराय नमः ।अर्घ्यं समर्पयामि ॥

**आचमनम्**:–ॐअद्धयवोचदधिवक्ताप्प्रथमो दैव्योभिषक् ॥ अहींश्च सर्व्वाञ्जम्भयन्त्सर्व्वाश्चयातु धान्योधराची: परासुव ॥ ॐ भूर्भुव: स्व: भगवते श्री नर्मदेश्वराय नम: । आचमनं समर्पयामि ॥

**स्नानम्**:–असौयस्ताम्रोऽअरुणऽउतबब्भ्रु: सुमङ्गल: ॥ येचैन ठं रुद्राऽअभितोदिक्षुश्श्रिता: सहस्रशो व्वैषाठं हेडऽईमहे ॥ ॐवरुणस्योत्तं भनमसि व्वरुणस्यस्कं भसर्जनीस्त्थो व्वरुणस्यऋृत सदन्यसि व्वरुणऋृतसदनमसि व्वरुणस्य ऋृत सदनमासीद ॥ ॐ भूर्भुव: स्व: भगवते श्री नर्मदेश्वराय नम: । स्नानं समर्पयामि ॥

**पय: स्नानम्**:–ॐ पय:पृथिव्यां पयओषधीषु पयोदिव्यं तरिक्षेपयोधा: । पयस्वती: प्रदिश: संतुमह्यम् ॥ काम धेनु समुत्पन्नं सर्वेषां जीवनं परम् । पावनं यज्ञहेतुश्च पय: स्नानार्थमर्पितम्॥ ॐ भूर्भुव: स्व: भगवते श्री नर्मदेश्वराय नम: । पय: स्नानं समर्पयामि ॥ पयस्नानान्ते शुद्धोदक स्नानं समर्पयामि शुद्धोदकस्नानान्ते आचमनीयं समर्पयामि ॥

**दधिस्नानम्**:–ॐदधिक्राव्णो अकारिषंजिष्णोरश्वस्य वाजिन: । सुरभिनो मुखाकरत्प्रणऽ आयू ठं षितारिषत् ॥ पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम् । दध्यानीतं मया देव स्नानार्थं प्रतिगृह्यताम् ॥ ॐ भूर्भुव: स्व: भगवते श्री नर्मदेश्वराय नम: दधिस्नानं समर्पयामि ॥ दधिस्नानान्ते शुद्धोदक स्नानं समर्पयामि शुद्धोदकस्नानान्ते आचमनीयं समर्पयामि ॥

**घृतस्नानम्**:–ॐ घृतं घृतपावान: पिवतवसां वसा पावान: पिबतांतरिक्षस्य हविरसि स्वाहा ॥ दिश: प्रदिशऽआदिशो विदिश ऽ उद्दिशोदिग्भ्य: स्वाहा ॥ नवनीतसमुत्पन्नं सर्वसंतोषकारकम् । घृतं तुभ्यं प्रदास्यामि स्नानार्थं प्रतिगृह्यताम् ॥ ॐ भूर्भुव: स्व: भगवते श्री नर्मदेश्वराय नम: । घृतस्नानं समर्पयामि । घृतस्नानान्ते

शुद्धोदक स्नानं समर्पयामि शुद्धोदकस्नानान्ते आचमनीयं समर्पयामि ॥

**मधुस्नानम्ः**–ॐमधुव्वाताऋृतायते मधुक्षरंति सिंधवः माध्वीर्नः सन्त्वोषधीः ॥ मधुनक्तमुतोषसो मधुमत्पार्थिव थ्ठं रजः । मधु द्यौरस्तु नः पिता ॥ मधुमान्नो वनस्पतिर्मधुमाँ२ अस्तु सूर्यः माध्वीर्गावो भवन्तु नः ॥ तरुपुष्पसमुद्भूतं सुस्वादु मधुरं मधु । तेजः पुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम् ॥ ॐ भूर्भुवः स्वः भगवते श्री नर्मदेश्वराय नमः । मधुस्नानं समर्पयामि ॥ मधुस्नानान्ते शुद्धोदक स्नानं समर्पयामि शुद्धोदकस्नानान्ते आचमनीयं समर्पयामि ॥

**शर्करास्नानम्ः**–ॐ अपाथ्ठं रसमुद्वय सथ्ठं सूर्येसंत थ्ठं समाहितम् ॥ अपा थ्ठं रसस्ययो रसस्तंवो गृह्णाम्युत्तममुपयाम गृहीतोसीन्द्रा यत्वाजुष्टं गृह्णाम्येष ते योनिरिंद्राय त्वा जुष्टतमम् ॥ इक्षुसारसमुद्भूता शर्करा पुष्टिकारिका । मलापहारिका दिव्या स्नानार्थं प्रतिगृह्यताम ॥ ॐ भूर्भुवः स्वः भगवते श्री नर्मदेश्वराय नमः । शर्करास्नानं समर्पयामि ॥ शर्करास्नानान्ते शुद्धोदक स्नानं समर्पयामि शुद्धोदकस्नानान्ते आचमीयं समर्पयामि ॥

**पञ्चामृतस्नानम्ः**–ॐ पंचनद्यः सरस्वती मपियंति सस्त्रोतसः । सरस्वतीतु पंचधासो देशे भवत्सरित् ॥ पयो दधि घृतं चैव मधु च शर्करायुतम् । पञ्चामृतं मयाऽऽनीतं स्नानार्थं प्रतिगृह्यताम् ॥ ॐ भूर्भुवः स्वः भगवते श्री नर्मदेश्वराय नमः । पञ्चामृतस्नानं समर्पयामि ॥

**गन्धोदकस्नानम्ः**–ॐ अथ्ठं शुनाते अथ्ठं शुः पृच्यतां परुषा परुः । गन्धस्ते सोममवतु मदाय रसो अच्युतः ॥ मलयाचल सम्भूतं चन्दनेन विमिश्रितम् । इदं गन्धोदकस्नानं कुङ्कुमाक्तं नु गृह्यताम्

॥ ॐ भूर्भुवः स्वः भगवते श्री नर्मदेश्वराय नमः । गन्धोदकस्नानं समर्पयामि ॥

**उद्वर्तनस्नानम्**:- ॐ गन्धर्वस्त्वा विश्वावसुः परिदधातु विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिडऽईडितः ॥ ॐ अꣳशुना ते अꣳशुः पृच्यतां परुषा परुः । गन्धस्ते सोममवतु मदाय रसो अच्युतः ॥ ॐ भूर्भुवः स्वः भगवते श्री नर्मदेश्वराय नमः । उद्वर्तनस्नानं समर्पयामि ॥

**विजयास्नानम्**:- ॐव्विज्ज्यन्धनुः कपर्दिनो व्विशल्योबाणवाँ २॥ ऽउत ॥ अनेशन्नस्ययाऽ इषवऽ आभुरस्यनिषङ्गधिः ॥ ॐ भूर्भुवः स्वः भगवते श्री नर्मदेश्वराय नमः । विजयास्नानं समर्पयामि ॥

**शुद्धोदकस्नान**:- ॐशुद्धवालः सर्वशुद्धवालो मणि बालस्तऽआश्विनाः श्वेतः श्वेताक्षोरुणस्ते रुद्राय पशुपतये कर्ण्णायामाऽअवलिप्ता रौद्रानभोरूपाः पार्ज्जन्याः ॥ ॐ भूर्भुवः स्वः भगवते श्री नर्मदेश्वराय नमः । शुद्धोदकस्नानं समर्पयामि ॥

शुद्धोदकस्नानान्ते आचमनीयं समर्पयामि ॥

ॐभूर्भुवः स्वः भगवते श्री नर्मदेश्वराय नमः ।

सर्वोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि ॥

**अभिषेकं कुर्यात्** ॥ (दूध मिश्रित जल से अभिषेक करे)

**रुद्रसूक्तः-हरिः ॐनमस्ते रुद्रमन्न्यवऽ उतोतऽइषवे नमः । बाहुभ्यामुतते नमः ॥१॥ यातेरुद्रशिवा तनूरघोराऽ। तया नस्तन्वाशं तमयागिरिशन्ताभिचा कशीहि ॥२॥ यामिषुङ्गिरिशन्त हस्तेबिभर्ष्यस्तवे ॥ शिवाङ्गिरित्रताङ्कुरुमाहि ꣳ सीः पुरुषञ्जगत् ॥३॥ शिवेनव्वचसात्वा गिरिशाच्छा व्वदामसि ॥ यथानः सर्व्वमिज्जगदयक्ष्म ꣳ सुमनाऽ असत् ॥४॥ अद्धयवो चदधिवक्ताप्प्रथमो दैव्योभिषक् ॥ अहीँश्च सर्व्वाञ्जम्भयन्त्सर्व्वाश्चयातु धान्योधराचीः परासुव ॥५॥ असौयस्ताम्रोऽअरुणऽउतबभ्रुः सुमङ्गलः ॥ येचैन ꣳ**

रुद्राऽअभितोदिक्षुश्श्रिता: सहस्रशो व्वैषाथं हेडऽईमहे ॥६॥
असौयोव्वसर्प्पतिनीलग्ग्रीवो व्विलोहित: ॥ उतैनङ्गोपाऽ
अदृश्श्रन्नदृश्श्रन्नुदहार्य्य: सदृष्टोमृडयातिन: ॥७॥
नमोस्तुनीलग्ग्रीवायसहस्राक्षायमीढुषे ॥ अथोयेऽ अस्यसत्त्वानो
हन्तेभ्योकरन्नम: ॥८॥ प्रमुञ्चधन्वनस्त्वमुभयोरात्त्कर्न्योर्ज्ज्याम् ॥
याश्चतेहस्तऽइषव: पराता भगवोव्वप ॥९॥ व्विज्ज्यन्धनु:
कपर्दिनो व्विशल्योबाणवाँ२॥ ऽउत ॥ अनेशन्नस्ययाऽइषवऽ
आभुरस्यनिषङ्गधि: ॥१०॥ यातेहेतिर्म्मीढुष्टमहस्ते बभूवतेधनु: ॥
तयास्मान्विश्श्वतस्त्वमयक्ष्मया परिभुज ॥११॥ परितेधन्न्वनो
हेतिरस्म्मान्न्वृणक्तुव्विश्श्वत: ॥ अथोयऽइषुधिस्तवारेऽ
अस्म्मन्निधेहितम् ॥१२॥ अवतत्त्यधनुष्ट्वठं सहस्राक्षशतेषुधे ॥
निशीर्य्यशल्यानाम्मुखाशिवोन: सुमनाभव ॥१३॥ नमस्तऽ
आयुधायानाततायधृष्णवे ॥ उभाब्भ्यामुततेनमो
बाहुभ्यान्तवधन्न्वने ॥१४॥ मानोमहान्तमुतमानोऽ अर्ब्भकम्मानऽ
उक्षन्तमुतमानऽ उक्षितम् ॥ मानोव्वधी: पितरम्मोतमातरम्मान:
प्प्रियास्तन्न्वोरुद्ररीरिष: ॥१५॥ ॐमानस्तोकेतनयेमानऽ
आयुषिमानो गोषुमानोऽ अश्श्वेषुरीरिष: । मानोव्वीरान्न्रुद्रभामिनो
व्वधीर्हविष्म्मन्त: सदमित्त्वा हवामहे ॥१६॥ अभिषेकं समर्पयामि॥

**शुद्धोदकस्नान:**–ॐशुद्धवाल: सर्वशुद्धवालो मणिबालस्तऽ
आश्श्विना: श्वेत: श्वेताक्षोरुणस्ते रुद्राय पशुपतयेकर्ण्णायामाऽ
अवलिप्ता रौद्रानभोरूपा:पार्ज्जन्या: ॥ ॐ भूर्भुव: स्व: भगवते
श्री नर्मदेश्वराय नम: । शुद्धोदकस्नानं समर्पयामि ॥
शुद्धोदकस्नानान्ते आचमनीयं समर्पयामि ॥

**वस्त्रम्**:–ॐअसौयोव्वसर्प्पतिनीलग्ग्रीवो व्विलोहित: ॥ उतैनङ्गोपाऽ
अदृश्श्रन्नदृश्श्रन्नुदहार्य्य: सदृष्टोमृडयातिन: ॥ ॐ युवा सुवासा:
परिवीत आगात्स उ श्रेयान्भवति जायमान: । तं धीरास: कवय

उन्नयन्ति स्वाध्यो मनसा देवयन्तः ॥ ॐ भूर्भुवः स्वः भगवते श्री नर्मदेश्वराय नमः । वस्त्रं समर्पयामि ॥

**यज्ञोपवीतम्ः**–नमोस्तुनीलग्ग्रीवायसहस्राक्षायमीढुषे ॥ अथोयेऽ अस्यसत्त्वानो हन्तेभ्योकरन्नमः ॥ ॐब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचोव्वेनऽ आवः । सबुध्न्या ऽ उपमाऽ अस्यविष्ठाः सतश्च योनिमसतश्चव्विवः ॥ ॐ भूर्भुवः स्वः भगवते श्री नर्मदेश्वराय नमः । यज्ञोपवीतं समर्पयामि । यज्ञोपवीतान्ते आचमनीयं जलं च समर्पयामि ॥

**उपवस्त्रम्ः**–ॐ सुजातो ज्योतिषा सहशर्म व्वरूथमासदत्स्वः । वासो अग्ने विश्वरूपथ्ठं संव्ययस्व विभावसो ॥ ॐ भूर्भुवः स्वः भगवते श्री नर्मदेश्वराय नमः । उपवस्त्रं समर्पयामि ॥

**चन्दनम्ः**–ॐप्रमुञ्चधन्वनस्त्वमुभयोरात्र्क्न्योर्ज्ज्याम् ॥ याश्चतेहस्तऽइषवः पराता भगवोव्वप ॥ ॐत्वां गन्धर्वा ऽ अखनँस्त्वा मिन्द्रस्त्वां बृहस्पतिः । त्वामोषधे सोमो राजा विद्वान् यक्ष्मा दमुच्यत ॥ ॐ भूर्भुवः स्वः भगवते श्री नर्मदेश्वराय नमः । चन्दनं समर्पयामि ॥

**रक्त चन्दनम्ः**– नहि तेषाममा चन नाध्वसु वारणेषु । ईशे रिपुरघशर्ठं सः ॥

रक्त चन्दन सम्मिश्रं पारिजातसमुद्भवम् । मया दत्तं महादेव चन्दनं प्रतिगृह्यताम् ॥ ॐ भूर्भुवः स्वः भगवते श्री नर्मदेश्वराय नमः । रक्तचन्दनं समर्पयामि ॥

**भस्मः**–ॐप्रसद्य भस्मना योनिमपश्च पृथिवीमग्ने । सथ्ठं सृज्यमातृभिष्ट्वं ज्योतिष्मान् पुनराऽ सदः ॥ ॐ भूर्भुवः स्वः भगवते श्री नर्मदेश्वराय नमः । भस्म समर्पयामि ॥

**अक्षतान्ः**–ॐअक्षन्नमीमदन्तह्य व प्रियाऽ अधूषत । अस्तोषतस्व भानवो विप्रान विष्ठ्या मती योजान्विन्द्रते हरिः ॥ अक्षताश्च सुरश्रेष्ठाः कंकुमुक्ताः सुशोभिताः । मया निवेदिता भक्त्या

गृहाण परमेश्वर ॥ ॐ भूर्भुवः स्वः भगवते श्री नर्मदेश्वराय नमः । अक्षतान् समर्पयामि ॥

**पुष्पमालाः**–ॐओषधीः प्रतिमोदद्ध्वम्पुष्पवतीः प्रसूवरीः। अश्श्वाऽइवसजित्वरी वीरूधः पारयिष्ण्वः॥ ॐ भूर्भुवः स्वः भगवते श्री नर्मदेश्वराय नमः । पुष्पमालां समर्पयामि॥

**बिल्वपत्रः**–ॐनमो बिल्मिने चकवचिने च नमो वर्मिणे चव्वरूथिने च नमः श्रुतायच श्रुतसेनायच नमो दुन्दुभ्याय चाहनन्याय च ॥१॥ त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रिधायुधम् । त्रिजन्मपापसंहारं बिल्वपत्रं शिवार्पणम् ॥२॥ त्रिशाखैर्बिल्वपत्रैश्च ह्यच्छिद्रैः कोमलैः शुभैः। शिवपूजां करिष्यामि बिल्वपत्रं शिवार्पणम् ॥३॥ अखण्डबिल्वपत्रेण पूजिते नन्दिकेश्वरे । शुद्धयन्ति सर्वपापेभ्यो बिल्वपत्रं शिवार्पणम् ॥४॥ शालिग्रामशिलामेकां विप्राणां जातु अर्पयेत् । सोमयज्ञमहापुण्यं बिल्वपत्रं शिवार्पणम् ॥५॥ दन्तीकोटि सहस्राणि वाजपेयशतानि च । कोटिकन्यामहादानं बिल्वपत्रं शिवार्पणम् ॥६॥ लक्ष्म्याः स्तनत उत्पन्नं महादेवस्य च प्रियम् । बिल्ववृक्षं प्रयच्छामि बिल्वपत्रं शिवार्पणम् ॥७॥ दर्शनं बिल्ववृक्षस्य स्पर्शनं पापनाशनम् । अघोरपापसंहारं बिल्वपत्रं शिवार्पणम् ॥८॥ मूलतो ब्रह्मरूपाय मध्यतो विष्णुरूपिणे । अग्रतः शिवरूपाय बिल्वपत्रं शिवार्पणम् ॥९॥ बिल्वाष्टकमिदं पुण्यं यः पठेच्छिवसन्निधौ । सर्वपापविनिर्मुक्तः शिवलोकमवाप्नुयात् ॥१०॥ ॐ भूर्भुवः स्वः भगवते श्री नर्मदेश्वराय नमः । बिल्वपत्राणि समर्पयामि ॥

**तुलसीमञ्जरीं**:–ॐशिवोभवप्रजाभ्यो मानुषीभ्यस्त्वमङ्गिरः ॥ माद्यावा पृथिवी अभिशोचीर्म्मान्तरिक्षम्मा वनस्पतीन्॥ ॐ भूर्भुवः स्वः भगवते श्री नर्मदेश्वराय नमः । तुलसीमञ्जरीं समर्पयामि ॥

**धत्तूरपुष्पं**:–ॐकार्षिरसि समुद्रस्य त्वाक्षित्याऽउन्नयामि । समापो अद्भिरग्मत समोषधीभिरोषधीः ॥ॐ भूर्भुवः स्वः भगवते श्री नर्मदेश्वराय नमः । धत्तूरपुष्पं समर्पयामि ॥

**दूर्वाङ्कुरान्**:- ॐ काण्डात्काण्डात्प्ररोहन्ती परुष: परुषस्परि ॥ एवानो दूर्वे प्रतनुसहस्रेण शतेन च ॥ ॐ भूर्भुव: स्व: भगवते श्री नर्मदेश्वराय नम: । दूर्वाङ्कुरान् समर्पयामि ॥

**सुगन्धितद्रव्यम्**:- ॐत्र्यम्बकं यजामहे सुगन्धिंपुष्टिवर्द्धनम् । उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीयमामृतात् ॥ ॐ भूर्भुव: स्व: भगवते श्री नर्मदेश्वराय नम: । सुगन्धिद्रव्यं समर्पयामि ॥

**एकादश-रुद्रपूजनम्**:- (एकादश रुद्रों तथा एकादशशक्तियों के नाममंत्रो से भगवान् श्रीसाम्बसदाशिव पर गन्धाक्षतपुष्प तथा बिल्वपत्र चढ़ाये)

ॐअघोराय नम: ॥१॥ ॐपशुपतये नम: ॥२॥ ॐशर्वाय नम: ॥३॥ ॐविरूपाक्षाय नम: ॥४॥ ॐविश्वरूपिणे नम: ॥५॥ ॐत्र्यम्बकाय नम: ॥६॥ ॐकपर्दिने नम: ॥७॥ ॐभैरवाय नम: ॥८॥ ॐशूलपाणये नम: ॥९॥ ॐईशानाय नम: ॥१०॥ ॐमहेश्वराय नम: ॥११॥ सर्वोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि ॥

**एकादश-शक्तिपूजनम्**:- ॐउमायै नम: ॥१॥ ॐशङ्करप्रियायै नम: ॥२॥ ॐपार्वत्यै नम: ॥३॥ ॐगौर्यै नम: ॥४॥ ॐकाल्यै नम: ॥५॥ ॐ कालिन्द्यै नम: ॥६॥ ॐकोटर्यै नम: ॥७॥ ॐविश्वधारिण्यै नम: ॥८॥ ॐह्रां नम: ॥९॥ ॐह्रीं नम: ॥१०॥ ॐगङ्गादेव्यै नम: ॥११॥ सर्वोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि ॥

**अङ्ग-पूजनम्**:- ॐ भवाय नम: पादौ पूजयामि ॥ ॐ जगत्पित्रे नम: जंघे पूजयामि ॥ ॐमृडाय नम: जानुनी पूजयामि ॥ ॐ रुद्राय नम: ऊरू पूजयामि ॥ ॐ कालान्तकाय नम: कटिं पूजयामि ॥ ॐनागेन्द्राभरणाय नम: नाभिं पूजयामि ॥ ॐ स्तव्याय नम: स्तनौ पूजयामि ॥ ॐभवनाशनाय नम: भुजान् पूजयामि ॥

ॐकालकंठाय नमः कंठं पूजयामि ॥ ॐ महेशाय नमः मुखं पूजयामि ॥ ॐ लास्यप्रियाय नमः ललाटं पूजयामि ॥ ॐ शिवाय नमः शिरः पूजयामि ॥ ॐप्रणतार्तिहराय नमः सर्वाण्यङ्गानि पूजयामि ॥

(गन्धाक्षत पुष्प चढाये)

**गण-पूजा**:-ॐ गणपतये नमः ॥ ॐकार्तिकाय नमः ॥ ॐपुष्पदन्ताय नमः ॥ ॐ कपर्दिने नमः ॥ ॐभैरवाय नमः ॥ ॐशूलपाणये नमः ॥ ॐईश्वराय नमः ॥ ॐ दण्डपाणये नमः ॥ ॐ नन्दिने नमः ॥ ॐ महाकालाय नमः ॥

(भगवान् को आठ पुष्प अर्पण करे)

**अष्ट-पुष्प**:-ॐ शर्वाय क्षितिमूर्त्तये नमः । ॐ भवाय जल मूर्त्तये नमः । ॐरुद्राय अग्निमूर्त्तये नमः । ॐ उग्राय वायुमूर्त्तये नमः । ॐ भीमाय आकाश मूर्त्तये नमः । ॐ ईशानाय सूर्यमूर्त्तये नमः । ॐ महादेवाय सोममूर्त्तये नमः। ॐपशुपतये यजमानमूर्त्तये नमः ॥

**नाना परिमलद्रव्य**:-ॐ अहिरिवभोगैः पर्येतिवाहुंज्याया हेतिम्परि बाधमानाः । हस्तग्घ्नो विश्वाव्वयनुनानि विद्वान्पुमान्पुमाꣳसम्परिपातु विश्वतः ॥ ॐ भूर्भुवः स्वः भगवते श्री नर्मदेश्वराय नमः । नानापरिमल द्रव्याणि समर्पयामि ॥

**धूप**:-ॐयातेहेतिर्म्मीढुष्टमहस्ते बभूवतेधनुः ॥ तयास्मान्विश्वतस्त्वमयक्ष्मया परिभुज ॥ ॐ धूरसि धूर्वधूर्वन्तं धूर्वतँयोस्मान्धूर्वतितं धूर्व यं व्व्यन्धूर्व्वामः । देवानामसि व्वन्हितमꣳस्नितमम्पप्रितमज्जुष्ट तमन्देवहूतमम् ॥ ॐ भूर्भुवः स्वः भगवते श्री नर्मदेश्वराय नमः । धूपमाघ्रापयामि ॥

**दीप**:-ॐपरितेधन्वनो हेतिरस्म्मान्वृणक्तु व्विश्वतः ॥ अथोयऽइषुधिस्तवारेऽ अस्म्मन्निधेहितम् ॥ साज्यं चवर्ति संयुक्तं वह्निना योजितं मया । दीपं गृहाण देवेश त्रैलोक्य तिमिरापहम्

॥ ॐ भूर्भुवः स्वः भगवते श्री नर्मदेश्वराय नमः । दीपं दर्शयामि ॥ हस्तौ प्रक्षाल्य ॥

**नैवेद्यम्ः**-ॐअवतत्त्यधनुष्ट्वर्ठ सहस्राक्षशतेषुधे ॥ निशीर्य्यशल्या नाम्मुखाशिवोनः सुमनाभव ॥ ॐ अन्नपतेन्नस्य नो देह्यनमीवस्य शुष्मिणः । प्रप्र दातारं तारिषऽऊर्जं नो धेहि द्विपदे चतुष्पदे ॥ शर्करा खण्डखाद्यानि दधिक्षीरघृतानि च । आहारं भक्ष्यभोज्यं च नैवेद्यं प्रतिगृह्यताम् ॥ ॐ प्राणाय स्वाहा, ॐ अपानाय स्वाहा, ॐ व्यानाय स्वाहा, ॐ उदानाय स्वाहा, ॐ समानाय स्वाहा। ॐ भूर्भुवः स्वः भगवते श्री नर्मदेश्वराय नमः । नैवेद्यं निवेदयामि मध्ये पानीयं जलं समर्पयामि, आचमनीयं जलं समर्पयामि, उत्तरापोषणार्थे हस्त प्रक्षालनं, मुखप्रक्षालनं आचमनीयं जलं समर्पयामि ॥

**करोद्वर्तनम्ः**-ॐ सिञ्चति परिषिञ्चन्त्युत्सिञ्चन्ति पुनन्ति च । सुरायै बभ्र्वैमदे किन्त्वो वदति किन्त्वः ॥ ॐ अꣳशुनाते अꣳशुः पृच्यतां परुषा परुः । गन्धस्ते सोममवतु मदाय रसो अच्युतः ॥ ॐ भूर्भुवः स्वः भगवते श्री नर्मदेश्वराय नमः । करोद्वर्तनार्थे चन्दनानुलेपनं समर्पयामि ॥

**ऋतुफलम्ः**-ॐ याः फलिनीर्या ऽअफलाऽ अपुष्पायाश्च पुष्पिणीः । बृहस्पति प्रसूतास्तानो मुंचन्त्वꣳ हसः॥ ॐ भूर्भुवः स्वः भगवते श्री नर्मदेश्वराय नमः । ऋतुफलानि निवेदयामि ॥ आचमनीयं जलं समर्पयामि ॥

**ताम्बूलम्ः**-ॐनमस्तऽ आयुधायानाततायधृष्णवे ॥ उभाब्भ्यामुततेनमो बाहुभ्यान्तवधन्वने ॥ पूगीफलं महद्दिव्यम् नागवल्ली दलैर्युतम् । एला चूर्णादि संयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥ ॐ भूर्भुवः स्वः भगवते श्री नर्मदेश्वराय नमः । मुखवासार्थम् एलालवंगपूगीफल सहितं ताम्बूलं बीटिकां(बीड़ा) समर्पय ॥

**द्रव्य दक्षिणाम्ः**–ॐ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत् । स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥

ॐयद्दत्तँ ख्यत्परादानँ य्यत्पूर्तं याश्च दक्षिणाः तदग्नि वैंश्श्व कर्म्मणः स्वर्द्देवेषुनो दधत् ॥ हिरण्यगर्भ गर्भस्थं हेमबीजं विभावसोः । अनन्त पुण्यफलदमतः शान्तिं प्रयच्छ मे ॥ ॐ भूर्भुवः स्वः भगवते श्री नर्मदेश्वराय नमः । द्रव्यदक्षिणां समर्पयामि ॥

**श्रीफलम्ः**–ॐश्रीश्चते लक्ष्मीश्चपत्क्य्रा बहोरात्रे पार्श्वे नक्षत्राणिरूपमश्विनौ ऽव्याप्तम् । इष्णन्निषाणा मुम्मऽइषाण सर्वलोकम्मऽइषाण ॥ ॐ भूर्भुवः स्वः भगवते श्री नर्मदेश्वराय नमः । श्रीफलं समर्पयामि ॥

**मंत्र–पुष्पाञ्जलिः**–ॐमानस्तोकेतनयेमानऽ आयुषिमानो गोषुमानोऽ अश्वेषुरीरिषः । मानोव्वीरान्न्रुद्रभामिनो व्वधीर्हविष्मन्तः सदमित्त्वा हवामहे ॥

शान्तं पद्मासनस्थं शशिधर मुकुटं पञ्चवक्त्रं त्रिनेत्रं ।
शूलं वज्रं च खड्गं परशुमभयदं दक्षिणांगे वहन्तम् ॥
नागं पाशं च घण्टां डमरुकसहितं साङ्कुशं वामभागे ।
नानालंकारयुक्तं स्फटिकमणिनिभं पार्वतीशं नमामि ॥

ॐ भूर्भुवः स्वः भगवते श्री नर्मदेश्वराय नमः । **मंत्र–पुष्पाञ्जलिं** समर्पयामि ॥

**प्रार्थनाः**–नमामीशमीशान निर्वाणरूपं । विभुं व्यापकं ब्रह्म वेदस्वरूपं ॥

निजं निर्गुणं निर्विकल्पं निरीहं । चिदाकाशमाकाशवासं भजेऽहं ॥
निराकारमोंकारमूलं तुरीयं । गिरा ग्यान गोतीतमीशं गिरीशं ॥
करालं महाकाल कालं कृपालं । गुणागार संसारपारं नतोऽहं ॥
तुषाराद्रि संकाश गौरं गभीरं । मनोभूत कोटि प्रभा श्री शरीरं ॥
स्फुरन्मौलि कल्लोलिनी चारुगंगा । लसद्भालबालेन्दु कंठे भुजंगा ॥

चलत्कुंडलं भ्रू सुनेत्रं विशालं । प्रसन्नाननं नीलकंठं दयालं ॥
मृगाधीशचर्माम्बरं मुण्डमालं । प्रियं शंकरं सर्वनाथं भजामि ॥
प्रचंडं प्रकृष्टं प्रगल्भं परेशं । अखंडं अजं भानुकोटिप्रकाशं ॥
त्रयंः शूल निर्मूलनं शूलपाणिं । भजेऽहं भवानीपतिं भावगम्यं ॥
कलातीत कल्याण कल्पान्तकारी । सदा सच्चिदानन्ददाता पुरारी ॥
चिदानंद संदोह मोहापहारी । प्रसीद प्रसीद प्रभो मन्मथारी ॥
न यावद् उमानाथ पादारविन्दं । भजंतीह लोके परे वा नराणां ॥
न तावत्सुखं शान्ति सन्तापनाशं । प्रसीद प्रभो सर्व भूताधिवासं ॥
न जानामि योगं जपं नैव पूजां । नतोऽहं सदा सर्वदा शंभु तुभ्यं ॥
जरा जन्म दुःखौघ तातप्यमानं । प्रभो पाहि आपन्नमामीश शंभो ॥
**श्लोकः**–रुद्राष्टकमिदं प्रोक्तं विप्रेण हरतोषये ।
ये पठन्ति नरा भक्त्या तेषां शम्भुः प्रसीदति ॥
प्रार्थनापूर्वकं नमस्कारान् समर्पयामि ॥
(भगवान् शिवपर १०८ नामों से बिल्वपत्र चढ़ाये या गंधाक्षतपुष्पआदि से पूजन करें) ॥ अष्टोत्तरशत विल्वपत्र ॥

**ॐ शिवाय नमः ॥१॥ ॐमहेश्वराय नमः ॥२॥ ॐशम्भवे नमः ॥३॥ ॐ पिनाकिने नमः ॥४॥ ॐ शशिशेखराय नमः ॥५॥ ॐवामदेवाय नमः ॥६॥ ॐविरूपाक्षाय नमः ॥७॥ ॐकपर्दिने नमः ॥८॥ ॐ नीललोहिताय नमः ॥९॥ ॐशङ्कराय नमः ॥१०॥ ॐशूलपाणिने नमः ॥११॥ ॐखट्वाङ्गिने नमः ॥१२॥ ॐविष्णुवल्लभाय नमः ॥१३॥ ॐशिपिविष्टाय नमः ॥१४॥ ॐअम्बिकानाथाय नमः ॥१५॥ ॐश्री कण्ठाय नमः ॥१६॥ ॐभक्तवत्सलाय नमः ॥१७॥ ॐ भवाय नमः ॥१८॥ ॐशर्वाय नमः ॥१९॥ ॐत्रिलोकेशाय नमः ॥२०॥ ॐशितिकण्ठाय नमः ॥२१॥ ॐशिवाप्रियाय नमः ॥२२॥**

ॐउग्राय नमः ॥२३॥ ॐकपर्दिने नमः ॥२४॥ ॐकामारये नमः ॥२५॥ ॐअन्धकासुरसूदनाय नमः ॥२६॥ ॐगङ्गाधराय नमः ॥२७॥ ॐललाटाक्षाय नमः ॥२८॥ ॐकालकालाय नमः ॥२९॥ ॐकृपानिधये नमः ॥३०॥ ॐभीमाय नमः ॥३१॥ ॐपरशुहस्ताय नमः ॥३२॥ ॐमृगपाणये नमः ॥३३॥ ॐजटाधराय नमः ॥३४॥ ॐकैलासवासिने नमः ॥३५॥ ॐकवचिने नमः ॥३६॥ ॐकठोराय नमः ॥३७॥ ॐत्रिपुरान्तकाय नमः ॥३८॥ ॐवृषाङ्काय नमः ॥३९॥ ॐवृषभारूढाय नमः ॥४०॥ भस्मोद्धूलितविग्रहाय नमः ॥४१॥ ॐसोमप्रियाय नमः ॥४२॥ ॐस्वरमयाय नमः ॥४३॥ ॐत्रयीमूर्तये नमः ॥४४॥ ॐअनीश्वराय नमः ॥४५॥ ॐसर्वज्ञाय नमः ॥४६॥ ॐपरमात्मने नमः ॥४७॥ ॐसोमसूर्याग्निलोचनाय नमः ॥४८॥ ॐहविषे नमः ॥४९॥ ॐ यज्ञमयाय नमः ॥५०॥ ॐसोमाय नमः ॥५१॥ॐपञ्चवक्त्राय नमः ॥५२॥ ॐसदाशिवाय नमः ॥५३॥ ॐविश्वेश्वराय नमः ॥५४॥ ॐवीरभद्राय नमः ॥५५॥ ॐगणनाथाय नमः ॥५६॥ ॐप्रजापतये नमः ॥५७॥ ॐहिरण्यरेतसे नमः ॥५८॥ ॐदुर्धर्षाय नमः ॥५९॥ ॐगिरीशाय नमः ॥६०॥ ॐगिरिजापतये नमः ॥६१॥ ॐअनघाय नमः ॥६२॥ ॐभुजङ्गभूषणाय नमः ॥६३॥ ॐभर्गाय नमः ॥६४॥ ॐगिरिधन्विने नमः ॥६५॥ ॐगिरिप्रियाय नमः ॥६६॥ ॐकृत्तिवाससे नमः ॥६७॥ ॐपुरारातये नमः ॥६८॥ ॐभगवते नमः ॥६९॥ ॐप्रमथाधिपाय नमः ॥७०॥ ॐमृत्युञ्जयाय नमः ॥७१॥ ॐसूक्ष्मतनवे नमः ॥७२॥ ॐजगद्व्यापिने नमः ॥७३॥ ॐजगद्गुरवे नमः ॥७४॥ ॐव्योमकेशाय नमः ॥७५॥ ॐमहासेनजनकाय नमः ॥७६॥ ॐचारुविक्रमाय नमः ॥७७॥ ॐरुद्राय नमः ॥७८॥ॐभूतपतये नमः ॥७९॥ ॐस्थाणवे नमः ॥८०॥ अहिर्बुध्न्याय नमः ॥८१॥ ॐदिगम्बराय नमः ॥८२॥

ॐअष्टमूर्तये नमः ॥८३॥ ॐअनेकात्मने नमः ॥८४॥ ॐसात्त्विकाय नमः ॥८५॥ ॐशुद्धविग्रहाय नमः ॥८६॥ ॐशाश्वताय नमः ॥८७॥ ॐखण्डपरशवे नमः ॥८८॥ ॐअजाय नमः॥८९॥ पाशविमोचकाय नमः ॥९०॥ ॐमृडाय नमः ॥९१॥ ॐपशुपतये नमः ॥९२॥ ॐदेवाय नमः ॥९३॥ ॐमहादेवाय नमः ॥९४॥ ॐअव्ययाय नमः॥९५॥ ॐ हरये नमः ॥९६॥ ॐपुष्पदन्तभिदे नमः ॥९७॥ ॐअव्यग्राय नमः ॥९८॥ ॐदक्षाध्वरहराय नमः ॥९९॥ ॐहराय नमः ॥१००॥ ॐभगनेत्रभिदे नमः ॥१०१॥ ॐअव्यक्ताय नमः ॥१०२॥ ॐसहस्राक्षाय नमः ॥१०३॥ ॐसहस्रपदे नमः ॥१०४॥ ॐअपवर्गप्रदाय नमः ॥१०५॥ ॐअनन्ताय नमः ॥१०६॥ ॐतारकाय नमः ॥१०७॥ ॐपरमेश्वराय नमः ॥१०८॥

अनेन अष्टोत्तरशत–बिल्वदल–समर्पणेन कर्मणा श्री नर्मदेश्वरः प्रीयतां न मम ॥

## ॥ शिवमानस पूजा ॥

रत्नैः कल्पितमासनं हिमजलैः स्नानं च दिव्याम्बरं,
नानारत्नविभूषितं मृगमदामोदाङ्कितं चन्दनम् ।
जातीचम्पकबिल्वपत्रसहितं पुष्प च धूपं तथा,
दीपं देव दयानिधे पशुपते हृत्कल्पितं गृह्यताम् ॥१॥
सौवर्णे नवरत्नखण्डरचिते पात्रे घृतं पायसं,
भक्ष्यं पञ्चविधं पयोदधियुतं रम्भाफलं पानकम् ।
शाकानामयुतं जलं रुचिकरं कर्पूरखण्डोज्ज्वलं,
ताम्बूलं मनसा मया विरचितं भक्त्या प्रभो स्वीकुरु ॥२॥
छत्रं चामरयोर्युगं व्यजनकं चादर्शकं निर्मलं,
वीणाभेरिमृदङ्गकाहलकला गीतं च नृत्यं तथा ।
साष्टाङ्गं प्रणतिः स्तुतिर्बहुविधा ह्येतत्समस्तं मया,
सङ्कल्पेन समर्पितं तव विभो पूजां गृहाण प्रभो ॥३॥

आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं,
पूजा ते विषयोपभोगरचना निद्रा समाधिस्थितिः ।
सञ्चारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वा गिरो,
यद्यत्कर्म करोमि तत्तदखिलं शम्भो तवाराधनम् ॥४॥
करचरणकृतं वाक्कायजं कर्मजं वा । श्रवणनयनजं वा
मानसं वापराधम् ॥
विहितमविहितं वा सर्वमेतत्क्षमस्व । जय जय करुणाब्धे
श्रीमहादेव शम्भो ॥५॥
वन्दे देवमुमापतिं सुरगुरुं वन्दे जगत्कारणं । वन्दे पन्नगभूषणं मृगधरं वन्दे पशूनाम्पतिम् । वन्दे सूर्यशशांकवह्निनयनं वन्दे मुकुन्दप्रियम् । वन्दे भक्तजनाश्रयञ्च वरदं वन्दे शिवं शङ्करम् ॥६॥ सौराष्ट्रे सोमनाथञ्च श्रीशैले मल्लिकार्जुनम् । उज्जयिन्यां महाकालमोङ्कारं ममलेश्वरम् ॥ केदारं हिमवत्पृष्ठे डाकिन्यां भीमशंकरम् । वाराणस्याञ्च विश्वेशं त्र्यम्बकं गौतमीतटे ॥ वैद्यनाथं चिताभूमौ नागेशं दारुका वने । सेतुबन्धे च रामेशं घुश्मेशञ्च शिवालये ॥ द्वादशैतानि नामानि प्रातरुत्थाय यः पठेत् । सर्व पाप विनिर्मुक्तः सर्व सिद्धिफलं लभेत् ॥७॥

## ॥ अथ जन्मोत्सव पूजन विधिः ॥

प्राङ्मुखो यजमानः–स्वासने उपविश्य ॥ आचम्य प्राणानायम्य ॥ स्वस्त्ययनम् पठेत् ॥

**साक्षतं जलं गृहीत्वा सङ्कल्पं कुर्यात्ः–** श्रीविष्णुः ३ श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्त्तमानस्य अद्य ब्रह्मणो द्वितीयपरार्द्धे तदादौ श्रीश्वेतवाराहकल्पे वैवस्वत मन्वतरे अष्टाविंशतिमे कलियुगे कलि प्रथम चरणे जम्बूद्वीपे भरतखण्डे आर्यावर्तान्तर्गत ब्रह्मावर्तैकदेशे गङ्गायमुनयोः पश्चिमे तटे नर्मदाया उत्तरेतटे अमुकनाम्निक्षेत्रे बौद्धावतारे अमुक विक्रम (अमुक) नाम्निसंवत्सरे अमुकायने अमुकऋतौ अमुकमासे अमुकपक्षे अमुक तिथौ

अमुकवासरे यथावर्तमान नक्षत्रयोगकरण लग्नमुहूर्त्त समन्विते एवं ग्रहगुणविशेषणविशिष्टायां शुभपुण्यतिथौ अमुकगोत्रोत्पन्नोऽहं अमुकशर्माहं मदीय जन्मोत्सव तिथौ आयुर्वृद्धिः कामार्थं लाभक्षेम विजयारोग्य सम्पत्तिप्राप्त्यर्थं श्रीकुलदेवता प्रीत्यर्थं प्रतिवार्षिक विहितं कुलदेवता पूजनं करिष्ये ॥ तत्रादौ निर्विघ्नता सिद्ध्यर्थं गणेशाम्बिकयोः पूजनपूर्वकं गौर्यादि षोडशमातृणां सूर्यादि नवग्रहाणां मार्कंडेयाद्यष्ट चिरञ्जीवीनां पूजनं करिष्ये ॥ ततः कुङ्कुमादीनां गणपत्यादीनां स्थापनम् ॥

## ॥ गणपति–पूजनम् ॥

ॐ गणानांत्वा गणपति ठँ हवामहे प्रियाणां त्वा प्रियपतिठँ हवामहे निधीनां त्वा निधिपति ठँ हवामहे वसो मम । आहमजानि गब्भर्धमा त्वमजासिगब्भर्धम् ॥

ॐनमो गणेब्भ्यो गणपतिब्भ्यश्चवो नमोनमो व्व्रातेब्भ्यो व्व्रातपतिब्भ्यश्चवो नमोनमो गृत्सेब्भ्यो गृत्सपतिब्भ्यश्चवो नमोनमो व्विरूपेब्भ्यो व्विश्वरूपेब्भ्यश्चवो नमोनमः ॥

ध्यानान्ते अक्षतपुष्पाणि समर्पयामि ॥ **षोडशोपचारैः पूजयेत् ॥**

## ॥ अथषोडशमातृका पूजनम् ॥

ॐसमख्ये देव्या धिया सं दक्षिणयोरुचक्षसा । मा मऽआयुः प्रमोषीर्मोऽअहं तव वीरं विदेय तव देवि सन्दृशि ॥

ॐ गौरी पद्मा शची मेधा सावित्री विजया जया । देवसेना स्वधा स्वाहा मातरो लोकमातरः ॥ धृतिः तुष्टि तथा पुष्टिरात्मनः कुल देवता । गणेशेनाधिकाह्येता वृद्धौ पूज्याश्च षोडशः ॥

**षोडशोपचारैः पूजयेत् ॥**

## ॥ अथ नवग्रहपूजनम् ॥

ॐग्रहाऽऊर्जाहुतयो व्यन्तो विप्राय मतिम् । तेषां विशिप्रियाणां वोऽहमिषमूर्जठँ समग्रभमुपयामगृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम् ॥

ॐब्रह्मा मुरारि स्त्रिपुरान्तकारी भानु शशी भूमिसुतो बुधश्च । गुरुश्च शुक्रः शनिराहुकेतवः सर्वे ग्रहाः शान्तिकरा भवन्तु ॥

**षोडशोपचारैः पूजयेत् ॥**

## अथ मार्कंडेयादीन् पूजयेत् ॥

वामहस्ते अक्षतान् गृहीत्वा दक्षिणहस्तेन नाम मन्त्रैरावाहयेत् ॥

१–ॐमार्कंडेयाय नमः मार्कंडेयमावाहयामि ॥ २–अश्वत्थाम्ने नमः अश्वत्थानमावाहयामि ॥ ३–बलये नमः बलिमावाहयामि ॥ ४–व्यासाय नमः व्यासमावाहयामि ॥ ५–हनुमते नमः हनुमन्तमावाहयामि ॥ ६–विभीषणाय नमः विभीषणमावाहय ॥ ७–कृपाचार्याय नमः कृपाचार्यमावाहयामि ॥ ८–परशुरामाय नमः परशुराममावाहयामि ॥

मार्कंडेयाद्यष्ट चिरञ्जीवीभ्यो नमः ॥ आसनादि षोडशोपचारैः पूजयेत् ॥

**प्रार्थयेत्ः–**

**१–मार्कंडेय प्रार्थनाः**–मार्कंडेय महाबाहो सप्तकल्पांत जीविनम् । चिरञ्जीवी तथा त्वंहि मुनीनां प्रवर प्रभो ॥ नववर्षायुषानित्यं तपसा महता पुरा । स्व स्व कल्पांत कृत्वायु प्रसृतं मुनिनां त्वया ॥

**२–अश्वत्थामा प्रार्थनाः**–द्रोणपुत्र महाबाहो चन्द्रतेज समुद्भव । भवायुर्वरदो मे त्वं अश्वत्थाम्ने नमो नमः ॥

**३–बलि प्रार्थनाः**–दैत्येन्द्रकुल सम्भूत बहुदाता हरेः पुरा । भविष्येन्द्र बले राजन् दीर्घमायु प्रयच्छ मे ॥

**४–व्यास प्रार्थना:**–भविष्य सांप्रतं चैव त्वमतिज्ञानवान् मुने । नारायण समुद्भूतं त्वं व्यासायुः प्रदोभव ॥

**५–हनुमत् प्रार्थना:**– अञ्जनी गर्भ संभूतं कपीन्द्र सचिवोत्तमः । रामप्रिय नमस्तुभ्यं हनुमन् रक्ष मां सदा ॥

**६–विभीषण प्रार्थना:**– विभीषण नमस्तुभ्यं समरे राम पूजकः । आयुरारोग्यमैश्वर्यं देहि पौलस्य नन्दन ॥

**७–कृपाचार्य प्रार्थना:**–कृपयापरया त्वं मे कुरु मां चिरजीविनम् । आयुरारोग्यमैश्वर्यं धनधान्यं प्रयच्छ मे ॥

**८–परशुराम प्रार्थना:**–रेणुकेय महावीर्य क्षत्रियान्वंशभ्रंशज । आयु प्रयच्छ मे देव जामदग्निर्नमोस्तुते ॥

**९–प्रह्लाद प्रार्थना:**–दानवेन्द्र महाबाहो विष्णुभक्त जितेन्द्रियः । शरणं त्वां प्रपन्नोस्मि दीर्घमायु प्रयच्छमे ॥

**प्रार्थना:**–अश्वत्थामा बलिर्व्यासो हनूमांश्च विभीषणः । कृपः परशुरामश्च सप्तैते चिरजीविनः ॥१॥ सप्तैतान् संस्मरेन्नित्यं मार्कंडेयमथाष्टमम् । जीवेद्वर्षशतं साग्रमल्पायुनाशयेद्ध्रुवम् ॥२॥ मार्कंडेयाद्यष्ट चिरञ्जीवीभ्यो नमः ॥

**अथ षष्ठीपूजनम् :**– षष्ठीदेव्यै नमः आवाहनादि षोडशोपचारैः पूजयेत् ॥

**प्रार्थना:**–या श्रीः स्वयं सुकृतिनां भवनेश्वलक्ष्मीः पापात्मनां कृतधियां हृदयेषु बुद्धिः । श्रद्धासतां कुलजन प्रभवस्य लज्जा तां त्वां नतास्म परिपालय देवि विश्वम् ॥ षष्ठी देव्यै नमः ॥ प्रार्थनां समर्पयेत् ॥

**कुलदेवीपूजनम्:**– ॐ जातवेदसेसुनवामसोममरातीयतोनिदहाति वेदः । सनः पर्षदतिदुर्गाणि विश्वानावेवसिंधुंदुरिता त्यग्निः ॥ कुलदेवी इहागच्छेहतिष्ठ अमुक कुलदेव्यै नमः । अमुक कुलदेवीमाहयामि स्थापयामि ॥

**प्रतिष्ठा:**–ॐमनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञꣳसमिमं दधातु । विश्वेदेवासऽइह मादयन्तामो३म्प्रतिष्ठ ॥ कुलदेवी सुप्रतिष्ठा वरदा भवतु ॥

अमुक कुलदेव्यै नमः आसनार्थे अक्षतान् समर्पयामि ॥ कुलदेव्यै नमः पाद्यं समर्पयामि ॥ कुलदेव्यै नमः अर्घ्यं समर्पयामि ॥ कुलदेव्यै नमः आचमनं समर्पयामि ॥ कुलदेव्यै नमः स्नानं समर्पयामि ॥ कुलदेव्यै नमः वस्त्रं समर्पयामि ॥ कुलदेव्यै नमः गंधं समर्पयामि ॥ कुलदेव्यै नमः अक्षतान् समर्पयामि ॥ कुलदेव्यै नमः पुष्पाणि समर्पयामि ॥ कुलदेव्यै नमः धूपं समर्पयामि ॥ कुलदेव्यै नमः दीपं समर्पयामि ॥ कुलदेव्यै नमः नैवेद्यं निवेदयामि ॥ कुलदेव्यै नमः आचमनीयं जलं समर्पयामि ॥ कुलदेव्यै नमः फलं समर्पयामि ॥ कुलदेव्यै नमः ताम्बूल सहितं दक्षिणां समर्पयामि ॥

ततः नारिकेरं गृहीत्वा अर्घ्यं दद्यात् ॥

**तत्र मन्त्रः**–रूपं देहि जयं देहि भाग्यं भवति देहिमे । पुत्रान् देहि धनं देहि सर्वान् कामांश्च देहिमे ॥१॥ फलेन फलितं सर्व त्रैलोक्यं सचराचरम् । तस्मात्फल प्रदानेन सफलासन्तु मनोरथाः ॥२॥ कुलदेव्यै नमः नारिकेलमयफलार्घ्यं समर्पयामि ॥ नमस्करोमि ॥ ततो नीराञ्जनम् कुर्यात् ॥

**तत्र मन्त्रः**–ॐ अग्निर्ज्योतिरग्नि स्वाहा सूर्योज्योतिर्ज्योतिः सूर्यः स्वाहा ॥ अग्निर्वर्चो ज्योतिर्वचः स्वाहा । सूर्योवर्चो ज्योतिर्वर्चः स्वाहा । ज्योतिः सूर्यः सूर्योज्योति स्वाहा । चन्द्रादित्त्योचधरणि विद्युदग्निस्तथैव च । त्वमेव सर्वज्योतींषि आर्तिक्यं प्रतिगृह्यताम ॥ श्री कुलदेव्यै नमः । सर्वेभ्यो देवेभ्यो नमः । आर्तिक्यं समर्पयामि । ॐ जातवेदसे सुनवा मसोममराती यतोनिदहाति वेदः । सनः पर्षदतिदुर्गाणि विश्वा नावेवसिंधुंदुरिता त्यग्निः ॥ कुलदेव्यै नमः । सर्वेभ्यो देवेभ्यो नमः ॥ मन्त्रपुष्पाञ्जलिं समर्पयामि ॥

ततस्तिलगुडयुत दुग्धं प्रसादेन पिवेत् ॥

(तिल गुड़ दुग्ध भोग लगाकर तीन बार पीकर, आचमन करे)

**तत्र मन्त्रः**–अञ्जल्यर्द्धमिदं क्षीरं सतिलं गुड मिश्रितम् । मार्कंडेयाद्वरं लब्धा पिबामि वंश (आयु) वर्द्धये॥ ततः द्विराचमनम्॥ कुलदेव्या पूजनकृतस्य कर्मणोविधेर्यन्न्यूनमऽधिकं वा तत्सर्वं भवतां ब्राह्मणानां प्रसादात् श्रीगणेशाम्बिकयोः प्रसादात्सर्वं विधेः परिपूर्णमस्तु, अस्तुपरिपूर्णम्॥

**हस्ते जलमादायः**–कृतस्य कुलदेव्याः पूजनकर्मणः साङ्गता सिद्ध्यर्थं यथोपपन्नेनान्नेन तृप्तिपर्यंतं ब्राह्मणान् सौवासिनींश्च भोजयिष्ये॥

कृतस्य कुलदेव्या पूजनकर्मणः साङ्गता सिद्ध्यर्थं आचार्यदक्षिणां दातुमहमुत्सृजे॥

ततः शान्तिरस्तु इत्यादि अभिषेकं कुर्यात्॥ स्वस्तिनइन्द्रेति यजमानस्य तिलकं कुर्यात्॥ ॐ श्रीर्वचस्वेति अक्षतान् दद्यात्॥ ॐश्रीर्वर्चस्वमायुष्यमारोग्यमाविधात्पवमानं विधीयते॥ धान्यं धनं पशुपुत्रलाभं शतसंवत्सरं दीर्घमायुः॥ मंत्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः । शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयस्तव॥१॥ अक्षतान् विप्रहस्तेषु नित्यं विन्दन्ति ये नराः । तेषां चत्वारि वर्द्धन्ते आयुः कीर्तियशोबलम्॥२॥ दीर्घायु धनवान् पुत्रवान् लक्ष्मीवान् भव॥ यस्यस्मृत्येति विष्णुः स्मरणम्॥ यस्यमृत्या च नामोक्त्या तपोयज्ञ क्रियादिषु । न्यूनं सम्पूर्णतां यातु सद्योवन्देतमच्युतम्॥

**अभिवादनः**– वृद्धान् गुरून् चाभिवादयामि ।

यथाशक्त्या ब्राह्मण भोजन संकल्पः॥ वंशपात्राणां सप्तधान्य प्रपूरितानां सहकाञ्चनानां दानं कांस्यपात्रे हिरण्याज्ययुते स्वमुखं विलोकयेत् । पात्रं विप्राय दद्यात्॥

**शिव रहस्ये जन्मदिन निर्णयः**–खंडनं नखकेशानां मैथुनाध्वागमौ तथा । आमिषं कलहं हिंसां वर्ष वृद्धौ विवर्जयेत्॥ जन्मनक्षत्र

संक्रान्तौ श्राद्धे जन्मदिने तथा । अस्पर्शास्पर्शने चैव न स्नानमुष्ण वारिणा ॥१॥ कृतांत कुजयोवरि यस्य जन्मतिथिर्भवेत् । अनृक्ष योग संप्राप्तौ विघ्नस्तस्य पदे पदे ॥२॥ तस्य सर्वोषधीस्नानं । गुरुदेवाग्निपूजनम् कार्यं सर्वारिष्ट प्रशांतये । दीपिकायां ॥३॥ जन्मर्क्षयुक्ता यदि जन्ममासे यस्य ध्रुवं जन्मतिथि र्भवेच । भवंति तद्वत्परमे वपानै रुज्य प्रयुक्तानि सुखानि तस्य ॥४॥ इयं तिथ्युदयन्ती ग्राह्या । युगाद्या वर्षवृद्धिश्च पुण्ययोगस्तथा परे । रवेरुदयनीं तेन नक्षत्र तिथि युग्मता । इतिमन्त्रं मुहूर्त व्यापिते पराग्राह्या अन्यथा पूर्वेग्राह्या । इति जन्मदिन कृत्य । अत्र केचिदूर्वा सर्षपाक्षतं हरिद्रागोरोचनादियुतां रक्षापोटके हस्ते बध्नन्ति अन्य ।

**अर्थ:**-केश और नाखून काटना, स्त्रीसंगम, मार्गचलना, मांसभोजन, कलह, हिंसा वर्ष वृद्धि पर न करें ॥१॥ जन्म नक्षत्र, संक्रान्ति, श्राद्ध, और जन्म दिन अस्पृश्य को छूने पर गर्म जल से स्नान न करे ॥२॥ शनिवार और मंगलवार के दिन अशुभ नक्षत्र एवं अशुभयोग होने पर कदम कदम पर विघ्न आते हैं । अतः सर्वोषधि स्नान गुरु, देव, अग्नि पूजन अरिष्ट शान्ति के लिये करे ॥३॥ यदि जन्म दिन जन्मनक्षत्र युत जन्म तिथि हो जन्ममास हो तो सारे सुख रोगयुक्त माने जाते हैं ॥४॥ तिथि नक्षत्र के योग से उदियात तिथि ली जाये ॥ दूर्वा सरसों अक्षत हरिद्रा गोरोचन से युक्त रक्षा पोटली हाथ पर बाँधे)

**॥ इति श्रीजन्मोत्सव पूजनविधिः ॥**

## ❋ ॥ दुर्गा पूजनम् ॥ ❋

**संकल्प:**-अद्येत्यादि० मम अमुक कामना फलप्राप्त्यर्थं श्रीमहाकाली महालक्ष्मी महासरस्वती नवदुर्गा प्रीत्यर्थं यथाशक्त्या यथोपहारेण श्री मंहाकाली महालक्ष्मी महासरस्वती नवदुर्गा पूजनाद्यर्चनमहं करिष्ये। इति संकल्पः ।

## प्रधान पीठ पूजा

प्रधान मण्डलोपरि संपूजयेत्ः-**अक्षतान् गृहीत्वा-**

ॐ पं पूर्वपीठाय नमः । ॐ पं पूर्णपीठाय नमः । ॐ कं कामपीठाय नमः ॥

**प्राच्यांः**- ॐउं उड्यानपीठाय नमः । **आग्नेयांः**- ॐ मां मातृपीठाय नमः । **दक्षिणेः**- ॐ जं जालंधरपीठाय नमः । **नैऋत्येः**- ॐकं कोल्हापुरोपपीठाय नमः । **पश्चिमेः**- ॐपूं पूर्णगिरिपीठाय नमः । **वायव्यांः**- ॐसौं सौहारोपपीठाय नमः । **उत्तरेः**-ॐकं कोल्हा-गिरिपीठाय नमः । **ऐशान्यांः**- ॐ कं कामरूपीठाय नमः । सर्वोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि ॥

**नमस्कारः-दक्षिणे**-ॐगुरवे नमः । ॐपरमगुरवे नमः । ॐपरात्परगुरवे नमः । ॐ परमेष्ठिगुरवे नमः । ॐ गुरुपंक्तये नमः । ॐमातापितृभ्यां । उपमन्यु,नारद,सनक,व्यासादिभ्यो नमः॥

**वामेः**-ॐ गं गणपतये नमः । ॐ दुं दुंर्गायै नमः । ॐ सं सरस्वत्यै नमः । ॐ क्षं क्षेत्रपालाय नमः ॥

## पीठ देवता स्थापनाः-

ॐमं मण्डूकाय नमः । ॐआं आधारशक्यै नमः । ॐमूं मूलप्रकृत्यै नमः । ॐकं कालाग्निरुद्राय नमः ॥

**तदुपरिः**-ॐ आं आदिकूर्माय नमः । ॐ अं अनन्ताय नमः । ॐआं आदिवराहाय नमः । ॐपं पृथिव्यै नमः ॥

**तदुपरिः**-ॐ अं अमृतार्णवाय नमः । ॐ रं रत्नद्वीपाय नमः । ॐहं हेमगिरये नमः । ॐनं नन्दनोद्यानाय नमः । ॐकं कल्पवृक्षाय नमः । ॐ मं मणिभूतलाय नमः । ॐ दं दिव्यमण्डपाय नमः । ॐ सं स्वर्णवेदिकायै नमः । ॐ रं रत्नसिंहासनाय नमः । ॐ धं धर्माय नमः । ॐज्ञां ज्ञानाय नमः । ॐवैं वैराग्याय नमः । ॐ ऐं ऐश्वर्याय नमः ।

**पुनः पूर्वेः**-ॐअं अनैश्वर्याय नमः ।

**पुनर्मध्ये:**–ॐ सं सत्त्वाय नमः । ॐ प्रं प्रबोधात्मने नमः । ॐ रं रजसे नमः । ॐ प्रं प्रकृत्यात्मने नमः । ॐ तं तमसे नमः । ॐ मं मोहात्मने नमः । ॐ सों सोममंडलाय नमः । ॐ सूं सूर्यमण्लाय नमः । ॐवं वह्निमण्डलाय नमः । ॐ मां मायातत्त्वाय नमः । ॐविं विद्यातत्त्वाय नमः । ॐ शं शिवतवाय नमः । ॐब्रं ब्रह्मणे नमः । ॐ मं महेश्वराय नमः । ॐ आं आत्मने नमः । ॐ अं अन्तरात्मने नमः । ॐ पं परमात्मने नमः । ॐ जं जीवात्मने नमः । ॐ ज्ञं ज्ञानात्मने नमः । ॐ कं कन्दाय नमः । ॐ नं नीलाय नमः । ॐ पं पद्माय नमः । ॐमहापद्माय नमः । ॐ रं रत्नेभ्यो नमः । ॐ कें केसरेभ्यो नमः । ॐ कं कर्णिकायै नमः ॥

सर्वोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि ॥

## ॥ प्रधान कलश स्थापनम् ॥

**अथकलश स्थापन मंत्र:**–ॐभूरसि भूमिरस्य दितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री ॥ पृथिवीयच्छ पृथिवीन्द्र ठँ ह पृथिवीम्माहिर्ठ सी: ॥ **इति भूमिं स्पृष्ट्वा** ॥ ॐधान्यमसि धिनुहि देवान् प्राणाय त्वोदानाय त्वा व्यानाय त्वा । दीर्घामनु प्रसितिमायुषे धां देवो वः सविता हिरण्यपाणि: प्रतिगृभ्णात्वच्छिद्रेण पाणिना चक्षुषे त्वा महीनां पयोसि ॥**इति यवान्निक्षिप्य** ॥ ॐआजिघ्र कलशं मह्या त्वा व्विशंत्विन्दवः । पुनरुर्ज्जा निवर्त्तस्व सा नः सहस्रं धुक्ष्वोरुधारा पयस्वती पुनर्म्माऽऽविशताद्रयिः ॥ **इति कुम्भ स्थापयेत्** ॥ ॐवरुणस्योत्तं भनमसि व्वरुणस्यस्कं भसर्जनीस्त्थो व्वरुणस्यऋृत सदन्यसि व्वरुणऋृतसदनमसि व्वरुणस्य ऋृत सदनमासीद ॥ **इति जलं प्रपूर्य** ॥ ॐत्वां गन्धर्वाऽ अखनँस्त्वा मिन्द्रस्त्वां बृहस्पतिः । त्वामोषधे सोमो राजा विद्वान् यक्ष्मा दमुच्यत ॥ **इति गन्धम्** ॥ ॐयाऽओषधी: पूर्वाजाता देवेभ्यस्त्रियुगं पुरा । मनै नु बभ्रूणामह छं शतं धामानि सप्त च ॥ **इति सर्वोषधी**

**प्रक्षेपः** ॥ ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि ॥ एवानो दूर्वे प्रतनुसहस्रेण शतेन च ॥ **इति दूर्वाः** ॥ ॐ अश्वत्थे वो निषदनं पर्णे वो व्वसतिष्कृता । गोभाजऽइत्किला सथयत्सनवथ पुरुषम् ॥ **इति पंचपल्लवान्** ॥ स्योना पृथिविनो भवानृक्षरा निवेशनी । यच्छा नः शर्म सप्रथाः ॥ **इति मृत्तिकाप्रक्षेपः** ॥ ॐ याः फलिनीर्या ऽअफलाऽ अपुष्पायाश्च पुष्पिणीः । बृहस्पति प्रसूतास्तानो मुंचन्त्वक्रय हसः ॥ **इति पूगीफलम् प्रक्षेपः** ॥ ॐ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत् । स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥ **इति हिरण्यम्** ॥ ॐपरिवाजपतिः कविरग्निर्हव्या न्यक्रमीत् । दधद्रत्नानि दाशुषे ॥ **इति पंचरत्नानि प्रक्षेपः** ॥ ॐ सुजातो ज्योतिषा सहशर्म व्वरूथमासदत्स्वः । वासो अग्ने विश्वरूपꣳ संव्ययस्व विभावसो ॥ **इति मंत्रेण सूत्रवेष्टनम्** ॥ ॐ पूर्णा दर्वि परा पत सुपूर्णा पुनरा पत ॥ व्वस्नेवव्विक्रीणा वहाऽइषमूर्ज ꣳ शतक्रतो ॥ **इति तण्डुल पूर्णपात्रम् निधाय** ॥

ॐमनो जूतिर्ज्जुषतामाज्यस्य बृहस्पतिर्य्यज्ञमिमन्तनोत्वरिष्टं यज्ञ ꣳ समिमन्दधातु । विश्वे देवासऽइह मादयन्तामो ३ँ॥ म्प्रतिष्ठ ॥ **इति मंत्रेण प्रतिष्ठा कार्या** ॥

## ✦✦ ॥ यंत्रस्थदेवता पूजनम् ॥ ✦✦

पूर्णपात्रोपरि यंत्रं स्थापयेत् (यंत्राभावे रक्तवस्त्रोपरि यंत्रं विलिख्य)

**बिन्दुमध्ये**:-ऐं ह्रीं क्लीं चामुण्डायै विच्चे श्री महाकाली महालक्ष्मी महासरस्वती स्वरूपिण्यै त्रिगुणात्मिकायै भगवत्यै दुर्गादेवतायै नमः। आवाहयामि स्थापयामि ॥

**बिंदोः परितः**-ॐगुरवे नमः । ॐपरमगुरवे नमः । ॐपरात्परगुरवे नमः । ॐ परमेष्ठिगुरवे नमः ।

ॐ **तत्रैव**:-ॐऐं हृदयाय नमः । ॐह्रीं शिरसे नमः । ॐक्लीं

शिखायै नमः । ॐ चामुण्डायै कवचाय नमः । ॐविच्चे नेत्रत्रयाय नमः । ॐऐं ह्रीं क्लीं चामुण्डायै विच्चे अस्त्राय नमः ।

**त्रिकोण स्वाग्रादिप्रादक्षिण्ये क्रमेण:**–ॐ स्वरया सह विधात्रे नमः । ॐ श्रिया सह विष्णवे नमः । ॐउमया सह शिवाय नमः । **दक्षिणे:**–ॐक्षुं सिंहाय नमः । **वामे:**–ॐहुं महिषाय नमः ।

**षट्कोणे:**–(अग्नीशासुरवायव्ये मध्ये दिक्षुच)ॐऐं नन्दजायै नमः । ॐह्रीं रक्तदन्तिकायै नमः । ॐ क्लीं शाकम्भर्यै नमः । ॐ दुं दुर्गायै नमः । ॐ हुं भीमायै नमः । ॐ ह्रीं भ्रामर्यै नमः ।

**अष्टदले:**–(स्वाग्रादि प्रादक्षिण्ये क्रमेण):–ॐ ऐं ब्राह्म्यै नमः । ॐ ह्रीं माहेश्वर्यै नमः । ॐक्लीं कौमार्यै नमः । ॐ ह्रीं वैष्णव्यै नमः । ॐहुं वाराह्यै नमः । ॐ क्ष्यौं नारसिंह्यै नमः । ॐ लं ऐन्द्र्यै नमः । ॐस्फ्रें चामुण्डायै नमः ।

**मध्येचतुर्विंशतिदले:**–ॐविं विष्णुमायायै नमः । ॐ चें चेतनायै नमः । ॐबुं बुद्ध्यै नमः । ॐ निं निद्रायै नमः । ॐक्षुं क्षुधायै नमः । ॐछां छायायै नमः । ॐशं शक्तये नमः । ॐतृं तृष्णायै नमः । ॐ क्षां क्षान्त्यै नमः । ॐजां जात्यै नमः । ॐ लं लज्जायै नमः । ॐशां शान्त्यै नमः । ॐ श्रं श्रद्धायै नमः । ॐकां कान्त्यै नमः । ॐ लं लक्ष्म्यै नमः । ॐधृं धृत्यै नमः । वृं वृत्यै नमः । ॐश्रुं श्रुत्यै नमः । ॐ स्मृं स्मृत्यै नमः । ॐ दं दयायै नमः । ॐ तुं तुष्ट्यै नमः । पुं पुष्ट्यै नमः । ॐ मां मातृभ्यो नमः । ॐ भ्रां भ्रान्त्यै नमः ।

**भूपुरे कोणचतुष्ठये आग्नेयादिक्रमेण:**–ॐगं गणपतये नमः । ॐ क्षं क्षेत्रपालाय नमः । ॐ वं बटुकाय नमः । ॐ यां योगिन्यै नमः ।

**भूपुरे पूर्वादि क्रमेण:**–ॐइन्द्राय नमः । ॐअग्नये नमः । ॐयमाय नमः । ॐनिर्ऋत्यै नमः । ॐवरुणाय नमः । ॐ वायवे नमः ।

ॐ सोमाय नमः । ॐईशानाय नमः । ॐब्रह्मणे नमः । ॐअनन्ताय नमः ।

**बाह्ये**:–ॐ व्रजाय नमः । ॐ शक्तये नमः । ॐ दंडाय नमः । ॐखड्गाय नमः । ॐपाशाय नमः । ॐ अंकुशाय नमः । ॐ गदायै नमः । ॐत्रिशूलाय नमः । ॐ पद्माय नमः । ॐ चक्राय नमः ।

कलशाद्बहिः–(मूलेन सर्वत्र) ॐ कादम्बर्यै नमः । ॐ उत्कायै नमः । ॐ कराल्यै नमः । ॐ रक्ताक्ष्यै नमः ।ॐ श्वेताक्ष्यै नमः । ॐहरिताक्ष्यै नमः । ॐयक्षिण्यै नमः । ॐकाल्यै नमः । ॐसुरज्येष्ठायै नमः । ॐ सर्पराज्ञ्यै नमः । ॐ यंत्रस्थदेवताभ्यो नमः । मूलेन संपूजयेत् ॥

## ✧✧ ॥ प्रधान पूजा ॥ ✧✧

**ध्यानम्**:–खड्गं चक्रगदेषुचापपरिघाञ्छूलं भुशुण्डीं शिरः
शंखं संदधतीं करैस्त्रिनयनां सर्वांगभूषावृताम् ।
नीलाश्मद्युतिमास्यपाददशकां सेवे महाकालिकाम्
यामस्तौत्स्वपिते हरौ कमलजो हन्तुं मधुं कैटभम् ॥१॥
अक्षस्त्रक्परशुं गदेषुकुलिशं पद्मं धनुष्कुण्डिकाम्
दण्डं शक्तिमसिं च चर्म जलजं घण्टां सुराभाजनम्
शूलं पाशसुदर्शने च दधतीं हस्तैः प्रसन्नाननाम्
सेवे सैरिभमर्दिनीमिह महालक्ष्मीं सरोजस्थिताम् ॥२॥
घण्टाशूलहलानि शंखमुसले चक्रं धनुः सायकं
हस्ताब्जैर्दधतीं घनान्तविलसच्छीतांशुतुल्यप्रभाम्
गौरीदेहसमुद्भवां त्रिजगतामाधारभूतां महा-
पूर्वामत्र सरस्वतीमनुभजे शुंभादिदैत्यार्दिनीम् ॥३॥

**इदमत्रादिपूजा**:– ॐनंदायै नमः । ॐ रक्तदंतिकायै नमः । ॐ शाकम्भर्यै नमः । ॐ दुर्गाभीमायै नमः । ॐ भ्रामर्यै

नमः । ॐ कालिकायै नमः । ॐ शिवदूत्यै नमः । ॐ महाकाल्यै नमः । ॐ महालक्ष्म्यै नमः । ॐ महासरस्वत्यै नमः । ॐ ब्रह्मणे नमः । ॐ विष्णवे नमः । ॐ रुद्राय नमः ।

**आवाहनः**–ॐसहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् । सभूमिꣳ सर्वत स्पृत्वाऽत्यतिष्ठद्दशाङ्गुलम् ॥ कल्याण जननीं सत्यां कामदां करुणाकराम् । अनंत शक्ति संपन्नां दुर्गामावाम्यहम् । श्री दुर्गादेव्यै नमः आवाहनं समर्पयामि ॥

**आसनम्**:–ॐपुरुषऽ एवेदꣳ सर्वं यद्भूतं यच्चभाव्यम् । उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ दुर्गे देवि सुरेशानि ज्ञान मार्ग प्रदे शिवे । आसनं मणि भूषाणां गृहाणत्वं सुरेश्वरि । ॐभगवत्यै श्री दुर्गादेव्यै नमः आसनं समर्पयामि ॥

**पाद्यम्**:–ॐएतावानस्य महिमातो ज्यायाँश्च पूरुषः । पादोस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥ कल्याणि मे महादुर्गे चामुण्डे शंकर प्रिये । पाद्यं गृहाण देवेशि भद्रकालि नमोऽस्तुते । ॐभगवत्यै श्री दुर्गादेव्यै नमः पाद्यं समर्पयामि ॥

**अर्घ्यम्**:–ॐत्रिपादूर्ध्वऽउदैत्पुरुषः पादोस्येहाभवत् पुनः । ततो विष्वङ् व्यक्रामत्साशनानशने अभि ॥ जगत्पूज्ये त्रिलोकेशि सर्वदा नवभंजिनि । अष्टांगार्घ गृहाणत्वं देवि विश्वार्तिहारिणि । ॐभगवंत्यै श्री दुर्गादेव्यै नमः अर्घं समर्पयामि ॥

**आचमनम्**:–ॐततो विराडजायत विराजो अधि पूरुषः । स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥ ॐभगवत्यै श्री दुर्गादेव्यै नमः आचमनीयं समर्पयामि ।

**मधुपर्कः**–ॐयन्मधुनो मधव्यं परम ꣳ रूपमन्नाद्यम् । तेनाऽहं मधुनो मधव्येन परमेण रूपमन्नाद्येन परमो मधव्योऽन्नादोऽसानि ॥ ॐभगवत्यै श्री दुर्गादेव्यै नमः मधुपर्कं समर्पयामि । मधुपर्कान्ते आचमनीयं समर्पयामि ॥

**जलस्नानम्**:–ॐवरुणस्योत्तं भनमसि व्वरुणस्यस्कं भसर्जनीस्त्थो व्वरुणस्यऋत सदन्यसि व्वरुणऋतसदनमसि व्वरुणस्य ऋत सदनमासीद ॥ ज्ञानमूर्ति भद्रकालि दिव्यमूर्ति सुरेश्वरि । स्नानं गृहाण देवेशि तीर्थोदक विभूषिणि । ॐभगवत्यै श्री दुर्गादिव्यै नमः स्नानं समर्पयामि ॥

**पयः स्नानम्**:–ॐ पयः पृथिव्यां पयओषधीषु पयोदिव्यं तरिक्षेपयोधाः । पयस्वतीः प्रदिशः संतुमह्यम् ॥ काम धेनु समुत्पन्नं सर्वेषां जीवनं परम् । पावनं यज्ञहेतुश्च पयः स्नानार्थमर्पितम् ॥ ॐभगवत्यै श्री दुर्गादिव्यै नमः पयः स्नानं समर्पयामि । पयः स्नानान्ते शुद्धोदकस्नानं समर्पयामि ॥

**दधिस्नानम्**:–ॐदधिक्राव्णो अकारिषंजिष्णोरश्वस्य वाजिनः । सुरभिनो मुखाकरत्प्रणऽ आयू ᳪं षितारिषत् ॥ पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम् । दध्यानीतं मया देव स्नानार्थं प्रतिगृह्यताम् ॥ ॐभगवत्यै श्री दुर्गादिव्यै नमः दधिस्नानं समर्पयामि । दधिस्नानान्ते शुद्धोदकस्नानं समर्पयामि ॥

**घृतस्नानम्**:–ॐ घृतं घृतपावानः पिवतवसां वसा पावानः पिबतांतरिक्षस्य हविरसि स्वाहा ॥ दिशः प्रदिशऽआदिशो विदिश ऽ उद्दिशोदिग्भ्यः स्वाहा ॥ नवनीतसमुत्पन्नं सर्वसंतोषकारकम् । घृतं तुभ्यं प्रदास्यामि स्नानार्थं प्रतिगृह्यताम् ॥ ॐभगवत्यै श्री दुर्गादिव्यै नमः घृतस्नानं समर्पयामि । घृतस्नानान्ते शुद्धोदकस्नानं समर्पयामि ॥

**मधुस्नानम्**:–ॐमधुव्वाताऋतायते मधुक्षरंति सिंधवः माध्वीर्नः सन्त्वोषधीः ॥ मधुनक्तमुतोषसो मधुमत्पार्थिव ᳪंरजः । मधुद्यौरस्तु नः पिता ॥ मधुमान्नो वनस्पतिर्मधुमाँ२ अस्तु सूर्यः माध्वीर्गावो भवन्तु नः ॥ तरुपुष्पसमुद्भूतं सुस्वादु मधुरं मधु । तेजः पुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम् ॥ ॐभगवत्यै श्री दुर्गादिव्यै नमः

मधुस्नानं समर्पयामि । मधुस्नानान्ते शुद्धोदकस्नानं समर्पयामि ॥

**शर्करास्नानम्ः**–ॐ अपाᳯं रसमुद्वय सᳯं सूर्येसंत ᳯं समाहितम् ॥ अपाᳯं रसस्यवो रसस्तंवो गृह्णाम्युत्तममुपयाम गृहीतोसीन्द्रा यत्वाजुष्टं गृह्णाम्येष ते योनिरिंद्राय त्वा जुष्टतमम् ॥ इक्षुसारसमुद्भूता शर्करा पुष्टिकारिका । मलापहारिका दिव्या स्नानार्थं प्रतिगृह्यताम् ॥ ॐभगवत्यै श्री दुर्गादेव्यै नमः शर्करास्नानं समर्पयामि । शर्करास्नानान्ते शुद्धोदकस्नानं समर्पयामि ॥

**पञ्चामृतस्नानम्ः**–ॐ पंचनद्यः सरस्वती मपियंति सस्त्रोतसः । सरस्वतीतु पंचधासो देशे भवत्सरित् ॥ पयो दधि घृतं चैव मधु च शर्करायुतम् । पञ्चामृतं मयाऽऽनीतं स्नानार्थं प्रतिगृह्यताम् ॥ ॐभगवत्यै श्री दुर्गादेव्यै नमः पञ्चामृतस्नानं समर्पयामि । पञ्चामृतस्नानान्ते शुद्धोदकस्नानं समर्पयामि ॥

**गन्धोदकस्नानम्ः**–ॐगन्धद्वारां दुराधर्षां नित्यपुष्टाङ्करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोपह्वयेश्रियम् ॥ ॐ अᳯं शुनाते अᳯं शुः पृच्यतां परुषा परुः । गन्धस्ते सोममवतु मदाय रसो अच्युतः ॥ ॐभगवत्यै श्री दुर्गादेव्यै नमः गन्धोदकस्नानं समर्पयामि । गन्धोदकस्नानान्ते शुद्धोदकस्नानं समर्पयामि ॥

**शुद्धोदकस्नानम्ः**–ॐशुद्धवालः सर्वशुद्धवालो मणिबालस्तऽ आश्विनाः श्वेतः श्वेताक्षोरुणस्ते रुद्राय पशुपतयेकर्णयामाऽ अवलिप्ता रौद्रानभोरूपाः पार्ज्जन्याः ॥ ॐभगवत्यै श्री दुर्गादेव्यै नमः शुद्धोदकस्नानं समर्पयामि। आचमनीयं जलं समर्पयामि॥

**अभिषेकम्ः–पञ्चोपचारैः सम्पूज्य** अभिषेकार्थम् पात्रे गंधपुष्पदुग्धजलैः अभिषेकं कुर्यात् ॥ अभिषेक समये देव्यथर्वशीर्षं श्री सूक्तं देवीसूक्तं वा पठेत् ॥

पुनः शुद्धोदकस्नानं समर्पयामि ॥

**वस्त्रोपवस्त्रम्**:–ॐतस्माद्यज्ञात्सर्वहुतः सम्भृतं पृषदाज्यम् । पशूँस्ताँश्चक्रे वायव्यानारण्या ग्राम्याश्चये ॥

यत्स्वच्छंमहार्हंतु पट्टसूत्रे विनिर्मिते । गृहाण शुभगे देवि पट्टकूल सुरार्चिते ।ॐभगवत्यै श्री दुर्गादिव्यै नमः वस्त्रोपवस्त्रं समर्पयामि ॥

(कंघा, सुरमा, अलङ्कार, कर्णभूषण,हार, अँगूठी, कटिभूषण, नूपुर, मुकुट, इत्यादि भगवती के अर्पण करे)

**अलंकारान्**:– सुरासुर शिरो रत्न निघृष्ट चरणांबुजे । अलंकारान् गृहाणत्वं नाना रत्न विभूषितान् । ॐभगवत्यै श्री दुर्गादिव्यै नमः अलंकारान् समर्पयामि ॥

ॐभगवत्यै श्री दुर्गादिव्यै नमः केशपाश संस्करणं समर्पयामि ॥

ॐभगवत्यै श्री दुर्गादिव्यै नमः सौवीराञ्जनं (सुरमा) समर्पयामि ॥

ॐभगवत्यै श्री दुर्गादिव्यै नमः हस्तयोः कङ्कणे समर्पयामि ॥

ॐभगवत्यै श्री दुर्गादिव्यै नमः कर्णयोः कुण्डले समर्पयामि ॥

ॐभगवत्यै श्री दुर्गादिव्यै नमः कण्ठे ग्रैवेयकं समर्पयामि ॥

ॐभगवत्यै श्री दुर्गादिव्यै नमः बाह्वोः अङ्गदे समर्पयामि ॥

ॐभगवत्यै श्री दुर्गादिव्यै नमः करयोरङ्गुलिमुद्रिकां समर्पयामि ॥

ॐभगवत्यै श्री दुर्गादिव्यै नमः कटिदेशे काञ्चीं समर्पयामि ॥

ॐभगवत्यै श्री दुर्गादिव्यै नमः पादयोः नूपुरे समर्पयामि ॥

ॐभगवत्यै श्री दुर्गादिव्यै नमः शिरसि मुकुटं समर्पयामि ॥

**चन्दनम्**:–ॐत्वां गन्धर्वा ऽ अखनँस्त्वामिन्द्रस्त्वां बृहस्पतिः । त्वामोषधे सोमो राजा विद्वान् यक्ष्मा दमुच्यत ॥ श्रीखण्डं शीतलं शुभ्रं मांगल्यं सुखवर्धनं । गृहाणार्घं मया दत्तं श्रीखंडंव्रत हेतवे ।ॐ भगवत्यै श्री दुर्गादिव्यै नमः श्री खण्डं चदनं समर्पयामि ॥

**गन्धम्**:–ॐगन्धद्वारां दुराधर्षां नित्यपुष्टाङ्करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोपह्वयेश्रियम् ॥ श्रीखण्डागरुकर्पूर रोचनाभिश्च

संयुतम् । गृहाण गंधं देवेशि सर्व काम फलप्रदम् । ॐ भगवत्यै श्री दुर्गादिव्यै नमः गंधं समर्पयामि ॥

**कुङ्कुमम्**:–कुंकुमं कान्तिदं देवि कुंकुमं काम रुपिणम् । अखंड काम सौभाग्यं कुंकुमं प्रति गृह्यताम् । ॐ भगवत्यै श्री दुर्गादिव्यै नमः कुंकुमं समर्पयामि ॥

**सिन्दूरम्**:–ॐसिन्धूरिव प्राध्वने शूघनासो वातप्रमियः पतयन्ति यह्वाः । घृतस्य धारा अरुषो न व्वाजी काष्ठा भिन्दन्नूर्मिभिः पिन्वमानः॥ सिंदूरं शोभनं रक्तं रजकं सुमनोहरं । कामदं काम जननं सिंदूरं प्रतिगृह्यताम् ॥ ॐ भगवत्यै श्री दुर्गादिव्यै नमः सिन्दूरं समर्पयामि ॥

**अक्षतान्**:–ॐअक्षन्नमीमदन्तह्य व प्रियाऽ अधूषत । अस्तोषतस्व भानवो विप्रान विष्ठ्या मती योजान्विन्द्रते हरिः ॥ अक्षताश्च सुरश्रेष्ठे कुंकुमाक्ताः सुशोभनाः । मया निवेदिताः भक्त्या गृहाण परमेश्वरि । ॐ भगवत्यै श्री दुर्गादिव्यै नमः अक्षतान् समर्पयामि ॥

**कज्जलम्**:–चक्षुर्भ्यां कज्जलं रम्यं सुभगे ! शान्तिकारके । कर्पूरज्योतिरुत्पन्नं गृहाण परमेश्वरी ॥ ॐ भगवत्यै श्री दुर्गादिव्यै नमः कज्जलं समर्पयामि ॥

**सुगन्धितेलम्**:–ॐत्र्यम्बकं यजामहेसुगन्धिंपुष्टिवर्द्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षी यमामृतात् ॥ ॐभगवत्यै श्री दुर्गादिव्यै नमः अङ्गेषु विलेपनार्थं सुगन्धितेलं समर्पयामि ॥

**पुष्पमालाम्**:–ॐओषधीः प्प्रतिमोदद्ध्वम्पुष्पवतीः प्रसूवरीः। अश्श्वाऽइवसजित्वरी वीरूधः पारयिष्ण्वः॥ महीबीज महाभागं पुष्पजाति समुद्भवम् । नाना वर्ण समाख्याता पुष्पमाला प्रकीर्तिता। ॐभगवत्यै श्री दुर्गादिव्यै नमः पुष्पमालां समर्पयामि ॥

## ।। अंग पूजा ।।

**अंगपूजा**:–ॐउमायै नमः पादौ पूजयामि ॥ ॐगौर्ये नमः जंघे पूजयामि ॥ ॐपार्वत्यै नमः जानुनी पूजयामि ॥

ॐजगद्धात्र्यै नमः ऊरू पूजयामि ॥ ॐ जगत्प्रतिष्ठायै नमः कटिं पूजयामि ॥ ॐ शान्तिरूपिण्यै नमः नाभिं पूजयामि ॥ ॐ देव्यै नमः उदरं पूजयामि ॥ ॐलोकवन्दितायै नमः स्तनौ पूजयामि ॥ ॐकाल्यै नमः कण्ठं पूजयामि ॥ ॐ शिवायै नमः मुखं पूजयामि ॥ ॐभवान्यै नमः नेत्रे पूजयामि ॥ ॐ रुद्राण्यै नमः कर्णौ पूजयामि ॥ ॐ शर्वाण्यै नमः ललाटं पूजयामि ॥ ॐमंगलदात्र्यै नमः शिरः पूजयामि ॥

**अबीर–गुलालः**–ॐ अहिरिवभोगैः पर्य्येतिवाहुँज्याया हेतिम्परि बाधमानाः । हस्तग्घ्नो विश्वाव्वयनुनानि विद्वान्पुमान्पुमाꣳ सम्परिपातु विश्वतः ॥ रक्तं रसोवसंतेज उत्सवे परमं शुभम् । मस्तके धार्यते देवि रंगे रंगं ददातु माम् । ॐभगवत्यै श्री दुर्गादेव्यै नमः अबीर गुलालं समर्पयामि ॥

**धूपम्**:–ॐ धूरसि धूर्वधूर्वन्तं धूर्वतँ योस्मान्धूर्वतितं धूर्व यं व्वयन्धूर्व्वामः । देवानामसि व्वन्हितमꣳ स्निततमम्पप्रितमञ्जुष्ट तमन्देवहूतमम् ॥ गुग्गुलं घृत संयुक्तं अगरु वास संयुतम् । गृहाण दशांगं धूपं भद्रकालि नमोऽस्तुते । वनस्पति रसो दिव्यो गंधाढ्यो गंध उत्तमः । आघ्रेयः सर्व भूतानां धूपोऽयं प्रति गृह्यताम् । ॐभगवत्यै श्री दुर्गादेव्यै नमः धूपं समर्पयामि ॥

**दीपम्**:–:–ॐ चन्द्रमाऽअप्स्वन्तरा सुपर्णो धावते दिवि । रयिं पिशङ्गं बहुलं पुरुस्पृहꣳ हरिरेति कनिक्रदत् ॥ ॐअग्निर्ज्ज्योति ज्ज्योतिरग्निः स्वाहा सूर्य्योज्ज्योतिर्ज्योतिः सूर्य्यः स्वाहा । अग्निर्वर्चोज्ज्योतिर्वर्चः स्वाहा सूर्य्यो व्वर्चोज्ज्योतिर्वर्चः स्वाहा। ज्योतिः सूर्य्यः सूर्य्योज्ज्योतिः स्वाहा ॥ रक्त सूत्र लसद्वर्ति गो घृतेन च पूरितं । दीपं गृहाण देवेशि नमः त्रैलोक्य सुन्दरि । दीपस्तमोनाशयति दीपः कांतिं प्रयच्छति । तस्माद्दीप प्रदानेन

प्रीयतां परमेश्वरि । ॐभगवत्यै श्री दुर्गादिव्यै नमः दीपं समर्पयामि । हस्तौ प्रक्षाल्य ॥

**नैवेद्यम्ः**–ॐ अन्नपतेन्नस्य नो देह्यनमीवस्य शुष्मिणः । प्रप्र दातारं तारिषऽऊर्जं नो धेहि द्विपदे चतुष्पदे ॥ दिव्यान्नं रस संपुष्टं नाना भक्ष्यैस्तु संस्तुतम् । चोह्य लेह्य समायुक्तमन्नं देवि गृहाणमे । अत्र चंदन गंध पुष्प धूप दीप नैवेद्यंवः स्वाहा । ॐ प्राणाय स्वाहा । ॐ अपानायस्वाहा । ॐ व्यानाय स्वाहा । ॐ उदानाय स्वाहा । ॐ समानाय स्वाहा । ॐ परमात्मने स्वाहा । मध्ये गंगाजलं समर्पयामि । नैवेद्यांते आचमनीयं समर्पयामि ॥

**ऋतुफलम्ः**–ॐया: फलिनीर्याऽअफलाऽ अपुष्पायाश्च पुष्पिणीः । बृहस्पति. प्रसूतास्तानो मुंचन्त्वᳬहसः ॥ पुष्पं पत्रं फलं तोयं रत्नानि विविधानि च । गृहाणार्घ्यं मया दत्तं देहि मे वांछितं फलं । ॐभगवत्यै श्री दुर्गादिव्यै नमः फलं समर्पयामि ॥ आचमनीयं जलं समर्पयामि ॥

**पूगीफल–ताम्बूलम्ः**–मुख वासार्थे ताम्बूलम् ॥ ॐ यत्पुरुषेण हविषा देवा यज्ञ मतन्न्वत । व्वसन्तोस्या सीदाज्यं ग्रीष्मऽ इध्मः शरद्धविः ॥ गृहाण देवि तांबूलं कर्पूरेण सुवासितं । पूगीफल समायुक्तं स्वर्णेन स्वादितं तथा । भगवत्यै श्री दुर्गादिव्यै नमः ताम्बूलं समर्पयामि ॥

**दक्षिणाः**–ॐ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत् । स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥ भगवत्यै श्री दुर्गादिव्यै नमः द्रव्यदक्षिणां समर्पयामि ॥

**श्रीफलम्ः**–ॐश्रीश्चते लक्ष्मीश्चपत्क्य्रा बहोरात्रे पार्श्वे नक्षत्राणिरूपमश्विनौ ऽव्यात्तम् । इष्णन्निषाणां मुम्मऽइषाण सर्वलोकम्मऽइषाण ॥ रूपं देहि जयं देहि भाग्यं भवति देहि मे । पुत्रं देहि धनं देहि सर्व कामांश्च देहि मे । भगवत्यै श्री

दुर्गादिव्यै नमः श्रीफलं समर्पयामि ॥

**फलार्घ्यम्**:–रूपं देहि जयं देहि भाग्यं भवति देहि मे । पुत्रां देहि धनं देहि सर्व कामांश्च देहि मे । ॐभगवत्यै श्री दुर्गादिव्यै नमः फलार्घ्यं समर्पयामि ॥

**आरती**:–ॐइदथ्ठं हविः प्रजननम्मेऽअस्तुदशवीरथ्ठं सर्वगणथ्ठं स्वस्तये । आत्मसनि प्रजासनि पशुसनि लोकसन्न्यभयसनि अग्निः प्रजाम्बहुलाम्मे करोत्वन्नम्पयोरेतोऽस्मासुधत्त ॥ मंगले कालिके देवि महिषासुरसूदिनी । नीराजनं मया दत्तं गृहाणेश्वरि सुन्दरि । मंगलं भगवान् विष्णुः मंगलं गरुडध्वजः । मंगलं पुंडरीकाक्षः मंगलायतनो हरिः । सर्व मंगल मांगल्ये शिवे सर्वार्थ साधिके । शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तुते । भगवत्यै श्री दुर्गादिव्यै नमः आरार्तिकं समर्पयामि ॥

जल आरार्तिकं समर्पयामि ॥

**प्रार्थना**:–मुखे ते ताम्बूलं नयनयुगले कज्जलकला ।
ललाटे काश्मीरं विलसति गले मौक्तिकलता ॥
स्फुरत्काञ्ची शाटी पृथुकटितटे हाटकमयी ।
भजामस्त्वां गौरीं नगपति किशोरीमविरतम् ॥

## ॥ प्राचीन ध्यानम् ॥

१–खड्गं चक्रगदेषुचापपरिघाञ्छूलं भुशुण्डीं शिरः
शंखं संदधतीं करैस्त्रिनयनां सर्वांगभूषावृताम् ।
नीलाश्मद्युतिमास्यपाददशकां सेवे महाकालिकाम्
यामस्तौत्स्वपिते हरौ कमलजो हन्तुं मधुं कैटभम् ॥१॥

२–अक्षस्त्रक्परशुं गदेषुकुलिशं पद्मं धनुष्कुण्डिकाम्
दण्डं शक्तिमसिं च चर्म जलजं घण्टां सुराभाजनम्
शूलं पाशसुदर्शने च दधतीं हस्तैः प्रसन्नाननाम्
सेवे सैरिभमर्दिनीमिह महालक्ष्मीं सरोजस्थिताम् ॥२॥

३–वामे कर्णे मृगांकं प्रलय परिणतं दक्षिणे सूर्यबिम्बं
कंठे नक्षत्रमालां परिविकटजटा जूटके केतु मालाम् ।
स्कंधेबद्धोरगेन्द्रं ध्वजनिकरयुतं ब्रह्मकंकालमाला।
हुंकारि कालरात्रि परिहरतु भयं भद्रदा भद्रकाली ॥३॥
४–नान्यं भजामि वरदे न च वर्णयामि
नान्यं स्मरामि कमपीह नरं परं वा
वाञ्छाऽतिरिक्तफलदे त्रिपुरेति नाम
मातर्हृदिस्फुरतु मे कुलकामधेनुः ॥४॥
५–घण्टाशूलहलानि शंखमुसले चक्रं धनुः सायकं
हस्ताब्जैर्दधतीं घनान्तविलसच्छीतांशुतुल्यप्रभाम्
गौरीदेहसमुद्भवां त्रिजगतामाधारभूतां महा–
पूर्वामत्र सरस्वतीमनुभजे शुंभादिदैत्यार्दिनीम् ॥५॥
६–सन्मूर्छन्मधुकैटभाय महिषोन्मादाय गौरी वपु
र्भूता यक्षतु दुष्ट दूत वससे धूम्रेक्षणादिच्छिदे ।
सासृग्बीजनिशुम्भशुम्भमथिनी विश्वस्तुता यार्पिता
क्ष्माभृद् वैश्य फलायभैरविभवद् रूपाय तस्मै नमः ॥६॥
७–या माया मधुकैटभ प्रमथिनी या माहिषोन्मूलिनी
या धूम्रेक्षण चण्डमुण्ड मथिनी या रक्तबीजाशिनी ।
शक्तिः शुम्भनिशुंभ दैत्य दलिनी या सिद्धलक्ष्मी परा
साऽ दुर्गा नवकोटि शक्ति सहिता मां पातु विश्वेश्वरी ॥७॥
८–मुण्डं विश्वस्य कर्तुः कर कमल तले धारयन्तीं पिबन्तीं
नाऽहं तृप्ता वदन्तीं सकलजन चयं भक्षयंतीं सदैव ।
श्यामां विष्णुं गिरीशं त्वरिकुलमथिनी दौर्भिरीड्यैवृतांसि
वंदेऽहं भद्रकालीं नवतनु विशदां प्रेतमध्या सनस्थाम् ॥८॥
९–मुक्ता फलैः कुंकुम पाटलानां सन्ध्येवतारामलकैर्विभाति ।
या मूलपीठा चलचूलिकायां त्वामेक वीरां शरणं प्रपद्ये ॥९॥
१०–मातर्मे मधुकैटभारि हृदये प्राणापहारोद्यमे

हेलालंबित धूम्रलोचन वधे हे चण्डमुण्डार्दिनी ।
नि: शेषी कृत रक्तबीज निलये नित्ये निशुंभावहे
शुंभध्वंसि निशुंभराज दुरिते दुर्गे नमस्तेऽम्बिके ॥१०॥
११–ब्रह्माणी कमलेन्दु सौम्यवदना माहेश्वरी शारदा
कौमारी रिपुदर्प नाशनकरी चक्रायुधा वैष्णवी ।
वाराही घनघोर घुर्घुर–रवा चैन्द्री सवज्रायुधा
चामुण्डा गणनाथ रुद्रसहिता रक्षन्तु मां मातर: ॥११॥
१२–या सा रक्ताम्बरधरा या देवी शूल पाणिनी ।
सिंहासन समारूढा सा देवी वरदा ऽस्तु न: ॥१२॥
१३–या श्री पद्मवने कदम्ब शिखरे राजारुहे कुंजरे
श्वेते चाश्व रथे वृषे च धवले राज्ञि च यूपस्थिते ।
शंखे देव कुले नरेन्द्र भुवने गंगातटे गोकुले
सा श्रीस्तिष्ठतु सर्वदा ममगृहे मेरुर्यथा निश्चला ॥१३॥

## ★★ ॥ भैरव नामावली ॥ ★★

**विनियोग:**–अस्य श्री बटुकभैरवाष्टोत्तर शतनाम मन्त्रस्य बृहदारण्यको नाम ऋषि: अनुष्टुब्छंद: श्रीबटुकभैरवो देवता बं बीजं ह्रीं शक्ति: ॐ कीलकं श्री बटुकभैरव प्रीत्यर्थं शत नाम जपे (हवने) विनियोग: ।

**शिरादि न्यास:**– बृहदारण्यक ऋषये नम: शिरसि ॥ अनुष्टुब्छंदसे नम: मुखे ॥ श्रीबटुकभैरवाय नम: हृदये ॥ बं बीजाय नम: गुह्ये ॥ ह्रीं शक्तये नम: पादयो: ॥ ॐ कीलकाय नम: सर्वाङ्गे।

**अथ न्यास:**–

ॐह्रां वां अंगुष्टाभ्यां नम: । ॐ ह्रीं वीं तर्जनीभ्यां नम: । ॐ ह्रुं वुं मध्यमाभ्यां नम: । ॐ ह्रैं वैं अनामिकाभ्यां नम: । ॐ ह्रौं वौं कनिष्ठिकाभ्यां नम: । ॐ ह्र: व: करतलकरपृष्ठाभ्यां नम: ।

**हृदयादिन्यास:**–ॐ ह्रां वां हृदयाय नमः । ॐ ह्रीं वीं शिरसे स्वाहा । ॐ ह्रुं वुं शिखायै वषट् । ॐ ह्रैं वैं कवचाय हुम् । ॐ ह्रौं वौं नेत्रत्रयाय वौषट् । ॐ ह्रः वः अस्त्राय फट् ।
(असितांगो रुरुश्चण्ड क्रोधनुन्मत्त भैरवः । कपाली भीषणश्चैव संहार चाष्टमस्मृतः)

**अथ ध्यानम्:–**

१–क्वाकाशः क्वसमीरण क्वदहन क्वापः क्वविशम्भर । क्वब्रह्मा क्वजनार्दन क्वतरणी क्वेन्दु क्वदेवासुराः ॥१॥

२–कल्पान्ता नटिनं नटः प्रमुदितः श्रीसिद्धियोगेश्वरः । क्रीडा नाटक नायको विजयंते देवो महाभैरवः ॥२॥

३–वंदे बालं स्फटिक सदृशं कुंतलोत्भासि वक्त्रं । दिव्या कल्पैर्नव मणिमयै किंकिणि नूपुराढ्यं ॥ दीप्ता कारंविशद वसनं सुप्रसन्नं महेशं । हस्ताभ्यां वै बटुक मनिशं शूल खड्गौ दधानम् ॥३॥

४–उद्यद्भास्कर सन्निभं त्रिनयनं रक्तांगराग सृजम् । स्मेरास्यं वरदं कपालमभयं शूलं दधानं करैः ॥ नील ग्रीव मुदार भूषणयुतं शीतांशु खण्डो ज्वलम् । बन्धो कारण माशिषं भयहरं देवं सदा भावयेत् ॥४॥

५–ध्याये नीलाद्रि कातं शशि शकलधरं मुण्ड मालं महेशं । दिग्वस्त्रं पिंगकेशं डमरुमथसृणि खड्ग पाशा भयानि ॥ नागं घंटां कपालं कर शिरसि रुहैर्विभ्रतं भीमदंष्ट्रं । सर्पा कल्पं त्रिनेत्रं मणिमय विलसत् किंकिणी नूपुराढ्यं ॥५॥

६–करकलित कपाल कुंडली दण्डपाणिस्त रुणतिमिरनीलो व्याल यज्ञोपवीती । क्रतुसमय सपर्या विघ्नविच्छेद हेतुर्जयति बटुकनाथः सिद्धिदः साधकानाम् ॥६॥

**अथ मंत्र:– ॐ ह्रीं वटुकाय आपदुद्धारणाय कुरु कुरु वटुकाय ह्रीं ॐ ॥**

ॐ भैरवो भूतनाथश्च भूतात्मा भूतभावनः । क्षेत्रज्ञः क्षेत्रपालश्च क्षेत्रदः क्षत्रियो विराट् ॥१॥ श्मशान वासी मांसाशी खर्पराशी स्मरांतकृत् । रक्तपः पानपः सिद्ध सिद्धिदः सिद्धि सेवितः ॥२॥ कंकालः कालशमनः कलाकाष्ठातनुः कविः । त्रिनेत्रो बहुनेत्रश्च तथा पिंगललोचनः ॥३॥ शूलपाणिः खड्गपाणिः कंकाली धूम्रलोचनः । अभीरु भैरवी नाथो भूतपो योगिनी पतिः ॥४॥ धनदोऽधनहारी च धनवान् प्रतिभानवान् । नागहारो नागपाशो व्योमकेश कपालभृत् ॥५॥ कालः कपालमाली च कमनीयः कला निधिः । त्रिलोचनो ज्वलन्नेत्रस्त्रिशिखी च त्रिलोकपः ॥६॥ त्रिनेत्रस्तनयो डिम्भः शान्तः शान्तजनप्रियः । बटुको बहुवेशश्च खट्वांगवरधारकः ॥७॥ भूताध्यक्षः पशुपतिर्भिक्षुकः परिचारकः। धूर्तो दिगम्बरः शूरोहरिणः पांडुलोचनः ॥८॥ प्रशांतः शांतिदः सिद्ध शंकरः प्रियबांधवः । अष्टमूर्तिर्निधीशश्च ज्ञान चक्षुस्तपोमयः ॥९॥ अष्टाधारः षडाधारः सर्पयुक्तः शिखीसखः। भूधरो भूधराधीशो भूपतिर्भूधरात्मजः ॥१०॥ कङ्कालधारी मुण्डी च नाग यज्ञोपवीतकः । जृम्भणो मोहनः स्तम्भी मारणः क्षोभणस्तथा ॥११॥ शुद्धो नीलांजनः प्रख्यो दैत्यहा मुण्डभूषितः। बलिभुग् बलिभुङ्नाथो बालो बाल पराक्रमः ॥१२॥ सर्वापत्तारणो दुर्गो दुष्टभूत निषेवितः । कामी कलानिधिः कान्तः कामिनीवशकृद्वशी ॥१३॥ सर्वसिद्धिप्रदो वैद्यः प्रभुर्विष्णु रितीवहि। अष्टोत्तरशतं नाम्नां भैरवस्य महात्मनः ॥१४॥ वाराणस्यां भैरवो देवः संसार भय नाशनः । अनेक जन्म कृतं पापं स्मरणेन विनश्यति ॥१५॥ तीक्ष्ण दंष्ट्र महाकाय कल्पांत दहनोपम । भैरवाय नमस्तुभ्य मनुज्ञां दातु मर्हसि ॥१६॥

इति भैरव नामावली समाप्ता

## ॥ गणपति मंत्र जपविधि ॥

ॐ अस्य श्री वक्रतुण्ड गणपति मंत्रस्य भार्गव ऋषिः अनुष्टुब्छन्दः विघ्नेशो देवता वं बीजं यं शक्तिः हुं कीलकं सर्वाभीष्ट सिद्ध्यर्थे जपे विनियोगः ॥

ॐ भार्गव ऋषये नमः शिरसि ॥ ॐ अनुष्टुब्छन्दसे नमः मुखे ॥ ॐ विघ्नेशो देवतायै नमः हृदि ॥ ॐ वं बीजाय नमः गुह्ये ॥ ॐ यं शक्तये नमः पादयोः ॥ ॐ हुं कीलकाय नमः सर्वांगे ॥ ॐ वं अंगुष्ठाभ्यां नमः ॥ ॐ क्रं तर्जनीभ्यां नमः ॥ ॐ तुं मध्यमाभ्यां नमः ॥ ॐ डां अनाकिाभ्यां नमः ॥ ॐ यं कनिष्ठिकाभ्यां नमः ॥ ॐ हुं करतलकरपृष्ठाभ्यां नमः ॥ ॐ वं हृदयाय नमः ॥ ॐ क्रं शिरसे स्वाहा ॥ ॐ तुं शिखायै वषट् ॥ ॐ डां कवचाय हुं ॥ ॐ यं नेत्रत्रयाय वौषट् ॥ ॐ हुं अस्त्राय फट् ॥

**ध्यानम्ः**–ॐ उद्यद्दिनेश्वर रुचिं निज हस्त पद्मैः पाशांकुशाऽभयवरान्दधतं गजास्यं ॥ रक्तांबरं सकल विघ्न हरं गणेशं ध्यायेत् प्रसन्न मखिला भरणाभिरामम् ॥ "ॐ वं वक्रतुण्डाय हुं" इत्यष्टोत्तर शत जाप्य कृतेन गणपतिः प्रीयतां न मम ॥

## ॥ रुद्र पाठ न्यास–ध्यान विधिः ॥

**विनियोगः**–ॐ अस्य श्री रुद्राध्याय महामन्त्रस्य अघोर शिवऋषिः अमृतानुष्टुब्छन्दः संकर्षण मूर्ति स्वरूपो योसावादित्ये स एष रुद्रो देवता नमस्ते इति बीजं नमः शिवायेति शक्तिः शिवतरायेति कीलकं रुद्राध्याय महामन्त्र जपे (पाठे)विनियोगः ॥

**अथ ऋष्यादि न्यासः**–ॐ अघोरशिव ऋषये नमः शिरसि ॥ ॐअमृतानुष्टुब्छन्दसे नमः मुखे ॥ ॐसंकर्षणमूर्ति स्वरूपो योसावादित्य सएषरूद्रो देवतायै नमः हृदि ॥

ॐ नमस्ते इति बीजं गुह्ये ॥ ॐ नमः शिवायेति शक्तिः पादयोः ॥ॐ शिवतरायेति कीलकं सर्वांगे ॥

**करन्यास:**-ॐअग्निहोत्रात्मने नमः अंगुष्ठाभ्याम् नमः ॥ ॐदर्शपौर्णमासात्मने नमः तर्जनीभ्याम् नमः॥ ॐचातुर्मासात्मने नमः मध्यमाभ्याम् नमः ॥ ॐज्योतिष्टोमात्मने नमः अनामिकाभ्याम् नमः ॥ ॐनिरूढ़पशुबंधात्मने नमः कनिष्ठकाभ्याम् नमः ॥ ॐसर्वकर्तात्मने नमः करतलकर पृष्ठाभ्याम् नमः॥

**हृदयादि न्यास:**-ॐअग्निहोत्रात्मने नमः हृदयाय नमः ॥ ॐदर्शपौर्णमासात्मने नमः शिरसे स्वाहा ॥ ॐचातुर्मासात्मने नमः शिखायै वषट्॥ ॐज्योतिष्टोमात्मने नमः कवचाय हुम् ॥ ॐनिरूढ़पशुबंधात्मने नमः नेत्रत्रयाय वौषट्॥ ॐसर्वकर्तात्मने नमः अस्त्राय फट्

**ध्यानम्:**-आपाताल नभस्थलान्त भुवनं ब्रह्माण्ड माविस्फुरत्,
ज्योतिस्फाटिक लिङ्ग मोलिविलसत् पूर्णेन्दुराका शुभैः॥
अस्तौकाप्लुत मेकमेव मनिशं रुद्रानुवाकाञ्जपन्,
ध्याये दीप्सित सिद्धये धृतपदं विप्रोभिषं चेच्छिवम्॥
ब्रह्माण्डं व्याप्तदेहा हिमभसितरुचा भासमाना भुजङ्गैः,
कण्ठे माला कपर्दा किरिटि च रुचिरा छन्दकोदण्डहस्ताः॥
त्र्यक्षारुद्राक्ष माला प्रकटित विभवाः शाम्भवा मूर्तिभेदाः,
रुद्राः श्रीरुद्रसूक्तं प्रकाटत विभवाः नः प्रयच्छन्तु सौख्यम्॥

## ☆☆॥ श्री शारदोक्त महामृत्युञ्जय जप विधिः॥ ☆☆

श्री गणेशाय नमः प्रातः स्नानादि नित्यकर्म कृत्वा॥ आसनोपविश्य ॥ भूतशुद्धिं प्राणप्रतिष्ठां च कृत्वा ॥ आचमनं प्राणायामम्॥ सुमुखश्चेत्यादि गणपतिं स्मृत्वा॥ आनोभद्रा भद्रसूक्तं पठेत्॥ गणपति पुण्याहवाचनं मातृकापूजनं वसोर्धारायुष्यमन्त्रजपं नान्दीश्राद्धम् आचार्यादि वरणं शिवपूजनं च कृत्वा॥ अत्राद्य मम/यजमानस्य श्री महामृत्युञ्जय प्रसाद सिद्धि द्वारा भूतप्रेतपिशाच

कृत्यादि सकलोपद्रव शान्त्यर्थं तथाच मार्तंडादिग्रह संसूचित संसूचयिष्यमाणाशेषारिष्ट निवारण पूर्वकायुष्याभिवृद्धये (मम यजमानस्य वा शरीरे स्थितस्य अमुक रोगस्य समूल नाशनेन अपमृत्यु निवारणार्थं क्षिप्रमारोग्य प्राप्त्यर्थं विषमस्थान स्थितसकलारिष्ट निवृत्तये श्री महामृत्युञ्जय देवता प्रीत्यर्थम् अमुक संख्यान्तर्गत अमुक संख्याकान् महामृत्युञ्जय जपान् स्वयं ब्राह्मण द्वारा वा अहं करिष्ये (कारयिष्ये) (यजमान के लिए शुभ चिन्तक करिष्यामि बोले ) तथा चादौ निर्विध्नता सिद्धयर्थं गणपति मन्त्रस्य अष्टोत्तरशत संख्याकान् जपानहं करिष्ये ॥ अष्टोत्तरशत गणपति मंत्रं जप्त्वा ॥

ॐ अस्य श्री महामृत्युञ्जय मन्त्रस्य वसिष्ठऋषि: अनुष्टुपछन्द: श्रीत्र्यम्बक रुद्रोदेवता श्रीं बीजं ह्रीं शक्ति: मम/यजमानस्य सर्वारिष्ट निवृत्तिपूर्वक सकलमनोरथसिद्ध्यर्थे जपे विनियोग:॥

**अथ ऋष्यादि न्यास:-** ॐवसिष्ठऋषयेनम: शिरसि ॥ ॐअनुष्टुपछन्दसेनम: मुखे॥ ॐ त्र्यम्बक रुद्रोदेवतायैनम: हृदये॥ ॐश्रीं बीजायनम: गुह्ये॥ ॐह्रीं शक्तये नम: पादयो: ॥

**अथ करन्यास:-**

ॐ हौ ॐ जूंस: भूर्भुव: स्व: त्र्यम्बकं ॐनमो भगवते रुद्राय शूलपाणये स्वाहा **अङ्गुष्ठाभ्यां नम:**॥ ॐ हौ ॐ जूंस: भूर्भुव: स्व: यजामहे ॐ नमो भगवते रुद्राय अमृतमूर्त्तये मां जीवय **तर्जनीभ्यां नम:**॥ ॐ हौ ॐजूंस: भूर्भुव: स्व: सुगंधिम्पुष्टिवर्धनम् ॐ नमो भगवते रुद्राय चन्द्रशिरसे धूर्जटिने स्वाहा **मध्यमाभ्यां नम:**॥ ॐ हौ ॐजूंस: भूर्भुव: स्व: उर्वारुकमिवबन्धनात् ॐ नमो भगवते रुद्राय त्रिपुरान्तकाय ह्रां ह्रीं **अनामिकाभ्यां नम:** ॥ ॐ हौ ॐ जूंस: भूर्भुव: स्व: मृत्योर्मुक्षीय ॐ नमो भगवते

रुद्राय त्रिलोचनाय ऋग्यजुः साममन्त्राय **कनिष्ठिकाभ्यां नमः** ॥ ॐ हौ ॐजूंसः भूर्भुवः स्वः मामृतात् ॐ नमो भगवते रुद्राय अग्नित्रयाय ज्वल ज्वल मां रक्ष रक्ष अघोरास्त्राय **करतलपृष्ठाभ्यां नमः** ॥ इति करन्यासः ॥

**अथ हृदयादिन्यासः**– ॐ हौ ॐजूंसः भूर्भुवः स्वः त्र्यम्बकं ॐ नमो भगवते रुद्राय शूलपाणये स्वाहा **हृदयाय नमः** ॥ ॐ हौ ॐजूंसः भूर्भुवः स्वः यजामहे ॐ नमो भगवते रुद्राय अमृतमूर्त्तये मां जीवय **शिरसे स्वाहा** ॥ ॐ हौ ॐजूंसः भूर्भुवः स्वः सुगन्धिं पुष्टिवर्धनम् ॐ नमो भगवते रुद्राय चन्द्रशिरसे धूर्जटिने स्वाहा **शिखायै वषट्** ॥ॐहौ ॐजूंसः भूर्भुवः स्वः उर्वारुकमिवबन्धनात् ॐ नमो भगवते रुद्राय त्रिपुरान्तकाय ह्रां ह्रीं **कवचाय हुँ** ॥ ॐहौ ॐजूंसः भूर्भुवः स्वः मृत्योर्मुक्षीय ॐ नमो भगवते रुद्राय त्रिलोचनाय ऋग्यजुः साममन्त्राय **नेत्रत्रयाय वौषट्** ॥ ॐहौ ॐजूंसः भूर्भुवः स्वः मामृतात् ॐ नमो भगवते रुद्राय अग्नित्रयाय ज्वल ज्वल मां रक्ष रक्ष अघोरास्त्राय **अस्त्राय फट्** ॥ इति हृदयादिन्यासः ॥

**अथ वर्णन्यासः**– त्र्यं नमः दक्षिण चरणाग्रे ॥ बं नमः, कं नमः, यं नमः, जां नमः, दक्षिणचरणसन्धि चतुष्केषु । मं नमः वाम चरणाग्रे । हें नमः, सुं नमः, गं नमः, धिं नमः, वामचरणसन्धि चतुष्केषु । पुं नमः गुह्ये, ष्टिं नमः आधारे, वं नमः जठरे, र्द्धं नमः हृदये, नं नमः कण्ठे । ॐ नमः दक्षिण कराग्रे । वां नमः, रुं नमः, कं नमः, मिं नमः, दक्षिणकरसन्धि चतुष्केषु । वं नमः वाम कराग्रे । बं नमः, धं नमः, नां नमः, मृं नमः, वामकरसन्धि चतुष्केषु । त्यों नमः वदने । मुं नमः ओष्ठयोः । क्षीं नमः घ्राणयोः । यं नमः दृशोः । मां नमः श्रवणयोः । मृं नमः भ्रुवोः । तान् नमः शिरसि ॥ इति वर्णन्यासः ॥

**अथ पदन्यासः**–ॐ त्र्यम्बकं शिरसि । यजामहे भ्रुवोः । सुगन्धिं दृशोः । पुष्टिवर्द्धनं मुखे । उर्वारुकं गण्डयोः । इव हृदये । बन्धनात् उदरे । मृत्योः गुह्ये । मुक्षीय ऊर्वोः । मा जान्वोः। अमृतात् पादयोः॥ इति पदन्यासः॥

**अथ ध्यानम्ः**–हस्ताभ्यां कलशद्वयामृतरसै राप्लावयन्तं शिरो, द्वाभ्यान्तौ दधतं मृगाक्षवलये द्वाभ्यां वहन्तं परम् ॥ अङ्कन्यस्त करद्वयामृतघटं कैलाशकान्तं शिवम्, स्वच्छाम्भोजगतं नवेन्दु मुकुटाभान्तं त्रिनेत्रं भजे ॥ इति ध्यात्वा

**प्रार्थनां कुर्यात्ः**–मृत्युञ्जय महादेव त्राहिमां शरणागतम् । जन्ममृत्युजराव्याधि पीडितं कर्मबन्धनैः ॥१॥ तावकस्त्वद्गतः प्राणस्त्वच्चित्तोऽहं सदामृड । इति विज्ञाप्य देवेशं जपेन्मृत्युञ्जयं मनुम् ॥२॥ यथासंख्यं मूलमन्त्रं प्रजप्य पुनर्न्यासं कृत्वा ॥ जपं भगवते त्र्यम्बकाय समर्पयेत्॥ गुह्यातिगुह्यगोप्तात्वं गृहाणास्मत्कृतं जपम् । सिद्धिर्भवतु मे देव त्वत्प्रसादान्महेश्वर ॥ इति मन्त्रेण जलेन जप निवेदनम् ॥

**अथ महामृत्युञ्जय मूलमन्त्रः**–ॐ हौ ॐ जूंसः भूर्भुवः स्वः त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम् । उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीयमामृतात् । भूर्भुवः स्वरों जूंसः हौ ॐ ॥ पञ्चाशद्वर्णोऽयं मन्त्रः॥ इति मृत्युञ्जय विधि समाप्ता॥

## ॥ त्र्यक्षर मृत्युञ्जय जप विधि ॥

ॐ अस्य श्री त्र्यक्षर मृत्युञ्जय मन्त्रस्य कहोल ऋषिः गायत्री छन्दः श्री मृत्युञ्जय रुदो देवता ॐबीजं जूं शक्तिः सः कीलकं मम अभीष्ट सिद्धये जपे विनियोगः॥

**ऋष्यादि न्यास** :–ॐकहोल ऋषये नमः शिरसि॥ ॐगायत्री छन्दसे नमः मुखे॥ ॐ मृत्युञ्जय रुद्र देवतायै नमः हृदि॥ ॐबीजाय नमः नाभौ॥ ॐ जूं शक्तये नमः पादयोः॥ ॐ सः कीलकाय

नमः सर्वाङ्गे ॥

**अथ कर न्यासः**–सां अंगुष्ठाभ्यां नमः ॥ सीं तर्जनीभ्यां नमः ॥ सूं मध्यमाभ्यां नमः ॥ सैं अनामिकाभ्यां नमः ॥ सौं कनिष्ठिकाभ्यां नमः ॥ सः करतलकर पृष्ठाभ्यां नमः ।

**अथ हृदयादिन्यासः**–सां हृदयायनमः, सीं शिरसे स्वाहा, सूं शिखायैवौषट् सैं कवचायहुम् सौं नेत्रत्रयाय वौषट् सः अस्त्राय फट् ॥

**अथ ध्यानम् :**–चन्द्रार्काग्निविलोचनं स्मितमुखं पद्मद्वयान्तः स्थितं मुद्रापाश मृगाक्ष सूत्र विलसत्पाणिं हिमांशु प्रभम् ॥ कौटीरेन्दु गलत्सुधाप्लुततनुं हारादि भूषोज्ज्वलं, कीर्त्या विश्व विमोहनं पशुपतिं मृत्युञ्जयं भावयेत् ॥

**अथ त्र्यक्षर ह्यमृत्युञ्जय मूलमन्त्रः** ॐ जूं सः ॥

यथासंख्यं मूलमन्त्रं प्रजप्य पुनर्न्यासं कृत्वा ॥ जपं भगवते मृत्युञ्जयाय समर्पयेत् ॥ गुह्याति गुह्यगोप्तात्वं गृहाणास्मत्कृतं जपम् । सिद्धिर्भवतु मे देव त्वत्प्रसादान्महेश्वर ॥ इति मन्त्रेण जलेन जप निवेदनम् ॥ इति त्र्यक्षर मृत्युञ्जय विधि समाप्ता ॥

## ☆☆ ॥ शताक्षरा गायत्रीमन्त्र जप विधिः ॥ ☆☆

**संकल्पः**–अत्राद्य मम यजमानस्य वा शरीरे स्थितस्य अमुक रोगस्य समूल नाशनेन अपमृत्यु निवारणार्थं क्षिप्रमारोग्य प्राप्त्यर्थं विषमस्थान स्थितसकलारिष्ट निवृत्तये श्री सवितृ जातवेदस्त्र्यम्बक देवता प्रीत्यर्थम् अमुक संख्यान्तर्गत अमुक संख्याकान् शताक्षरा गायत्रीमंत्र जपान् स्वयं ब्राह्मण द्वारा वा अहं करिष्ये ॥

**विनियोगः**–अस्यशताक्षरा गायत्रीमंत्रस्य विश्वामित्र-मरीचि-कश्यप-वशिष्ठ-ऋषयो-गायत्री-

त्रिष्टुप्-अनुष्टुपछन्दांसि सवितृ-जातवेदस्त्र्यम्बका देवता गायत्र्यक्षराणि बीजानिअनुष्टुबक्षराणि शक्तयस्त्रिष्टुबक्षराणि कीलकानि ममारिष्ट शान्तये जपे विनियोगः॥

विश्वामित्र-मरीचि-कश्यप-वशिष्ठऋषिभ्यो नमः शिरसि॥

गायत्री-त्रिष्टुबनुष्टुपछन्देभ्यो नमः (मुखे )

सवितृ-जातवेदस्त्र्यम्बकदेवेभ्यो नमः (हृदये )

गायत्र्यक्षरेभ्यो बीजेभ्यो नमः (गुह्ये)

अनुष्टुबक्षरेभ्यो शक्तिभ्यो नमः (पादयोः)

त्रिष्टुबक्षरेभ्यः कीलकेभ्यो नमः (नाभौ)

विनियोगाय नमः (सर्वाङ्गे)

**करन्यासः-**

ॐतत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि (अंगुष्ठाभ्यां नमः)

ॐधियो योनः प्रचोदयात् (तर्जनीभ्यां नमः)

ॐजातवेदसे सुनवामसोममरातीयतो निदहाति वेदः (मध्यमाभ्यां नमः)

ॐसनः पर्षदति दुर्गाणि विश्वानावेव सिन्धुं दुरितात्यग्निः (अनामिकाभ्यां नमः)

ॐत्र्यम्बकं यजामहे सुगन्धिम् पुष्टिवर्धनम् (कनिष्ठिकाभ्यां नमः)

ॐउर्वारुकमिव बन्धनान् मृत्योर्मुक्षीय मामृतात् (करतलकर पृष्ठाभ्यां नमः)

**हृदयादि न्यासः-**

ॐतत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि (हृदयाय नमः)

ॐधियो योनः प्रचोदयात् (शिरसे स्वाहा)

ॐजातवेदसे सुनवामसोममरातीयतो निदहाति वेदः (शिखायै वषट्)

ॐसनः पर्षदति दुर्गाणि विश्वानावेव सिन्धुं दुरितात्यग्निः

(कवचाय हुम्)

ॐत्र्यम्बकं यजामहे सुगन्धिम् पुष्टिवर्धनम् (नेत्रत्रयाय वौषट्)

ॐउर्वारुकमिव बन्धनान् मृत्योर्मुक्षीय मामृतात् (अस्त्राय फट्)

**ध्यानम्**:-स्मर्तव्या खिललोकवर्ति- सततं यज्जङ्गमस्थावर,

व्याप्तं येन च यत्प्रपञ्चविहितं मुक्तिर्यत: सिद्धयति।

यद्वास्यात् प्रणवत्रिभेदगहनं श्रुत्वा च यद् गीयते,

तद्वस्तु स्थितिसिद्धयेऽस्तु वरदं ज्योतिस्त्रयोत्थं मह:॥

**मूलमंत्र**:-ॐतत्स वितुर्वरेण्यं भर्गो देवस्य धीमहि धियो योन: प्रचोदयात्॥ जातवेदसे सुनवामसोममरातीयतो निदहाति वेद:। सन: पर्षदति दुर्गाणि विश्वानावेव सिन्धुं दुरितात्यग्नि:॥ त्र्यम्बकं यजामहे सुगन्धिम् पुष्टिवर्धनम्। उर्वारुकमिव बन्धनान् मृत्योर्मुक्षीय मामृतात् ॐ॥

अनेन शताक्षरागायत्री जपाख्येन कर्मणा श्रीसवितृजातवेदस्त्र्यम्बक देवता: प्रीयन्ताम्

॥ शताक्षरी गायत्रीमंत्र जप विधि समाप्ता॥

## ★★★॥ शिव पंचाक्षर मंत्र जपविधि॥★★★

विनियोग:-ॐअस्य श्रीशिवपञ्चाक्षर मन्त्रस्य वामदेव ऋषि: अनुष्टुब्छन्द: सदाशिवो देवता जपे (पूजने) विनियोग:॥

ॐवामदेव ऋषये नम: शिरसि॥ ॐअनुष्टुब्छन्दसे नम: मुखे॥ ॐसदाशिव देवतायै नम: हृदये॥

**करन्यास**:-ॐ अंगुष्ठाभ्यां नम:॥ ॐ नं तर्जनीभ्यां नम:॥ ॐ मं मध्यमाभ्यां नम:॥ ॐ शिं अनामिकाभ्यां नम:॥ ॐ वां कनिष्ठिकाभ्यां नम:॥ ॐ यं करतलकर पृष्ठाभ्यां नम:॥

**हृदयादि न्यास**:-ॐ हृदयाय नम:॥ ॐ नं शिरसे स्वाहा॥

ॐ मं शिखायै वषट्॥ ॐ शिं कवचाय हुम्॥ ॐ वां नेत्रत्रयाय वौषट्॥ ॐ यं अस्त्राय फट्॥

**ध्यानम्**:–ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं,

रत्ना कल्पोज्वलांगं परशुमृगवरा भीतिहस्तं प्रसन्नम्।

पद्मासीनं समन्तात् स्तुत ममर गणैर्व्याघ्र कृत्तिं वसानं,

विश्वाद्यं विश्ववन्द्यं निखिल भयहरं पंचवक्त्रं त्रिनेत्रम्॥

**मूलमन्त्रः** ॐ नमः शिवाय॥

यथासंख्यं मूलमन्त्रं प्रजप्य, पुनर्न्यासं कृत्वा॥ जपं भगवते सदाशिवाय समर्पयेत्॥ गुह्याति गुह्यगोप्तात्वं गृहाणास्मत्कृतं जपम्। सिद्धिर्भवतु मे देव त्वत्प्रसादान्महेश्वर॥ इति मन्त्रेण जलेन जप निवेदनम्॥ इति ॐ नमः शिवाय जप विधि समाप्ता॥

## ॥ अथ नवग्रह मन्त्राणां जप विधिः॥

## ☆☆☆ सूर्य मन्त्र जप विधिः ☆☆☆

**१–संकल्प**:–अद्येत्यादि० मासानामुत्तमे अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे मम यजमानस्य वा सर्वारिष्ट निवृत्यर्थममुक ग्रहमंत्रस्य यथा संख्याकाऽजपान्नद्याहं कारयिष्ये (करिष्ये)

**विनियोगः**–आकृष्णेनेति मन्त्रस्य हिरण्यस्तूप ऋषिः त्रिष्टुब्छन्दः सविता देवता सूर्य प्रसन्नार्थे जपे विनियोगः॥

**अथ शिरोन्यास**:– आकृष्णेन शिरसि॥ रजसा ललाटे॥ वर्तमानो मुखे॥ निवेशयन् हृदि॥ अमृतं नाभौ॥ मर्त्यञ्च कटयां॥ हिरण्ययेन सविता जंघयोः॥ रथेना ऊर्वोः॥ देवो याति जान्वोः॥ भुवनानि पश्यन् पादयोः॥

**कर न्यास**:– आकृष्णेन अंगुष्ठाभ्यां नमः॥ रजसा तर्जनीभ्यां नमः॥ वर्तमानो निवेशयन् मध्यमाभ्यां नमः॥ अमृतं मर्त्यञ्च

अनामिकाभ्यां नमः ॥ हिरण्ययेन सविता रथेना कनिष्ठिकाभ्यां नमः ॥ देवो याति भुवनानि पश्यन् करतलकर पृष्ठाभ्यां नमः ॥

**ततो हृदयादि न्यासः**– आकृष्णेन हृदयाय नमः ॥ रजसा शिरसे स्वाहा ॥ वर्तमानो निवेशयन् शिखायै वषट् ॥ अमृतं मर्त्त्यञ्च कवचाय हुँ ॥ हिरण्ययेन सविता रथेना नेत्रत्रयाय वौषट् ॥ देवो याति भुवनानि पश्यन् अस्त्राय फट् ॥

**ध्यानम्**:–पद्मासनः पद्मकरो द्विबाहुः पद्मद्युतिः सप्त तुरंग वाहनः ।
दिवाकरो लोकगुरुः किरीटी मयि प्रसादं विदधातु देवः ॥

**मूलमन्त्रः**–ॐआकृष्णे नरजसा वर्तमानो निवेशयन्नमृतम्मर्त्यञ्च । हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॐ ॥
(जप संख्या ७०००)

उत्तर–न्यासान्विधाय ॥ गुह्याति गुह्यगोप्तात्वं गृहाणास्मत्कृतं जपम् । सिद्धिर्भवतु मे देव त्वत्प्रसादान्महेश्वर ॥ इति मन्त्रेण जलेन जप निवेदनम् ॥ सूर्याय समर्पयेत् ॥

(**एकाक्षरी बीज मंत्रः**–ॐ घृणिः सूर्याय नमः ॥
**तान्त्रिक मंत्रः**–ह्रां ह्रीं ह्रौं सः सूर्याय नमः)

## ✧✧✧ चन्द्र–मन्त्र जपविधिः– ✧✧✧

**२–विनियोगः**–इमन्देवेति गौतम ऋषिः द्विपदा विराट् छन्दः सोमो देवता चन्द्रप्रीत्यर्थे जपे विनियोगः ॥

**अथ शिरोन्यासः**–इमन्देवा शिरसि ॥ असपत्नकं ललाटे ॥ सुवध्वं मुखे ॥ महते क्षत्राय हृदि ॥ महते जैष्ठ्याय नाभौ ॥ महते जानराज्याय कटयां ॥ इन्द्रस्येंद्रियाय ऊर्वोः इमममुष्यपुत्रं जान्वोः ॥ अमुष्यै पुत्रं गुल्फयोः ॥ अस्यै विश एष वोमी राजा सोमोस्माकं ब्राह्मणानां राजा पादयोः ॥

**करन्यासः**–इमन्देवा असपत्लक सुवध्वं अंगुष्ठाभ्यां नमः ॥ महते क्षत्राय तर्जनीभ्यां नमः महते जैष्ठ्याय मध्यमाभ्यां नमः ॥ महते जानराज्याय अनामिकाभ्यां नमः ॥ इन्द्रस्येंद्रियाय कनिष्ठिकाभ्यां नमः ॥ इमममुष्य पुंत्रममुष्यै पुत्रमस्यै व्विषएष वोमी राजा सोमोस्माकं ब्राह्मणानां राजा करतलकर पृष्ठाभ्यां नमः ॥

**अथ हृदयादि न्यासः**– इमन्देवा असपत्लक सुवध्वं हृदयाय नमः ॥ महते क्षत्राय शिरसे स्वाहा ॥ महते जैष्ठ्याय शिखायै वषट् ॥ महते जानराज्याय कवचाय हुँ ॥ इन्द्रस्येंद्रियाय नेत्रत्रयाय वौषट् ॥ इमममुष्य पुत्रममुष्यै पुत्रमस्यै व्विषएष वोमी राजा सोमोस्माकं ब्राह्मणानां राजा अस्त्राय फट् ॥

**ध्यानम्**:–श्वेताम्बरः श्वेतविभूषणश्च, श्वेतद्युति र्दण्डधरो द्विबाहुः । चन्द्रोऽमृतात्मा वरदः किरीटी मयि प्रसादं विदधातु देवः ॥

**मूलमन्त्रः**–ॐइमन्देवाऽअसपत्क्नथ्ठं सुबध्वम्महते क्षत्रायमहते ज्ज्यैष्ठ्याय महतेजानराज्ज्यायेन्द्रस्येन्द्रियाय ॥ इमममुष्य पुत्रमुष्यै पुत्रमस्यै व्विशऽ एष वोमी राजा सोमोस्म्माकम्ब्राह्मणानांथ्ठं राजा ॐ ॥

जपसंख्या (११,०००) जपान्ते पुनर्न्यासान्विधाय ॥ गुह्याति गुह्यगोप्तात्वं गृहाणास्मत्कृतं जपम् । सिद्धिर्भवतु मे देव त्वत्प्रसादान्महेश्वर ॥ इति मन्त्रेण जलेन जप निवेदनम् ॥ चन्द्राय समर्पयेत् ॥

**(एकाक्षरी बीज मंत्रः**–ॐ सों सोमाय नमः ॥

**तान्त्रिक मंत्रः**–ॐ श्रां श्रीं श्रौं सः चन्द्रमसे नमः)

## भौम मन्त्र जप विधिः–

**३–विनियोगः**–अग्निम्मूर्द्धेति विरूपाक्ष ऋषिः गायत्री छन्दः अंगारको देवता भौम प्रीत्यर्थे जपे विनियोगः ॥

**शिरोन्यास**:–अग्निः शिरसि ॥ मूर्द्धा ललाटे ॥ दिवः मुखे ॥ ककुत् हृदि ॥ पतिः नाभौ ॥ पृथिव्यां कटयां ॥ अयं ऊर्वोः ॥ अपां जान्वोः ॥ रेतांसि गुल्फयोः ॥ जिन्वति पादयोः ॥

**करन्यास**:– अग्निर्म्मूर्द्धादिवः अंगुष्ठाभ्यां नमः ॥ ककुत्तर्जनीभ्यां नमः ॥ पतिः पृथिव्याऽअयम् मध्यमाभ्यां नमः ॥ अपां अनामिकाभ्यां नमः ॥ रेतांसि कनिष्ठिकाभ्यां नमः ॥ जिन्वति करतलकर पृष्ठाभ्यां नमः ॥

**अथ हृदयादि न्यासः**–अग्निर्म्मूर्द्धादिवः हृदयाय नमः ॥ ककुत्त् शिरसे स्वाहा ॥ पति÷पृथिव्याऽअयम् शिखायै वषट् ॥ अपां कवचाय हुँ ॥ रेतांसि नेत्रत्रयाय वौषट् ॥ जिन्वति अस्त्राय फट् ॥

**ध्यानम्**:–रक्ताम्बरो रक्तवपुः किरीटी,
चतुर्भुजो मेषगतो गदाधरः ।
धरासुतः शक्ति धरश्च शूली,
सदायमस्मद्वरदः प्रसन्नः ॥

**मूलमन्त्रः**–ॐअग्निर्म्मूर्द्धादिवः ककुत्पतिः पृथिव्याऽअयम् ॥ अपाꣳरेताꣳ सिजिन्वति ॥

जपसंख्या (१०,०००)जपान्ते पुनर्न्यासान्विधाय ॥ गुह्याति गुह्यगोप्तात्वं गृहाणास्मत्कृतं जपम् । सिद्धिर्भवतु मे देव त्वत्प्रसादान्महेश्वर ॥ इति मन्त्रेण जलेन जप निवेदनम् ॥ भौमाय समर्पयेत् ॥

(**एकाक्षरी बीज मंत्रः**–ॐ अं अंगारकाय नमः
**तान्त्रिक मंत्रः**–ॐ क्रां क्रीं क्रौं सः भौमाय नमः)

## बुध मन्त्र जप विधिः–

**४–विनियोग**:–उद्बुध्यस्वेति मन्त्रस्य परमेष्ठी प्रजापतिः ऋषिः त्रिष्टुब्छन्दः बुधो देवता बुध प्रीत्यर्थे जपे विनियोगः ॥

**शिरोन्यासः**–उद् बुध्यस्वेति शिरसि ॥ अग्ने प्रति ललाटे ॥ जागृहि त्वं मुखे ॥ इष्टापूर्ते हृदि ॥ स सृजेथमयञ्च नाभौ ॥ अस्मिन्त्सधस्थे

कट्याम् ॥ अद्धयुत्तरस्मिन् ऊर्वो: ॥ विश्वेदेवा जान्वो: ॥ यजमानश्च गुल्फयो: ॥ सीदत पादयो: ॥

**करन्यास:**– उद्बुद्धयस्वाग्ने प्रतिजागृहि त्वं अङ्गुष्ठाभ्यां नम: ॥ इष्टापूर्त्ते तर्जनीभ्यां नम: ॥ ससृजेथामयञ्च मध्यमाभ्यां नम: ॥ अस्मिन्त्सधस्त्थेऽ अद्धयुत्त रस्मिन् अनामिकाभ्यां नम: ॥ विश्वे देवायजमानश्च कनिष्ठिकाभ्यां नम: ॥ सीदत करतलकर पृष्ठाभ्यां नम: ॥

**अथ हृदयादि न्यास:**– उद्बुद्धयस्वाग्ने प्रतिजागृहि त्वं हृदयाय नम: ॥ इष्टापूर्त्ते शिरसे स्वाहा ॥ ससृजेथामयञ्च शिखायै वषट् ॥ अस्मिन्त्सधस्त्थेऽ अद्धयुत्त रस्मिन् कवचाय हुँ ॥ विश्वे देवायजमानश्च नेत्रत्रयाय वौषट् ॥ सीदत अस्त्राय फट् ॥

**ध्यानम्:**–नीलाम्बरो नीलवपु: किरीटी, चतुर्भुज दण्डधरश्च हारी । चर्मासिधृक् सोमसुतो गदाभृत्, सिंहादि रूढो वरदो बुधश्च ॥

मूलमंत्र:–ॐ उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्त्ते सꣳ सृजेथामयञ्च ॥ अस्मिन्त्सधस्त्थेऽ अद्धयुत्त रस्मिन्विश्वे देवायजमानश्च सीदत ॥ जपसंख्या (४,०००) जपान्ते पुनर्न्यासान्विधाय ॥ गुह्याति गुह्यगोप्तात्वं गृहाणास्मत्कृतं जपम् । सिद्धिर्भवतु मे देव त्वत्प्रसादान्महेश्वर ॥ इति मन्त्रेण जलेन जप निवेदनम् ॥ बुधाय समर्पयेत् ॥

**(एकाक्षरी बीज मंत्र:**–ॐ बुं बुधाय नम: ॥

**तान्त्रिक मंत्र:**–ॐ ब्रां ब्रीं ब्रौं स: बुधाय नम:)

## गुरु मन्त्र जप विधि:–

**५–विनियोग:**–बृहस्पतेति मन्त्रस्य गृत्समद ऋषि: अनुष्टुब्छन्द: बृहस्पति र्देवता बृहस्पति प्रीत्यर्थे जपे विनियोग: ॥

**शिरोन्यास:**–ॐबृहस्प्पते शिरसि ॥ अतियदर्य्यो ललाटे ॥ अर्हाद्द्युमद् मुखे ॥ विभातिक्क्रतुमत् हृदये ॥ जनेषु नाभौ ॥यद्दीदयत् कट्याम् ॥ सवसऽऋतप्प्रजात ऊर्वो: ॥ तत्तदस्म्मा सुद् द्रविणं

जान्वो: ॥ धेहि गुल्फयो: ॥ चित्रं पादयो: ॥

**करन्यास:**–ॐबृहस्प्पते अतियदर्य्यो अङ्गुष्ठाभ्यां नम: ॥ अर्हाद्द्युमत् तर्जनीभ्यां नम: ॥ विभाति क्रतुमत् मध्यमाभ्यां नम: ॥ जनेषु अनामिकाभ्यां नम: ॥ उद्दीदयच्छवसऽ ऋतप्प्रजा ततदस्म्मासु कनिष्ठिकाभ्यां नम: ॥ द्रविणन्न्धेहि चित्रम् करतलकर पृष्ठाभ्यां नम: ॥

**अथ हृदयादि न्यास:**–ॐबृहस्प्पते अतियदर्य्यो हृदयाय नम ॥ अर्हाद्द्युमत् शिरसे स्वाहा ॥ विभाति क्रतुमत् शिखायै वषट् ॥ जनेषु कवचाय हुँ ॥ उद्दीदयच्छवसऽऋतप्प्रजा ततदस्म्मासु नेत्रत्रयाय वौषट् ॥ द्रविणन्न्धेहि चित्रम् अस्त्राय फट् ॥

**ध्यानम्:**– पीताम्बर: पीतवपु: किरीटी चतुर्भुज देवगुरु: प्रशान्त: ।
तथाक्षसूत्रञ्च कमण्डलुञ्च दण्डं च विभ्रद् वरदोऽस्तु मह्यम् ॥

**मूलमन्त्र:**–ॐबृहस्प्पते ऽअतियदर्य्योऽअर्हाद्द्युमद्द्विभाति क्क्रतुमज्जनेषु । यद्दीदयच्छवसऽऋतप्प्रजा ततदस्म्मा सुद्द्रविणन्न्धेहि चित्रम् ॥ जपसंख्या (१९,०००) जपान्ते पुनर्न्यासान्विधाय ॥ गुह्याति गुह्यगोप्तात्वं गृहाणास्मत्कृतं जपम् । सिद्धिर्भवतु मे देव त्वत्प्रसादान्महेश्वर ॥ इति मन्त्रेण जलेन जप निवेदनम् ॥ गुरवे समर्पयेत् ॥

(**एकाक्षरी बीज मंत्र:**–ॐ बृं बृहस्पतये नम: ॥

**तान्त्रिक मंत्र:**–ॐ ग्रां ग्रीं ग्रौं स: गुरवे नम:)

## भृगुमन्त्र जपविधि:–

६–**विनियोग:**– अन्नात्परिस्रुतेति मन्त्रस्य प्रजापति: ऋषि: अनुष्टुब्छन्द: शुक्रो देवता शुक्र प्रीत्यर्थे जपे विनियोग: ॥

**शिरोन्यास:**– अन्नात्परिस्रुत: शिरसि ॥ रसम्ब्रह्मणा ललाटे ॥व्यपिवत्क्षत्रं मुखे ॥ पय: सोमं हृदये ॥ प्रजापति: नाभौ ॥

ऋृतेनसत्त्यं कट्याम् ॥ इन्द्रियंव्विपानं गुदे ॥ शुक्रं वृषणे ॥ अन्धसः ऊर्वोः ॥ इन्द्र स्येन्द्रियं जानुनोः इदं पयः गुल्फयोः ॥ अमृतम्मधु पादयोः ॥

**करन्यासः**- अन्नात्त्परिस्रुतोरसं अङ्गुष्ठाभ्यां नमः ॥ ब्रह्मणा व्यपिवत्क्षत्रं तर्जनीभ्यां नमः ॥ पयः सोमम्प्रजापतिः मध्यमाभ्यां नमः ॥ ऋृतेनसत्त्यमिन्द्रियं अनामिकाभ्यां नमः ॥ व्विपानठ्ँ शुक्क्रमन्धस कनिष्ठिकाभ्यां नमः ॥ इन्द्रस्येन्द्रिय मिदम्पयोमृतम्मधु करतलकर पृष्ठाभ्यां नमः ॥

**अथ हृदयादि न्यासः**- अन्नात्त्परिस्रुतोरसं हृदयाय नमः ॥ ब्रह्मणा व्यपिवत्क्षत्रं शिरसे स्वाहा ॥ पयः सोमम्प्रजापतिः शिखायै वषट् ॥ ऋृतेनसत्त्यमिन्द्रियं कवचाय हुँ ॥ व्विपानठ्ँ शुक्क्रमन्धस नेत्रत्रयाय वौषट् ॥ इन्द्रस्येन्द्रिय मिदम्पयोमृतम्मधु अस्त्राय फट् ॥

**ध्यानम्**:-श्वेताम्बरः श्वेतवपुः किरीटी चतुर्भुजो दैत्यगुरुः प्रशान्तः ।

तथाक्षसूत्रं च कमण्डलुञ्च दण्डञ्च बिभ्रद्वरदोऽस्तु मह्यम् ॥

**मूलमन्त्रः**-ॐ अन्नात्त्परिस्रुतो रसम्ब्रह्मणा व्यपिवत्क्षत्रम्पयः सोमम्प्रजापतिः ॥ ऋृतेनसत्त्यमिन्द्रियंव्विपानठ्ँ शुक्क्रमन्धसऽ इन्द्रस्येन्द्रिय मिदम्पयोमृतम्मधु ॥ जपसंख्या (१६,०००) जपान्ते पुनर्न्यासान्विधाय ॥ गुह्याति गुह्यगोप्तात्वं गृहाणास्मत्कृतं जपम् । सिद्धिर्भवतु मे देव त्वत्प्रसादान्महेश्वर ॥ इति मन्त्रेण जलेन जप निवेदनम् ॥ शुक्राय समर्पयेत् ॥

**(एकाक्षरी बीज मंत्रः**-ॐ शुं शुक्राय नमः ॥

**तान्त्रिक मंत्रः**-ॐ द्रां द्रीं द्रौं सः शुक्राय नमः)

## ❋ शनिमंत्र जपविधिः- ❋

**७-विनियोगः**-शन्नोदेवीति मन्त्रस्य सिन्धुद्वीप ऋषिः दध्यङ्गाथर्वण ऋषिः गायत्री छन्दः शनिर्देवता शनि प्रीत्यर्थे जपे विनियोगः ॥ शं शिरसि ॥ नः ललाटे ॥ देवीः नेत्रयोः ॥ अभिष्टये मुखे ॥

आपो कण्ठे ॥ भवन्तु हृदये ॥ पीतये नाभौ ॥ शंयोः कट्यां ॥ अभि जंघयोः ॥ स्त्रवन्तु गुल्फयोः नः पादयोः ॥

**करन्यासः**-शन्नोदेवी अङ्गुष्ठाभ्यां नमः ॥ अभिष्टये तर्जनीभ्यां नमः ॥ आपोभवन्तु मध्यमाभ्यां नमः ॥ पीतये अनामिकाभ्यां नमः ॥ शँय्यो रभि कनिष्ठिकाभ्यां नमः ॥ स्त्रवन्तुनः करतलकर पृष्ठाभ्यां नमः ॥

**अथ हृदयादि न्यासः**- शन्नोदेवी हृदयाय नमः ॥ अभिष्टये शिरसे स्वाहा ॥ आपोभवन्तु शिखायै वषट् ॥ पीतये कवचाय हुँ ॥ शँय्यो रभि नेत्रत्रयांय वौषट् ॥ स्त्रवन्तुनः अस्त्राय फट् ॥

**ध्यानम्**:-नीलाम्बरः शूलधरः किरीटी गृध्रस्थितः शस्त्रधरो धनुष्मान् । चतुर्भुजः सूर्यसुतः प्रसन्नः सदास्तु मह्यम् वरदोऽल्पगामी॥

**मूलमन्त्रः**-ॐ शन्नोदेवी रभिष्टयऽ आपो भवन्तुपीतये ॥ शँय्यो रभिस्त्रवन्तुनः ॥

जपसंख्या (२३,०००) जपान्ते पुनर्न्यासान्विधाय ॥ गुह्याति गुह्यगोप्तात्वं गृहाणास्मत्कृतं जपम् । सिद्धिर्भवतु मे देव त्वत्प्रसादान्महेश्वर ॥ इति मन्त्रेण जलेन जप निवेदनम् ॥ शनये समर्पयेत् ॥

(**एकाक्षरी बीज मंत्रः**-ॐ शं शनैश्चराय नमः ॥
**तान्त्रिक मंत्रः**-ॐ प्रां प्रीं प्रौं सः शनये नमः)

## राहुमंत्र जपविधिः-

**८-विनियोगः**-कयानश्चित्रेति मन्त्रस्य वामदेव ऋषिः गायत्री छन्दः राहु प्रीत्यर्थे जपे विनियोगः ॥

**शिरोन्यासः**-कया शिरसि ॥ नः ललाटे ॥ चित्रं मुखे ॥ आ कण्ठे ॥ भुवः हृदये ॥ दूती नाभौ ॥ सदा कटयां ॥ वृधः मेढ्रं ॥ सखा ऊर्वोः ॥ कया जान्वोः ॥ शचिष्ठया गुल्फयोः ॥ वृता पादयोः ॥

**करन्यास:**– कया न: अङ्गुष्ठाभ्यां नमः ॥ चित्रऽआ तर्जनीभ्यां नमः ॥ भुवदूती मध्यमाभ्यां नमः ॥ सदावृध: सखा अनामिकाभ्यां नमः ॥ कया शचिष्ट्या कनिष्ठिकाभ्यां नमः ॥ वृता करतलकर पृष्ठाभ्यां नमः ॥

**अथ हृदयादि न्यास:**– कया न: हृदयाय नमः ॥ चित्रऽआ शिरसे स्वाहा ॥ भुवदूती शिखायै वषट् ॥ सदावृध: सखा कवचाय हुँ ॥ कया शचिष्ट्या नेत्रत्रयाय वौषट् ॥ वृता अस्त्राय फट् ॥

**ध्यानम्:**– नीलाम्बरो नीलवपु: किरीटी, करालवक्त्रो करखड्गशूली । चतुर्भुजश्चर्म धरश्च राहु:, सिंहासनस्थो वरदोऽस्तु मह्यम् ॥

**मूलमन्त्र:**–ॐकया नश्चित्रऽआ भुवदूती सदावृध: सखा ॥ कया शचिष्ट्या वृता ॥

जपसंख्या (१८,०००) जपान्ते पुनर्न्यासान्विधाय ॥ गुह्याति गुह्यगोप्तात्वं गृहाणास्मत्कृतं जपम् । सिद्धिर्भवतु मे देव त्वत्प्रसादान्महेश्वर ॥ इति मन्त्रेण जलेन जप निवेदनम् ॥ राहवे समर्पयेत् ॥

**(एकाक्षरी बीज मंत्र:**–ॐ रां राहवे नमः ॥

**तान्त्रिक मंत्र:**–ॐ भ्रां भ्रीं भ्रौं स: राहवे नमः)

## केतुमंत्र जपविधि:–

**१–विनियोग:**–केतुं कृण्वन्निति मन्त्रस्य मधुच्छन्द ऋषि: गायत्रीछन्द: केतुर्देवता केतुप्रीत्यर्थे जपे विनियोग: ॥

**शिरोन्यास:**–केतुं शिरसि ॥ कृण्वन् ललाटे ॥ अकेतव मुखे ॥ पेशो हृदये ॥ मर्या नाभौ ॥ अपेशसे कट्यां ॥ समु ऊर्वो: ॥ षद्भि: जान्वो: ॥ अजायथा: पादयो: ॥

**करन्यास:**– केतुङ्कृण्वन् अङ्गुष्ठाभ्यां नमः ॥ अकेतवे तर्जनीभ्यां नमः ॥ पेशोमर्या मध्यमाभ्यां नमः ॥ अपेशसे अनामिकाभ्यां नमः ॥ समुषद्भि: कनिष्ठिकाभ्यां नमः ॥ अजायथा: करतलकर

पृष्ठाभ्यां नमः ॥
**हृदयादिन्यासः**–केतुङ्कृण्वन् हृदयाय नमः ॥ अकेतवे शिरसे स्वाहा ॥ पेशोमर्या शिखायै वषट् ॥ अपेशसे कवचाय हुँ ॥ समुषद्भिः नेत्रत्रयाय वौषट् ॥ अजायथाः अस्त्राय फट् ॥
**ध्यानम्**:–धूम्रो द्विबाहु र्वरदो गदाधरो,
गृध्रासनस्थो विकृतासनश्च ।
किरीट केयूर विभूषितो यः,
सदाऽस्तु मे केतुगणः प्रशान्तः ॥
**मूलमंत्रः**–ॐ केतुङ्कृण्वन्नकेतवे पेशोमर्य्याऽ अपेशसे ॥ समुषद्भिरजायथाः ॥
जपसंख्या (१७,०००) जपान्ते पुनर्न्यासान्विधाय ॥ गुह्याति गुह्यगोप्तात्वं गृहाणास्मत्कृतं जपम् । सिद्धिर्भवतु मे देव त्वत्प्रसादान्महेश्वर ॥ इति मन्त्रेण जलेन जप निवेदनम् ॥ केतवे समर्पयेत् ॥
(**एकाक्षरी बीज मंत्रः**–ॐ कें केतवे नमः ॥
**तान्त्रिक मंत्रः**–ॐस्रां स्रीं स्रौं सः केतवे नमः)

## ॥ अथः छायापात्र दानम् ॥

**आचमन प्राणानायम्यः**– इहाद्य तिथौ देशकाल संकीर्त्यः–
मम तच्छरीरोवा वच्छिन्न समस्त पापक्षय सर्वग्रह पीडा शान्ति शरीरोत्थार्ति नाशाय प्रासाद आयुरारोग्यादि सर्व सौख्य प्राप्तये च इदं स्वदेहं छाया वीक्षीताज्य पूरित काँस्यपात्र ससुवर्ण सदक्षिणाकं द्रव्यदान महं करिष्ये ॥
तथा काँस्य पात्रे स्थिते आज्ये च आत्मरूपं निरीक्ष्य ॥
ॐ रूपेण वोरूपमभ्यागान् तुथोवो विश्ववेदा विभजतु ऋतस्यपथा प्रेत चन्द्रदक्षिणा वि स्वः पश्य व्यन्तरिक्षं यतस्व सदस्यैः ॥१॥
रूपठं रूपंप्रतिरूपो बभूवतदस्य रूपंप्प्रति चक्षणाय इन्द्रो मायाभिः ॥ पुरुरूप ईयते युक्ताह्यस्य हरयः शतादशो त्ययं वैहरयोयं

वैदश च सहस्त्रणी बहू चिनन्ता तदेतद् ब्रह्म पूर्व मनमवाह्यज मनुः सर्वानु शासनम् ॥२॥ इत्याज्ये मुखवलोक्य ॥

**प्रार्थनाम् कुर्यात्**:-याऽ लक्ष्मीर्यश्चमे दौस्थ्यम् सर्वाङ्गं समुपस्थितम् ॥ तत्सर्वम् नाशयाज्य त्वं श्रियमायुश्च वर्द्धय ॥१॥ आज्यं सुराणामाहारः सर्वमाज्ये प्रतिष्ठितम् ॥ आज्यपात्र प्रदानेन शान्ति रस्तु सदा मम ॥२॥

**पुनः प्रयोगः**- ममायुरारोग्य प्राप्तये ससुवर्ण मिदमाज्यपात्रं अमुक गोत्रायामुक शर्म्मणे विष्णुरूप ब्राह्मणाय तुभ्यमहं संप्रददे ॥ तेन दानेन श्री भगवान् विष्णुः प्रीयताम् न मम ॥ **इति छायादानं**॥

## आसन रामायण जी का

**सोरठा**:-जेहि सुमिरत सिधि होय, गन नायक करिवर वदन ।
करहु अनुग्रह सोई, बुद्धि राशी शुभ गुन सदन ॥१॥
मूक होय वाचाल, पंगु चढ़ई गिरिवर गहन ।
जासु कृपा सो दयाल, द्रवहु सकल कलिमल दहन ॥२॥
नील सरोरुह श्याम, तरुण अरुण वारिज नयन ।
करउसो मम उर धाम सदा छीर सागर सयन ॥३॥
कुन्दु इन्दु सम देह उमा रमन करुना अयन ।
जाहि दीन पर नेह करहु कृपा मर्दन मयन ॥४॥
वन्दऊ गुरु पद कंज कृपा सिंधु नर रूप हरि ।
महा मोह तम पुंज जासु वचन रवि कर निकर ॥५॥
वन्दऊ अवध भूआल सत्य प्रेम जेहि राम पद ।
विछुरत दीन दयाल प्रिय तनु तृण इव परिहरेऊ ॥६॥
प्रणवऊ पवन कुमार खल वन पावक ज्ञान घन ।
जासु हृदय आगार बसहि राम शर चाप धर ॥७॥
वन्दऊ चारिहु वेद भव वारिधी वोहित सरिस ।
जिन्हइ न सपनेऊ खेद वरनत रघुवर विसद जसु ॥८॥
वन्दऊ निधी पद रेनु भव वारिधि जेहि कीन्ह जहँ ।

संत सुधा ससि धेनु प्रगटे खल विष वारुनी जहँ ॥९॥
**दोहा:**–श्री गुरु चरण सरोज रज निज मनु मुकुर सुधारि ।
वरनऊ रघुवर विमल जसु जो दायक फल चारि ॥१॥
तुलसी कृत रामायण कथा कहऊँ अनुसार ।
आयसु आसन लीजिए विराजिये पवन कुमार ॥२॥
राम कथा के रसिक तुम धीर वीर बल पुंज ।
आयसु आसन लीजिए भक्त राशी मति धीर ॥३॥
बेग पधारिये पवन सुत लिये हाथ जय माल ।
रघुवर चरित बखानियो सुनियो दीन दयाल ॥४॥
सियावर रामचन्द्र शंकर हरि ओम जय जय सियाराम
जय जय हनुमान हरि की जय ॥

## –: विसर्जन :–

**दोहा:**–राम लक्ष्मण जानकी सदा करऊ कल्याण ।
रामायण वैकुण्ठ में विदा वीर हनुमान ॥१॥
जय जय सियाराम की जय लक्ष्मण बलवान ।
जय कपीश सुग्रीव की कहत चले हनुमान ॥२॥
कहऊँ दण्ड्वत प्रभु सन तुम्हहिं कहऊँ कर जोर ।
वार वार रघु नाम कहि सुरति करायेहु मोरि ॥३॥
एक घड़ी आधी घड़ी आधी में पुनि आधी ।
तुलसी संगत साधुकी हरे कोटि अपराध ॥४॥
जहाँ न हरि की शुभ कथा भक्ति नहीं लवलेश ।
तुलसी तहाँ न विलम्बिये परि हरिये वह देश ॥५॥
राम नाम आधी घड़ी पापहि पुंज पहार ।
बलि हारी वा नाम की जारि करै सोई छार ॥६॥
पवन तनय संकट हरण मंगल मूरति रूप ।
राम लखन सीता सहित हृदय बसहु सुर भूप ॥७॥
जोजन जहाँ से आईए कथा सुनी मनलाय ।
अपने अपने धाम को हरि सुमरेऊँ गृह जाय ॥८॥

कथा विसर्जन होत है सुनो वीर हनुमान ।
श्रोता वक्ता के प्रभु सदा करो कल्याण ॥१॥
सियावर रामचन्द्र जी की जय, उमापति महादेव जी की जय, पवन सुत हनुमान जी की जय, सन्त वर तुलसीदास जी की जय ॥

## श्रीराम स्तुति ॥

श्रीरामचन्द्र कृपालु भजु मन, हरण भवभय दारुणं ।
नवकंज लोचन कंजमुख, कर कंज पद कंजारुणं ॥
कंदर्प अगणित अमित छबि, नवनील नीरद सुदरं ।
पट पीत मानहु तडित रुचि शुचि नौमि जनक सुतावरं ॥
भजु दीनबंधु दिनेश दानव दैत्य वंश निकंदनं ।
रघुनंद आँनदकंद कोशलचंद दशरथ नंदनं ॥
सिर मुकुट कुंडल तिलक चारु उदारु अंग विभूषणं ।
आजानुभुज शर चाप धर संग्राम जित खर दूषणं ॥
इति वदति तुलसीदास शंकर शेष मुनि मन रंजनं ।
मम हृदयकंज निवास कुरु कामादि खल दलगंजनं ॥
मनु जाहिं राचेउ मिलिहि सो बरु सहज सुंदर साँवरो ।
करुना निधान सुजान सीलु सनेह जानत रावरो ॥
एहि भाँति गौरि असीस सुनि सिय सहित हियँ हरषीं अली ।
तुलसी भवानिहि पूजि पुनि पुनि मुदित मन मंदिर चली ॥
सो०-जानि गौरि अनुकूल सिय हिय हरषु न जाइ कहि ।
मंजुल मंगल मूल बाम अंग फरकन लगे ॥

## ॥ भजन शिव शंकर का ॥

मुंडन की माला सोहें ओड़े मृग छाला वो तो पीवे भंग प्याला भोला, के डम डम बाजे डमरुआ....२
ॐ शिव शंकर कैलाशी
आप हो घट-घट के बासी,
आप हो घट-घट के बासी के भोला रहते हो काशी ।

मस्तक ऊपर चन्द्र विराजे,
मस्तक ऊपर चन्द्र विराजे बाजे-बाजे रे डमरुआ ।
मुंडन की माला सोहें ओढ़े मृग छाला वो तो पीवे भंग प्याला
भोला, के डम डम बाजे डमरुआ....२
गोरा जी सेवा करती हैं जटा से गंगा बहती हैं ।
जटा से गंगा बहती हैं पाप वो सबके हरती हैं ।
पाप वो सबके हरती है जटा से गंगा बहती हैं ।
डुड़े नादियाँ पे असवारी बाजे बाजे रे पायलियाँ ।
मुंडन की माला सोवें ओढ़े मृग छाला वो तो पीवे भंग प्याला
भोला, के डम डम बाजे डमरुआ....२
ॐ शिव मंडल आया हैं कि चरणों में शीश नवाया हैं ।
चरणों में शीश नवाया हैं के भोले तेरा गुण गाया हैं ।
पार लगादे पार लगादे भोले हमारी तो नईया पार लगादे ।
मुंडन की माला सोहें ओढ़े मृग छाला वो तो पीवे भंग प्याला
भोला, के डम डम बाजे डमरुआ....२
(बोलो शंकर भगवान की जय)

**अग्निवासः**-जिस दिन हवन करना हो, उस दिन की तिथि और वार की संख्या जोड़कर एक और मिलावें, कुलयोग में ४ का भाग दे । शेष ० या ३ रहे तो अग्निवास पृथ्वी पर शुभ है । शेष १ रहे तो अग्निवास आकाश में प्राण हानि कारक तथा शेष २ रहे तो अग्निवास पाताल में धन हानिकारक है । तिथि गणना शुक्ल प्रतिपदा तथा वार की गणना रविवार से करनी चाहिए । इसके बाद ग्रह मुख आहुति विचार देखना चाहिए ॥

## ॥ ग्रह मुखे होमाहुति चक्रम् ॥

**सूर्य नक्षत्र सेः**- सूर्य ३ नेष्ट ॥ बुध ३ श्रेष्ठ ॥ शुक्र ३ श्रेष्ठ ॥ शनि ३ नेष्ट ॥ चन्द्र ३ श्रेष्ठ ॥ मंगल ३ नेष्ट ॥ गुरु ३ श्रेष्ठ ॥ राहु ३ नेष्ट ॥ केतु ३ नेष्ट ॥

## ✪✪ ॥ शिव वास ज्ञान चक्रम् ॥ ✪✪

**शिव वासः**-तिथि को दुगना करके ५ और जोड़ें । योग में ७ का भाग दें । शेष १ बचे तो कैलाश में सुख । २ बचे तो गौरी संन्निध में सुख सम्पदा । ३ वृषारूढ़ में अभीष्ट सिद्धि । ४ सभा में संतापकारक । ५ भोजन में पीड़ाकारक । ६ क्रीड़ा में कष्टकारक । ० श्मशान में मृत्यु ॥

**शिववास शुभतिथि चक्रम्ः**-शुक्लपक्षेः-२,५,६,७,९,१२,१३ तथा **कृष्णपक्षेः**-१,४,५,८,११,१२,३०

## ✩✩ ॥ श्री गणेशजी की आरती ॥ ✩✩

जयदेव जयदेव, जय मंगल मूरती, श्री राजन मूरती ।
दर्शन मात्रेमाय, सुमिरण मात्रे माय, कामना कुरता। जयदेव २ ।
१-सुख करता, दुःख हरता, वरता-विघ्नाची २, उर्वी कुर्वी रूपा देहरांची ॥ जयदेव-२
सर्वाङ्गि सिन्दूर, वट षन दुर्रराची-२, कंठे सोहे माल कंठे झलके माल मुक्ता बैहलाची, जयदेव-२।
२-हीरा रत्ना जडता बाला, सोहें तुझ गवरा-२ चंदा नाची बूटी कुमुकुम केसरा।
हीरा रत्ना जडता मुक्टा, सोहे तुझ गवरी कँवरा, रुण झुण थई-थई फूंदी चरणे घूंघरा, जयदेव-२।
३-पाया चा घुघरियाँ, रुण झुण वाजन्ता-२, तथथई-तथथई, नाचे गणपति-२ तुम ईश्वर पार्वती कौतुक ना कर्त्ता, जयदेव-२ ।
४-लम्बोदर पीताम्बर, फणी वणी वन्देना-२ शरले शुण्डे वक्रे, गण्डेत्रे नैयना, दास रामा चार, वटपाये सजना-२ संकट पावाहेणी निरहाणी रक्षाणी सुखरी वन्देना, जयदेव-२।
५-कनक प्रज्वलनी अंगे, उज्जवलनी आरती-२ विध्न विनायक कान्ता, द्वन्द्वे बलिहाची, भक्त्या चा तुम सांचा, तुम हो गणपति-२

तुम चा सुमिरण करता, विध्ने चा हरता जयदेव जयदेव, जय मंगल मूरती, श्री राजन मूरती ।

दर्शन मात्रेमाय, सुमिरण मात्रे माय, कामना कुरता । जयदेव २ । शुभम् ॥

## ॥ शतरुद्राभिषेक ॥

हरिः ॐ नमस्ते रुद्रमन्यवऽ उतोतऽइषवे नमः । बाहुभ्यामुतते नमः ॥१॥ यातेरुद्रशिवा तनूरघोरा पापकाशिनी । तया नस्तन्वाशं तमयागिरिशन्ताभिचा कशीहि ॥२॥ यामिषुङ्गिरिशन्त हस्तेबिभर्ष्यस्तवे ॥ शिवाङ्गिरित्रताङ्कुरुमाहि ठं सीः पुरुषञ्जगत् ॥३॥ शिवेनव्वचसात्वा गिरिशाच्छा व्वदामसि ॥ यथानः सर्व्वमिज्जगदयक्ष्म ठं सुमनाऽ असत् ॥४॥ अद्धयवो चदधिवक्ताप्प्रथमो दैव्योभिषक् ॥ अहीँश्च सर्व्वाञ्जम्भय न्त्सर्व्वाश्चयातु धान्योधराचीः परासुव ॥५॥ असौयस्ताम्रोऽ अरुणऽउतबभ्रुः सुमङ्गलः ॥ येचैन ठं रुद्राऽअभितोदिक्षुश्श्रिताः सहस्रशो व्वैषाथं हेडऽईमहे ॥६॥ असौयोव्वसर्प्पतिनीलग्ग्रीवो व्विलोहितः ॥ उतैनङ्गोपाऽ अदृश्श्रन्नदृश्श्रन्नुदहार्य्यः सदृष्टोमृडयातिनः ॥७॥ नमोस्तुनीलग्ग्रीवायसहस्राक्षायमीढुषे ॥ अथोयेऽ अस्यसत्त्वानो हन्तेभ्योकरन्नमः ॥८॥ प्रमुञ्चधन्वनस्त्व मुभयोरात्त्क्न्योंज्ज्याम् ॥ याश्चतेहस्तऽइषवः पराता भगवोव्वप ॥९॥ व्विज्ज्यन्धनुः कपर्दिनो व्विशल्योबाणवाँ २॥ ऽउत ॥ अनेशन्नस्ययाऽइषवऽ आभुरस्यनिषङ्गधिः ॥१०॥ याते हेतिर्म्मीढुष्टमहस्ते बभूवतेधनुः ॥ तयास्मान्विश्वतस्त्वमयक्ष्मया परिभुज ॥११॥ परितेधन्वनो हेतिरस्म्मान्वृणक्तुव्विश्वतः ॥ अथोयऽइषुधिस्तवारेऽ अस्म्मन्निधेहितम् ॥१२॥ अवतत्त्यधनुष्ट्व ठं सहस्राक्षशतेषुधे ॥ निशीर्यशल्यानाम्मुखाशिवोनः सुमनाभव ॥१३॥ नमस्तऽ आयुधायानाततायधृष्णवे ॥ उभाभ्यामुततेनमो बाहुभ्यान्तवधन्वने ॥१४॥ मानोमहान्तमुतमानोऽ अर्भकम्मानऽ उक्षन्तमुतमानऽ उक्षितम् ॥ मानोव्वधीः पितरम्मोतमातरम्मानः

प्प्रियास्तन्वोरुद्ररीरिष: ॥१५॥ ॐमानस्तोकेतनयेमानऽ आयुषिमानो गोषुमानोऽ अश्वेषुरीरिष:। मानोव्वीरान्न्रुद्रभामिनो व्वधीर्हविष्मन्त: सदमित्त्वा हवामहे ॥१६॥

नमोहिरण्यबाहवेसेनान्न्येदिशाञ्चपतयेनमोनमोव्वृक्षेब्भ्योहरिकेशेब्भ्य: पशूनाम्पतयेनमोनम: शष्प्पिञ्जरायत्त्विषीमतेपथीनाम्पतयेनमोनमो-हरिकेशायोपवीतिनेपुष्टानाम्पतयेनमोनमोबब्भ्लुशाय ॥१७॥

नमोबब्भ्लुशायव्याधिनेन्नानाम्पतयेनमोनमोभवस्यहेत्यैजग-ताम्पतयेनमोनमोरुद्रायाततायिनेक्षेत्राणाम्पतयेनमोनम: सूतायाहन्त्यैव्वनानाम्पतयेनमोनमोरोहिताय ॥१८॥

नमोरोहितायस्त्थपतयेव्वृक्षाणाम्पतयेनमोनमोभुवन्तयेव्वारिव-स्कृतायौषधीनाम्पतयेनमोनमोमन्त्रिणेव्वाणिजायकक्षाणाम्पतयेन-मोनमऽउच्चैर्ग्घोषायाक्रन्दयतेपत्तीनाम्पतयेनमोनम: कृत्स्नाय ॥१९॥

नम: कृत्स्नायतयाधावते सत्त्वानाम्पतये नमोनम: सहमा नायनिव्याधिनऽआव्याधिनीनाम्पतयेनमोनमोनिषङ्गिणेककुभा यस्तेनानाम्पतयेनमोनमोनिचेरवेपरिचरायारण्यानाम्पतयेनमोन मोव्वञ्चते॥२०॥नमोव्वञ्चतेपरिवञ्चतेस्त्तायूनाम्पतयेनमोनमोनिषङ्गिण ऽइषुधिमतेतस्कराणाम्पतयेनमोनम:सृकायिब्भ्योजिघाꣳसद्भ्योमु ष्णताम्पतयेनमोनमोसिमद्भ्योनक्तञ्चद्भ्योव्विकृन्तानाम्पतयेनम: ॥२१॥नमऽउष्णीषिणेगिरिचरायकुलुञ्चानाम्पत येनमोनमऽइषुमद्भ्यो धन्वायिब्भ्यश्चवोनमोनम ऽआतन्वानेब्भ्य:प्रतिदधानेब्भ्य श्चवोनमोनमऽआयच्छद्भ्यो-स्यद्भ्यश्चवोनमोनमोव्विसृजद्भ्य: ॥२२॥ नमोव्विसृजद्भ्योव्विद्ध्यद्भ्यश्चवोनमोनम:स्वपद्भ्यो जाग्ग्रद्भ्य- श्चवोनमोनम:शयानेब्भ्यऽआसीनेब्भ्यश्चवोनमोनमस्ति ष्ठद्भ्योधावद्भ्द्यश्चवोनमोनम: सभाब्भ्य: ॥२३॥ नम: सभाब्भ्य: सभापतिब्भ्यश्चवोनमोनमोश्वेब्भ्योश्वपतिब्भ्य श्चवोनमोनमऽ आव्याधिनीब्भ्योव्विविद्ध्यन्तीब्भ्यश्चवो नमोनमऽ उगणाब्भ्यस्तृꣳहतीब्भ्यश्चवोनमोनमोगणेब्भ्य: ॥२४॥

नमोगणेब्भ्योगणपतिब्भ्यश्चवोनमोनमोव्व्रातेब्भ्योव्व्रात पतिब्भ्यश्चवोनमोनमो गृत्सेब्भ्योगृत्सपतिब्भ्यश्चवो नमोनमोव्विरूपेब्भ्योव्विश्वरू–पेब्भ्यश्चवोनमोनमः ॥२५॥ नमः सेनाब्भ्य सेनानिब्भ्यश्चवोन मोनमोरथिब्भ्योऽ अरथेब्भ्यश्चवोनमोनमः क्षत्तृब्भ्यः सङ्ग्रहीतृ ब्भ्यश्चवो नमोनमो महद्भ्योऽअब्भर्भकेब्भ्यश्चवोनमः ॥२६॥ नमस्तक्षब्भ्योर थकारेब्भ्यश्चवो नमोनमः कुलालेब्भ्यः कर्म्मारेब्भ्यश्चवो नमोनमो निषादेब्भ्यः पुञ्जिष्टेब्भ्यश्चवो नमोनमः श्वनिब्भ्योमृगयुब्भ्य श्चवोनमोनमः श्वब्भ्यः– ॥२७॥ नमः श्वब्भ्यः श्वपतिब्भ्यश्चवो नमोनमो भवायचरुद्रायचनमः शर्वायचपशुपतयेचनमोनीलग्ग्रीवाय चशितिकण्ठायचनमः कपर्द्दिने ॥२८॥ नमः कपर्दिनेचव्व्यु प्तकेशायचनमः सहस्राक्षायचशतधन्वनेच ॥ नमोगिरिशाया यचशिपि विष्ट्टायचनमो मीढुष्टमायचेषुमतेचन मोह्रस्वाय ॥२९॥ नमोह्रस्वायचव्वा मनायचनमोबृहते चव्वर्षी से चनमोव्वृद्धायचस वृधेचनमोग्ग्रयायचप्प्रथमायचनमऽआशवे ॥३०॥ नमऽ आशवेचाजिरा यचनमः शीग्घ्र्यायचशीब्भ्या यचनमऽ ऊर्म्म्या यचावस्वन्न्या यचनमोनादेया यचद्वीप्यायच ॥३१॥ नमोज्ज्येष्ठायचकनिष्ठायचनमःपूर्व्वजायचापरजायचनमो मध्यमायचापगल्भायचनमो जघन्न्यायचबुध्न्नयायचनमः सोब्भ्याय ॥३२॥ नमः सोब्भ्यायचप्प्रतिसर्य्यायचनमोयाम्म्या यचक्षेम्म्या यचनमः श्लोकक्यायचावसान्न्यायचनमऽ उर्व्वर्ष्याय चखल्ल्यायचनमोव्वन्न्याय ॥३३॥ नमोव्वन्न्यायय चकक्ष्यायचनमः श्रवायच प्प्रतिश्श्रवायचनमऽ आशुषेणायचाशुरथायचनमः शूरायचावभेदिनेचनमोबिल्मिने ॥३४॥ मोबिल्मिने चकवचिनेचनमोव्वर्मिणेचव्वरूथिनेचनमः श्रुतायचश्रुत सेनायचनमोदुन्दुब्भ्यायचा हनन्न्यायचनमोधृष्णवे ॥३५॥ नमोधृष्णवे चप्रमृशा यचनमोनिषङ्गिणे चेषुधिमतेचनमस्तीक्ष्णे षवेचायुधिचनमः

स्वायुधायचसुधन्वनेच ॥३६॥ नमः स्रुत्यायचपत्थ्यायचनमः काटयायचनीप्यायचनमः कुल्यायचारस्यायचनमो नादेयायचव्वैशन्तायचनमः कूप्याय ॥३७॥
नमः कूप्यायचावट्यायचनमोव्वीद्ध्र्यायचा तप्यायचनमो मेग्घ्या चव्विद्युत्यायचनमोव्वर्ष्यायचावर्ष्यायचनमोव्वात्याय ॥३८॥ नमो व्वात्यायचरेष्म्यायचनमोव्वास्तव्यायचव्वास्तुपायचनमः । सोमायचरुद्रायचनमस्ताम्राय चारुणायचनमः शङ्गवे ॥३९॥ नमः शङ्गवे चपशुप तये चनमऽउग्ग्रायचभीमाय चनमोग्ग्रेवधा यचदूरेवधायचनमोहन्त्रेचहनीयसेनमोव्वृक्षेब्भ्योहरिकेशे ब्भ्योनमस्ताराय ॥४०॥ नमः शम्भवायचमयोभ वायचनमः शङ्करायचमयस्करायचनमः शिवायचशिव तरायच ॥४१॥ नमः पार्ष्यायचाव्वार्ष्यायचनमः प्रतरणायचोत्त रणायचनमस्तीर्त्थ्या यचकुल्ल्यायचनमः शष्प्यायच फेन्न्यायचनमः सिकत्त्याय ॥४२॥ नमः सिकत्त्यायचप्प्रवहष्या यचनमः किर्ठंशिलायचक्षणायचनमः कपर्द्दिनेचपुलस्तयेनमऽ इरिण्यायचप्प्रपत्थ्यायचनमोव्व्रज्ज्याय ॥४३॥ नमोव्व्रज्ज्यायच गोष्ठ्यायचनमस्तल्प्प्यायचगेह्ष्यायचन मोह्रदष्यायचनि वेष्ष्यायचनमः काट्ट्या यचगह्वरेष्ठायचनमः शुष्क्याय ॥४४॥ शुष्क्यायचहरित्यायचनमः पार्ठ्ठं सव्यायचरजस्यायचनमो लोप्प्यायचनमऽऊर्व्यायच सूर्व्यायचनमःपर्णाय ॥४५॥ नमः पर्ण्णायचपर्ण्णशदायचनमऽउद्दुर माणायचाभिघ्नतेचनमऽआखिदतेचप्प्रखिदतेचनमऽइषुकृद्भ्य वोनमोनमोवः किरिकेब्भ्योदेवानार्ठं हृदयेब्भ्योनमोव्वि चिन्वत्केब्भ्यो नमोव्विक्षिणत्केब्भ्योनमऽ आनिर्हतेब्भ्यः ॥४६॥ द्रापेऽ अन्धसस्पते दरिद्रनीललोहित । आसाम्प्रजानामेषाम्पशूनाम्मा भेर्म्मारोङ्मोचन किञ्चनाममत् ॥४७॥ इमारुद्रायतवसेकपर्द्दिने क्षयद्वीरा यप्प्रभरामहेमतीः । यथाशमसद्द्विपदेचतुष्पदेव्वि श्वम्पुष्टङ्ग्रामेऽ अस्मिन्ननातुरम् ॥४८॥ यातेरुद्रशिवातनूः शिवाविश्वा हाभेषजीशिवारुतस्यभेषजीतयानोमृडजीवसे॥४९॥

परिनोरुद्रस्यहे तिर्व्वणक्तुपरित्वेषस्यदुर्म्मतिरघायोः ।
अवस्त्थिराघवद्ध्यस्तनुष्वमीढुर्स्तो कायतनयायमृड ॥५०॥
मीढुष्टमशिवतमशिवोनः सुमनाभव । परमेव्वृक्षऽआयुधन्नि
धायकृत्तिँ व्वसानऽआचरपिनाकम्बिब्भ्रदागहि ॥ ५१॥
व्विकिरिद्धव्विलोहितनमस्तेऽअस्तुभगवः । यास्तेसहस्रर्ठंहेत
योन्न्यमस्म्मन्निवपन्तुता ॥ ५२॥ सहस्राणिसहस्रशोबाह्वोस्त
वहेतयः- । तासामी शानोभगवःपराचीनामुखाकृधि ॥ ५३॥
असङ्ख्यातासहस्राणियेरुद्राऽअधिभूम्म्याम् । तेषार्ठंसहस्रयो
जनेवधन्वानितन्मसि ॥५४॥ अस्म्मिन्महत्यर्णवेन्तरिक्षेभवा ऽअधि
। तेषार्ठं सहस्रयोजनेवधन्वानितन्मसि ॥५५॥ नीलग्ग्रीवाः
शितिकण्ठादिवर्ठंरुद्राऽउपश्रिताः । तेषार्ठं सहस्रयोजनेव
धन्वानितन्मसि ॥५६॥ नीलग्ग्रीवाः शितिकण्ठाः शर्वाऽअधः
क्षमाचराः । तेषार्ठं सहस्रयोजनेवधन्वानितन्मसि ॥५७॥
येवृक्षेषुशष्पिञ्जरानीलग्ग्रीवाव्विलोहिताः । तेषार्ठं
सहस्रयोजनेवधन्वानितन्मसि ॥५८॥ येभूतानामधिपतयोव्वि
शिखासः कपर्द्दिनः । तेषार्ठं सहस्रयोजनेवधन्वानितन्मसि ॥५९
॥ येपथाम्पथिरक्षयऽऐलवृदाऽआयुर्य्युधः । तेषार्ठं सहस्रयो
जनेवधन्वानितन्मसि ॥६०॥ येतीर्त्थानिप्प्रचरन्तिसृका
हस्तानिषङ्गिणः । तेषार्ठं सहस्रयोजनेवधन्वानितन्मसि ॥६१॥
येन्नेषुव्विविद्ध्यन्तिपात्रेषुपिबतोजनान् । तेषार्ठं
सहस्रयोजनेवधन्वानितन्मसि ॥६२॥ यऽएतावन्तश्चभूयार्ठंस
श्चदिशोरुद्राव्वितस्त्थिरे । तेषार्ठंसहस्रयोजनेवधन्वा नितन्मसि
॥६३॥ नमोस्तुरुद्रेब्भ्योयेदिवियेषाँव्वर्षमिषवः । तेब्भ्योदशप्प्राची
र्द्दशदक्षिणादशप्प्रतीचीर्द्दशोदीचीर्द्दशोर्द्ध्वाः । तेब्भ्योनमोऽ
अस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्मोयश्चनोद्वेष्टि तमेषाञ्जम्भे
दध्ध्मः ॥ ६४॥ नमोस्तुरुद्रेब्भ्योयेन्तरिक्षेये षाँव्वातऽ इषवः ।

तेब्भ्योदशप्प्राचीर्द्दशदक्षिणादशप्प्रती चीर्द्दशोदीचीर्द्द शोर्द्ध्वाः । तेब्भ्यो नमो ऽ अस्तु ते नो वन्तु ते नो मृडयन्तु ते यन्द्विष्मो य श्चनोद्वेष्टितमेषाञ्जम्भेदध्ध्मः ॥ ६५॥

नमो स्तुरुद्रेब्भ्योयेपृथिव्व्याँयेषामन्नमिषवः । तेब्भ्योदशप्प्राचीर्द्दश दक्षिणादशप्प्रतीचीर्द्दशोदीचीर्द्दशोर्द्ध्वाः । तेब्भ्योनमोऽ अस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्मोयश्चनोद्वे ष्टितमेषाञ्जम्भे दध्ध्मः ॥६६॥ नमस्ते रुद्रमन्न्यवऽ उतोतऽइषवे नमः। बाहुब्भ्यामुतते नमः ॥६७॥ यातेरुद्रशिवा तनूरघोरा पापकाशिनी। तया नस्तन्वाशं तमयागिरिशन्ताभिचा कशीहि ॥६८॥ यामिषुङ्गिरिशन्त हस्तेबिभर्ष्ष्यस्तवे ॥ शिवाङ्गिरित्रताङ्कुरुमाहि ठँ सीः पुरुषञ्जगत् ॥६९॥ शिवेनव्वचसात्वा गिरिशाच्छा व्वदामसि ॥ यथानः सर्व्वमिज्जगदयक्ष्म ठँ सुमनाऽ असत् ॥७०॥ अद्धयवो चदधिवक्ताप्प्रथमो दैव्योभिषक् ॥ अहीँश्च सर्व्वाञ्जम्भयन्त्सर्व्वाश्चयातु धान्योधराचीः परासुव ॥७१॥ असौयस्ताम्रोऽअरुणऽउतबब्भ्रुः सुमङ्गलः ॥ येचैन ठँ रुद्राऽअभितोदिक्षुश्श्रिताः सहस्रशो व्वैषाठँ हेडऽईमहे ॥७२॥ असौयोव्वसर्प्पतिनीलग्ग्रीवो व्विलोहितः ॥ उतैनङ्गोपाऽ अदृश्श्रन्नदृश्श्रन्नुदहार्य्यः सदृष्टोमृडयातिनः ॥७३॥ नमोस्तुनील ग्ग्रीवायसहस्राक्षायमीढुषे ॥ अथोयेऽअस्यसत्त्वानो हन्तेब्भ्योकरन्नमः ॥७४॥ प्रमुञ्चधन्वनस्त्वमुभयोरात्त्क्न्योर्ज्ज्याम् ॥ याश्चतेहस्तऽइषवः पराता भगवोव्वप ॥७५॥ व्विज्ज्यन्धनुः कपर्दिनो व्विशल्योबाणवाँ २॥ ऽउत ॥ अनेशन्नस्ययाऽइषवऽ आभुरस्यनिषङ्गधिः ॥७६॥ यातेहेतिर्म्मीढुष्टमहस्ते बभूवतेधनुः ॥ तयास्मान्विश्श्वतस्त्वमयक्ष्मया परिभुज ॥७७॥ परितेधन्वनो हेतिरस्म्मान्वृणक्तुव्विश्श्वतः ॥ अथोयऽइषुधिस्तवारेऽ अस्म्मन्निधेहितम् ॥७८॥ अवतत्त्यधनुष्ट्व ठँ सहस्राक्षशतेषुधे ॥ निशीर्य्यशल्यानाम्मुखाशिवोनः सुमनाभव ॥७९॥ नमस्तऽ आयुधायानातताय धृष्ष्णवे ॥ उभाब्भ्यामुततेनमो

बाहुभ्यान्तवधन्वने ॥८०॥ मानोमहान्तमुतमानोऽ अर्ब्भकम्मानऽउक्षन्तमुतमानऽ उक्षितम् ॥ मानोव्वधीः पितरम्मोतमातरम्मानः प्प्रियास्तन्न्वोरुद्ररीरिषः ॥८१॥ मानस्तोकेतनयेमानऽ आयुषिमानो गोषुमानोऽ अश्वेषुरीरिषः । मानोव्वीरान्रुद्रभामिनो व्वधीर्हविष्मन्तः सदमित्त्वा हवामहे ॥८२॥ एषतेरुद्रभागः सहस्वस्राम्बिकयातञ्जुषस्वस्वाहैषतेरुद्रभागऽ आषुस्तेपशुः ॥८३॥ अवरुद्रमदीमह्यवदेवन्त्र्यम्बकम् । यथानोव्वस्यसस्करद्यथानः श्रेयसस्करद्यथानोव्यवसाययात् ॥८४॥ नमस्तेहरसे शोचिषेनमस्तेऽअस्त्वर्च्चिषे । अन्न्याँस्तेऽ अस्मत्तपन्तुहेतयः पावकोऽअस्मब्भ्यर्ठंशिवोभव ॥८५॥ नमस्तेऽअस्तुव्विद्युतेनमस्तेस्तनयित्त्नवे । नमस्तेभगवन्नस्तुयतः स्वः समीहसे ॥८६॥ नतम्व्वि दाथयऽइमाजजानान्न्यद्युष्म्माकमन्तरम्बभूव । नीहारेणप्प्रावृताजल्प्याचासुतृपऽउक्थसश्चरन्ति ॥८७॥ विश्वकर्म्माह्यजनिष्टदेवऽ आदिद्गन्धर्वोऽअभवद्द्वितीयः तृतीयः पिताजनितौषधीनामपाङ्गर्ब्भँ व्यदधात्पुरुत्रा ॥८८॥ मीढुष्टमशिवतमशिवोनः सुमनाभव । परमेव्वृक्षऽआयुधन्निधायकृत्तिँ व्वसानऽआचरपिनाकम्बिब्भ्रदागहि ॥ ८९॥ व्विकिरिद्दव्विलोहितनमस्तेऽअस्तुभगवः । यास्तेसहस्रर्ठंहेतयोन्न्यमस्म्मन्निवपन्तुता ॥ ९०॥ सहस्राणिसहस्रशोबाह्वोस्तवहेतयः–। तासामी शानोभगवः पराचीनामुखाकृधि ॥ ९१॥ असङ्ख्यातासहस्राणियेरुद्राऽ अधिभूम्म्याम् । तेषार्ठं सहस्रयोजनेवधन्वानितन्मसि ॥९२॥ व्वयर्ठंसोमव्रतेतवमनस्तनूषुविब्भ्रतः । प्रजावन्तः सचेमहि ॥९३॥ एषतेरुद्रभागः सहस्वस्राम्बिकयातञ्जुषस्वस्वाहैषतेरुद्रभागऽ आषुस्तेपशुः ॥९४॥ अवरुद्रमदीमह्यवदेवन्त्र्यम्बकम् । यथानोव्वस्यसस्करद्यथानः श्रेयसस्करद्यथानो व्यवसाययात् ॥९५॥

भेषजमसिभेषजङ्गवेश्वायपुरुषायभेषजम् । सुखम्मेखायमेष्यै ॥९६॥ त्र्यम्बकँयजामहेसुगन्धिम्पुष्टिवर्द्धनम् । उर्व्वारुकमिवबन्धना न्मृत्योर्मुक्षीयमामृतात् ॥ त्र्यम्बकँयजामहेसुगन्धिम्पतिवेदनम् । उर्व्वारुकमिवबन्धनादितोमुक्षीयमामुतः ॥९७॥एतत्तेरुद्रावस न्तेनपरोमूजवतोतीहि । अवततधन्वापिनाकावसःकृत्तिवासाऽ अहिर्ठ सन्नः शिवोतीहि ॥९८॥ त्र्यायुषञ्जमदग्नेः कश्यपस्य त्र्यायुषम्। यद्देवेषुत्र्यायुषन्तन्नोऽ अस्तुत्र्यायुषम् ॥९९॥ शिवोनामासिस्वधितिस्तेपितानमस्तेऽअस्तुमामाहिर्ठं सीः ॥ निवर्त्तयाम्म्या युषेन्नाद्या यप्प्रजननायरायस्पोषायसुप्प्रजा स्त्वायसुवीर्य्याय ॥१००॥

**॥ शुभम् ॥**